ARTHAŚĀSTRA OF KAUṬALYA

Edited: T. GANAPATI SASTRI



Translated By

N.P. UNNI

THE ARTHAŚĀSTRA OF KAUṬALYA

With the commentary "SRĪMŪLA" of

Mahāmahopādhyāya

T. Gaṇapati Sāstrī

Part -III—8, 9, 10, 11, 12, 13, 14 & 15 Adhikaraṇas

English Translation of the text by

DR. N.P. UNNI

Ex-Vicechancellor

Sree Sankaracharya University of Sanskrit, Kalady, Kerala



NEW BHARATIYA BOOK CORPORATION

DELHI (INDIA)

Publisher :

New Bharatiya Book Corporation
5824, New Chandrawal (Near Shiva Mandir)
Jawahar Nagar, Delhi-110007
Phone : 23851294, 23850437
E-mail newbbc@indiatimes.com

First Edition : 2006

ISBN : 81-8315-034-9

Laser Type Setting :

Creative Graphics
Delhi

Printed at : **Jain Amar Printing Press**
Delhi-110007

कौटलीयम्

अर्थशास्त्रम्

महामहोपाध्यायेन

त० गणपतिशास्त्रिणा

विरचितया श्रीमूलाख्यया व्याख्यया

समुपेतं तेनैव संशोधितम्।

तृतीय सम्पुटः – अष्टमादिपञ्चदशान्तान्यधिकरणानि

मूलग्रन्थस्य आङ्गलानुवादकः

डॉ० एन्० पी० उण्णि

कुलपतिचरः

श्रीशङ्कराचार्यसंस्कृतसर्वकलाशाला, कालडी, केरलम्



न्यू भारतीय बुक कॉरपोरेशन

(दिल्ली) : : (भारत)

प्रकाशक :
न्यू भारतीय बुक कॉरपोरेशन
5824, न्यू चन्द्रावल, (निकट शिव मन्दिर)
जवाहर नगर, दिल्ली-110007
फोन : 23851294, 23850437
E-mail : newbbc@indiatimes.com

प्रथम संस्करण : 2006

ISBN : 81-8315-034-9

लेज़र टाईप सैटिंग :
क्रियेटिव ग्राफिक्स

मुद्रक :
जैन अमर प्रिंटिंग प्रैस
दिल्ली-7

CONTENTS

व्यसनाधिकारिकम्-अष्टमाधिकरणम्।

BOOK EIGHT : CONCERNING VICES AND CALAMITIES

दुर्गलम्भोपायः—त्रयोदशमधिकरणम्।

BOOK THIRTEEN : MEANS TO CAPTURE A FORTRESS

औपनिषदिकं—चतुर्दशमधिकरणम्।

BOOK FOURTEEN : SECRET MEANS

औपनिषदिकं–चतुर्दशमधिकरणम्।
BOOK FOURTEEN : SECRET MEANS

।। श्रीः ।।

श्रीगणेशाय नमः।

Salutation of Śrīgaṇeśa

कौटलीयम्

अर्थशास्त्रम्

महामहोपाध्यायगणपतिशास्त्रिरचित व्याख्योपेतम्।

(तृतीयः सम्पुटः।)

व्यसनाधिकारिकम्-अष्टममधिकरणम्।

BOOK EIGHT : CONCERNING VICES AND CALAMITIES

Chapter 117

127 प्रक० प्रकृतिव्यसनवर्गः।

Section 127 : Calamities of the Elements of Sovereignty

व्यसनयौगपद्ये सौकर्यतो यातव्यं रक्षितव्यं वेति व्यसनचिन्ता।

दैवं मानुषं वा प्रकृतिव्यसनमनयापनयाभ्यां सम्भवति।

षाड्गुण्याधिकरणे 'अरिसम्पद्युक्तः सामन्तः शत्रुर्व्यसनी यातव्यः' इति यातव्यस्य शत्रोर्व्यसनमङ्गमभिहितम्। 'अभ्युच्चीयमानो विगृह्णीयात्' इति च यातुर्विजिगीषोर्व्यसनाभावोऽङ्गमभिहितः। तस्यैतस्य व्यसनस्य कारणस्वरूपाश्रयादिकं वक्तुमिदमष्टममधिकरणमारभ्यते **व्यसनाधिकारिकं** नाम। व्यसनस्याधिकारः प्रस्तावोऽस्त्यस्मिन्निति च मत्वर्थीयोऽत्र ठन्।

अधिकरणं स्वयमेव संगमयति–व्यसनयौगपद्य इत्यादि। शत्रुर्यदा व्यसनी आत्मा चाव्यसनी, तदा शत्रूच्छेदसौकर्याद् यानं कर्तव्यमुक्तम्। तस्यास्य व्यसनस्य यौगपद्ये शत्रुविजिगीष्वोरुभयोरपि युगपत् सम्भवे सति, सौकर्यतो यातव्यं रक्षितव्यं वा यानं वा सौकर्यात् कर्तव्यं रक्षणं वा, इति एवं कोटिद्वयोपस्थानात्, व्यसनचिन्ता व्यसनस्य गौरवलाघवचिन्तनमन्यतरकोटिनिर्धारणार्थं, क्रियत इति, शेषः। तत्र

प्रकृतिव्यसनवर्ग इति प्रथमं सूत्रम्। प्रकृतयः स्वाम्यादयः सप्त तासां व्यसनवर्ग उच्यत इति सूत्रार्थः। व्यसनं सामान्यतो विभजंस्तत्कारणमाह–**दैवमिति**। दैवं जन्मान्तरीयकर्मजन्यं, मानुषं वा पुरुषबुद्धिजन्यं

In the event of calamities happening together the problem under consideration should be whether one should take an offensive or defensive attitude.

Calamities to people in general occur due to providence or due to wrong or bad policy on the part of the humans.

गुणप्रातिलोम्यमभावः प्रदोषः प्रसङ्गः पीडा वा व्यसनम्। व्यस्यत्येनं श्रेयस इति व्यसनम्।

स्वाम्यमात्यजनपददुर्गकोशदण्डमित्रव्यसनानां पूर्वं पूर्वं गरीय इत्याचार्याः।

वा, प्रकृतिव्यसनं स्वाम्यादिव्यसनम्, अनयापनयाभ्याम् अनयेनाशुभविधिना अपनयेन सन्ध्यादिगुणानामयथावदनुष्ठानेन च, सम्भवति। तत्रानयकारणकमग्न्युदकादिभयम् अपनयकारणकं परचक्राद्युपद्रवः।

व्यसनं विशेषतो विभजते **गुणप्रातिलोम्यमिति**। महाकुलीनत्वादिगुणानां स्वानुरूपकार्यानारम्भकत्वं सन्धिविग्रहादीनामसम्यगनुष्ठानं वा, अभावः महाकुलीनत्वादीनामसत्त्वं सन्धिविग्रहादीनामननुष्ठानं वा, प्रदोषः प्रकृष्टो दोषो गुणन्यक्कारेण प्रगल्भमानः कोपादिः, प्रसङ्गः स्त्रीमृगयाद्यत्यासक्तिः, पीडा वा परचक्रादिभव आबाधश्च, व्यसनम्। व्यसनसंज्ञान्वर्थतां दर्शयति–व्यस्यत्येनमित्यादि। एनं जनं, श्रेयसः अर्थप्राप्त्यनर्थपरिहाररूपात्, व्यस्यति विक्षिपति दूरीकरोति इत्यतो, व्यसनम्, उच्यत इति शेषः। एषामादिमौ प्रकारौ गुणप्रातिलोम्यगुणाभावौ वक्ष्यमाणायां राजराज्यव्यसनचिन्तायां, प्रदोषप्रसङ्गौ पुरुषव्यसनवर्गे, पीडा च बलमित्रव्यसनवर्गेऽनुसन्धेयाः। तदिदं यथोक्तरूपं प्रकृतिव्यसनं स्वाम्यादिसप्तप्रकृत्याश्रयत्वेन सप्तात्मकं स्थितम्।

अथ स्वामिव्यसनादीनां सप्तानां गौरवतारतम्यं यानादिकार्योपयुक्तमुपदेष्टुं सूत्रयति–**स्वाम्यमात्येत्यादि**। स्वामिव्यसनादीनां मित्रव्यसनान्तानां सप्तानां मध्ये, पूर्वं पूर्वं व्यसनं, गरीयः उत्तरोत्तरापेक्षया गुरुतरं भवति मित्रव्यसनाद् दण्डव्यसनं गरीयो दण्डव्यसनात् कोशव्यसनं कोशव्यसनाद् दुर्गव्यसनं दुर्गव्यसनाद् जनपदव्यसनं जनपदव्यसनादमात्यव्यसनम् अमात्यव्यसनाच्च स्वामिव्यसनमिति क्रमेण। इति आचार्याः पूर्वेऽर्थशास्त्रकाराः, आहुरिति शेषः। ते च वक्ष्यमाणभारद्वाजविशालाक्षाद्यतिरिक्ता ग्राह्याः, तद्विप्रतिपन्नानामंशानामनुपदमुद्भाव्य खण्डयिष्यमाणत्वात्। अत एव चाचार्यमतमिदमखण्डितत्वात् **कौटल्यस्येष्टं** द्रष्टव्यम्।

By the term Vyasana—calamity—is meant the course opposed to the six-fold policy, anger, indulgence (with women or gambling) or trouble from outsiders.

Preceptors hold that among the vices like or due to the distress of the king minister, people in villages, people in fort, treasury, army and ally—the seriousness of these consisting the earlier ones being serious than the later ones (in the order of enumeration).

नेति भारद्वाजः। स्वाम्यमात्यव्यसनयोरमात्यव्यसनं गरीय इति। मन्त्रो मन्त्रफलावाप्तिः कर्मानुष्ठानमायव्ययकर्म दण्डप्रणयनममित्राटवीप्रतिषेधो राज्यरक्षणं व्यसनप्रतीकारः कुमाररक्षणमभिषेकश्च कुमाराणामायत्तममात्येषु। तेषाम् अभावे तदभावः, छिन्नपक्षस्येवं राज्ञश्चेष्टानाशः। व्यसनेषु चासन्नाः परोपजापाः। वैगुण्ये च प्राणबाधः प्राणान्तिकचरत्वाद् राज्ञ इति।

नेति कौटल्यः। मन्त्रिपुरोहितादिभृत्यवर्गमध्यक्षप्रचारं पुरुषद्रव्यप्रकृतिव्यसनप्रतीकार-मेधनं च राजैव करोति। व्यसनिषु वामात्ये-

तत्र भारद्वाजस्य विप्रतिपत्तिमुपन्यस्यति-नेति भारद्वाज इत्यादि। स्वाम्यमात्येत्यादिनाचार्यनिर्दिष्टे गरीयस्त्वक्रमे स्वाम्यमात्ययोः पौर्वापर्यविपर्ययः कर्त्तव्य इत्यर्थः। एकदेशविप्रतिपत्त्या च शेषसम्प्रतिपत्तिर्भार-द्वाजस्य बोद्धव्या। एवं विशालाक्षादिविप्रतिपत्तिष्वपि द्रष्टव्यम्। अमात्यव्यसनगरीयस्त्वे भारद्वाजोक्तां युक्तिमाह-मन्त्र इति। मंत्रः कार्याकार्यविमर्शनं, मन्त्रफलावाप्तिः कार्यनिर्द्धारणं, कर्मानुष्ठानं निर्धारितकार्यकरणम्, आयव्ययकर्म हिरण्याद्युत्पादनमुत्पादितहिरण्यविनियोगश्च, दण्डप्रणयनं सैन्यसमुत्थापनयथास्थानस्थापनादि, अमित्राटवीप्रतिषेधः अमित्राणामाटविकानां च स्वदेशहिंसनाद् वारणं, राज्यरक्षणं निजप्रजायोगक्षेमवहनं, व्यसनप्रतीकारः दैवमानुषविपत्प्रतिक्रिया, कुमाररक्षणं कुमारेभ्यो नृपस्य रक्षणं, कुमाराणामभिषेकश्च यौवराज्ये नवार्जितराज्ये वाभिषेचनं च, अमात्येषु आयत्तम् अमात्यैकसाध्यम्। तेषाम् अमात्यानाम्, अभावे, तदभावः मन्त्राद्यभावः। ततश्च छिन्नपक्षस्येव छिन्नपक्षस्य पक्षिण इव, राज्ञः चेष्टानाशः प्रवृत्तिलोपः, स्यादिति शेषः। व्यसनेषु च अमात्यानां व्यसनसम्भवे च, आसन्नाः परोपजापाः शत्रूपजापानर्था सन्निहिताः स्युः। वैगुण्ये च पूज्यापूजनदूष्यादरणलक्षणे विगुणाचारे च, राज्ञः प्राणबाधः प्राणनाशः स्यात्, कुतः, प्राणान्तिकचरत्वात् राजप्राणनिकटचरत्वादमात्यानाम्। अतस्तद्वैगुण्यमन्तिकचरा अमात्याः परिहरेयुरित्यर्थः। इति शब्दो हेतौ। एवञ्च राज्ञः सर्वारम्भाणां जीवितस्य चामात्याधीनत्वादमात्या एव राजापेक्षया गरीयांस इति तद्यसनमेव गरीय इत्यभिप्रायः।

भारद्वाजोक्तं खण्डयति-नेति कौटल्य इत्यादि। मन्त्रिपुरोहितेत्यादिना स्वामीतीत्यन्तेन खण्डन-युक्तिप्रदर्शनम्। मन्त्रिपुरोहितादिभृत्यवर्गं

'Not so'—says Bhāradvāja—Between the distresses of the king and the minister the distress of the minister is more serious. Deliberations in council, attainment of the result of deliberation, accomplishment of works, business relating to income and expenditure, recruitment of the army, prevention of enemies and wild tribes entering the country, protection of the country, remedial measures to calamities, protection of the prince and the intallation of princes constitute the duties of the minister. In the absence of the minister all these are hampered; and like a bird deprived of its feathers the king loses his capacity for action. In calamities the intrigues of the enemies will pose danger. In the distress of the minister the very life of the king will be without security since the former always will be with him.

'Not so'—says Kauṭalya. It is the king who really attends to the functions of appointing ministers, priests and other servants including the superintendents of several departments and attends to the remedial measures against the troubles of his subjects and of his kingdom in addition to progressive measure. Further when the ministers are in distress it is he (the king) who removes the troubles of other people.

ष्वन्यानव्यसनिनः करोति। पूज्यपूजने दूष्यावग्रहे च नित्ययुक्तस्तिष्ठति। स्वामी च सम्पन्नः स्वसम्पद्भिः प्रकृतीः सम्पादयति। स्वयं यच्छीलस्तच्छीलाः प्रकृतयो भवन्ति, उत्थाने प्रमादे च तदायत्तत्वात्। तत्कूटस्थानीयो हि स्वामीति।

अमात्यजनपदव्यसनयोर्जनपदव्यसनं गरीय इति विशालाक्षः। कोशो दण्डः कुप्यं विष्टिर्वाहनं निचयाश्च जनपदादुत्तिष्ठन्ते। तेषामभावो जनपदाभावे। स्वाम्यमात्ययोश्चानन्तर इति।

मन्त्रिपुरोहितसेनापतिप्रभृतिं भृत्यवर्गम्, अध्यक्षप्रचारं सुवर्णाध्यक्षादिसर्वविधाध्यक्षव्यवस्थापनं, पुरुषद्रव्यप्रकृतिव्यसनप्रतीकारं मन्त्र्यादीनां पुरुषप्रकृतीनां द्रव्यप्रकृतीनां जनपददुर्गकोशानां च व्यसनप्रतिक्रियाम्, एधनं च पुरुषद्रव्यप्रकृतीनामेव वर्धनं च, राजैव करोति। एतावतामात्याभावे राजश्रेष्टानाशः प्रत्युक्तः। व्यसनिषु वा अमात्येषु जातेषु, अन्यान् अव्यसनिनः करोति अमात्यपदेषु स्थापयति। एतेन 'व्यसनेषु चासन्नाः परोपजापाः' इति यदुक्तं तत् प्रत्युक्तम्। पूज्यपूजने, दूष्यावग्रहे च दूष्याणां राज्योपघातिनां निग्रहणे च, नित्ययुक्तः नित्यावहितः, तिष्ठति। एतेन 'वैगुण्ये च प्राणबाध' इति समाहितम्। प्रकृतिगुणवत्तापि स्वामिगुणवत्तयैवाभिनिर्वर्तत इत्याह–**स्वामी चेत्यादि**। स च, सम्पन्नः गुणसमृद्धियुक्तः, स्वसम्पद्भिः स्वीयाभिर्गुणसमृद्धिभिः, प्रकृतीः, सम्पादयति सम्पन्नीः करोति। स्वामिनः सम्पन्नत्वे तद्यत्नं विना स्वयमेव प्रकृतयः सम्पन्ना भवन्तीत्यभिप्रायेणाह–**स्वयं यच्छील** इत्यादि। **उत्थाने प्रमादे च तदायत्तत्वादि**ति। प्रकृतयो हि स्वामिनमुत्तिष्ठमानमनूत्तिष्ठन्ति प्रमाद्यन्तं चानुप्रमाद्यन्तीत्यर्थः। तासां तदनुविधायित्वे कारणमाह–**तत्कूटस्थानीयो हि स्वामीतीति**। तासां कूटं मूलप्रकृतिः तत्स्थानीयो हि राजा, अर्थात् तद्विकृतिस्थानीयास्ताः।

विशालाक्षस्य विप्रतिपत्तिमाह–**अमात्यजनपदेत्यादि**। अमात्यव्यसनाज्जनपदव्यसनस्य गरीयस्त्वे तदीयां युक्तिमाह–**कोश** इत्यादि। कोशो हिरण्यादिसमुदयः, दण्डो मौलभृतादि सैन्यं, कुप्यं वस्त्रास्तरणादि, विष्टिः कर्मकरवर्गः, वाहनं गजाश्वादि, निचयाश्च धान्यस्नेहादिसमुदयाश्च, जनपदाद्, उत्तिष्ठन्ते उद्भवन्ति जनपदाभावे तेषां कोशादीनाम, अभावः। **स्वाभ्यमात्ययोश्चानन्तर इति**। ततश्च जनपदः स्वाम्यमात्ययोरनन्तरः

He is ever vigilant to honour the worthy and punish the wicked. A king who is prosperous pleases his people with his riches. According to the habits of the king the people also behave like that, since in progress as well as fall they are dependent on him. Hence the king is the pinnacle of the people.

Viśālākṣa holds the view that between the troubles of the minister and of the people, the troubles of the peple are more serious. Items like

finance, army, raw materials, free labour, transportation of things and collections of things are all secured from the people. In the absence of people, such things too will not be there. (Hence) people are next only to the king and the minister.

नेति कौटल्यः। अमात्यमूलाः सर्वारम्भाः जनपदस्य कर्मसिद्धयः स्वतः परतश्च योगक्षेमसाधनं व्यसनप्रतीकारः शून्यनिवेशोपचयौ दण्डकरानुग्रहश्चेति।

जनपददुर्गव्यसनयोर्दुर्गव्यसनम् इति पाराशराः। दुर्गे हि कोशदण्डोत्पत्तिरापदि स्थानं च जनपदस्य। शक्तिमत्तराश्च पौरा जानपदेभ्यो नित्याश्चापदि सहाया राज्ञः। जानपदास्त्वमित्रसाधारणा इति।

नेति कौटल्यः। जनपदमूला दुर्गकोशदण्डसेतुवार्तारम्भाः।

अव्यवहितः मध्यगतः, युक्त इति शेषः। तथा च 'स्वाम्यमात्यजनपददुर्गे'ति पठितं सूत्रं 'स्वामिजनपदामात्यदुर्गे'त्येवमेकदेशव्यत्ययेन पठितव्यमित्याशयः।

विशालाक्षमतं निराचष्टे–**नेति- कौटल्य** इति। तत्र युक्तिमाह–**अमात्यमूला** इति। जनपदस्य, **सर्वारम्भाः** सर्वे व्यापाराः, अमात्यमूलाः। के ते, **कर्मसिद्धयः** सेतुवार्तादिकर्मनिष्पत्तयः, **स्वतः परतश्च योगक्षेमसाधनं** स्वजनात् शत्रुजनाच्च योगक्षेमयोरलब्धलाभलब्धपालनयोर्निष्पादनं, **व्यसनप्रतीकारः** प्रकृतिव्यसनप्रतिक्रिया, **शून्यनिवेशोपचयौ** शून्यदेशे ग्रामादिनिवेशनं निवेशितपरिवर्धनं च, **दण्डकरानुग्रहश्च** दण्डस्य उत्तमसाहसादेः करस्य राजभागस्य च अनुग्रहः ग्रहणानुवृत्तिश्च, इति।

पाराशराणां विप्रतिपत्तिमाह–**जनपदेत्यादि**। जनपदव्यसनदुर्गव्यसनयोर्मध्ये दुर्गव्यसनं गुरुतरमिति पराशरशिष्याः।'स्वाम्यमात्यजनपददुर्गकोशे'त्येतत्'स्वाम्यमात्यदुर्गजनपदकोशे'ति किञ्चिद्व्यत्ययेन पठनीयमित्याशयः। तत्र युक्तिरुच्यते–**दुर्गे** हीति। दुर्गं स्थानीयं तस्मिन्, दुर्गाद्धीति कचित् पाठः। कोशदण्डोत्पत्तिः धनसमुदायबलोत्पत्तिः, आपदि स्थानं च जनपदस्य जानपदानां परचक्रभयादौ रक्षाभूमिश्च, पौराः जानपदेभ्यः, शक्तिमत्तराश्च अतिशयेन शक्तिमन्तश्च, नित्याश्च सर्वकालानुवर्तिनश्च, आपदि सहायाः, राज्ञः, सुलभा इति शेषः। नैवं जानपदा इत्याह–जानपदास्त्विति। ते तु, अमित्रसाधारणाः पराक्रम्यागतं शत्रुमप्यनुवर्तन्त इत्यर्थः। इति।

पाराशरमतं प्रत्याचष्टे–**नेति कौटल्य** इति। तत्र युक्तिमाह–**जनपदेत्यादि**। **दुर्गकोशदण्डसेतुवार्तारम्भाः** दुर्गस्य स्थानीयादेः कोशस्य

'Not so'—says Kauṭalya. All activities such as accomplishment of the works, security of persons, remedies against calamities, colonization of wild tracts, recruitment of the army, collections of taxes and bestowing of favours proceed from the minister.

Parāśara holds that between the distress of the people and distress due to bad fortification, the latter is of more serious consequence. It is in the fort that the treasury and the army are secured for the protection of people in danger. Here the people are more strong than the one in the

country side and as such a permanent strength for the king in times of danger. The people of the country side are common both to the king and the enemy.

'Not so'—says Kauṭalya. Forts, finance and the army depend upon the people as also buildings (forts) trade, agriculture etc.

शौर्यं स्थैर्यं दाक्ष्यं बाहुल्यं च जानपदेषु। पर्वतान्तर्द्वीपाश्च दुर्गा नाध्युष्यन्ते जनपदाभावात्। कर्षकप्राये तु दुर्गव्यसनमायुधीयप्राये तु जनपदे जनपदव्यसनमिति।

दुर्गकोशव्यसनयोः कोशव्यसनम् इति पिशुनः। कोशमूलो हि दुर्गसंस्कारो दुर्गरक्षणं च। दुर्गः कोशादुपजाप्यः परेषाम्। जनपदमित्रामित्रनिग्रहो देशान्तरितानामुत्साहनं दण्डबल-व्यवहारः।

धनसमुदायस्य दण्डस्य सैन्यस्य सेतोः पुष्पफलवाटादेः वार्तायाः कृषिपशुपाल्यवणिज्यानां च आरम्भाः, जनपदमूलाः जनपदयोनयः। न केवलं दुर्गवत् कोशदण्डयोः, किन्तु कोशदण्डयोनित्वेन त्वयोक्तस्य दुर्गस्यापि जनपदो योनिरिति स एव गरीयानित्यभिप्रायः। यत् पौराणां शक्तिमत्तरत्वमुक्तं तत्रोत्तरमाह–**शौर्यमित्यादि**। शौर्यं पराक्रमवत्त्वं, स्थैर्यम् अभेद्याध्यवसायत्वं, दाक्ष्यं शीघ्रक्रियत्वं, बाहुल्यं च बहुत्वं च, जानपदेषु। पौरेषु शौर्यादिसत्त्वेऽपि बाहुल्यं नास्तीत्यभिप्रायः। व्यतिरेकान्तरमाह–**पर्वतान्तर्द्वीपाश्चेति**। पर्वतरूपा अन्तरीपरूपा द्वीपरूपाश्च, दुर्गाः, नाध्युष्यन्ते, कुतः, जनपदाभावात् जनवासयोग्यस्थानविरहात्। जनपदस्तु दुर्गरहितोऽप्यध्युष्यत इत्यार्थम्। एवञ्च दुर्गाणां जनपदनैरपेक्ष्येण वासयोग्यतैव नास्ति, जनपदस्य तु दुर्गनैरपेक्ष्येण वासयोग्यतास्तीति दुर्गाज्जनपद एव गरीयानित्याशयः। विशेषान्तरमाह–**कर्षकप्राये त्वित्यादि**। अल्पायुधीये कृषीवलबहुले देशे, दुर्गव्यसनं दुर्गविरहनिमित्ता पीडा जायते। तच्च आयुधीयबहुले जनपदे आयुधीयैरेव सुखेन परिहर्तुं शक्यं, जनपदव्यसनं तु तैरप्यपरिहार्यमिति तदेव गरीय इत्यभिप्रायः।

नारदमतमुपन्यस्यति–**दुर्गकोशव्यसनयोरित्यादि**। दुर्गव्यसनकोशव्यसनयोर्मध्ये कोशव्यसनं गुरुतरमिति पिशुनो नारदो मन्यते। 'स्वाम्यमात्यजनपददुर्गकोशदण्डे'त्येतत् 'स्वाम्यमात्यजनपदकोश-दुर्गदण्डे'त्येवं व्यत्ययेन पठनीयमित्याशयः। तत्र युक्तिमाह–**कोशमूलो हीत्यादि**। धनसञ्चयनिर्वर्त्यं हि स्थानीयादिसंस्करणं तद्रक्षणं चेत्यर्थः। **दुर्ग इति**। परेषां दुर्गः परदुर्गस्थो जनः क्रुद्धलुब्धभीतादिः, कोशाद् धनदानेनैव, उपजाप्यः परेभ्यो भेदनीयः। जनपदमित्रामित्रनिग्रहः जनपदस्य मित्रस्यामित्रस्य च निग्रहः, देशान्तरितानां देशव्यवहितानाम् उत्साहनं साहाय्यकरणायोद्योजनं, दण्डबलव्यवहारः दण्डबलस्य सैन्यबलस्य दानग्रहणलक्षणो व्यव-

It is in the people of the country that qualities like bravery, resoluteness, dexterity and abundance are met with. People do not generally inhabit in forts on the mountains and islands for want of lands. In regions occupied by cultivations troubles due to the absence of fortification arise while the regions occupied mostly by war-like people there is the scope for troubles.

Between the troubles of forts and of the treasury the one relating to treasury is serious, observes Piśuna (Nārada). For it is based on the

resources of the treasury that the renovation and protection of the fort are made. Further there could be intrigues relating to forts rather than treasury from enemies. By means of wealth one could keep under control the people, friends and enemies, besides encouragaing and establishing the army and its operations.

कोशमादाय च व्यसने शक्यमपयातुं न दुर्गम् इति।

नेति कौटल्यः। दुर्गार्पणः कोशो दण्डस्तूष्णींयुद्धं स्वपक्षनिग्रहो दण्डबलव्यवहारः आसारप्रतिग्रहः परचक्राटवीप्रतिषेधश्च। दुर्गाभावे च कोशः परेषाम्। दृश्यते हि दुर्गवतामनुच्छित्तिरिति।

कोशदण्डव्यसनयोर्दण्डव्यसनम् इति कौणपदन्तः। दण्डमूलो हि मित्रामित्रनिग्रहः परदण्डोत्साहनं स्वदण्डप्रतिग्रहश्च। दण्डाभावे च ध्रुवः कोशविनाशः। कोशाभावे च शक्यः कुप्येन भूम्या परभूमिस्वयंग्रहेण वा दण्डः पिण्डयितुम्। दण्डवता च कोशः। स्वामिनश्चा-सन्नवृत्तित्वादमात्यसधर्मा दण्ड इति।

हारश्च, कोशादिति वर्तते। भवतीति शेषः। शत्र्वाक्रमणादिव्यसने दुर्गादपसरता कोशो हस्ते कर्तुं शक्यो न दुर्गमित्येवं विशेषान्तरमाह–कोशमादाय चेत्यादि।

नारदमतं निराकरोति–नेति कौटल्य इति। दुर्गार्पण इत्यादिना दुर्गस्य कोशव्यावृत्तगुणकीर्तनम्। दुर्गेणार्प्यत इति दुर्गार्पणो दुर्गाधीन इत्यर्थः। कः, कोशः, दण्डः सैन्यं, तूष्णींयुद्धं तीक्ष्णादिभिर्गूढवधः, स्वपक्षनिग्रहः स्वपक्षसम्बन्धिदूष्यामित्रादिनिग्रहणं, दण्डबलव्यवहारः सैन्यबलदानग्रहणव्यवहारः, आसारप्रतिग्रहः सुहृद्बलस्वीकारः, परचक्राटवीप्रतिषेधश्च शत्रुसैन्यस्याटविकस्य चाक्रमणान्निवारणं च। कोशस्य रक्षापि दुर्गाधीनैवेत्याह–दुर्गाभावे चेति। दुर्गरक्षाभावे, कोशः, परेषां शत्रुसम्बन्धी भवतीत्यर्थः। किञ्च दुर्गवन्तः कदाप्यनुच्छेद्याः शत्रूणामित्याह–दृश्यते हीत्यादि।

भीष्मस्य मतमाह–कोशदण्डव्यवसनयोरित्यादि। 'स्वाम्यमात्यजनपददुर्गकोशदण्डमित्रे'त्येतत् 'स्वाम्यमात्यजनपददुर्गदण्डकोशमित्रे'ति व्यत्ययेन पठनीयमित्याशयः। तत्र युक्तिरुच्यते–दण्डमूलो हीत्यादि। मित्रामित्रनिग्रहः मित्रस्यामित्रस्य च दमनं, परदण्डोत्साहनं परदण्डस्य स्वोपकारार्थमागतस्य उत्साहनं, स्वदण्डप्रतिग्रहश्च स्वदण्डस्य शत्रुबलाभियोगितया स्वीकारश्च, दण्डमूलः दण्डभयनिमित्तः। दण्डाभावे च, ध्रुवः निश्चितः, कोशविनाशः। कोशाभावे तु दण्डविनाशो न भवतीत्याह–कोशाभावे च हिरण्यविरहेण तद्दानाभावेऽपीत्यर्थः। कुप्येन वस्त्रादिदानेन, भूम्या भूमि-

Further it is possible to remove the contents of the treasury in times of danger, but not the fort.

'Not so'—says Kauṭalya. It is in the fort that the treasury and army are kept and it is from these that secret war, control over one's partisans, the upkeep of the army, help from the ally is received and driving out of enemy and wild tribes are made. In the absence of the fort the treasury

virtually belongs to the enemy. Further it is seen that those possessing a fort is beyond destruction.

According to Kauṇapadanta between the distress due to the want of money and an inefficient army that which is due to the inefficient army is serious. Control of friends and enemies, winning over the army of an enemy and administration of the country are dependent upon the army. In the absence of an army the destruction of the treasury is certain. But the lack of finance can be made up by procuring raw materials of the land or by seizing the territory of an enemy by force. With the army finance could be secured. When the army is at hand it could very well perform the functions of a minister.

नेति कौटल्यः। कोशमूलो हि दण्डः। कोशाभावे दण्डः परं गच्छति, स्वामिनं वा हन्ति। सर्वाभियोगकरश्च कोशो धर्मकामहेतुः। देशकालकार्यवशेन तु कोशदण्डयोरन्यतरः प्रमाणीभवति। लम्भपालनो हि दण्डः कोशस्य। कोशः कोशस्य दण्डस्य च भवति। सर्वद्रव्यप्रयोजकत्वात् कोशव्यसनं गरीय इति।

दण्डमित्रव्यसनयोर्मित्रव्यसनम् इति वातव्याधिः। मित्र-

दानेन, परभूमिस्वयंग्रहेण वा शत्रोरभियुक्तस्य देशे 'येन यत् स्वयं गृह्यते तत् तदीयं धनमि'ति संवित्कलनया वा, दण्डः पिण्डयितुं संग्रहीतुं, शक्यः। पिण्डयितुं शक्य इति सम्बध्यते। दण्डः स्वामिन आसन्नवर्तनेन सर्वकार्यनिर्वाहकत्वादमात्यस्थानीय इत्याह-**स्वामिनश्चासन्ने**त्यादि।

भीष्ममतं निराकरोति-**नेति कौटल्य** इत्यादि। युक्तिमाह-कोशमूलो हि दण्ड इति। कोशसंग्राह्य एव दण्डो नोपायान्तरसंग्राह्यः। कोशाभाव इति। तद्विरहे, दण्डः परं गच्छति संगृहीतमपि दण्डं परः कोशदानेन स्वायत्तं करोतीत्यर्थः। स्वामिनं वा हन्ति अर्थात् कोशालाभकुपितः। सर्वाभियोगकरश्चेति। सर्वसामन्तविषयाभियोगनिर्वाहकश्च, सर्वाभियोगतारक इति पाठे सर्वेषां सामन्तानामभियोगाद् विरोधात् तारको रक्षक इत्यर्थः, कोशः, धर्मकामहेतुः। यदुक्तं दण्डस्य प्राधान्यं पूर्वपक्षिणा तद् देशकालकार्यानुसारात् कोशसाधारणमङ्गीकरोति-देशकालकार्यवशेन त्वित्यादि। देशवशेन कालवशेन कार्यवशेन च कदाचित् कोशः कार्यसाधको भवति कदाचिद् दण्ड इत्यर्थः। एवं स्थितेऽपि कोशस्य दण्डाद् व्यतिरेकमाह-लम्भपालनो हीति। दण्डः, कोशस्य लम्भपालनः लाभरक्षकः अर्थाल्लब्धकोशरक्षकः। कोशः, कोशस्य दण्डस्य च, भवति अर्थात् पालनः। एकदेशानुवृत्तिर्वा पालन इति। एतावता सिद्धमाह-सर्वद्रव्यप्रयोजकत्वादिति। सर्वद्रव्येषु सर्वासु द्रव्यप्रकृतिषु प्रयोजकत्वात् कार्यकारित्वात्, कोशव्यसनं, गरीयः। इति।

अथोद्धवमतं सप्तममाह-दण्डमित्रव्यसनयोरित्यादि। 'स्वाम्यमात्यजनपददुर्गकोशदण्डमित्र-व्यसनानामि'त्येतत्। 'स्वाम्यमात्यजनपददुर्गकोशमित्रदण्डव्यसनानामि'तिकिञ्चद् व्यत्ययेन पठनीयमित्यर्थः। तत्र युक्ति-

'Not so'—says Kauṭalya. The army is dependent on finance. In the absence of the finance the army goes to the side of the enemy and may kill the king himself. But finance is the source that helps one to perform

virtuous deeds and to enjoy all pleasures. According to the change in place, time and policy either finance or army becomes more useful. Sometimes army is required to amass wealth, and wealth is the means of securing both treasury and army. Since all activities are dependent on finance, troubles relating to finance are more serious.

Vātavyādhi maintains that of the distress of the army and of an ally, the distress of an ally is more serous.

मभृतं व्यवहितं च कर्म करोति, पार्ष्णिग्राहमासारममित्रमाटविकं च प्रतिकरोति, कोशदण्डभूमिभिश्चोपकरोति व्यसनावस्थायोगमिति।

नेति कौटल्यः। दण्डवतो मित्रं मित्रभावे तिष्ठत्यमित्रो वा मित्रभावे। दण्डमित्रयोस्तु साधारणे कार्ये सारतः स्वयुद्धदेशकाललाभाद् विशेषः। शीघ्राभियाने त्वमित्राटविकाभ्यन्तरकोपे च न मित्रं विद्यते। व्यसनयौगपद्ये परवृद्धौ च मित्रमर्थयुक्तौ तिष्ठति।

प्रकृतिव्यसनसम्प्रधारणमुक्तमिति।

प्रदर्शनं–मित्रमित्यादिना। मित्रम्, अभृतम् अदत्तवेतनं, व्यवहितं च आत्मानवहितं च सत्, कर्म करोति। दण्डस्तु भृतश्च समक्षितश्च कर्म करोतीत्यार्थम्। पार्ष्णिग्राहमित्यादि। पृष्ठशत्रुम्, आसारं पार्ष्णिग्राहमित्रम्, अमित्रम्, आटविकं च, प्रतिकरोति वारयति। कोशदण्डभूमिभिश्च कोशादिदानेन च, उपकरोति। कथम्भूतं सत्, व्यसनावस्थायोगं व्यसनावस्थायाम् आपद्दशायां योग आत्मना सह संगतिर्यस्य तत् तथाभूतं सत्। इति।

तदपि मतं प्रत्याचष्टे–नेति कौटल्य इति। तत्र युक्तिमाह–दण्डवत् इत्यादि। मित्रं वा अमित्रो वा दण्डवतो नृपस्य भवति, दण्डाभावे मित्रामित्रव्यवहार एव नास्तीत्यर्थः। दण्डमित्रयोस्त्वित्वादि। दण्डमित्रयोरुभयोः कार्यसाधकत्वे बलतः समाने स्वानुगुणयुद्धभूमिकाललाभानुसारेणान्यतरप्रमाणीकरणलक्षणो विशेषो भवतीत्यर्थः। एवं सति दण्डस्य मित्राद् व्यतिरेकमाह–शीघ्राभियाने त्विति। शत्रुमुद्दिश्याभियाने शीघ्रमनुष्ठातव्ये, अमित्राटविकाभ्यन्तरकोपे च अमित्राणाम् आटविकानाम् आभ्यन्तराणाम् अभ्यन्तरगतानां दूष्यादीनां च कोपे विकारे च सद्यः शंमयितव्ये समुपस्थिते, मित्रं न विद्यते दूरस्थत्वादुपकारक्षमं न भवति। दण्डस्तु सन्निहितत्वादुपकारक्षमो भवतीत्याशयः। व्यसनयौगपद्ये शत्रुविजिगीष्वोर्युगपदापत्सम्भवे, परवृद्धौ च विजिगीष्वपेक्षया शत्रोर्वृद्धियुक्तत्वे च, मित्रम्, अर्थयुक्तौ तिष्ठति अर्थलाभमेवात्मनो गणयति, परादधिकमर्थं गृहीत्वा तत्पक्षं प्रविशतीत्यर्थः। एवञ्च सर्वकालोपकारकतया दण्डस्य मित्राद् गरीयस्त्वसिद्धेर्दण्डव्यसनमेव मित्रव्यसनाद् गुरुतरमिति सिद्धम्।

प्रकृतीत्यादि। प्रकृतिव्यसनानां परस्परापेक्षगौरवलाघवनिर्धारणमित्थं व्याख्यातम्।

An ally not maitained by money and located far off is of service since he drives away not only the rear enemy and the friends of the rear-enemy but also the frontal enemy and wild tribes besides helping his friends with money, army and lands on occasions of distress.

'Not so'—says Kauṭalya. The ally of a king with a powerful army assumes friendly attitude as also his enemy. When there is a task which

could be accomplished by either the army or the ally the preference to the army or ally should depend upon the advantages that one could secure in matters of appropriate place and time for war and the expected benefit.

But in times of distress due to the sudden attack of an enemy, a wild tribe or local rebels, no friend can be trusted. When calamities occur all on a sudden and when the enemy has grown strong a friend would maintain his friendship only as long as he could derive financial benefit.

Thus the comparative seriousness with regard to calamities of various elements have been dealt with.

प्रकृत्यवयवानां तु व्यसनस्य विशेषतः।
बहुभावोऽनुरागो वा सारो वा कार्यसाधकः।।
द्वयोस्तु व्यसने तुल्ये विशेषो गुणतः क्षयात्।
शेषप्रकृतिसाद्गुण्यं यदि स्यान्नाभिधेयकम्।।

योऽयं स्वाम्यादिप्रकृतिविशेषसप्तकसम्बन्धिनां व्यसनानां परस्परगुरुलघुभावः यानादिकार्योपयोगी कथितः, तस्य क्वचिदप्रयोजकत्वमाह–प्रकृत्यवयवानां त्विति। प्रकृतीनां स्वाम्यादीनाम् अवयवाः यथा–स्वामिनो राजयुवराजादयः अमात्यस्य मन्त्रिमन्त्रपरिषदादयः जनपदस्य कर्षकायुधीयादयः दुर्गस्य धान्वनवनादयः कोशस्य रत्नसारफल्वादयः दण्डस्य मौलभृतादयः मित्रस्य सहजकृत्रिमादयः इत्येतेषां, व्यसनस्य, विशेषतः इतरापेक्षया गरीयस्त्वरूपे विशेषे विद्यमानेऽपि, बहुभावः जनादिबहुत्वम्, अनुरागः स्वामिभक्तिः, सारो वा प्रशस्तगुणयोगो वा, कार्यसाधकः यानादिकार्यसिद्धिकरः। तद्यथा–दुर्गव्यसनवति शत्रौ दुर्गव्यसनाद् गुरुतरं जनपदव्यसनं प्राप्तोऽपि विजिगीषुर्जनपदावयवानां बहुभावानुरागादिसत्त्वे दुर्गावयवानां च तदसत्त्वे यानादिकमनुतिष्ठेत्, तच्च सिद्धिकरं स्यादिति।।

इदं शत्रुविजिगीष्वोर्व्यसनैक्ये उक्तम्। व्यसनतुल्यतायां त्वाह–द्वयोस्त्विति। शत्रुविजिगीष्वोरुभयोः, व्यसने तुल्ये, गुणतः एकत्र बहुभावानुरागादिगुणसद्भावात्, क्षयात् अन्यत्र तथाविधगुणविरहाच्च, विशेषः यानानुष्ठानलक्षणः, अध्यवसेय इति शेषः। तद्यथा–शत्रुविजिगीषू द्वावपि जनपदव्यसनवन्तौ। तत्र विजिगीषोर्जनपदावयवानां बहुभावानुरागादिसत्त्वे शत्रोर्जनपदावयवानां तदभावे च विजिगीषुर्यानमनुतिष्ठेत् तच्च कार्यसिद्धिकरं स्यादेवेत्यभिप्रायः। यथोक्तबहुभावानुरागादिगुणसत्त्वासत्त्वनिमित्तश्चायं विशेषः किं सर्वत्रैव भवति, नेत्याह–शेषेत्यादि। शेषप्रकृतिसाद्गुण्यं शेषाणां यत्प्रकृतिविषयं व्यसनं शत्रुविजिगीष्वोस्तुल्यं तदतिरिक्तानां प्रकृतीनां–जनपदव्यसने तुल्ये तदतिरिक्तानां स्वाम्यमात्यादिप्रकृतिनां–साद्गुण्यं 'जानपदोऽभिजातः' इत्यादिगुणसमृद्धत्वरूपम्, अभिधेयकग् अभिधानविषयभूतं पूर्वोक्तमित्यर्थः, न स्याद् यदि अर्थाच्छत्रोर्न भवेच्चेत्। तदैव स विशेष इत्यर्थः। परस्य शेषप्रकृतिसाद्गुण्ययोगे तु बहुभावानुरागादि-सद्भावोऽपि विजिगीषोरप्रयोजक इत्यभिप्रायः।।

When a section of one of the elements of sovereignty is in distress, the extent, the affection and strength of the serviceable section could accomplish a work.

When any two elements of sovereignty are equally under troubles, they should be distinguished based on their progressive or declining tendencey provided that the fair conditions of the rest of the elements needs no explanation.

शेषप्रकृतिनाशस्तु यत्रैकव्यसनाद् भवेत्।
व्यसनं तद् गरीयः स्यात् प्रधानस्येतरस्य वा।।

।। इति कौटलीयार्थशास्त्रे व्यसनाधिकारिकेऽष्टमाधिकरणे
प्रथमोऽध्यायः प्रकृतिव्यसनवर्गः
आदितः सप्तदशशततमः।।

यत्रैकप्रकृतिविषयं व्यसनं शेषप्रकृतिविनाशहेतुः स्यात्, तत्र तद् व्यसनं प्रधानप्रकृतिसम्बद्धं वा भवतु अप्रधानप्रकृतिसम्बद्धं वा, सर्वथा तद् गुरुतरमेवेत्याह–शेषप्रकृतिनाशस्त्वित्यादि।।

।। इति कौटलीयार्थशास्त्रे व्यसनाधिकारिकेऽष्टमाधिकरणे
प्रथमोऽध्यायः प्रकृतिव्यसनवर्गः
आदितः सप्तदशशततमः।

When the distress of a single element tends to destroy the rest of the elements, whether they relate to the main or any other element are verily serious.

Thus the one hundred and seventeenth chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the first chapter of the eighth Adhikaraṇa dealing with the section 'Calamities of the elements of sovereignty'.

Chapter 118

128. प्रक० राजराज्ययोर्व्यसनचिन्ता।

Section 128 : Troubles of the King and of his Kingdom

राजा राज्यमिति प्रकृतिसंक्षेपः।

राज्ञोऽभ्यन्तरो बाह्यो वा कोप इति। अहिभयादभ्यन्तरः कोपो बाह्यकोपात् पापीयान्। अन्तरमात्यकोपश्चान्तःकोपात्। तस्मात् कोशदण्डशक्तिमात्मसंस्थां कुर्वीत।

द्वैराज्यवैराज्ययोः। द्वैराज्यमन्योन्यपक्षद्वेषानुरागाभ्यां परस्पर-

राजराज्ययोर्व्यसनचिन्ता इति सूत्रम्। राजा अभिषिक्तः स्वामी विजिगीषुमित्राद्यवस्थः राज्यम् अमात्यादिप्रकृतिपञ्चकं तयोः व्यसनचिन्ता व्यसनानां गुरुलघुभावसम्प्रधारणा क्रियत इति सूत्रार्थः। स्वाम्यादिप्रकृतीर्द्विंश उपादाय तद्व्यसनानां परस्परगुरुलघुभावः पूर्वप्रकरणे चिन्तितः, इह तु स्वामी एको राशिः शेषप्रकृतिसमुदायोऽपर इति द्वैराश्येन गृहीत्वा तद्व्यसनावान्तरभेदानां स विचार्यते।

तदेतदभिसन्धायाह–राजेति। प्रकृतिसंक्षेपः प्रकृतीनां स्वाम्यादीनां सप्तानां संक्षेपः समष्टिः, राजा राज्यमिति, द्वैराश्येन विभज्यत इति शेषः। तत्र राजा स्वामी विजिगीषुमित्रोभयरूपः राज्यम् अमात्यादिद्रव्यप्रकृतिपञ्चकम्।

तत्र राजव्यसनहेतुभूतयोः राज्यव्यसनभेदयोर्गुरुलघुभावं चिन्तयति–राज्ञ इत्यादि। राजानं प्रति राज्यस्य आभ्यन्तरो बाह्य इति द्वौ कोपौ। तत्राद्योऽमात्यादिकोपो द्वितीयोऽरिकोपः। तयोर्मध्ये कतरो गुरुतर इति चिन्त्यत इत्यर्थः। निर्धारयति–अहिभयादिति। अभ्यन्तरकोपो बाह्यकोपात् पापीयान् अतिशयेनानर्थावहः, कुतः, अहिभयात् आसन्नसर्पभयसधर्मत्वात्। अभ्यन्तरकोपेऽपि द्विरूप आन्तरामात्यकोपो बाह्यामात्यकोप इति, तत्राद्योऽन्यस्मादन्तःकोपात् पापीयानित्यर्थः। तस्मात् उक्तकोपद्वयपापीयस्त्वाद्धेतोः, कोशदण्डशक्तिं कोशदण्डयोस्तत्प्रशमनसाधनयोर्विषये या शक्तिः प्रयोगप्रभविष्णुता ताम्, आत्मसंस्थाम् आत्मनि प्रतिष्ठितां स्वायत्तां, कुर्वीत।

एवं राज्यकोपजं राजव्यसनं तत्परिहारोपायं चाभिधाय राजनिमित्तं राज्यस्य व्यसनमाह–द्वैराज्यवैराज्ययोरिति। द्वैराज्यं द्विस्वामिकत्वं वैराज्यं विगतस्वामिकत्वं तयोः, चिन्ता क्रियत इति शेषः। तदुभयगुरुलघुभावश्चिन्त्यत इत्यभिप्रायः। तत्राचार्यमतमाह–द्वैराज्यमिति। तत्

The king and his kingdom are the basic elements of the state.

The troubles of the king could be either internal or external. Internal troubles are more serious than external since the former is just like the danger arising from a lurking snake. Troubles caused by ministers are more serious than the one caused by the other internal troubles. Hence the king should keep under his control the treasury and the army.

There could be divided rule and foreign rule. Of these the divided rule or rule of a country by two king is bound to perish owing to mutual hatred, partiality and rivalry. According to preceptors the foreign rule which depends upon the affection of the people is for better benefits in its own conditions.

सङ्घर्षेण वा विनश्यति। वैराज्यं तु प्रकृतिचित्तग्रहणापेक्षि यथास्थितमन्यैर्भुज्यत इत्याचार्याः।

नेति कौटल्यः। पितापुत्रयोर्भ्रात्रोर्वा द्वैराज्यं तुल्ययोगक्षेममात्यावग्रहं वर्तयेतेति। वैराज्ये तु जीवतः परस्याच्छिद्य 'नैतन्मम' इति मन्यमानः कर्शयत्यपवाहयति, पण्यं वा करोति, विरक्तं वा परित्यज्य अपगच्छतीति।

अन्धश्चलितशास्त्रो वा राजेति। अशास्त्रचक्षुरन्धो यत्किञ्चनकारी दृढाभिनिवेशी परप्रणेयो वा राज्यमन्यायेनोपहन्ति, चलितशास्त्रस्तु यत्र शास्त्रच्चलितमतिर्भवति, शक्यानुनयो भवतीत्याचार्याः।

अन्योन्यपक्षद्वेषानुरागाभ्यां परस्परपक्षयोर्द्वेषानुरागाभ्यां, परस्परसंघर्षेण वा मिथः स्पर्धया वा, विनश्यति। वैराज्ये गुणमाह–वैराज्यमिति। तत्, प्रकृतिचित्तग्रहणापेक्षि प्रजाचित्तज्ञानानुरोधिप्रवृत्तिकं, यथास्थितं केनाप्यव्याकुलितं, अन्यैः भुज्यते प्रजाभिरनुभूयते। अतश्च वैराज्याद् द्वैराज्यं पापीय इत्याशयः। इत्याचार्याः, मन्यन्त इति शेषः।

तन्मतं निराकरोति–नेति कौटल्य इति। तत्र युक्तिमाह–पितापुत्रयोरित्यादि। अयमर्थः–द्वैराज्यं नाम पितापुत्रयोर्भ्रात्रोर्वा दायभागिनोः परस्परेण विरोधाद् भवति। तच्चाभिन्नयोगक्षेमत्वादमात्यैरेव राज्ययोगक्षेम-निर्वहणसहायभूतैः प्रतिषिध्येतेति नातिगणनीयो द्वैराज्ये दोष इति। वैराज्ये पुनर्महान्तं दोषमाह–वैराज्ये त्वित्यादि। अयमर्थः–विजिगीषुर्जीवन्तं शत्रुमनादृत्य बलापहृततदीयराज्यस्तस्मिन् राज्ये यदि ममकारं न करोति, तदा तद् दण्डकरादिभिः कर्शयति, अन्यत्र नयति, मूल्यग्रहणेन वा यस्मै कस्मैचिद् विक्रीणीते। यद्यात्मनि तद् विरक्तं भवति, तदापहृतसर्वसारं तत् परित्यज्यापैतीति महते दुःखाय स्यादिति।

राज्यव्यसनस्यावान्तरमेदं चिन्तयति–अन्ध इत्यादि। अन्धः अनधीतशास्त्रो राजा, चलितशास्त्रोऽधीता-ननुरुद्धशास्त्रो राजा, तयोर्मध्ये को वा श्रेयानिति विचार्यत इत्यर्थः। तत्राचार्यमतेन निर्णयमाह–अशास्त्रेत्यादि। अशास्त्रचक्षुः शास्त्रात्मकचक्षुर्हीनः, अन्धः, यत्किञ्चनकारी असमीक्षापूर्वकारी, दृढाभिनिवेशी अनिवार्यदुष्कर्माभिनिवेशः, परप्रणेयो वा परबुद्ध्यधीनप्रवृत्तिको वा भवन्, अन्यायेन राज्यम् उपहन्ति। चलितशास्त्रस्त्विति। सत्,

'Not so'—says Kauṭalya. The divided rule between a father and his son or between two brothers has almost the same consequences since it is under the strict control of the same minister. In the case of foreign rule brought into existence by forcibly appropriating the country from its ruler, the new ruler is bound to have feeling that, "it is not mine' and hence he impoverishes it, takes away its wealth, treats it as a commercial merchandise and when the people cease to love him, he retires abandoning the country.

Which is better—a blind ruler or one who flouts the science of policy? According to preceptors—A blind king—not possessed of an eye in sciences—is indiscriminate in his actions, very obstinate and is led by others, destroys the kingdom by his own maladministration, but an erring king could easily be brought around when and where his mind goes astray from the procedures laid down in scientific treatises.

नेति कौटल्यः। अन्धो राजा शक्यते सहायसम्पदा यत्र तत्र वा पर्यवस्थापयितुमिति। चलितशास्त्रस्तु शास्त्रादन्यथाभिनिविष्टबुद्धिरन्यायेन राज्यमात्मानं चोपहन्तीति।

व्याधितो नवो वा राजेति। व्याधितो राजा राज्योपघातममात्यमूलं प्राणाबाधं वा राज्यमूलमवाप्नोति, नवस्तु राजा स्वधर्मानुग्रहपरिहारदानमानकर्मभिः प्रकृतिरञ्जनोपकारैश्चरतीत्याचार्याः।

यत्र विषये, शास्त्रात् चलितमतिर्भवति, तत्र शक्यानुनयः शक्यः सुकरः अनुनयः सान्त्वपूर्वं वारणं यस्य स तथाभूतो भवति। इत्याचार्याः।

तन्मतप्रतिषेधपूर्वे स्वमतमाह–नेति कौटल्य इत्यादि। अन्धो राजा अमात्यादिसहायगतया प्राज्ञत्वादिगुणसम्पदा यत्र हितायां प्रवृत्तौ पर्यवस्थापयितुमिष्टस्तत्र शक्यः पर्यवस्थापयितुम्। चलितशास्त्रस्तु शास्त्रप्रतिषिद्धकर्माभिनिवेशदोषाद् वारयितुमशक्योऽन्यायेन राज्यं चात्मानं च नाशयतीत्यर्थः।

अन्यं विचारमाह–व्याधित इति। व्याधिग्रस्तः, नवो वा अचिराभिषिक्तो वा, राजा, श्रेयानिति विचार्यते। तत्राचार्यमतमाह–व्याधितो राजेति। सः, अमात्यमूलं राजभयाभावनिरङ्कुशवृत्तिभिरमात्यैर्जनितं, राज्योपघातम्, अवाप्नोति। राज्यमूलं प्राणाबाधं वा अमात्यादिप्रकृतिषट्ककृतं स्वप्राणनाशं वावाप्नोति। नवो राजा तु, स्वधर्मादिभिः स्वधर्मः शास्त्रोक्तराजधर्मानुष्ठानम् अनुग्रहः स्वकोशोपकारः परिहारः करमोक्षणं दानं कृतकर्मणां भूम्याद्यर्पणं मानः सत्कारः कर्म पूर्तादिप्रवर्तनम् इत्येतैः, प्रकृतिरञ्जनोपकारैः प्रकृत्यनुरागोत्पादनोपायैः, चरति व्यवहरति, इतयाचार्याः।

नेति कौटल्य इति। प्रतिषेधे उपपत्तिमाह–व्याधितो राजेति। सः, यथाप्रवृत्तं पूर्वप्रवृत्तप्रकारे, राजप्रणिधिं राजव्यापारम्, अनुवर्तयति। नवो राजा तु, इदं राज्यं, मम बलावर्जितं स्वबलोपार्जितम्, इति, मन्यमान इति शेषः, अनवग्रहः निरङ्कुशः,यथेष्टं स्वच्छन्दं, चरति। वा अथवा, सामुत्थायिकैः सामवायिकैः, अवगृहीतः परतन्त्रतां नीतः, राज्योपघातं सामवायिकमूलं, मर्षयति सहते न तु प्रतिकर्तुं शक्नोतीत्यर्थः। प्रकृतिषु विषये, अरूढः नवत्वेनानुपजातस्नेहः, सुखः समुच्छेत्तुं भवति परेणोच्छेत्तुमनायासशक्यो भवति। एवञ्च नवाद् व्याधितस्य श्रेयस्त्वं सिद्धम्। व्याधितविषयेऽपि

'Not so'—says Kauṭalya. A blind king could be brought into the ways of sciences with the help of his supporters whereever and whenever needed. An erring king who flouts the sciences brings about destruction to himself and to his kingdom by his wrong ways.

Who is better, a diseased or a new king! Preceptors are of the opinion that—a diseased king influenced by the intrigues of his ministers, either destroys the country or his own life, while a new king is bound to please the people by popular deeds like gifts, remedies and bestowing honours and strictly following his duties and observances which are beneficial to his subjects.

नेति कौटल्यः। व्याधितो राजा यथाप्रवृत्तं राजप्रणिधिमनु वर्तयति। नवस्तु राजा 'बलावर्जितं ममेदं राज्यम्' इति यथेष्टमनवग्रहश्चरति। सामुत्थायिकैरवगृहीतो वा राज्योपघातं मर्षयति। प्रकृतिष्वरूढः सुखः समुच्छेत्तुं भवति। व्याधिते विशेषः–पापरोग्यपापरोगी च।

नवेऽप्यभिजातोऽनभिजात इति। दुर्बलोऽभिजातो बलवाननभिजातो राजेति। दुर्बलस्याभिजातस्योपजापं दौर्बल्यापेक्षाः प्रकृतयः कृच्छ्रेणोपगच्छन्ति। बलवतश्चानभिजातस्य बलापेक्षाः सुखेन इत्याचार्याः।

नेति कौटल्यः। दुर्बलमभिजातं प्रकृतयः स्वयमुपनमन्ति, जात्यमैश्वर्यप्रकृतिरनुवर्तत इति। बलवतश्चानभिजातस्योपजापं विसंवादयन्ति–अनुरागे सार्वगुण्यम् इति।

न सामान्यग्रहणं, किन्तु व्याधितविशेषस्यैवापापरोगिलक्षणस्य स्वमते ग्रहणमित्यभिप्रायं मनसि निधाय पापरोगी अपापरोगी चेत्येवं व्याधिते विशेषमाचष्टे–व्याधिते विशेष इत्यादि। पापरोगः कुष्ठादिः तद्वान् पापरोगी।

नवेऽप्यवान्तरभेदं विमर्शार्थमाह–नवेऽपीत्यादि। विशेष इत्यनुवर्तते। तत्राभिजातो दुर्बलो वा गरीयान् बलवाननभिजातो वेति चिन्तयति–दुर्बल इत्यादि। आचार्यमतेन निर्णयमाह–दुर्बलस्येत्यादि अभिजातस्यापि सतो दुर्बलस्योपजापं प्रकृतयो दौर्बल्यावज्ञया कृच्छ्रादङ्गीकुर्वन्ति, बलवतस्त्वनभिजातस्यापि बलबहुमानात् सुखेनाङ्गीकुर्वन्तीति बलवाननभिजात एव गरीयानित्यभिप्रायः।

आचार्यमतं निषेधन् स्वमतमाह–नेति कौटल्य इत्यादि। युक्तिमाह–दुर्बलमिति। बलरहितम्, अभिजातं राजानं, प्रकृतयः, स्वयम् उपनमन्ति अप्रार्थ्यमाना अप्याभिजात्यानुरागादुपगम्याश्रयन्ति। कुतः, जात्यं कुलोत्पन्नम्, ऐश्वर्यप्रकृतिः ऐश्वर्यार्हता, अनुवर्तत इति हेतोरित्यर्थः। बलवतश्च, अनभिजातस्य अजात्यस्य, उपजापं, विसंवादयन्ति नानुवर्तन्ते। कुतः, अनुरागे सार्वगुण्यमिति अनुरागे सति सर्वगुणयोगित्वं प्रतीयत इति हेतोः। इह 'अनुयोगे साद्गुण्यमि'त्यपपाठः। एवञ्च प्रकृतय आभिजात्यानुरागाद्–

'Not so'—says Kauṭilya. A diseased king continues to follow the rutines and administer country. A new king thinks that "the country was acquired by my own might "and begins to act as he pleases. He is even prepared to oppress the people under the influece of his allies who joined forces with him. One who has no firm roots or control over his elements

could easily be uprooted. In the case of the diseased king there is distinction between one who is morally diseased and the one who is physically diseased.

In the case of new kings who is better—a high-born or a base-born? Again which is better, a weak but high born king or a strong but low-born king ? Preceptors are of the view that in the case of a weak but high-born person people hardly allow room for intrigues. On the other hand a strong but base-born ruler will easily yield himself to intrigues in case he desires power.

'Not so'—says Kauṭalya. People will naturally obey a high-born king though he is weak for it is the natural tendency of the people to follow a high-born king, for attaining prosperity. They do not yield to the intrigues of a strong but base born ruler as it is well known that possession of virtues makes for friendship.

प्रयासवधात् सस्यवधो मुष्टिवधात् पापीयान्।

निराजीवत्वादवृष्टिरतिवृष्टित इति।

द्वयोर्द्वयोर्व्यसनयोः प्रकृतीनां बलाबलात्।
पारम्पर्यक्रमेणोक्तं याने स्थाने च कारणम्।।

।। इति कौटलीयार्थशास्त्रे व्यसनाधिकारिकेऽष्टमाधिकरणे
द्वितीयोऽध्यायः राजराज्ययोर्व्यसनचिन्ता,
आदितोऽष्टादशोत्तरशततमः।।

भिजाते सार्वगुण्यं पश्यन्त्यस्तमुपनमन्ति, अनभिजातं त्वनुरागाभावान्नोपनमन्तीत्याशयैः। इत्थं राजहेतुकं राज्यव्यसनं व्याख्यातम्।

परचक्रहेतुकं व्यसनमाह–प्रयासवधादिति। सस्यवधः निष्पन्नसस्यनाशनं, मुष्टिबधात् मुष्टिर्बीजवापः तस्याकरणात्, पापीयान्, कुतः प्रयासवधात् धान्यालाभहेतुत्वसाम्येऽपि उदकपायनपालनादिरूप-परिश्रमनैष्फल्यहेतुत्वेनाधिकेन योगात्।

दैवकृतं व्यसनमाह–निराजीवत्वादिति। इह पापीयानित्यनुवृत्तं स्त्रीलिङ्गतया विपरिणम्यते। अवृष्टिः, अतिवृष्टितः, पापीयसी, कस्मात्, निराजीवत्वात् उदकाधीनाजीवोच्छेदप्रयोजकत्वात्। इतिशब्दो विचारसमाप्तौ।

एवं निर्णीतो द्विद्विप्रकृतिपरस्परगुरुलघुभावः क्वोपयुज्यत इत्याह–द्वयोर्द्वयोरित्यादि। याने स्थाने च कारणमिति। शत्रुव्यसनापेक्षया स्वव्यसनस्य लघुत्वं विजिगीषोर्याने प्रयोजकं गुरुत्वं तु स्थाने इत्येवं यानस्थानव्यवस्थापकतया बलाबलमुपयुज्यत इति भावः।।

इति कौटलीयार्थशास्त्रव्याख्यायां व्यसनाधिकारिकेऽष्टमाधिकरणे
द्वितीयोऽध्यायः राजराज्ययोर्व्यसनचिन्ता,
आदितोऽष्टादशोत्तरशततमः।।

The destruction of crops is of worse consequences than the destruction of handful of grains.

The absence of rain is more serious than that of excessive rains since it is the labour that is rendered helpless.

Between pairs of distresses affecting the elements of a sovereignty the seriousness or insignificance is dealt with in the order of enumeration of the several types of offensive or defensive operations.

Thus the one hundred and eighteenth chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the second chapter of the eighth Adhikaraṇa dealing with the section, 'Troubles of the King and of his Kingdom.

Chapter 119

129 प्रक० पुरुषव्यसनवर्गः।

Section 129 : The Troubles of Men

अविद्याविनयः पुरुषव्यसनहेतुः। अविनीतो हि व्यसनदोषान् न पश्यति।

तानुपदेक्ष्यामः कोपजस्त्रिवर्गः, कामजश्चतुर्वर्गः।

तयोः कोपो गरीयान्। सर्वत्र हि कोपश्चरति, प्रायशश्च कोपवशा राजानः प्रकृतिकोपैर्हताः श्रूयन्ते, कामवशाः क्षयव्ययनिमित्तमरिव्याधिभिः इति।

नेति भारद्वाजः। सत्पुरुषाचारः कोपः। वैरयातनमवज्ञावधो

पुरुषव्यसनवर्ग इति सूत्रम्। पुरुषसामान्यस्य यानि व्यसनानि व्यसनप्रभवा दोषास्तेषां वर्गोऽभिधीयत इति सूत्रार्थः।

पुरुषस्य व्यसने कारणमाह–अविद्याविनय इति। विद्यासु आन्वीक्षिक्यादिषु विनयः शिक्षा विद्याविनयः तस्याभावः अविद्याविनयः, पुरुषव्यसनहेतुः। हेतुत्वमुपपादयति–अविनीतो हीत्यादि। पुरुषस्य व्यसने प्रवृत्तिस्तज्जन्यदोषाज्ञानाद् भवति, अज्ञानं विद्याशिक्षणाभावकृतमित्यर्थः।

व्यसनदोषान् प्रतिज्ञापूर्वमुपदिशति–तानुपदेक्ष्याम इत्यादि। तत्र वाक्पारुष्यमर्थदूषणं दण्डपारुष्यं च त्रिवर्गः, मृगया द्यूतं स्त्रियः पानमिति चतुर्वर्गः। उभयोः संकलनया च व्यसनदोषाः सप्त सम्पद्यन्त इति बोद्धव्यम्।

तयोरिति। वर्गद्वयोत्पादकयोः कामकोपयोर्मध्ये, कोपो गरीयान्, कोपज इति नयचन्द्रिकापाठे तयोः कामजकोपजयोर्वर्गयोरिति व्याख्येयम्। गरीयस्त्वे हेतुमाह–सर्वत्र हीत्यादि। कोपो हि सर्वविषयः कामस्तु स्त्र्यादिप्रतिनियतविषयत्वादसर्वविषय इत्यसार्वत्रिकं काममपेक्ष्य सार्वत्रिकः कोपो गुरुतरः। ततश्च तज्जन्यस्त्रिवर्गोऽपि गुरुतर इति भावः। हेत्वन्तरमाह–प्रायशश्चेत्यादि। क्षयव्ययनिमित्तमरिव्याधिभिरित्यादि। कोशदण्डहानिं शरीरपरिहानिं च निमित्तीकृत्य शत्रुभिर्व्याधिभिश्च हताः श्रूयन्त इत्यर्थः। एवञ्चारिव्याधिहनना-पेक्षया पापीयसः प्रकृतिकोपहननस्य कोपो निमित्तं भवतीत्यतोऽपि हेतोः कोपो गरीयानित्यभिप्रायः।

नेति भारद्वाज इति। कोपः कामश्च न दोष इति द्रोणाचार्यो मन्यत इत्यर्थः। सत्पुरुषाचार इत्यादिना तत्र हेतूपन्यासः। कोपः, सत्पुरुषाचारः सत्पुरुषधर्मो भवति। उपोदयं कोपसाध्यमाह–वैरयातनं वैरप्रति-

Ignorance as well as lack of discipline form the causes of a man's troubles. One who lacks discipline could not perceive the injuries arising from vices.

We shall enumerate them (here). Vices due to anger are three-fold and those due to desire are four-fold.

Between them anger is more serious. Anger proceeds against all: kings falling prey to anger are seen despised or destroyed by the anger of people, but those addicted to pleasures have perished in consequence of serious diseases brought about by enemies by means of deterioration and impoverishment.

'Not so'—says Bhāradvāja. Anger is the characteristic feature of a righteous man. It is the basis of bravery, puts down despicable persons and keeps the people under fear. Anger is always an essential quality to prevent sin. Desire is connected with the enjoyment of results. Reconciliations, generosity and the act of enduring oneself to all are acceptable qualities. One who is inclined to enjoy pleasures as also the result of one's action should possess desire.

भीतमनुष्यता च। नित्यश्च कोपसम्बन्धः पापप्रतिषेधार्थः। कामः सिद्धिलाभः। सान्त्वं त्यागशीलता सम्प्रियभावश्च। नित्यश्च कामेन सम्बन्धः कृतकर्मणः फलोपभोगार्थ इति।

नेति कौटल्यः। द्वेष्यता शत्रुवेदनं दुःखासङ्गश्च कोपः। परिभवो द्रव्यनाशः पाटच्चरद्यूतकारलुब्धकगायनवादकैश्चानर्थ्यैः संयोगः कामः।

तयोः परिभवाद् द्वेष्यता गरीयसी, परिभूतः स्वैः परैश्चावगृह्यते, द्वेष्यः समुच्छिद्यत इति। द्रव्यनाशाच्छत्रुवेदनं गरीयः, द्रव्य-

क्रिया, अवज्ञावधः परकृतावहेलनवारणं, भीतमनुष्यता च यमुद्दिश्यापकारकरणाद् भीता मनुष्याः स भीतमनुष्यस्तत्ता च, कोपात् सिध्यतीति वाक्यशेषः। पापप्रतिषेधार्थः दुर्जननिग्रहार्थः कोपसम्बन्धः कोपस्वीकारः, नित्यश्च अवर्जनीयश्च सत्पुरुषस्य। कामं प्रत्याह–काम इति। सः, सिद्धिलाभः सुखलाभहेतुः। तदधीनान् पुरुषस्य गुणानाह–सान्त्वं सूनृतभाषित्वं, त्यागशीलता दानशौण्डत्वं, सम्प्रियभावश्च सौम्यत्वं च, जायत इति शेषः। कृतस्य प्रयत्नस्य तत्फलानुभवार्थं कामेन सम्बन्धः पुरुषावर्जनीयश्चेत्याह–नित्यश्चेत्यादि। इतिशब्दो हेत्वर्थः।

तदिदं भारद्वाजमतं निषेधति–नेति कोटल्य इति। भारद्वाजेन यदुक्तं तत्र, कोपकामौ न गुणौ, किन्तु दोषावेवेत्यर्थः। कोपजान् महानर्थान् आह–द्वेष्यतेति। द्वेष्यता सर्वद्वेषविषयता, शत्रुवेदनं शत्रुलाभः, दुःखासङ्गश्च दुःखयोगश्च, कोपः आयुर्घृतमितिवत् कार्यकारणयोरभेदोपचाराद् द्वेष्यतादिनिमित्तं कोप इत्यर्थः। एवं कोपजदोषत्रिवर्गमुक्त्वा कामजं दोषत्रिवर्गमाह–परीत्यादि। परिभवः उत्पथप्रवृत्त्यावमानप्राप्तिः, द्रव्यनाशः द्रव्याणामपात्रेष्वतिमात्रं विनियोगान्नाशः, पाटच्चरादिभिः पाटच्चराश्चोराः द्यूतकारा अक्षादिदेविनः लुब्धकाः मृगयासहायाः गायनाः कण्ठगायिनः वादकाः वीणावादिनः एभिः, अनर्थ्यैः अर्थापेतैः, संयोगश्च, कामः परिभवादिरूपः काम इत्यर्थः। एवञ्चानर्थहेतुत्वात् कोपकामयोर्दोषत्वं सिद्धम्।

तयोश्च कोपस्य गरीयस्त्वं यत् प्रागुपन्यस्तं तद् यथोक्तकोपजदोषत्रिवर्गकामजदोषत्रिवर्गान्योन्यगुरुलघु-भावविमर्शद्वारेण स्थापयति–तयोः परिभवादित्यादि। तयोः कोपजकामजत्रिवर्गयोर्मध्ये, परिभवात् कामजवर्गप्रथमाद्, द्वेष्यता कोपजवर्गप्रथमा, गरीयसी। कुतः परिभूतः स्वैः परैश्च

'Not so'—says Kauṭalya. Anger causes enmity with an adversary and results in troubles and is always associated with pain. Addiction to pleasure gives rise to contempt and loss of wealth and prompts one join company with thieves, gambles, hunters, singers, players on musical instruments and other objectionable persons. Of these enmity is more serious than contempt since a despised person is caught hold of by his own people as well as by enemies whereas a hated person gets destroyed. Between loss of wealth and troubles from an enemy the latter is more serious, since the loss of wealth affects the treasury while enmity even causes loss of life.

नाशः कोशाबाधकः, शत्रुवेदनं प्राणाबाधकमिति। अनर्थ्यसंयोगाद् दुःखसंयोगो गरीयान्, अनर्थ्यसंयोगी मुहूर्तप्रीतिकरः, दीर्घक्लेशकरो दुःखानामासङ्ग इति। तस्मात् कोपो गरीयान्।

वाक्पारुष्यमर्थदूषणं दण्डपारुष्यमिति। वाक्पारुष्यार्थदूषणयोः वाक्पारुष्यं गरीयः इति विशालाक्षः। परुषमुक्तो हि तेजस्वी तेजसा प्रत्यारोहति, दुरुक्तशल्यं हृदि निखातं तेजस्सन्दीपनमिन्द्रियोपतापि च इति।

नेति कौटल्यः। अर्थपूजा वाक्छल्यमपहन्ति, वृत्तिविलोपस्त्वर्थदूषणम्। अदानमादानं विनाशः परित्यागो वा अर्थस्येत्यर्थदूषणम्।

अवगृह्यते विधेयीक्रियते। द्वेष्यः, समुच्छिद्यते राज्यात् प्रभ्रश्यते, इति अतः कारणात्। द्रव्यनाशात् कामजवर्गद्वितीयात्, शत्रुवेदनं कोपजवर्गद्वितीयं, गरीयः, कुतः, द्रव्यनाशः कोशाबाधकः कोशमेव केवलमाबाधते न तु प्राणान्, शत्रुवेदनं प्राणाबाधकम्, इत्यतः कारणात्। अनर्थ्यसंयोगात् कामजवर्गतृतीयात्, दुःखसंयोगः कोपजवर्गतृतीयः, गरीयान्, कुतः, अनर्थ्यसंयोगः, मुहूर्तप्रीतिकरः दुःखपर्यवसाय्यपि मुहूर्तं प्रीतये कल्पते, दुःखानामासङ्गः, दीर्घक्लेशकरः प्रीतिलेशेनाप्यस्पृष्टं क्लेशं करोति, इत्यतः। तस्मादिति। कामजत्रिवर्गापेक्षया कोपजत्रिवर्गस्य गरीयस्त्वात्, कोपः, गरीयान् कामापेक्षया।

'कोपजस्त्रिवर्ग' इति पूर्वमुक्तस्य त्रिवर्गस्य परस्परतो गुरुलघुभावं विचारयति–वाक्पारुष्यमित्यादि। तत्राद्ययोर्निर्णयं विशालाक्षमतेनाह–वाक्पारुष्यार्थदूषणयोरित्यादि। तत्र हेतुमाह–परुषमुक्तो हीति। परुषवाक्यैरधिक्षिप्तः, तेजस्वी परिभवासहनस्वभावः, तेजसा, प्रत्यारोहति अधिक्षेप्तारं प्रत्याक्रामति। दुरुक्तशल्यं दुर्वचनरूपं शल्यं, हृदि, निखातं स्थापितं तेजस्सन्दीपनं तेजसः प्रज्वलनंकरम्, इन्द्रियोपतापि च इन्द्रियसन्तापकरं च। इति अतः कारणात्।

विशालाक्षमतं निराकरोति–नेति कौटल्य इति। तत्र हेतुमाह–अर्थपूजेति। अर्थेन सत्कारः, वाक्छल्यम् अधिक्षेपवचनप्रयोगकृतं मनश्शल्यम्, अपहन्ति अपोहति। वाक्पूजा तु अर्थदूषणं नापहन्ति तस्य जीविकाविलोपहेतुत्वादित्यभिप्रायेणाह–वृत्तिविलोपस्त्वर्थदूषणमिति। अदानमित्यादिना–

Between the company of the undesirable persons and affliction of sorrow the latter is more serious; company of the undesirable could be stopped at once where as remedies for affliction takes much time. Hence anger is more serious.

What is verse? Abuse of language; abuse of wealth or oppressive punishment? Between the abuse of language and abuse of wealth the abuse of language is more serious according to Viśālākṣa. When harsh words are used against a brave one, he retaliates and bad language like a nail piercing the heart excites anger and pains the sense organs.

'Not so'—says Kauṭalya. Abuse of language can be expiated by a gift of money and thus the pain is removed, whereas the abuse of money may result in the loss of livelihood. The abuse of money consists in not giving, exaction, loss and abandonment.

अर्थदूषणदण्डपारुष्ययोरर्थदूषणं गरीयः इति पाराशराः। अर्थमूलौ धर्मकामौ, अर्थप्रतिबन्धश्च लोको वर्तते, तस्योपधातो गरीयान् इति।

नेति कौटल्यः। सुमहताप्यर्थेन न कश्चन शरीरविनाशमिच्छेत्। दण्डपारुष्याच्च तमेव दोषमन्येभ्यः प्राप्नोति। इति कोपजस्त्रिवर्गः।

कामजस्तु। मृगया द्यूतं स्त्रियः पानमिति चतुर्वर्गः। तस्य मृगयाद्यूतयोः मृगया गरीयसी इति पिशुनः। स्तेनामित्रव्यालदावप्रस्खलनभयदिमोहाः क्षुत्पिपासे च प्राणाबाधस्तस्याम्। द्यूते तु जितमेवाक्षविदुषा यथा जयत्सेनदुर्योधनाभ्याम् इति।

र्थदूषणस्य प्रकाराणां प्रदर्शनं तेषु चतुर्ष्वपि वृत्तिविलोपहेतुत्वस्य स्पष्टत्वबोधनार्थम्। अदानं कृतकर्मवेतनानर्पणम्, आदानं दण्डाद्यात्मना धनग्रहणं, विनाशो देशपीडनम्, अर्थस्य परित्यागः रक्षणीयस्यारक्षणम्, इति चतुष्प्रकारमिति शेषः, अर्थदूषणम्। तथाचार्थदूषणमेव गरीय इत्यभिप्रायः।

अर्थदूषणदण्डपारुष्ययोरर्थदूषणं गरीय इति पाराशरमतमाह–अर्थदूषणेत्यादि। तत्र युक्तिमाह–अर्थमूलौ धर्मकामावित्यादि। धर्मकामयोरर्थसाध्यतया लोकवर्तनस्यार्थान्वयव्यतिरेकानुविधायित्वादर्थस्य प्राधान्यात् तस्योपघातो दण्डपारुष्याद् गुरुतर इत्यर्थः।

कामजस्य चतुर्वर्गस्य त्रीणि द्विकानि कृत्वा तेषामेकैकस्यावयवयोरन्योन्यापेक्षं गुरुलघुभावं निर्णेष्यन् वर्गिणो निर्दिशति–कामजस्तु मृगयेत्यादि। आद्यद्विके गरीयस्त्वस्य निर्णयं नारदमतेनाह–तस्येत्यादि। तत्र तदीयां युक्तिमाह–स्तेनेत्यादि। स्तेनाश्चोराः अमित्राः शत्रवः व्यालाः दुष्टमृगाः दावो वनाग्निः प्रस्खलनं गत्याद्यनवधानम् एतेभ्यो भयानि अपायशङ्काः दिङ्मोहः दिग्भ्रमः इत्येते, क्षुत्पिपासे च बुभुक्षोदन्ये च, प्राणाबाधः

According to the school of Pārāśaras—between the abuse of money and the abuse of punishment, the abuse of money is more serious and worse. Righteousness and desire are caused by money, world itself is bound on wealth and hence its abuse is more serious.

'Not so'—says Kauṭalya. No man desires the loss of his own life even for a huge financial benefit. One who hands out an oppressive punishment is liable to get the same punishment from an enemy. Such is the nature of the three-fold evils due to anger.

As for those related to desire :- They consist of hunting, gambling, attachment to women and drinking. Between hunting and gambling hunting is a more serious vice according to Piśuna. In the case of hunting one falls into the hands of robbers, enemies and elephants, wild fire, fear, inability to distinguish between the different location, hunger, thirst, and loss of life. In gambling an expert gambler becomes victorious like Jayatsena and Duryodhana.

नेति कौटल्यः। तयोरप्यन्यतरपराजयोऽस्तीति नलयुधिष्ठिराभ्यां व्याख्यातं, तदेव विजितद्रव्य- मामिषं, वैरबन्धश्च, सतोऽर्थस्य विप्रतिपत्तिरसतश्चार्जनमप्रतिभुक्तनाशो, मूत्रपुरीष- धारणबुभुक्षादिभिश्च व्याधिलाभ इति द्यूतदोषः। मृगयायां तु व्यायामः श्लेष्मपित्तमेदः स्वेदनाशश्चले स्थिरे च काये लक्षपरिचयः कोपभयस्थानेहितेषु च मृगाणां चित्तज्ञानम्- नित्ययानं चेति।

द्यूतस्त्रीव्यसनयोः कैतवव्यसनम् इति कौणपदन्तः। सातत्येन हि निशि प्रदीपे मातरि च मृतायां दीव्यत्येव कितवः, कृच्छ्रे च प्रतिपृष्टः कुप्यति। स्त्रीव्यसनेषु तु स्नानप्रतिकर्म- भोजनभूमिषु

कार्यकारणयोरभेदोपचारात् प्राणपीडाहेतव इत्यर्थः, तस्यां मृगयायाम्। द्यूते तु, अक्षविदुषा जितमेव अक्षदेवनविचक्षणो जयमेव लभते। तत्रोदाहरणमाह–यथेत्यादि। इतिशब्दो हेतौ।

पिशुनमतं निषेधति–नेति कौटल्य इति। मृगयाद्यूतयोर्मध्ये द्यूतस्य मृगयाया इव दोषमाह–तयोरपीत्यादि। अन्यतरस्य जयवत् पराजयोऽपि नियतः, जितं द्रव्यं सर्वेषां भोग्यं भवति, पराजितस्य जेतरि विद्वेषकरणं, सतो विशुद्धागमस्य पूर्वार्जितस्य द्रव्यस्यास्थानविनियोगः, असतोऽशुद्धागमस्यार्थस्य द्यूतोपायेनाधिगमनम्, अभुक्तस्यैव द्यूतार्जितस्य पुनर्द्यूते हारणा, मूत्रपुरीषधारणबुभुक्षापिपासाभिर्व्याधिप्राप्तिश्चेत्येतान् द्यूते दोषानभिधाय मृगयायां गुणानाह–मृगयायां त्वित्यादि। व्यायामः कायायासकरणम्। श्लेष्मपित्तगेदस्स्वेदनाशः श्लेष्मपित्तदोषनाशः मांसानुपचयः आयासे महत्यप्यस्विद्यद्गात्रत्वं च, चलस्य स्थिरस्य च शरीरस्य लक्षीकरणशिक्षणं, कोपनिमित्तचेष्टितेषु भयनिमित्तचेष्टितेषु च मृगाणां भावज्ञानं, मृगयार्थस्य यानस्य वर्षादिषु कर्तुमशक्यतया कादाचित्कानुष्ठानविषयत्वं न पुनर्द्यूतस्येव नित्यानुष्ठानविषयत्वमित्येते द्यूतव्यावृत्ता गुणा मृगयायां सन्ति। अतश्च द्यूतमेव पापीय इत्यभिप्रायः।

द्यूतस्त्रीव्यसनयोर्बलाबलचिन्तायां द्यूतव्यसनं गरीय इति भीष्ममतमाह–द्यूतेत्यादि। तदीयं तत्र हेतुमाह–सातत्येन हीत्यादि। द्यूतकारो हि सूर्यप्रकाशाभावेऽपि रात्रौ दीपप्रकाशमुपजीव्याविच्छेदेन दीव्यति, मृताया मातुरौर्ध्वदैहिकमप्यात्मकार्यं परिहृत्य दीव्यति, कार्यसङ्कटे तन्निवारणोपायं पृष्टः

'Not so'—says Kauṭalya. Of the two parties one gets defeated as is known from the story of Nala and Yudhiṣṭhira; the same wealth won over

in the game like a piece of flesh causes enmity and further there is the lack of recognition well earned wealth and ill-gotten wealth, loss of wealth without a chance to enjoy the same, failure to anwer the calls of nature, affliction of diseases for failure of timely food are the evils of gambling. Hunting has certain advantages like getting proper physical exercise, the disappearance of phlegm, bile, fat and sweat, skill in shooting animals on the move and the ascertainment of beast's movement and mental dispostion.

According to Kaunapadanta, between addiction to gambling and to women, gambling is a more serious evil, for gamblers are found playing always even at night before a lamp, even when the mother of one of them is dead, and becomes angry when spoken to when he is in trouble. In the case of addiction to women, it is possible to hold conversation about virtue and wealth at the time of bathing, dressing and eating.

भवत्येव धर्मार्थपरिप्रश्नः। शक्या च स्त्री राजहिते नियोक्तुम्। उपांशुदण्डेन व्याधिना वा व्यावर्तयितुमवस्त्रावयितुं वा इति।

नेति कौटल्यः। सप्रत्यादेयं द्यूतं, निष्प्रत्यादेयं स्त्रीव्यसनम्। अदर्शनं, कार्यनिर्वेदः, कालातिपातनादनर्थधर्मलोपश्च, तन्त्रदौर्बल्यं, पानानुबन्धश्चेति।

स्त्रीपानव्यसनयोः स्त्रीव्यसनम् इति वातव्याधिः। स्त्रीषु हि बालिश्यमनेकविधं निशान्तप्रणिधौ व्याख्यातम्। पाने तु शब्दादीनामिन्द्रियार्थानामुपभोगः प्रीतिदानं परिजनपूजनं कर्मश्रमवधश्च इति।

कुप्यतीत्येते द्यूते दोषाः। स्त्रीव्यसने तु दोषसत्त्वेऽपि विशेषमाह–स्त्रीव्यसनेष्वित्यादि। स्त्रीव्यसनी तु स्नानभूमौ प्रसाधनभूमौ भोजनभूमौ च धर्ममर्थं वा प्रष्टुं बोधयितुं च शक्यः, यत्स्त्रीव्यसनी राजा सा राजहितायां वृत्ताववस्थापयितुममात्यादिभिः शक्या, अवस्थापनाशक्यत्वे उपांशुदण्डेन नाशयितुं शक्या, नाशनाशक्यत्वे रसदानादिनिमित्तव्याधियोगेनान्यत्र नेतुं वा शक्येत्येते दोषपरिहारमार्गाः सम्भवन्तीत्याशयः।

कौणपदन्तमतमिदं निराचष्टे–नेति कौटल्य इति। तत्र हेतुक कथनं–सप्रत्यादेयमित्यादिना। द्यूते हारितं यत् तत् पुनर्द्यूतद्वारेण प्रत्यादातुं शक्यमिति प्रत्यादेयसहितं द्यूतम्, अतथाभूतं तु स्त्रीव्यसनम्। किञ्च स्त्रीव्यसनिनो राज्ञो दर्शनमेव तावदमात्यैर्न लभ्यते, अमात्यादीनां राजादर्शननिमित्तः कार्यानुष्ठानेष्वनुत्साहः, कालातिपातनादनर्थप्राप्तिसहिता धर्महानिश्च, तन्त्रस्य स्वराज्यचिन्तनलक्षणस्यानूर्जितत्वं, स्त्रीरतिसहकारिणो मद्यपानस्यानुवर्तनमित्येतैर्दोषैः स्त्रीव्यसनमेव पापीय इत्यभिप्रायः।

स्त्रीव्यसनपानव्यसनयोर्बलाबलविचारे स्त्रीव्यसनं गरीय इत्युद्धवमतमाह–स्त्रीपानव्यसनयोरित्यादि। तत्र तदीयं हेतुमाह–स्त्रीषु हीत्यादि। तासु हि बहुप्रकारं मौर्ख्यं भर्तृवधार्थविषमिश्रलाजदानादिलक्षणं प्रथमाधिकरणीयनिशान्तप्रणिधिप्रकरणोदाहृतं सम्भावितं, न तु पाने। किञ्च पाने चित्तैकाग्र्यसम्पत्त्या शब्दादीनामिन्द्रियार्थानामैकस्यानुभवः, प्रीतिदानं, परिजनसत्कारः, कर्मायासकरणनिमित्ताङ्गावसादादिप्रशमनं च भवतीत्येतस्माद्धेतोरित्यर्थः।

It is possible to send a lady to secure the welfare of the king. Further it is possible to hand out secret punishment, and to get rid of her or send her out under the plea of disease.

'Not so'—says Kauṭalya. It is possible to divert the attention from gambling but is impossible to divert one's attention from women. (The consequences of the latter are) failure to see reasons, laziness at work, tendency to postpone the duties and as much failure in righteous actions, weakness in pursuing policies and contracting the evil of drinking.

Vātavyādhi is of the view that between addiction to women and to drinking, addiction to women is a serious vice. The childish nature of women had already been dealt with in the section dealing with the harem. (The advantages of drinking are) enjoyment of sound and other objects of the senses, pleasing other peoples, honouring the followers and relaxation from the fatigue caused by work.

नेति कौटल्यः। स्त्रीव्यसने भवत्यपत्योत्पत्तिरात्मरक्षणं चान्तर्दारेषु, विपर्ययो वा बाह्येषु, अगम्येषु सर्वोच्छित्तिः। तदुभयं पानव्यसने। पानसम्पत्–संज्ञानाशः अनुन्मत्तस्योन्मत्तत्वम्-प्रेतस्य प्रेतत्वं कौपीनदर्शनं श्रुतप्रज्ञाप्राणवित्तमित्रहानिः सद्भिर्वियोगोऽनर्थ्यसंयोगस्तन्त्रीगीत-नैपुण्येषु चार्थघ्नेषु प्रसङ्ग इति।

द्यूतमद्ययोः द्यूतमेकेषाम्। पणनिमित्तो जयः पराजयो वा प्राणिषु निश्चेतनेषु वा पक्षद्वैधेन प्रकृतिकोपं करोति, विशेषतश्च सङ्घानां

इदं मतं प्रतिषेधति–नेति कौटल्य इति। तत्र हेतुमाह–स्त्रीव्यसन इत्यादि। तस्मिन्, अन्तर्दारेषु यथाविधि परिणीतासु पतिव्रतासु, अपत्योत्पत्तिः, आत्मरक्षणं च भवति। वा अन्तर्दाराभावपक्षे, बाह्येषु गणिकादिषु, प्रसक्तस्येति शेषः, विपर्ययः अपत्योत्पत्त्यात्मरक्षणयोरभावः। अगम्येषु कुलस्त्रीजनेषु, सर्वोच्छेदः प्राणपर्यन्तसर्वस्वनाशः। एवं तावद् गणिकादिप्रसङ्गः कुलवधूप्रसङ्गः इति दोषद्वयं स्त्रीव्यसनेऽभिहितम्। तच्च तदतिरिक्ताश्च बहवो दोषाः पानव्यसने भवन्तीत्याह–तदुभयमित्यादि। पानसम्पत् पानकार्याणां समृद्धिः। तां विवृणोति–संज्ञानाश इति। संज्ञानाशो बुद्धिलोपः। अनुन्मत्तस्य उन्मत्तभावः चित्तविभ्रमहीनस्यैव विभ्रान्तचित्तत्वम्। अप्रेतस्य प्रेतत्वं जीवत एव शवसाधारणं निश्चेष्टत्वं विभ्रान्तचित्तत्वम्। कौपीनदर्शनं गुह्यागोपनम्। श्रुतादिहानिः श्रुतं शास्त्रश्रवणं प्रज्ञा श्रुतजन्या मतिः प्राणो बलं वित्तमित्रे प्रसिद्धे तेषां हानिः। सद्भिर्वियोगः सत्संगाभावः। अनर्थ्यसंयोगः गायनवाद- कादिसंसर्गः। तन्त्रीगीतनैपुण्येषु चार्थघ्नेषु प्रसङ्गः अर्थोपघातिषु वीणागानकौशलेष्वत्यासङ्गः। एवञ्च स्त्रीव्यसनाद् मद्यव्यसनं गरीय इति व्यवस्थितम्।

केचिदाचार्या मन्यन्ते–द्यूतमद्यव्यसनयोर्द्यूतव्यसनं गरीय इति। तन्मतं सयुक्तिकं दर्शयति–द्यूतमद्ययोरित्यादि। एकेषामित्येतदनन्तरं गरीयस्त्वेनेष्टमिति शेषः। तत्र द्यूतदोषबाहुल्यं हेतुमाह–पणनिमित्त इति। पणो ग्लहद्रव्यं तन्निमित्तः, जयः पराजयो वा पणलाभप्रयोजना जयः पणहानिप्रयोजनः पराजय इत्यर्थः, प्राणिषु निश्चेतनेषु वा प्राणिद्यूते प्राणिविषयः अप्राणिद्यूते अप्राणिविषयः, पक्षद्वैधेन जेतृपक्षो जितपक्ष इति परस्परविरुद्ध पक्षद्वयोत्स्थापनेन, प्रकृतिकोपं, करोति। विशेषतश्च, सङ्घानां, सङ्घवर्मिणा च

'Not so'—says Kauṭalya. Addiction to women results in the birth of children, self-protection, restriction to wives in the harem, absence of such interest in other women and total lack of interest in unworthy women. Both the wrong consequences of the above follow in drinking. The bad effects of drinking are—loss of intellect, lunacy in a normal man of sound sense, corpse-like appearance in a living man, failure to put on a loin-cloth, loss of knowledge, loss of wealth and friends, disassociation with noble people, suffering from pain, indulgence in playing musical instruments, singing and related arts which result in considerable loss of wealth.

According some authorities, between gambling and drinking, gambling is a more serious vice. Gambling results in the gain or loss of stakes to one party or other; and even among dumb animals it splits them into factions and causes provocation and it is especially due to gambling that assemblies and royal confedaracies posessing of royal characteristics of assemblies are split into factions and are consequently destroyed.

सङ्घधर्मिणां च राजकुलानां द्यूतनिमित्तो भेदः, तन्निमितो विनाश इति। असत्प्रग्रहः पापिष्ठतमो व्यसनानां तन्त्रदौर्बल्यादिति।।

असतां प्रग्रहः कामः कोपश्चावग्रहः सताम्।
व्यसनं दोषबाहुल्यादत्यन्तमुभयं मतम्।।
तस्मात् कोपं च कामं च व्यसनारम्भमात्मवान्।
परित्यजेन्मूलहरं वृद्धसेवी जितेन्द्रियः।।

।। इति कौटलीयार्थशास्त्रे व्यसनाधिकारिकेऽष्टमाधिकरणे
तृतीयोऽध्यायः पुरुषव्यसनवर्गः,
आदित एकोनविंशतिशततमः।।

सङ्घधर्म ऐकमत्यं तद्वतां च, राजकुलानां, द्यूतनिमित्तो भेदः ऐकमत्यभङ्गः। तन्निमित्तः भेदनिमित्तः विनाशः, जायत इति शेषः। इति हेतोः। अन्येषामिति। अपरेषामाचार्याणाम्, असत्प्रग्रहः असतां प्रग्रहः पूजा यस्मिन्नस्ति सः अर्थान्मद्यपानासङ्गः, पापिष्ठतमः, व्यसनानां सर्वेषां व्यसनानां मध्ये, कुतः, तन्त्रदौर्बल्यात् स्वराज्यचिन्तापचयात्। इति एवं मतमिति शेषः। 'अन्येषाम्' इति पाठो मूलमातृकासु न दृश्यते। किन्तु नयचन्द्रिकायामुपात्तत्वात् प्रकृतसंगतत्वाच्च स आदृतः। मतद्वयमपीदमप्रतिषिद्धत्वात् कौटल्यस्यापीष्टं द्रष्टव्यम्।।

प्रपश्चितमर्थं संक्षिप्याह–असतामिति। गायनवादकादीनामनर्थ्यानां, प्रग्रहः पूजाहेतुः, कामः कोपश्च, सताम्, अवग्रहः निग्रहहेतुः। उभयम् उक्तं द्विकम्, अत्यन्तं सर्वथा, व्यसनम् मतं व्यसनत्वेनाभिमतं, कुतः, दोषबाहुल्यात् पूर्वोक्ताद् दोषप्राचुर्यात्।।

तस्मादिति। तस्मात् आत्यन्तिकव्यसनतायाः सिद्धत्वात्, व्यसनारम्भं दुःखजनकं, मूलहरं

सर्वस्वनाशकरं, कोपं च, कामं च, परित्यजेत्, कः, आत्मवान् मनस्वी धीर इत्यर्थः। स कीदृशः, वृद्धसेवी जितेन्द्रियः वृद्धसंयोगद्वारेण वशीकृतमनस्क इत्यर्थः।।

इति कौटलीयार्थशास्त्रव्याख्यायां व्यसनाधिकारिके
अष्टमाधिकरणे तृतीयोऽध्यायः पुरुषव्यसनवर्गः,
आदित एकोनविंशतिशततमः।।

Acceptance of what is condemned is the worst of all vices since it causes incapacity to deal with politics.

Acceptance of what is condemned is due to one's desire and anger consists in oppressing the good; since both of them are considered as productive of worst evils, they should be avoided.

Hence he who is possessed of discretion should consult the aged ones (for advice) and after controlling his passions, should avoid anger and desire which are the root causes of all kinds of vices.

Thus the One hundred and nineteenth chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the third chapter of the eighth Adhikaraṇa dealing with the troubles of men.

Chapter 120

130-132. प्रक० पीडनवर्गः, स्तम्भनवर्गः, कोशसङ्गवर्गश्च।

Section 130 : Molestations, 131 : Obstructions 132 : Financial Troubles

दैवपीडनमग्निरुदकं व्याधिर्दुर्भिक्षं मरक इति।

अग्न्युदकयोरग्निपीडनमप्रतिकार्यं सर्वदाहि च, शक्योपगमनं तार्याबाधमुदकपीडनमित्याचार्याः।

नेति कौटल्यः। अग्निर्ग्राममर्धग्रामं वा दहति, उदकवेगस्तु ग्रामशतप्रवाहीति।

व्याधिदुर्भिक्षयोर्व्याधिः प्रेतव्याधितोपसृष्टपरिचारकव्यायामोपरोधेन कर्माण्युपहन्ति, दुर्भिक्षं पुनरकर्मोपघाति हिरण्यपशुकरदायि च इत्याचार्याः।

नेति कौटल्यः। एकदेशपीडनो व्याधिः शक्यप्रतीकारश्च, सर्वदेशपीडनं दुर्भिक्षं प्राणिनामजीवनायेति।

पीडनवर्ग इति सूत्रम्। पीडनानां देवमानुषभेदभिन्नानां, वर्गः अभिधीयत इति सूत्रार्थः। गुणप्रातिलोम्य-गुणाभाव-प्रदोष-प्रसङ्ग-पीडात्मकेषु पञ्चसु व्यसनेषु प्रसङ्गपर्यन्तानि निरूपितानि। पीडारूपं तु सम्प्रति निरूप्यते।

तत्र दैवपीडनं तावत् पञ्चधा विभजते-दैवपीडनमग्निरित्यादि।

तेषां द्वयोर्द्वयोः क्रमेण परस्परगुरुलघुभावं निर्णेष्यन् प्रथमयोरग्निपीडनोदकपीडनयोस्तन्निर्णयमाचार्यमतेनाह-अग्न्युदकयोरित्यादि। तयोर्मध्ये अग्निपीडनम् अग्नेः स्प्रष्टुमप्यशक्यतया प्रतिकर्तुमशक्यं सर्वदहनशीलं च भवति, उदकपीडनं तु शक्योपगमनं नौकादिप्रतिकार्याबाधं चेत्यतोऽग्निपीडनमुदकपीडनाद् गरीय इत्याचार्या मन्यन्त इत्यर्थः।

तन्मतं निषेधति-नेति कौटल्य इति। निषेधसूचित उदकपीडनस्य गरीयस्त्वे स्वमते साधकमाह-अग्निर्ग्राममित्यादि। ग्रामशतप्रवाही ग्रामशतमाक्रम्यापहर्तुं शक्त इत्यर्थः।

व्याधिदुर्भिक्षयोर्व्याधिगरीयस्त्वमाचार्यमतेनाह-व्याधीत्यादि। प्रेतादिव्यायामोपरोधेन प्रेतानां व्याधितानाम्

उपसृष्टपरिचारकाणां रोगिपरिचारकाणां च कृष्याद्यायासोपहननेन। अकर्मोपघाति कर्मानुपघातकम्। हिरण्यपशुकरदायि हिरण्यरूपं पशुरूपं च करं धान्यकराभावेऽपि दत्त इत्यर्थः।

आचार्योक्तहेतुविघटनभङ्ग्या दुर्भिक्षगरीयस्तां स्वाभिमतां समर्थयति–नेति कौटल्य इत्यादि। एकदेशपीडनः एकदेशमात्रवर्तित्वात्। सर्वदेशपीडनं कृत्स्नजनपदव्यापित्वात्।

Providential calamities are (five kinds) fire, floods, pestilence, famine and epidemics (like plague). According to preceptors between fire and floods, destruction caused by fire is irremediable since it reduces everything (to ashes), while the loss due to floods can be alleviated by countable means.

'Not so'—says Kauṭalya. Fire destroys a village or half of it, but floods carry off hundreds of villages.

Preceptors are of the view that between pestilence and famine, pestilence puts an end to almost all kinds of activities on account of disease and death among men and owing to the flight of servant; but famine stops no works and brings in gold, cattle and taxes.

'Not so'—states Kauṭalya pestilence affects only a part of the country and can be remedied, but famine affects the whole country and causes trouble to the life of all people affecting their livelihood.

तेन मरको व्याख्यातः।

क्षुद्रकमुख्यक्षययोः क्षुद्रकक्षयः कर्मणामयोगक्षेमं करोति, मुख्यक्षयः कर्मानुष्ठानोपरोधधर्मा इत्याचार्याः।

नेति कौटल्यः। शक्यः क्षुद्रकक्षयः प्रतिसन्धातुं बाहुल्यात् क्षुद्रकाणां, न मुख्यक्षयः। सहस्रेषु हि मुख्यो भवत्येको न वा सत्त्वप्रज्ञाधिक्यादाश्रयत्वात् क्षुद्रकाणामिति।

स्वचक्रपरचक्रयोः स्वचक्रमतिमात्राभ्यां दण्डकराभ्यां पीडयत्यशक्यं च वारयितुं, परचक्रं तु शक्यं प्रतियोद्धुमपसारेण सन्धिना वा मोक्षयितुम् इत्याचार्याः।

तेनेति। प्राणिप्राणहरणलक्षणेन दुर्भिक्षोक्तन्यायेन, मरको मारिः, व्याख्यातः, बहुतरप्राणिमरणहेतुतया दुर्भिक्षादपि स गरीयानित्यर्थः।

अथ पीडाया विषयभेदनिमित्ते गौरवचिन्तने आचार्यमतमाह–क्षुद्रकमुख्यक्षययोरिति। क्षुद्रकाः कर्मणां कर्तारः मुख्याः प्रधानाः कर्मणां कारयितारः तेषां क्षययोर्मध्ये, क्षुद्रकक्षयः, कर्मणाम्, अयोगक्षेमं करोति अप्रवृत्तप्रवृत्तिं प्रवृत्तरक्षणं च न निष्पादयति, मुख्यक्षयः, कर्मानुष्ठानोपरोधधर्मा कर्मानुष्ठानविधातमात्रहेतुः न तु कर्मकराणां कारयितृनिरपेक्षां स्वतन्त्रप्रवृत्तिं विहन्तीत्यर्थः। तथा च कारयितृक्षयात् कर्तृक्षयो गरीयानित्यभिप्रायः।

तन्निराकरोति–नेति कौटल्य इति। क्षुद्रकक्षयः प्रतिसन्धातुं क्षुद्रकान्तरप्रतिनिधानेन समाधातुं, शक्यः, कुतः, क्षुद्रकाणां, बाहुल्यात् बहुत्वेन सुलभत्वात्। न मुख्यक्षयः मुख्यक्षयस्तु न प्रतिसन्धातुं शक्यः। तत्र हेतु

माह–सहस्रेषु हीति। बहुषु पुरुषाणां सहस्रेषु मध्ये, मुख्य एको भवति न वा अतिदुर्लभ इत्यर्थः। स कथम्भूतः, सत्त्वप्रज्ञाधिक्यादाश्रयत्वात् क्षुद्रकाणां सत्त्वप्रज्ञातिशययोनिमित्तां क्षुद्रकाश्रयत्वयोग्यतां प्राप्य स्थित इत्यर्थः। इति शब्दो वाक्यार्थहेतुत्वे।

इत्थं दैवपीडनं निरूप्य मानुषपीडनं निरूपयति–स्वचक्रपरचक्रयोरिति। तयोर्मध्ये, स्वचक्रं स्वबलम्, अतिमात्राभ्यां सीमातिगाभ्यां, दण्डकराभ्यां पीडयति, अशक्यं च वारयितुं स्वामिप्रकृत्युत्पादितां पीडां कः प्रतिसमाधीतेत्यर्थः। 'अशक्यं वारयितुमि'त्यस्य स्थाने 'अशक्यप्रकृतिश्च' इति नयचन्द्रिकायाः पाठः। अप्रतिसमाधेयराजप्रकृतिरूपं च स्वचक्रं भवतीति

This explains the consequences of epidemics also.

Between the loss of petty labourers and their chieftains, the loss of petty labourers causes obstruction to the work, but the loss of the chieftains results in the absence of over all supervision, according to the view of preceptors.

'Not so'—says Kauṭalya. Loss of petty labourers could be remedied since they are available in large numbers, but not the loss of chieftains of labourers. A chieftain could be found only one among a thousand men, since he is the one possessed of excessive courage and wisdom and is the refuge of the ordinary labourers.

According to preceptors, between the troubles arising from one's own circle and one's enemy circle, those from one's own circle are doubly injurious and are irremediable whereas that from the enemy's circle can be fought or kept away by the intervention of an ally or by making peace.

नेति कौटल्यः। स्वचक्रपीडनं प्रकृतिपुरुषमुख्योपग्रहविघाताभ्यां शक्यते वारयितुम्, एकदेशं वा पीडयति। सर्वदेशपीडनं तु परचक्रं विलोपघातदाहविध्वंसनापवाहैः पीडयतीति।

प्रकृतिराजविवादयोः प्रकृतिविवादः प्रकृतीनां भेदकः पराभियोगानावहति। राजविवाद-स्तु प्रकृतीनां द्विगुणभक्तवेतनपरिहारकरो भवतीत्याचार्याः।

नेति कौटल्यः। शक्यः प्रकृतिविवादः प्रकृतिमुख्योपग्रहेण कलहस्थानापनयनेन वा वारयितुं, विवदमानास्तु प्रकृतयः परस्परसङ्घर्षेणोपकुर्वन्ति। राजविवादस्तु पीडनोच्छेदनाय प्रकृतीनां द्विगुणव्यायामसाध्य इति।

तदर्थो बोद्धव्यः। परचक्रं तु, शक्यं प्रतियोद्धुं प्रतियोधनेन वारयितुं शक्यम्, अपसारेण अन्यत्र गमनेन, सन्धिना वा दानपणनेन वा, मोक्षयितुं द्रोहारम्भान्निवर्तयितुं, शक्यम्। एवञ्च परचक्रपीडनात् स्वचक्रपीडनं गरीय इति भावः। इत्याचार्याः।

स्वचक्रपीडनं नाम प्रकृतिपुरुषमुख्यभूतानाममात्यादीनामानुकूल्यसम्पादनेन विघातोत्पादनेन च वारयितुं शक्यम्। एकदेशमेव च तद् धनधान्याद्याढ्यवन्तं प्रदेशं पीडयति, न तु सर्वदेशम्। परचक्रं तु द्रव्यलुण्टनैर्मनुष्यवधैर्गृहादिदाहभञ्जनैः स्वदेशादुत्सारणैश्च सर्वं देशं पीडयतीत्यतः परचक्रपीडनमेव स्वचक्रपीडनाद् गरीय इत्यभिप्रायकमाचार्यमतनिषेधपूर्वकमाह–नेति कौटल्य इत्यादि।

अथ प्रकृतिविवादराजविवादयोस्तारतम्यपरीक्षायामाचार्यमतमाह–प्रकृतीत्यादि। प्रकृतिराजविवादयोः प्रकृतिविवादः प्रकृतीनां परस्परविप्रतिपत्तिः राजविवादः राज्ञोः परस्परविप्रतिपत्तिः तयोर्मध्ये, प्रकृतिविवादः, प्रकृतीनां भेदकः परस्परभेदहेतुः, अत एव पराभियोगान् शत्रूद्योगान्, आवहति। राजविवादस्तु, प्रकृतीनां, द्विगुणभक्तवेतनपरिहारकरः भक्तवेतनद्वैगुण्यं करमोक्षणं च करोति ततश्च प्रकृत्यनुकूलाद् राजविवादात् तत्प्रतिकूलः प्रकृतिविवादो गरीयानित्यर्थः। इत्याचार्यमतम्।

तत् प्रतिषेधति–नेति कौटल्य इत्यादि। शक्य इत्यादेरयमर्थः–प्रकृतिविवादः प्रकृतिमुख्यानुकूलकरणेन परस्परकलहकारणनिवारणेन वा वारयितुं शक्यः। किञ्च विवदमानाः प्रकृतयः परस्परस्पर्धया सातिशयमुप-

'Not so'—says Kauṭalya. Troubles from one's own circle could be prevented by arresting or destroying the leaders or they could hurt only a part of the country. (On the other hand) the circle of enemies could trouble the whole country by inflicting loss, destruction, by burning, devastation and plunder.

According to preceptors, between the quarrels among the people and among the kings, the quarrel among people brings about discussion and thereby enables the enemy to invade the country. But the quarrels among kings are productive of double pay and wages as well as remission of taxes to the people.

'Not so'—says Kauṭalya. It is easy to put down the dissension among people by arresting the chieftains and removing them from the spots of trouble, and the people in quarrel prove helpful to each other in a trouble some situation and thereby help the country. The quarrel among kings causes trouble and destruction to the people and requires double effort to effect a settlement.

देशराजविहारयोः देशविहारस्त्रैकाल्येन कर्मफलोपघातं करोति, राजविहारस्तु कारुशिल्पिकुशीलववाग्जीवनरूपाजीवावैदेहकोपकारं करोति इत्याचार्याः।

नेति कौटल्यः। देशविहारः कर्मश्रमवधार्थमल्पं भक्षयति, भक्षयित्वा च भूयः कर्मसु योगं गच्छति। राजविहारस्तु स्वयं वल्लभैश्च स्वयंग्राहप्रणयपण्यागारकार्योपग्रहैः पीडयतीति।

सुभगाकुमारयोः कुमारः स्वयं वल्लभैश्च स्वयंग्राहप्रणयपण्यागारकार्योपग्रहैः पीडयति। सुभगा विलासोपभोगेन। इत्याचार्याः।

कुर्वन्ति। राज्ञोर्विवादस्तु प्रकृतीनां शक्तिसिद्धिविघातलक्षणाय पीडनाय उच्छेदाय च कल्पते प्रकृतिविवादप्रशमनापेक्षितप्रयत्नाद्विगुणप्रयत्नप्रशमनीय इत्ययमेव गरीयानिति।

देशविहारराजविहारयोर्गुरुलघुभावं निरूपयन्नाचार्यमतमाह–देशराजविहारयोरिति। देशविहारो देशीयजनक्रीडा राजविहारो राजक्रीडा तयोर्मध्ये, देशविहारः, त्रैकाल्येन कर्मफलोपघातं करोति कृतवापसस्यानवेक्षणात् तत्कालकरणीयवापाकरणात् करिष्यमाणवापानुकूलक्षेत्रसंस्काराकरणाच्च कालत्रयेऽपि कृषिफलमुपहन्ति। राजविहारस्तु, कारुशिल्पिकुशीलववाग्जीवनरूपाजीवावैदेहकोपकारं करोति, तत्र

कारवस्तक्षादयः शिल्पिनः सूक्ष्मशिल्पकराः स्वर्णकारादयः कुशीलवाः गायकाः वाग्जीवनाः स्तुतिपाठकाः रूपाजीवा वेश्याः वैदेहकाः गन्धमाल्यादिविक्रयजीविनः। अतश्च देशविहार एव गरीयानित्यभिप्रायः। इत्याचार्याः।

तत् प्रतिषेधति–नेति कौटल्य इत्यादि। देशविहारस्तावत् कृष्यादिव्यापारानुष्ठानोत्पन्नश्रम-निवारणापेक्षितमल्पं कालमपहरति। अपहृत्य च भूयः कृष्यादिकर्मसु उद्योगं गमयति विहारवन्तं जनम्। राजविहारस्तु स्वयं राज्ञा राजवल्लभैश्च जानपदाननुज्ञातधनग्रहणलक्षणेन स्वयंग्राहेण आत्माभिरुचिकल्पितया पण्यशालया कार्यनिर्वर्तनार्थलञ्चग्रहणेन च पीडयतीति स एव पापीयानित्यर्थः।

सुभगाविहारकुमारविहारयोर्गुरुलघुभावं आचार्यमतमाह–सुभगाकुमारयोरिति। सुभगा देवी कुमारो युवराजः तयोर्मध्ये, कुमारः,स्वयं वल्लभैश्च स्वदयितजनैश्च स्वयंग्राहप्रणयपण्यागारकार्योपग्रहैः पीडयति, अर्थाज्जनान्।

According to Preceptors between a sportive king and a sportive country, a sportive country is ruinous to the results achieved, whereas a sporting king proves beneficial to artisans, carpenters, musicians, buffoons and traders.

'Not so'—says Kauṭalya. A country taking to sports for relaxation from labour causes only a trifling loss, and after enjoyment it resume the work. A sportive king causes oppression by showing indulgence to his courtiers, by seizing and begging and by obstructing work in the manufactories.

According to preceptors, between a favourite wife and a prince, the prince causes oppression by showing indulgence to his friends, by seizing and begging and by obstructing the work in manufactures. But a wife who is the favourite of the king will remain addicted to her amourous sports.

नेति कौटल्यः। शक्यः कुमारो मन्त्रिपुरोहिताभ्यां वारयितुं, न सुभगा बालिश्याद-नर्थ्यजनसंयोगाच्चेति।

श्रेणीमुख्ययोः श्रेणी बाहुल्यादनवग्रहा स्तेयसाहसाभ्यां पीडयति, मुख्यः कार्यानुग्रह-विघाताभ्याम् इत्याचार्याः।

नेति कौटल्यः। सुव्यावर्त्या श्रेणी समानशीलव्यसनत्वात्।, श्रेणीमुख्यैकदेशोपग्रहेण वा। स्तम्भयुक्तो मुख्यः परप्राणद्रव्योपघाताभ्यां पीडयतीति।

सन्निधातृसमाहर्त्रोः सन्निधाता कृतविदूषणात्ययाभ्यां पीडयति। समाहर्ता करणाधिष्ठितः प्रदिष्टफलोपभोगी भवति इत्याचार्याः।

सुभगा, विलासोपभोगेन क्रीडार्थेन भोगद्रव्येण गन्धमाल्यादिना, पीडयति। ततश्च कुमारनिमित्तकं पीडनं गुर्वित्यर्थः।

तन्निषिध्य स्वमतमाह–नेतीत्यादि। कुमारः, मन्त्रिपुरोहिताभ्यां, वारयितुं स्वयंग्राहादिभ्यो निवर्तयितुं,

शक्यः। सुभगा, न वारयितुं शक्या स्त्रीत्वादेव। हेत्वन्तरमप्याह–बालिश्याद् अनर्थ्यजनसंयोगाच्चेति। मौर्ख्याद् गायनवाग्जीवनकुशीलवादिसहवासाच्च।

श्रेणीनिमित्तपीडामुख्यनिमित्तपीडयोर्गुरुलघुभावे आचार्यमतमाह–श्रेणीमुख्ययोरिति। तयोर्मध्ये, श्रेणी आयुधीयकर्षकाणामन्योन्यसंगतानां सङ्घः, बाहुल्यात्, अन्वग्रहा वारयितुमशक्यतया निष्प्रतिबन्धा, स्तेयसाहसाभ्यां परधनप्रच्छन्नहरणात् परधनप्रसभहरणाच्च, पीडयति। मुख्यः, कार्यानुग्रहविधाताभ्याम् उत्कोचदाने कार्यसाधनेन तददाने कार्यविहननेन च, पीडयतीति।

तन्निषिध्य स्वमतमाह–नेतीत्यादि। श्रेणी, सुव्यावर्त्या सुखेन स्तेयादितो निवर्तयितुं शक्या, कुतः समानशीलव्यसनत्वात् श्रेण्यवयवतुल्यकृष्यादिवृत्तिव्यसनत्वात्, अर्थात् समानशीलव्यसनैरेव। श्रेणीमुख्यैकदेशोपग्रहेण वा श्रेणीमुख्याङ्गभूतपुरुषानुकूलनेन वा, सुव्यावर्त्येति सम्बध्यते। स्तम्भयुक्तः गर्वयुक्तः, मुख्यः, परप्राणद्रव्योपघाताभ्याम् अन्यजीवितहरणेनान्यद्रव्यहरणेन च, पीडयति। इति अतश्च मुख्यपीडैव गरीयसीत्यर्थः।

सन्निधातृपीडासमाहतृपीडयोर्गुरुलघुभावं चिन्तयन्नाचार्यमतमाह–सन्निधातृसमाहर्त्रोरिति। तयोर्मध्ये, सन्निधाता, कृतविदूषणात्ययाभ्यां कृतस्य भूषणादेर्दोषारोपेण कालातिक्रमकथनेन च, पीडयति। समाहर्ता, करणाधि–

'Not so'—says Kauṭalya. It is possible to prevent a prince with the help of ministers and priests, but not a favourite wife addicted to childishness and company of wicked people.

Preceptors are of the view that the troubles caused by a corporation of people cannot be suppressed and the one caused by a chieftain, corporate people could not be subdued since it consists of a number of men who may indulge in theft and violence, whereas a leader causes trouble by obstruction and destruction of work.

'Not so'—says Kauṭalya. It is very easy to avoid the trouble of the corporation since it has to follow the fortunes of the king like his rise and fall; or by arresting the leader or a part of the corporation itself. A leader having firm support is likely to cause oppression by injuring the life and property of others.

Preceptors are of the opinion that between a chamberlain and the collector of revenue, the chamberlain causes oppression by spoiling works and by imposing fines. But the collector of revenue makes use of the ascertained revenue in the department over which he presides.

नेति कौटल्यः। सन्निधाता कृतावस्थमन्यैः कोशप्रवेश्यं प्रतिगृह्णाति। समाहर्ता तु पूर्वमर्थमात्मनः कृत्वा पश्चाद् राजार्थं करोति, प्रणाशयति वा, परस्वादाने च स्वप्रत्ययश्चरतीति।

अन्तपालवैदेहकयोरन्तपालश्चोरप्रसङ्गदेयात्यादानाभ्यां वणिक्पथं पीडयति। वैदेहकास्तु पण्यप्रतिपण्यानुग्रहैः प्रसाधयन्ति इत्याचार्याः।

नेति कौटल्यः। अन्तपालः पण्यसम्पातानुग्रहेण वर्तयति। वैदेहकास्तु सम्भूय पण्यानामुत्कर्षापकर्षं कुर्वाणाः पणे पणशतं कुम्भे कुम्भशतम् इत्याजीवन्ति।

ष्ठितः संख्यायकाधिष्ठितः, प्रदिष्टफलोपभोगी स्वक्लृप्तवेतनमात्रभोक्ता, भवति, अत एव न पीडाकर इत्यभिप्रायः। इत्याचार्याः।

आचार्यमतं निषिध्य स्वमतमाह-नेति कौटल्य इत्यादि। सन्निधाता, अन्यैः कृतावस्थम् अन्यैः परीक्षकैः सुपरीक्ष्य ग्राह्यत्वेन निर्णीतं, कोशप्रवेश्यं भाण्डागारस्थापनीयं वस्तु, प्रतिगृह्णाति, न तु तस्य ग्राह्यत्वाग्राह्यत्वनिषये स प्रमाणमित्यर्थः। एवञ्च स न पीडाकरः किन्तु समाहर्तैवेत्यभिप्रायेणाह-समाहर्ता त्विति। सः, पूर्वं प्रथमम्, आत्मनः अर्थं कृत्वा अपीडनार्थमुत्कोचद्रव्यं गृहीत्वा, पश्चाद् राजार्थं, करोति उत्थापयति, प्रणाशयति वा स्वयमपहरति वा। प्रणाशनसम्भावनार्थमाह-परस्वादाने चेति। परस्वस्य करभूतस्य ग्रहणे च, स्वप्रत्ययः आत्मप्रमाणकः, चरति। इतिशब्दो हेत्वर्थः। एवञ्च समाहर्तैव पीडाकर इत्यभिप्रायः।

अन्तपालवैदेहकपीडां प्रत्याह-अन्तपालवैदेहकयोरिति। तयोर्मध्ये, अन्तपालः, चोरप्रसङ्गदेयात्यादानाभ्यां चोरप्रसङ्गेन स्वप्रसञ्जितचोरद्वारार्थापहरणेन देयात्यादानेन देयस्य पथिकदेयस्य वर्तनीरूपस्यातिमात्रग्रहणेन च, वणिक्पथं पीडयति। वैदेहकास्तु, पण्यप्रतिपण्यानुग्रहैः पण्ये पणनीयपदार्थे प्रतिपण्ये पण्यमूल्यप्रतिनिधिभूते पदार्थे च अनुग्रहैः लाभकल्पनैः प्रसाधयन्ति वणिक्पथं वर्धयन्ति इत्याचार्याः।

तन्मतं निषिध्य स्वमतमाह-नेतीत्यादि। अन्तपालः, पण्यसम्पातानुग्रहेण पण्यानां सम्भूयागमनं पण्यसम्पातः तेन तन्निमित्ता वर्तनीह लक्ष्यते, तस्याम् अनुग्रहेण लाभकरणेन, वर्तयति अर्थात् वणिक्पथम्।

'Not so'—says Kauṭalya. The chamberlain appropriates the wealth presented by others to be entered into the treasury. The collector makes his own revenue first and then that of the king, or he destroys the revenue of the king and proceeds at his will to seize the property of others.

According to preceptors between the superintendent of the boundary and a trader, the superintendent of the boundary destroys traffic by permitting thieves and taking taxes more than what is due. The traders makes the country prosperous by a favourable barter of commercial goods.

'Not so'—says Kauṭalya. The superintendent of the boundary favours commercial traffic by welcoming the arrival of merchandise. But the traders join together in causing rise and fall in the value of articles and live by making profits cent per cent in paṇas and cent per cent by kumbhas (measure of grains).

अभिजातोपरुद्धा भूमिः पशुव्रजोपरुद्धा वेति। अभिजातोपरुद्धा भूमिः महाफलाप्यायुधीयोपकारिणी न क्षमा मोक्षयितुं व्यसनाबाधभयात्। पशुव्रजोपरुद्धा तु कृषियोग्या क्षमा मोक्षयितुं, विवीतं हि क्षेत्रेण बाध्यते। इत्याचार्याः।

नेति कौटल्यः। अभिजातोपरुद्धा भूमिरत्यन्तमहोपकारापि क्षमा मोक्षयितुं व्यसनाबाधभयात्। पशुव्रजोपरुद्धा तु कोशवाहनोपकारिणी न क्षमा मोक्षयितुमन्यत्र सस्यवापोपरोधादिति।

वैदेह कास्तु, सम्भूय संहता भूत्वा, पण्यानाम् उत्कर्षापकर्षं कुर्वाणाः स्वपण्यविक्रये मूल्योत्कर्षं परपण्यक्रयणे मूल्यापकर्षं च कल्पयन्तः, पणे पणशतम् एकस्मिन् पणे पणानां शतं, कुम्भे कुम्भशतम् एकस्मिस्तैलादिकुम्भे तत्कुम्भशतम्, इति आजीवन्ति अनेन प्रकारेण बहुगुणं लाभं गृह्णन्ति। अतो वणिज एव पीडाकरा इत्यभिप्रायः।

भूमेः पीडाहेतुभूताया मोक्षणीयत्वामोक्षणीयत्वे चिन्तयति–अभिजातोपरुद्धेति। विजिगीषुकुलीनाधिगता, भूमिः, मोक्षयितव्येति शेषः। पशुव्रजोपरुद्धा वा मोक्षयितव्या, इति विचार्यत इति शेषः। तत्राचार्यमतमाह–अभिजातोपरुद्धा भूमिः, महाफलापि प्रभूतधान्यफलदायिकापि, आयुधीयोपकारिणी आयुधीयदानेनोपकर्त्री, अत एव मोक्षयितुं न क्षमा। कुतः, व्यसनाबाधभयात् व्यसने शत्र्वाक्रमणे च आबाधः आयुधीयव्यपगमनिमित्ता पीडा तद्भयात्। पशुव्रजोपरुद्धा तु कृषियोग्या धान्यादिप्रसवार्हा, अत एव मोक्षयितुं क्षमा। पशुभोग्यविवीत-स्थानभूता भूमिः किमिति विवीतत्वबाधनेन धान्योत्पत्तिक्षेत्रतामापाद्यत इत्यत्राह -विवीतं हि क्षेत्रेण बाध्यत इति। विवीतं तृणाद्युत्पत्तिभूमिः, क्षेत्रेण सस्यवापेन, बाध्यते प्रयोजनगौरवादित्यर्थम्।

आचार्यमतं निषेधति–नेति कौटल्य इति। अभिजातोपरुद्धा भूमिरतिमहान्तं सस्योपकारमादधानापि मोक्षणीयैव, अन्यथा व्यसने रन्ध्रान्वेषिणाभिजातेनैव आबाध उत्पाद्येतेति भयात्। पशुव्रजोपरुद्धा तु कोशसंग्राह्यघृतादिदानेन बलीवर्दादिवाहनदानेन चोपकारिणी अत एव मोक्षयितुं न क्षमा समीपावस्थितसस्यवापक्षेत्रोपघाताभावे इत्येवंरूपं स्वमतमाह–अभिजातोपरुद्धेत्यादि।

Which is preferable :—land occupied by high-born persons or land kept for grazing a block of cattle! Preceptors are of the view that—the land occupied by high born people is very productive and provides men for the army and hence it is not easy to be freed for fear of the attacking forces. But the land held for grazing a block of cattle is also cultivable and deserves to be freed; for cultivable land is preferred to pasture land.

'Not so'—says Kauṭalya. The land occupied by a high-born deserves to be freed for fear of causing troubles by the very person in exigencies. But the land held for grazing a flock of cattle is productive of money and beasts and does not therefore deserve to be confiscated unless cultivation of crops is prevented.

प्रतिरोधकाटविकयोः प्रतिरोधका रात्रिसत्रचराः शरीराक्रमिणो नित्याः शतसहस्रा-पहारिणः प्रधानकोपकाश्च। व्यवहिताः प्रत्यन्तारण्यचराश्चाटविकाः प्रकाशा दृश्याश्चरन्त्येक-देशघातकाश्च। इत्याचार्याः।

नेति कौटल्यः। प्रतिरोधकाः प्रमत्तस्यापहरन्ति, अल्पाः कुण्ठाः सुखा ज्ञातुं ग्रहीतुं च। स्वदेशस्थाः प्रभूता विक्रान्ताश्चाटविकाः। प्रकाशयोधिनोऽपहर्तारो हन्तारश्च देशानां राजसधर्माण इति।

मृगहस्तिवनयोः मृगाः प्रभूताः प्रभूतमांसचर्मोपकारिणो मन्द-

प्रतिरोधकाटविकयोः पीडामधिकृत्याचार्यमतमाह–प्रतिरोधकाटविकयोरित्यादि। प्रतिरोधकाः,

रात्रिसत्रचराः रात्रिचारिणो वनगहनचारिणश्च, शरीराक्रमिणः परशरीरहिंसिनः शरीरं शरीरमात्रमर्थादसहायं जनं यं यं पश्यन्ति तं तमाक्रमितुं शीलमेषामिति तथाभूता इत्यर्थः, नित्याः सर्वदा सन्निहिताः, शतसहस्रापहारिणः हिरण्यादिलक्षापहारिणः, प्रधानकोपकाश्च प्रधानान् राष्ट्रमुख्यान् महाधनिकान् कोपयन्ति उपघ्नन्तीति तथाभूताश्च। व्यवहिता दूरस्थाः, दूरस्थत्वमेव विवृणोति–प्रत्यन्तारण्यचराश्च विषयान्तवनचारिणश्च, आटविकाः, प्रकाशाः सर्वजनविदिताः, दृश्याः दृष्टिविषयाः, चरन्ति। एतेन तत्पीडनीयानामपसरणसौकर्यमुक्तम्। एकदेशघातकाश्च कतिपयघातिनो न सर्वघातिनः। एवञ्च प्रतिरोधका गुरुपीडाकराः आटविका लघुपीडाकरा इत्यभिप्रायः। इत्याचार्याः।

तन्मतं निराकरोति–नेति कौटल्य इति। प्रतिरोधकाः, प्रमत्तस्य धनरक्षणानवहितस्य, अपहरन्ति अर्थाद् धनम्, अल्पाः असहायचराः, अत एव कुण्ठाः कुण्ठितप्रसराः, ज्ञातुं, ग्रहीतुं च नन्धुं च, सुखाः अनायासशक्याः। सुखमिति पाठे सामान्ये नपुंसकम्। आटविकेषु विशेषमाह–आटविकाः स्वदेशस्थाः, न तु प्रतिरोधका इव देशान्तरगमनसापेक्षाः, प्रभूताः अनल्पाः, विक्रान्ताश्च विक्रमवत्तया दुर्ग्रहाश्च। किञ्च राजान इव ते निरङ्कुशाः प्रकाशमेव युद्धं कृत्वा देशीयजनानां द्रव्यं प्राणांश्च हरन्तीत्याह प्रकाशयोधिन इत्यादि। ततश्चाटविकपीडैव गरीयसीत्यभिप्रायः।

मृगवनाद्धस्तिवनं पीडने गरीय इत्यभिप्रायकमाह–मृगहस्तिवनयोरित्यादि। प्रभूताः प्रचुराः हस्त्यपेक्षया। मन्दग्रासावक्लेशिनः अल्पाहाराः

Preceptors say that :—between robbers and wild tribes, robbers are bent on kidnapping women at night, make assault on men and take away hundreds and thousands of paṇas and to trouble the chieftains. Wild tribes living under a leader and moving in the neighbouring forests can be seen here and there and doing partial destruction.

'Not so'—says Kauṭalya. Robbers carry away the property of those who are careless and can be put down as they are easily recognised and caught hold of. But wild tribes have their own strong holds, and being numerous and brave, ready to fight in broad day light and seizing and destroying countries like kings.

Between the forests of beasts and of elephants, that of beasts are numerous and productive of plenty of flesh and skins; they arrest the growth of grass and are easily countrolled. On the other hand elephants are of reverse nature and are observed as destroying countries even after being captured and tamed.

ग्रासावक्लेशिनः सुनियम्याश्च। विपरीता हस्तिनो गृह्यमाणाः दुष्टाश्च देशविनाशायेति।

स्वपरस्थानीयोपकारयोः स्वस्थानीयोपकारो धान्यपशुहिरण्यकुप्योपकारो जानपदानामापद्यात्मधारणः। विपरीतः परस्थानीयोपकारः। इति पीडनानि।

आभ्यन्तरो मुख्यस्तम्भो बाह्यो मित्राटवीस्तम्भः। इति स्तम्भवर्गः।

ताभ्यां पीडनैर्यथोक्तैश्च पीडितः सक्तो मुख्येषु परिहारोपहतः प्रकीर्णो मिथ्यासंहृतः सामन्ताटवीहृत इति कोशसङ्गः।।

अत एव घातने सुलभक्लेशाः अत एवानुधावितृसुग्रहा इत्यर्थः। सुनियम्याः गृहीताश्च सुखेन वशयितुं शक्याः। विपरीताः मृगोक्तगुणविपरीतगुणाः अल्पसंख्या अल्पमांसचर्मोपकारिणः अमिताहारतयानवक्लेशिनो दुर्दमाश्चेत्यर्थः। गृह्यमाणा दुष्टाश्च देशविनाशायेति। गृह्यमाणा हस्तिनो दुष्टाश्चेत्, लोकं विनाशयन्ति।

स्वनगरोपकारपरनगरोपकारयोराद्य उपकर्तुर्गुणावहः, द्वितीयः पीडावह इत्याह–स्वपरस्थानीयोपकारयोरिति। तयोः, स्वस्थानीयोपकारः, जानपदानां, धान्यपशुहिरण्यकुप्योपकारः धान्यपश्वादिक्रयविक्रयव्यवहाररूपः, आपदि दुर्भिक्षादिविपत्समये, आत्मधारणः स्वप्राणधारणहेतुः। परस्थानीयोपकारः परस्थानीये स्वेन प्रयुक्तो धान्यादिक्रयविक्रयव्यवहारः, विपरीतः परवृद्धिहेतुत्वादात्मपीडावह इत्यर्थः। इति पीडनानीति। एवं देशपीडनवर्गो व्याख्यात इत्यर्थः।

अथ स्तम्भनवर्ग इति सूत्रम्। राष्ट्रमुख्याद्यैः प्रत्यूहोक्तया राजार्थोपरोधः स्तम्भनं तत्सबद्धो वर्ग उच्यत इति सूत्रार्थः। जनपददुर्गव्यसनकथनानन्तरं क्रमप्राप्तं कोशव्यसनमनेन सूत्रेणोत्तरेण चाभिधीयते।

राष्ट्रमुख्यकृतः स्तम्भ आभ्यन्तर इति मित्राटविककृतः स्तम्भो बाह्य इति च स्तम्भो द्विप्रकार इत्याह–आभ्यन्तर इत्यादि। इति स्तम्भवर्ग इति। व्याख्यात इति शेषः।

कोशसङ्गवर्ग इति सूत्रम्। कोशस्य राजार्थस्य करादेः सङ्गः अप्रदानं भाण्डागारे प्रवेशाकरणं कोशसङ्गः तस्य वर्ग उच्यत इति सूत्रार्थः।

Between the benefits derived from one's own country and that from a foreign country, benefits derived from one's own country consists of grains, cattle, gold and raw materials which are useful for the people in calamities. But the benefit derived from a foreign country are of the reserved nature. Such is the group of molestations.

Obstructions to movements caused by a chief are internal, while the one caused by an enemy or a wild tribe is external obstruction. Such is the group of obstruction.

Financial problems due to the two kinds of obstruction and the molestations described above are stagnation of financial status, loss of wealth because of remission of taxes to favour leaders, scattered revenue, false account of the collection of revenue and the revenue left in the custody of a neighbouring king or of a wild tribe. These are the financial trouble.

पीडनानामनुत्पत्तौ उत्पन्नानां च वारणे।
यतेत देशवृद्ध्यर्थे नाशे च स्तम्भसङ्गयोः।।

।। इति कौटलीयार्थशास्त्रे व्यसनाधिकारिकेऽष्टमाधिकरणे चतुर्थोऽध्यायः
पीडनवर्गः स्तम्भनवर्गः कोशसङ्गवर्गः
आदितः विंशतिशततमः।।

ताभ्यामिति। आभ्यन्तरबाह्यस्तम्भाभ्यां, यथोक्तैः पीडनैश्च दैवमानुषरूपैः, पीडितः अल्पितः, मुख्येषु सक्तः करदेभ्यो गृहीत एव मुख्यैर्भक्षितत्वात् तेषु स्थितः, परिहारोपहतः परिहारेण राजशासननिमित्तकेन

कराग्रहणेन उपहत: विहतोत्थापन:, प्रकीर्ण: कणशस्तत इतो विक्षिप्तावस्थित:, मिथ्यासंहत: न्याय्यपरिमाणात् न्यूनतयाधिकतया वा संहत:, सामन्ताटवीहत: सामन्तैराटविकैश्चापहृत:। हृतस्थाने 'भृत' इत्यादर्शेषु पठ्यते। इति एम्प्रकारा:, कोशसङ्गा:।।

प्रान्ते श्लोकमाह–पीडनानामिति। तेषाम्, अनुत्पत्तौ उत्पत्तिप्रतिबन्धे, उत्पन्नाना पीडनानां, वारणे च यतेत राजा। किमर्थं, देशवृद्ध्यर्थम्। स्तम्भसङ्गयो: नाशे च, यतेत्, अर्थात् कोशवृद्ध्यर्थम्।।

इति कौटलीयार्थशास्त्रव्याख्यायां व्यसनाधिकारिकेऽष्टमाधिकरणे
चतुर्थोऽध्याय: पीडनवर्ग: स्तम्भनवर्ग: कोशसङ्गवर्ग:,
आदितो विंशत्यधिकशततम:।।

In order to achieve the property of the country one should try to avoid the cause of trouble, remedy them as and when they occur, avert obstructions and financial troubles.

Thus the One hundred and twentieth chapter of Arthaśāstra of Kauṭalya comes to an end. Here ends the fourth chapter of the eighth Adhikaraṇa dealing with the sections of Molestations, Obstructions and Financial troubles.

Chapter 121

133.134. प्रक० बलव्यसनवर्गः, मित्रव्यसनवर्गश्च।

Sections 133 : Troubles of the Army
134 : Troubles of a Friend

बलव्यसनानि। अमानितं विमानितम् अभृतं व्याधितं नवागतं दूरायातं परिश्रान्तं परिक्षीणं प्रतिहतं हताग्रवेगम् अनृतुप्राप्तम् अभूमिप्राप्तम् आशानिर्वेदि परिसृप्तं कलत्रगर्हि अन्तश्शल्यं कुपितमूलं भिन्नगर्भम् अपसृतम् अतिक्षिप्तम् उपनिविष्टं समाप्तम् उपरुद्धम् परिक्षिप्तं छिन्नधान्यपुरुषवीवधं स्वविक्षिप्तं मित्रविक्षिप्तं दूष्ययुक्तं दुष्टपार्ष्णिग्राहं शून्यमूलम् अस्वामिसंहतं भिन्नकूटम् अन्धमिति।

तेषाममानितविमानितयोरमानितं कृतार्थमानं युध्येत न विमानितमन्तःकोपम्।

अभृतव्याधितयोरभृतं तदात्वकृतवेतनं युध्येत, न व्याधितमकर्मण्यम्।

नवागतदूरायातयोर्नवागतमन्यत उपलब्धदेशमनवमिश्रं युध्येत, न दूरायातमायतगतपरिक्लेशम्।

बलव्यसनवर्ग इति सूत्रम्। बलस्य दण्डस्य यानि व्यसनानि तेषां वर्गः अभिधीयत इति सूत्रार्थः। कोशव्यसनानन्तरं क्रमप्राप्तं दण्डव्यसनमिहोच्यते।

बलव्यसनानीति। बलस्य व्यसनरूपा धर्मा उच्यन्त इति शेषः। तान् उद्दिशति–अमानितमित्यादि।

तेषां क्रमेण द्वयोर्द्वयोर्गुरुलघुभावं चिन्तयिष्यन् प्रथमस्य द्विकस्य तमादौ निरूपयति–तेषामिति। अमानितादिचतुस्त्रिंशद्विशेषयुक्तानां बलानां मध्ये, अमानितविमानितयोः अकृतार्थसत्कारस्यावहलितस्येत्यनयोर्द्वयोः, अमानितं, कृतार्थमानं तत्कालकृतार्थदानसत्कारं सद्, युध्येत। न विमानितमन्तःकोपमिति। विमानितं तु हृदयनिहितस्वावज्ञामर्षं न युध्येत।

अभृतव्याधितयोरित्यादि। अदत्तवेतनरोगिणोर्मध्ये। तदात्वकृतवेतनं तत्कालदत्तवेतनं सत्। अकर्मण्यं कर्माक्षमम्।

नवागतदूरायातयोरित्यादि। नवागतमचिरायातं दूरायातं दूरादागतं तयोर्मध्ये;नवागतम्, अन्यत्र

उपलब्धदेशं स्वतो देशानभिज्ञमपि नवेतरेभ्यो विज्ञातदेशम्, अनवमिश्रं नवेतरसहितं, युध्येत। न दूरायातमायतगतपरिक्लेशमिति। दूरायातं दीर्घाध्वगमनपरिखिन्नत्वान्न युध्येत।

The troubles of the army are (as follows :)—disrespected,; dishonoured; unpaid; diseased; freshly arrived; made a long journey; tired; fatigued; repelled; with defeated vanguard; suffering from inclemency of seasons; arrived at an unsuitable ground; disappointed; scattered; despised by wives; having many traitors; with provoked base, with concealed dissensions, arrived from a foreign country, serving in many countries; trained for special encampment; trained for a particular movement; obstructed; surrounded; with supply of grains, its men and stores cut off; kept in one's own country; kept under the protection by an ally; having inimical persons; afraid of a rear enemy; with communication network cut off; lost its commander; without a proper leader and blind (untrained).

Of the disrespected and dishonoured among these the disrespected may be taken to fight after honouring them suitably, but not the dishonoured ones.

Of unpaid and diseased armies, unpaid may be taken to fight after making full payment, but not the diseased one which is of no use.

Of the freshly arrived and long-travelled armies that which has freshly arrived may be taken to fight after taking proper position and unmixed with other soldiers, but not the long-travelled and fatigued army.

परिश्रान्तपरिक्षीणयोः परिश्रान्तं स्नानभोजनस्वप्नलब्धविश्रमं युध्येत, न परिक्षीण-मन्यत्राहवे क्षीणयुग्यपुरुषम्।

प्रतिहतहताग्रवेगयोः प्रतिहतमग्रपातभग्नं प्रवीरपुरुषसंहतं युध्यते, न हताग्रवेगमग्रपात-हतप्रवीरम्।

अनृत्वभूमिप्राप्तयोरनृतुप्राप्तं यथर्तुयोग्ययुग्यशस्त्रावरणं युध्येत, नाभूमिप्राप्तमवरुद्ध-प्रसारव्यायामम्।

आशानिर्वेदिपरिसृप्तयोराशानिर्वेदि लब्धाभिप्रायं युध्येत, न परिसृप्तमपसृतमुख्यम्।

कलत्रगर्ह्यन्तश्शल्ययोः कलत्रगर्ह्युन्मुच्य कलत्रं युध्येत, नान्तश्शल्यमन्तरमित्रम्।

परिश्रान्तपरिक्षीणयोरित्यादि। असुखाहारदूरगतागतादिपरिखिन्नं परिश्रान्तं युद्धान्तरक्षीणयुग्यपुरुषं परिक्षीणं तयोर्मध्ये। अन्यत्राहवे अन्यस्मिन् युद्धे।

प्रतिहतहताग्रवेगयोरिति। प्रतिहतं युद्धारम्भ एव प्राप्तभङ्गं हताग्रवेगं हतः प्रवीरपुरुषवधकुण्ठितः अग्रवेग प्राथमिको युद्धसम्पातोत्साहो यस्य तत् तथाभूतं तयोर्मध्ये, प्रतिहतम्, अग्रपातभग्नमिति तद्विवरणं, प्रवीरपुरुषसंहतं प्रवीरपुरुषमिलितं, युध्येत। हताग्रवेगम्, अग्रपातहतप्रवीरमिति तद्विवरणं, न युध्येत।

अनृत्वभूमिप्राप्तयोरित्यादि। अनृतुप्राप्तम् अलब्धयुद्धयोग्यर्तुकम् अभूमिप्राप्तं सैन्यव्यायामानर्हभूमिप्रातं तयोर्मध्ये, अनृतुप्राप्तं, यथर्तुयोग्ययुग्यशस्त्रावरणं यथोपस्थितर्त्वर्हवाहनायुधकवचादियुक्तं सत्, युध्येत। अभूमिप्राप्तं तु, अवरुद्धप्रसारव्यायामं न युध्येत उपरुद्धसर्वतोगतिकत्वादुपरुद्धयुद्धकर्मत्वाच्च न योद्धुमर्हेत्।

कामनाविषयवस्त्वलाभप्राप्तनैराश्यमाशानिर्वेदि मुख्यवर्जितं परिसुप्तं तयोर्मध्ये आशानिर्वेदि बलम् आसादितपुनराशा स्थानं भूत्वा युध्येत, न तु परिसुप्तं प्रधानापेतत्वादित्याह–आशानिर्वेदीत्यादि। अपसृतमुख्यमितिपरिसृप्तपदार्थव्याख्यानम्। एवमुत्तरेष्वपि बोध्यम्। अपसृतमित्यपपाठः।

कलत्रगर्ह्यन्तःशल्ययोरिति। कलत्रं लक्षणया पोष्यवर्गं गर्हति 'एष मे युद्धकर्मपरिपन्थी रक्षाभार' इति निन्दतीति कलत्रगर्हि, अन्तरमित्रमन्तः शल्यं तयोर्मध्ये, कलत्रगर्हि, कलत्रम् उन्मुच्य समुचिते रक्षास्थानेऽवस्थाप्ययुध्येत। अन्तःशल्यम्, अन्तरमित्रम् अन्तर्गतशत्रुकं, न युध्येत।

Of tired and reduced armies, the tired one may be taken to fight after it has refreshed itself by bathing, eating and sleeping, but not the reduced army with fatigued soldiers.

Of armies which have either been repelled or have their vanguard destroyed, that which has been repelled may be taken to fight along with the addition of fresh soldiers, but not the army which has lost many of its brave men in a frontal attack.

Of armies either suffering due to unsuitable season or driven to an unsuitable ground that which is suffering from wrong seasons may be taken to fight after providing with weapons and dress suitable to the seasons, but not an army on an unfavourable ground obstructing its movements.

Of disappointed and renegade armies, that which is disapointed may be taken to fight but not the army which has run away on a previous occasion.

Of soldiers who are attached to their wives or are under an enemy, those attached to wives may be taken to fight, but not an army with dissidents who are like internal enemies.

कुपितमूलभिन्नगर्भयोः कुपितमूलं प्रशमितकोपं सामादिभिर्युध्येत, न भिन्नगर्भम-न्योन्यस्माद भिन्नम्।

अपसृतातिक्षिप्तयोरपसृतमेकराज्यातिक्रान्तम् मन्त्रव्यायामाभ्यां सत्रमित्रापाश्रयं युध्येत, नातिक्षिप्तमनेकराज्यातिक्रान्तं बह्वाबाधत्वात्।

उपनिविष्टसमाप्तयोरुपनिविष्टं पृथग्यानस्थानमतिसन्धातारं युध्येत, न समाप्तमरिणैक-स्थानयानम्।

उपरुद्धपरिक्षिप्तयोरुपरुद्धमन्यतो निष्क्रम्योपरोद्धारं प्रतियुध्येत, न परिक्षिप्तं सर्वतः प्रतिरुद्धम्।

छिन्नधान्यपुरुषवीवधयोः छिन्नधान्यमन्यतो धान्यमानीय जङ्गमस्थावराहारं वा युध्येत, न छिन्नपुरुषवीवधमनभिसारम्।

कुपितमूलं क्रुद्धप्रधानकं भिन्नगर्भं परम्परभिन्नगर्भितं तयोर्मध्ये, कुपितमूलं, सामादिभिः प्रशमितकोपं सद् युध्येत, नतु भिन्नगर्भमित्याह–कुपितमूलभिन्नगर्भयोरित्यादि।

एकस्मिन् राज्येऽतिक्रान्तं बलैर्विप्रकृतं यत् तदपसृतमुच्यते। अनेकेषु राज्येष्वतिकान्तं बलैः कृतभङ्गं यत् तद् अतिक्षिप्तमुच्यते। तयोर्मध्ये अपसृतं शास्त्रदृष्टोपायचिन्तालक्षणेन मन्त्रेण शिक्षाविशेषलक्षणेन व्यायामेन च अरण्यं मित्रं चापाश्रित्य युध्येत, न तु अतिक्षिप्तम्, अनेकराज्यानुभूतबहुपीडत्वादित्याह– अपसृतातिक्षिप्तयोरित्यादि। सत्रम् अरण्यम्।

शत्रोः समीपे यन्निविष्टं न शत्रुणा सह निविष्टम् अर्थाच्छत्रुसम्बद्धस्वीययानस्थानं, तद् उपनिविष्टम्। यच्छत्रुणा सह तुल्यस्थानयानं तत् समाप्तम्। तयोर्मध्ये उपनिविष्टं बलं स्वातिसन्धातारं शत्रुं प्रति युध्येत पृथग्यानस्थानस्यात्मनो रन्ध्रं स न जानातीति कृत्वा। न तु समाप्तं स्वातिसन्धातारं शत्रुं प्रति युध्येत स्वस्यारिणा सहैकस्थानयानस्य रन्ध्रं सं जानातीति कृत्वेत्याह–उपनिविष्टसमाप्तयोरित्यादि।

एकतः प्रतिरुद्धमुपरुद्धं सर्वतः प्रतिरुद्धं परिक्षिप्तम्। तयोर्मध्ये उपरुद्धम् उपरोधदेशेतरदेशतो निर्गत्योपरोद्धारं प्रति युध्येत, न पुनः परिक्षिप्तमित्याह–उपरुद्धपरिक्षिप्तयोरित्यादि।

विच्छिन्नस्वदेशधान्यागमं छिन्नधान्यम् उच्यते, विच्छिन्नस्वदेशयौधपुरुषशिक्यादिभारागमं छिन्नपुरुषवीवधम्। तयोर्मध्ये छिन्नधान्यमन्यदेशाद् व्रीह्यादिधान्यमानीय वा युध्येत्, मृगादिजङ्गममांसाहारं वृक्षादिस्थावरफला-

Of provoked and secretly disunited armies, that of which a part is provoked may be taken to fight after pacifying it by conciliation but not the secretly disunited army the members of which are estranged from each other.

Of armies which have left service either in one state or in many states, that whose termination of service in a foreign state is not due to instigation or conspiracy may be taken to fight under the leadership of spies and friends, but not the army which has resigned its service in many states and is therefore dangerous.

Of armies trained in a particular type of fight or to a particular movement in a particular place, the one trained in a particular type may be taken to fight but not the one trained to a particular place.

Of obstructed and surrounded armies, that which is prevented from moving to a particular direction may be taken to fight against an enemy in another direction, but not an army whose movements are prevented on all sides.

Of troops whose provisions of grains is cut off as also its supply of men and stores, that which has lost its supply of grains may be taken to

fight after providing the grains brought from another place, but not the army to which men and provisions cannot be supplied.

स्वविक्षिप्तमित्रविक्षिप्तयोः स्वविक्षिप्तं स्वभूमौ विक्षिप्तं सैन्यमापदि शक्यमवस्त्रावयितुं, न मित्रविक्षिप्तं-विप्रकृष्टदेशकालत्वात्।

दूष्ययुक्तदुष्टपार्ष्णिग्राहयोर्दूष्ययुक्तमाप्तपुरुषाधिष्ठितमसंहतं युध्येत, न दुष्टपार्ष्णिग्राहं पृष्ठाभिघातत्रस्तम्।

शून्यमूलास्वामिसंहतयोः शून्यमूलं कृतपौरजानपदारक्षं सर्वसन्दोहेन युध्येत, नास्वामिसंहतं राजसेनापतिहीनम्।

भिन्नकूटान्धयोर्भिन्नकूटमन्याधिष्ठितं युध्येत, नान्धमदेशिकमिति।।

दोषशुद्धिर्बलावापः सत्रस्थानातिसंहितम्।
सन्धिश्चोत्तरपक्षस्य बलव्यसनसाधनम्।।

द्याहारं च भूत्वा वा युध्येत, न तु छिन्नपुरुषवीवधमसहायमित्याह-छिन्नधान्यपुरुषवीवधयोरित्यादि।

स्वभूमौ कार्यार्थं तत इतः प्रेशितं स्वविक्षिप्तमुच्यते, मित्रभूमौ तत्कार्यार्थं प्रेषितं मित्रविक्षिप्तम्। तयोर्मध्ये स्वविक्षिप्तं विप्रकृष्टदेशस्थत्वेन सन्निधानविलम्बित्वादित्याह-स्वविक्षिप्तमित्रविक्षिप्तयोरित्यादि।

राज्योपघातिनो मुख्या हि दूष्याः, तैर्युक्तं दूष्ययुक्तमुच्यते। पृष्ठाभिधातरन्ध्रान्वेषिपार्ष्णिग्राहम्। तयोर्मध्ये दूष्ययुक्तं दूष्योपजीव्यस्वविश्वस्तपुरुषाधिष्ठितं दूष्यान्तरासंहतं सद् युध्येत, न तु दुष्टपार्ष्णिग्राहं पृष्ठाभिघातमयग्रस्तत्वादित्याह-दूष्ययुक्तदुष्टपार्ष्णिग्राहयोरित्यादि।

निरवशेषसैन्यसन्दोहेन प्रस्थितं शून्यमूलमुच्यते, राज्ञा सेनापतिना वानधिष्ठितम् अस्वामिसंहतम्। तयोर्मध्ये शून्यमूलं पौरजानपदकृतपरिरक्षं भूत्वा सर्वसन्दोहेन युध्येत, न पुनरस्वामिसंहतमनायकत्वादित्याह-शून्यमूलास्वामिसंहतयोरित्यादि।

भिन्नकूटान्धयोरिति। कूटं शृङ्गं तत्स्थानीयः सर्वसेनाध्यक्षः तद्रहितं भिन्नकूटम्, अन्धे शत्रुवृत्तिज्ञानशून्यं, तयोर्मध्ये भिन्नकूटम् अन्याधिष्ठितम् अन्येन प्रधानेनाध्यक्षितं भूत्वा युध्येत। अदेशिकम् उपदेष्टृरहितम् अन्धं न बुध्येत। इतिशब्दो बलव्यसनस्वरूपादिनिरूपणसमाप्त्यर्थः।।

उक्तानां बलव्यसनानां परिहारोपायानाह-दोषशुद्धिरिति। अमाननविमाननादीनां दोषाणां प्रायश्चित्तविधानं दोषशुद्धिः, बलावापः निर्दोषस्य

Of the armies kept in one's own country or under the protection of an ally, that which is kept in one's own region can easily be disbandled in times of calamity, but not the army under the protection fo an ally, as it is far removed in place and time.

Of armies either infiltrated with trators, or frightened by an enemy in the rear, that which is full of trators may be taken to fight apart under the leadership of a trusted commander, but not the army which is afraid of an attack from the rear.

Of the armies that has lost its base for want of leaders and one organised without a king or chief of the army, the former one under the protection of the citizens may be taken to fight, but not the army without a king or chief to lead.

Of troops which have lost their leader or which are not trained, those that have lost the leader may be taken to fight under the command of a new person but not the troops which are not trained.

Removal of vices. recruitment of new men, keeping away from likely places of ambush by the enemy, means to overecome the enemies, making peace with the stronger adversary, are the means of protection the army from troubles.

रक्षेत् स्वदण्डं व्यसने शत्रुभ्यो नित्यमुत्थितः।
प्रहरेद् दण्डरन्ध्रेषु शत्रूणां नित्यमुत्थितः।।
अभियातं स्वयं मित्रं सम्भूयान्यवशेन वा।
परित्यक्तमशक्त्या वा लोभेन प्रणयेन वा।।
विक्रीतमभियुञ्जाने सङ्ग्रामे वापवर्तिना।
द्वैधीभावेन वा मित्रं यास्यता वान्यमन्यतः।।

बलस्य बलान्तरेण सहावस्थापनं, सत्रस्थानातिसंहित सत्रस्थानमरण्यस्थितिः अतिसंहितं कपटोपायैः शत्रुबलातिसन्धानं च, अतिसंधानामित्यपि पाठः। उत्तरपक्षस्य सन्धिश्च बलाधिकप्रतिपक्षेण सन्धिकरणं च, बलव्यसनसाधनं बलव्यसनानां परिहारोपायः।।

उपदेष्टव्यशेषमाह–रक्षेदिति। नित्यमुत्थितः नित्योद्योगी सन्, व्यसने, स्वदण्डं स्वबलं, शत्रुभ्यो रक्षेत्। तथाभूत एव सन्, शत्रूणां, दण्डरन्ध्रेषु सैन्यच्छिद्रेषु, प्रहरेत्।।

इत्थं बलव्यसनं निरूपितम्। अथ मित्रव्यसने निरूपणीये सूत्रम्–मित्रव्यसनवर्ग इति। मित्रसंबन्धिनां व्यसनानां वर्ग उच्यत इति सूत्रार्थः।

तमेवाह–अभियातमिति। स्वयं स्वकार्यार्थे वा, संभूय समुदायेन सह तदर्थे समवेत्य वा, अन्यवशेन वा स्वबन्ध्वादिकार्यवशेन वा, अभियातं शत्रौ कृताभियोगं, मित्रम्, अशक्त्या वा शक्तिविरहेण वा, लोभेन वा शत्रुसकाशाद् धनग्रहणेन वा, प्रणयेन वा शत्रौ स्नेहेन वा, परित्यक्तम् अकृतसाहाय्यम् अर्थाद् विजिगीषुणा, यद् यथोक्तास्ववस्थासु यथाशक्ति साह्ये कर्तव्ये विजिगीषुणात्मदोषादुपेक्षितं, तत् तथाविधं मित्रमिति श्लोकार्थः। तस्य च 'कृच्छ्रेण साध्यते' इति वक्ष्यमाणेन सम्बन्धः। एवमुत्तरत्रापि बोद्धव्यम्। अयमेको मित्रव्यसनस्य प्रयोजकः प्रकारः।।

प्रकारान्तरमाह–विक्रीतमित्यादि। संग्रामे युद्धे, अभियुञ्जाने अनुष्ठीयमानाभियोगे न तु निस्तीर्णाभियोगे सति अर्थान्मित्रे, अपवर्तिना स्वारब्धमेव साहाय्यमपरिसमाप्य परस्माद् धनं गृहीत्वा मध्ये निवर्तमानेन विजिगीषुणा, विक्रीतं वा स्वीयत्वात् प्रच्यावितं वा, मित्रम्। प्रकारमन्यमाह–द्वैधीभावेन वेति। स्वमित्रशत्रुणा सह सन्धिं कृत्वा स्वयातव्यं प्रति यानं द्वैधीभावः तेन निमित्तेन वा विक्रीतं, मित्रम्। प्रकारान्तरमाह–यास्यता

The king being ever vigilant shall protect his army from the enemies and keeping vigilance, he should strike at the enemy on their weak points.

A friend who marches against an ally, of his own initiative or under the influences of others, a friend who is abandoned because of his failure to keep up his friendship, or owing to greediness or indifference;

A friend who is bought by another and as such with drawn himself from fighting; or following the policy of making peace with one and marching against another and has contracted friendship with one;

पृथग्वा सह याने वा विश्वासेनातिसंहितम्।
भयावमानालस्यैर्वा व्यसनान्न प्रमोक्षितम्।।
अवरुद्धं स्वभूमिभ्यः समीपाद् वा भयाद् गतम्।
आच्छेदनाददानाद् वा दत्त्वा वाप्यवमानितम्।।
अत्याहारितमर्थे वा स्वयं परमुखेन वा।
अतिभारे नियुक्तं वा भङ्क्त्वा परमवस्थितम्।।
उपेक्षितमशक्तया वा प्रार्थयित्वा विरोधितम्।
कृच्छ्रेण साध्यते मित्रं सिद्धं चाशु विरज्यति।।

वान्यमन्यत इति। 'त्वमितो याहि अहमितो यास्यामी'त्येवम् अन्यतः अन्येन स्वमित्रशत्रुणा सह सन्धिं कृत्वा, अन्यं स्वशत्रुं, यास्यता वा विजिगीषुणा, विक्रीतं मित्रम्।।

प्रकारान्तरमाह–पृथग्वेत्यादि। पृथग् याने विश्वासेन वा 'त्वमितो याहि त्वच्छत्रुं प्रति अहमितो यास्यामी'ति भिन्नदिक्कयानविषयसन्धिविश्वासेन वा, सह याने विश्वासेन वा सहयानसन्धिविश्वासेन वा, अतिसंहितं मित्रशत्रोः प्रच्छन्नसाहाय्यकरणेन वञ्चितं, मित्रम्। प्रकारान्तरमाह–भयावमानालस्यैर्वेति। मित्रशत्रोः सकाशाद् भयेन वा मित्रविषयानादरेण वा अलसतया वा, व्यसनात् शत्र्वभियोगात्, न प्रमोक्षितम् अनिस्तारितं, मित्रम्।

प्रकारान्तराण्याह–अवरुद्धमिति। स्वभूमिभ्यः अवरुद्धं स्वभूमिमुद्दिश्य प्रतिरुद्धागमनं मित्रम्। समीपाद् भयाद् गतं वा वधबन्धनादिशङ्कया स्वसमीपात् स्वयमेव गतं वा मित्रम्। आच्छेदनाद् बलेन द्रव्यापहरणाद्, अवमानितं मित्रम्। अदानाद् वा दातव्याप्रदानाद् वा, अवमानितं मित्रम्। दत्त्वापि वा दातव्यं प्रदायापि वा अवमानितं मित्रम्।।

प्रकारान्तरमाह–अत्याहारितमिति। स्वयं, परमुखेन वा अन्यद्वारेण वा, अर्थम् अत्याहारितं वा धनमतिमात्रहारितं वा, मित्रम्। प्रकारान्तरमाह–अतिभार इत्यादि। विजिगीषुशत्रुं निर्जित्य प्राप्तमात्रमेव पुनरपि दुस्साधे कार्ये नियुक्तं वा, मित्रम्।।

प्रकारान्तरमाह–उपेक्षितमशक्त्या वेति। सामर्थ्यविरहेणानपेक्षितं, प्रार्थयित्वा विरोधितं पुनर्मित्रभाव-प्रार्थनयोपगतमुत्पादितविरोधं वा, मित्रम्। इत्थं व्युत्पादितनानाप्रकारविकारप्राप्तस्य पुनस्साध्यतापेक्षायामाह–कृच्छ्रेणेति।

A friend who is going to march either singly or in combination with another against an ally, who is not relieved from troubles owing to fear, contempt or indifference;

A friend who is surrounded in his own place or who has ran away owing to fear, or who is displeased since he had to pay much or despised even after giving his due;

A friend who has voluntarily given too much, or made by another to pay much to his ally; a friend kept under pressure or has sought alliance with another having broken the friendship;

A friend who is neglected owing to the inability to retain his friendship, a friend who has become an enemy in spite of his ally's entreaties to the contrary—such friends are hardly acquired; and if acquired at all they turn away in no time.

कृतप्रयासं मान्यं वा मोहान्मित्रममानितम्।
मानितं वा न सदृशं भक्तितो वा निवारितम्।।
मित्रोपघातत्रस्तं वा शङ्कितं वारिसंहितात्।
दूष्यैर्वा भेदितं मित्रं साध्यं सिद्धं च तिष्ठति।।
तस्मान्नोत्पादयेदेनान् दोषान् मित्रोपघातकान्।
उत्पन्नान् वा प्रशमयेद् गुणैर्दोषोपघातिभिः।।
यतो निमित्तं व्यसनं प्रकृतीनामवाप्नुयात्।
प्रागेव प्रतिकुर्वीत तन्निमित्तमतन्द्रितः।।

।। इति कौटलीयार्थशास्त्रे व्यसनाधिकारिके अष्टमाधिकरणे पञ्चमोऽध्यायः
बलव्यसनवर्गः मित्रव्यसनवर्गः
आदितः एकत्रिंशतिशततमः।।
एतावता कौटलीयस्यार्थशास्त्रस्य व्यसनाधिकारिकम्
अष्टममधिकरणं समाप्तम्।।

मित्रं यथोक्तविकारभेदभिन्नं, कृच्छ्रेण साध्यते क्लेशेन स्वानुकूलीक्रियते विजिगीषुणा। सिद्धं वा कथञ्चित् प्राप्तानुकूल्यमपि वा, आशु क्षिप्रं, विरज्यति निःस्नेहं भवति।।

इत्थं विकृतचित्तेषु मित्रेषु दुस्साधानां वर्गमुक्त्वा सुसाधानां वर्गमाह–कृतप्रयासमिति। विजिगीष्वर्थे कृतसंग्रामादिपरिश्रमम्, अत एव मान्यं पूजार्हम्, मोहाद् अमानितं प्रमादादपूजितं वा इति प्रथमम्। मानितं वा न सदृशमिति द्वितीयम्, अकृतस्वप्रयासानुरूपसत्कारं वेत्यर्थः। भक्तितो वा निवारितमिति तृतीयं, शत्रुभिः विजिगीषुविषयादनुरागात् प्रतिषिद्धमित्यर्थः। मित्रोपघातत्रस्तं वेति चतुर्थे, मित्रस्यान्यस्योपघातं विजिगीषुणा कृतं दृष्ट्वा स आत्मनोऽपि क्रियेतेति भीतमित्यर्थः। शङ्कितं वारिसंहितादिति पञ्चमं, स्वशत्रुणा कृतसन्धानाद् विजिगीषोरुपजातशङ्कमित्यर्थः। दूष्यैर्वा भेदितमिति षष्ठं, राज्योपधातपरैः प्रधानैः प्रयुक्तभेदमित्यर्थः। मित्रं यथोक्तषट्प्रकारं, साध्यं विकारापनयनेन प्रकृतिं नेतुं शक्यम्। सिद्धं च तिष्ठति प्रकृतिप्राप्तं च पुनर्न विक्रियते।।

तस्मादिति। सर्वथापि परिहर्तव्यवाद्धेतोः, एनान् दोषान् मित्रोपघातकान् मैत्रीभङ्गहेतून् यथोक्तान् परित्यक्तत्वविक्रीतत्वादिरूपान् दोषान्,

नोत्पादयेत् अर्थान्मित्रेषु। उत्पन्नान् वा यदृच्छासम्भूतांश्च तान् दोषान्, दोषोपघातिभि: गुणै: सान्त्वादिरूपै:, प्रशमयेत्।।

पूर्वोक्तसर्वविधस्वाम्यादिप्रकृतिव्यसनसाधारणं विधिं वदन्नधिकरणमुपसंहरति–यत् इत्यादि। इह यत इति द्वितीयार्थे तसि:। अतन्द्रितोऽनलस: अर्थाद् विजिगीषु:, प्रकृतीनां स्वाम्यादीनां मित्रान्तानां सम्बन्धि, व्यसनं कर्तृ, यत् निमित्तं स्वोत्पादकम् अवाप्नुयात्, तत् निमित्तं, तदवाप्ते प्रागेव, प्रतिकुर्वीत परिहरेत् तदुत्पत्तिप्रागभावं परिरक्षेदित्यर्थ:। अस्य श्लोकस्य मित्रव्यसनवर्गनिरूपणारम्भात् प्राक् पाठो मातृकासु दृश्यते।।

इत्यष्टमाधिकरणं श्रीमूले विवृतौ गतम्।
कौटलीयस्य व्यसनाधिकारिकसमाह्वयम्।।

इति श्रीवञ्चिमण्डलमहाराजाश्रितस्य ताम्रपर्णीतीरवर्तितरुवाग्रहारा-
भिजनस्य श्रीसीताम्बाश्रीरामसुब्रह्मण्यार्यसूनोर्महामहोपाध्याय-
गणपतिशास्त्रिण: कृतिषु कौटलीयार्थशास्त्रव्याख्यायां श्री-
मूलाख्यायां व्यसनाधिकारिकेऽष्टमाधिकरणे पञ्चमो-
ऽध्याय: बलव्यसनवर्गो मित्रव्यसनवर्ग:,
आदित एकविंशत्यधिकशततम:।।
इति व्यसनाधिकारिकमष्टम-
मधिकरणं समाप्तम्।।

A friend who has realised the implications of friendship, who is honourable, who is disillusioned for want of recognition or honoured, or unequal to the task, or who is prevented on account of fear from another;

A friend who is frightened at the destruction of another friend or who is nation of enemies or who is made by traitors to give up friendship (by employing means of dissension), it is possible to acquire such a friend, and once acquired he is likely to keep up the friendship.

Hence one should not give rise to those causes which are destructive of creating friendship, and when they rise one should get rid of them by adopting such friendly attitude as can remove those causes.

One should be careful to find out such such causes that generate the dislike of of the people and should undertake preventive measures before they arise, always being vigilant in this matter.

Thus the onehundred and twenty first chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the fifth chapter of the eighth Adhikaraṇa dealing wih the section, Troubles of the army and troubles of a friend.

The eighth Adhikaraṇa 'Concerning vices and calamities' is concluded.

अभियास्यत्कर्म–नवममधिकरणम्

BOOK NINE : ACTIONS OF AN INVADER

Chapter 122

135, 136. प्रक० शक्तिदेशकालबलाबलज्ञानं, यात्राकालाश्च।

Sections 135 : Knowledge of Power, Place, Time, Strength and Weakness

136 : The Time of Invasion

विजिगीषुरात्मनः परस्य च बलाबलं शक्तिदेशकालयात्राकालबलसमुत्थानकाल-पश्चात्कोपक्षयव्ययलाभापदां ज्ञात्वा विशिष्टबलो यायात्। अन्यथासीत।

उत्साहप्रभावयोरुत्साहः श्रेयान्। स्वयं हि राजा शूरो बल-

अभियास्यतः पूर्वाधिकरणनिरूपितप्रकृतिव्यसनगुरुलघुभावज्ञानवत् शक्त्यादीनां बलाबलस्य ज्ञानमप्यपेक्षितमिति तन्निरूपणायेदमधिकरणमारभ्यतेऽभियास्यत्कर्माख्यम्। तत्रेदं प्रथमं

शक्तिदेशकालबलाबलज्ञानमिति सूत्रम्। शक्तेरुत्साहप्रभावमन्त्रलक्षणायाः देशस्य समविषमाद्यात्मकस्य कालस्य शीतोष्णादिरूपस्य च यद् बलं स्वसैन्यस्य युद्धयोग्यत्वं यच्चाबलं परसैन्यस्य युद्धायोग्यत्वं तयोर्ज्ञानं विचारः क्रियत इति सूत्रार्थः।

शक्त्यादिज्ञानस्य यानं प्रति प्रयोजकतामन्वयव्यतिरेकाभ्यामाह–विजिगीषुरिति। सः, आत्मनः परस्य च विषये, बलाबलं शक्त्यादीनां शक्तिदेशकालयात्राकालबलसमुत्थानकालानां बलं यानानुकूलत्वं तदनुष्ठाननिमित्तभूतम् अबलं तद्विपरीतं, पश्चात्कोपक्षयव्ययलाभापदां बलं यानाननुकूलत्वं यानपरिहारनिमित्तभूतम् अबलं तद्विपरीतं च, ज्ञात्वा परस्परतोऽन्यतश्च सम्प्रधार्य, विशिष्टबलो यायात् परापेक्षयात्मनो यानानुकूलशक्त्यादिविशेषयोगे सति यानमनुतिष्ठेत्। तत्र शक्त्यादिषु कालः कार्यानुरूपबलोपादानकालः, पश्चात्कोपो विजिगीषौ याते पश्चात् तस्य स्थानीयादौ पार्ष्णिग्राहादिभिर्दाहविलोपाद्यारम्भः, क्षयो युग्यपुरुषापचयः,

व्यय: हिरण्याद्यपचय:, लाभ: फलसिद्धि:, आपद: 'बाह्याभ्यन्तराश्चापद' इति सूत्रे व्याख्यास्यमाना: इति बोद्धव्यम्। अन्यथासीतेति। विशिष्टबलत्वाभावे न यायादित्यर्थ:।

शक्तिषु श्रेयस्त्वं चिन्तयन्नाचार्यमतमाह–उत्साहप्रभावयोरिति। उत्साह: शौर्यबलारोग्यादियोग: प्रभाव: कोशदण्डयोग: तयोर्मध्ये, उत्साह:, श्रेयान् प्रशस्ततर:। तत्र हेतुमाह–स्वयं हि राजेत्यादि। राजा हि स्वयं शौर्यवान् कायशक्तियुक्त आरोग्यसम्पन्न: शिक्षितास्त्रविद्यो मित्रबलासहकृत–

The conqueror should ascertain the comparative strength and weakness of his adversary and having known the power, place, time, the time of marching and of recruiting the army, the consequences, the loss of men and money and profits and danger, he should march with his full force. Otherwise he should keep quiet.

Preceptors are of the view :—that between enthusiasm and power, enthusiasm is better.

वानरोग: कृतास्त्रो दण्डद्वितीयोऽपि शक्त: प्रभाववन्तं राजानं जेतुम्, अल्पोऽपि चास्य दण्डस्तेजसा कृत्यकरो भवति। निरुत्साहस्तु प्रभाववान् राजा विक्रमाभिपन्नो नश्यति इत्याचार्या:।

नेति कौटल्य:। प्रभाववानुत्साहवन्तं राजानं प्रभावेनातिसन्धत्ते तद्विशिष्टमन्यं राजानम् आवाह्य हत्वा क्रीत्वा प्रवीरपुरुषान्। प्रभूतप्रभावहयहस्तिरथोपकरणसम्पन्नश्चास्य दण्ड: सर्वत्राप्रतिहतश्चरति। उत्साहवतश्च प्रभाववन्तो जित्वा क्रीत्वा च स्त्रियो बाला: पङ्गवोऽन्धाश्च पृथिवीं जिग्यु: इति।

प्रभावमन्त्रयो: प्रभाव: श्रेयान्। मन्त्रशक्तिसम्पन्नो हि वन्ध्यबुद्धिरप्रभावो भवति, मन्त्रकर्म चास्य निश्चितमप्रभावो गर्भधान्यमवृष्टिरिवोपहन्ति इत्याचार्या:।

स्वीयदण्डमात्रसहायोऽपि सन् प्रभाविनं राजानं जेतुं शक्तो भवति, अस्यैव तेजोमहिम्ना दण्ड: स्वल्पोऽपि कार्यक्षमो भवतीत्येतस्मात् कारणादित्यर्थ:। प्रभाववतोऽप्युत्साहव्यतिरेके जयव्यतिरेकमाह–निरुत्साहस्त्वित्यादि।

आचार्यमतं खण्डयति–नेति कौटल्य इति। युक्तिमाह–प्रभाववानिति। स:, उत्साहवन्तं राजानं प्रभावेन, अतिसन्धत्ते अतिशेते, कथं कृत्वा, तद्विशिष्टं तस्माद् यातव्याद् विशिष्टमुत्कृष्टबलम्, अन्यं राजानम्, आवाह्य स्वसाह्यार्थं वरयित्वा, प्रवीरपुरुषान्, हत्वा भक्तवेतनदानेन स्वीकृत्य, क्रीत्वा प्रभूतधनदानेन स्वायत्तीकृत्य वा। प्रभूतप्रभावादिसम्पन्नश्च, भूत्वेति शेष:, अस्य दण्ड: सर्वत्र अप्रतिहत:, चरति प्रसरति। किञ्च स्त्रीबालपङ्ग्वन्धा अपि कोशसम्पन्महिम्ना उत्साहवत: प्रवीरान् स्वायत्तीकृत्य भूमिं जितवन्त इत्यैतिह्यमप्यस्तीत्याह–उत्साहवतश्चेत्यादि। इतिशब्दानन्तरम् ऐतिह्यमिति शेष:।

प्रभावमन्त्रशक्त्योर्मध्ये प्रभावशक्ति: श्रेयसी, कस्मात्, मन्त्रशक्तियुक्त: प्रभावशक्तिरहितश्चेत्, निष्फलमन्त्रो भवति, प्रभावाभावो हि तस्य विचार्यनिर्णीतं मन्त्रार्थानुष्ठानप्रकारं कोशदण्डैकसाध्यमुपहन्ति, यथा गर्भस्थं धान्यं वृष्ट्यपेक्षोद्गमनं वृष्ट्यभाव उपहन्ति तद्वदित्याचार्या मन्यन्त इत्याह–प्रभावमन्त्रयोरित्यादि।

A king who is energetic, brave, strong, free from disease, skilful in wielding weapons, with the help of his own army will be able to win over a powerful king; though small, his own army will be able to accomplish the task. But a king lacking enthusiasm will perish despite having a powerful army.

'Not so'—says Kautalya. He who is possessed of power surpasses by the sheer force of his power, another who is merely enthusiastic, having acquired, captured or bought another enthusiastic king as well as brave soldiers. He can make his enthusiastic army of horses, elephants, chariots and others to move everywhere without obstruction. Powerful kings, women, youngmen, lame or blind have conquered the earth by winning over or purchasing the help of enthusiastic persons.

According to preceptors, between power and skill in intrigue, power is better. A king possessed of skill in intrigue becomes a man of barren mind of he has no power, for intrigue has certain limitations and one who has no power loses his kingdom as sprouts of seed in drought become dry.

नेति कौटल्यः। मन्त्रशक्तिः श्रेयसी। प्रज्ञाशास्त्रचक्षुर्हि राजा अल्पेनापि प्रयत्नेन मन्त्रमाधातुं शक्तः, परानुत्साहप्रभाववतश्च सामादिभिर्योगोपनिषद्भ्यां चातिसन्धातुम्। एवमुत्साहप्रभावमन्त्रशक्तीनामुत्तरोत्तराधिकोऽतिसन्धत्ते।

देशः पृथिवी। तस्यां हिमवत्समुद्रान्तरमुदीचीनं योजनसहस्रपरिमाणं तिर्यक् चक्रवर्तिक्षेत्रम्। तत्रारण्यो ग्राम्यः पार्वत औदको भौमः समो विषम इति विशेषाः। तेषु यथास्वबलवृद्धिकरं कर्म प्रयुञ्जीत। यत्रात्मनः सैन्यव्यायामानां भूमिः अभूमिः परस्य, स उत्तमो देशः। विपरीतोऽधमः। साधारणो मध्यमः।

आचार्यमतं निषेधन् स्वमतमाह–नेति कौटल्य इत्यादि। मन्त्रशक्तिरिति। सा श्रेयसीत्यत्र युक्तिमाह–प्रज्ञाशास्त्रचक्षुर्हीति। प्रज्ञा शेमुषी शास्त्रं श्रुतं ते चक्षुषी यस्य स तथाभूतो हि, राजा, अल्पेनापि प्रयत्नेन, मन्त्रम्, आधातुम् अनुष्ठातुं, शक्तः। परान् उत्साहप्रभाववतश्च, सामादिभिः उपायैः, योगोपनिषद्भ्यां योगेन तीक्ष्णादिगूढपुरुषप्रयोगेण उपनिषदा औपनिषदिकोक्तविषाग्न्यादिना च, अतिसन्धातुं शक्तः, आत्मन उत्साहप्रभावाल्पत्वेऽपीत्यार्थम्। एवमिति। अनेन प्रकारेण उत्साहाद्युत्तरोत्तरगौरवसिध्येत्यर्थः, उत्साहप्रभावमन्त्र शक्तीनाम्, उत्तरोत्तराधिकः उत्तरोत्तरयाधिको राजा, अतिसन्धत्ते पूर्वपूर्वशक्तियोगिनमतिशेते। इति शक्तिर्निरूपितः।

देशं निरूपयति–देशः पृथिवीति। तस्यामिति। पृथिव्यां, हिमवत्समुद्रान्तरम् उदीचीनं हिमालयदक्षिण-समुद्रयोरन्तरालम् उदग्भवं, तिर्यग् योजनसहस्रपरिमाणं पूर्वापरसमुद्रावधिकं योजनसहस्रमितं, चक्रवर्तिक्षेत्रं चक्रवर्तिनां क्षेत्रं यस्याखण्डस्य शासनेन राजा चक्रवर्तीति व्यपदिश्यते तदित्यर्थः। विशेषानाह–तत्रेति। चक्रवर्तिक्षेत्रे, आरण्यः कृष्यनर्हदेशप्रायः ग्राम्यः कृष्यर्हदेशप्रायः, पार्वतः उन्नतदृषत्प्रायः, औदक आस्रावयुक्तः, भौमः स्थलप्रायः, समः अनुन्नतानतः, विषमः उन्नतानतः, इति विशेषाः। तेष्विति। उक्तेषु विशेषेषु,

यथास्वजलवृद्धिकरं स्वसैन्यजयावहं यथा भवेद् अर्थात् परसैन्यपराजयावहं च तथाभूतं, कर्म युद्धं, प्रयुञ्जीत। यत्रेति। यस्मिन् देशे, आत्मनः सैन्यव्यायामानां, भूमिः योग्यः प्रदेशो, लभ्यत इति शेषः, परस्य शत्रोः, सैन्यव्यायामानाम्, अभूमिः योग्यप्रदेशाभावः, स उत्तमो देशः।

'Not so'—says Kauṭalya. Skill in intrigue is more powerful. Skill for intrigue is better. He who has the eye of knowledge and is acquainted with the science of polity can, with a little effort make use of his skill for intrigue and can succeed by way of conciliation and other strategic means and by spies and chemical appliance in surpassing those kings having enthusiasm and power. Thus he who possesses more enthusiasm, power and skills of intrigue in that progressive order will be successful in surpassing others.

Country means the earth. There in between the mount Himalayas in the north and ocean in the south and east stretches a region of a thousand yojanas in measurement to be ruled by an emperor. There are such types of land as forests, villages, mountains, river, level plains and uneven grounds. There he should undertake such works as he considers to be favourable to his power and prosperity. That part of the country which is suitable for the exercise of his army and unsuitable to his enemies, is the best. That which is of the reverse nature is worst. Ordinary region (sharing common qualities) is the middle one.

कालः शीतोष्णवर्षात्मा। तस्य रात्रिरहः पक्षो मास ऋतुरयनं संवत्सरो युगमिति विशेषाः। तेषु यथास्वबलवृद्धिकरं कर्म प्रयुञ्जीत। यत्रात्मनः सैन्यव्यायामानामृतुः अनृतुः परस्य स उत्तमः कालः। विपरीतोऽधमः। साधारणो मध्यमः।

शक्तिदेशकालानां तु शक्तिः श्रेयसीत्याचार्याः। शक्तिमान् हि निम्नस्थलवतो देशस्य शीतोष्णवर्षवतश्च कालस्य शक्तः प्रतीकारे भवति।

देशः श्रेयान् इत्येके, स्थलगतो हि श्वा नक्रं विकर्षति, निम्नगतो नक्रः श्वानमिति।

कालः श्रेयान् इत्येके। दिवा काकः कौशिकं हन्ति, रात्रौ कौशिकः काकम् इति।

विपरीतः परस्य सैन्यव्यायामानां भूमिः आत्मनश्चाभूमिर्यः स देश इत्यर्थः, अधमः। साधारणः आत्मपरयोर्विशेषरहितो देशः, मध्यमः।

कालं निरूपयति–काल इति। सः शीतोष्णवर्षात्मा शीतस्वभावो हेमन्तादिरूपः उष्णस्वभावो ग्रीष्मादिरूपः वर्षस्वभावः प्रावृड्रूपश्च भवति। तस्य विशेषानाह–तस्य रात्रिरित्यादि। उक्तेषु कालस्य विशेषेषु कर्मप्रयोगप्रकारं कालस्योत्तमादित्वं चाह–तेषु यथास्वबलवृद्धिकरमित्यादि।

इत्थं शक्त्याद्यवान्तरभेदानां बलाबलं विचारितम्। इदानीं शक्त्यादीनां त्रयाणां मिथो बलाबलं विचारयन्नाचार्यमतमाह–शक्तिदेशकालानां त्वित्यादि। तत्र युक्तिमाह–शक्तिमान् हीत्यादि। प्रतीकारे प्रतिक्रियायाम्। तत्र देशस्य प्रतिक्रिया निम्नादेर्मृदापूरणादिः, कालस्य प्रतिक्रिया कञ्चुकादिना शीतादिवारणम्।

तत्रैकीयमतमाह–देश इत्यादि। स्थले शुनो नक्रविकर्षणयोग्यताया अस्थले तदभावस्य च, जले नक्रस्य श्वविकर्षणयोग्यतायाः अजले तदभावस्य चोपलब्ध्या बलाबलस्य देशतद्भावतदभावानुविधायित्वाद् देश एव श्रेयानित्यर्थः।

काकदिवापराक्रमित्व-घूकरात्रिपराक्रमित्वदृष्टान्तेन बलाबलस्य कालान्वयव्यतिरेकानुविधानं वर्णयन्तः कालस्य श्रेयस्त्वमेके मन्यन्त इत्याह–कालः श्रेयानित्यादि।

Time consists of cold, hot and rainy periods. Its divisions are : the night, the day, the fortnight, the month, the season, the solstices, the year and the yuga. During these periods he should undertake such works as are conducive to the growth of his power and prosperity. The period favourable for the exercises of his army and unfavourable for his enemy is the best. That of the reverse nature is worst. That which possesses both the qualities are of middling quality.

Preceptors say that among strength, place, and time, strength is the best. Only a man of strength can overcome the problems due either to the unevenness of the ground or to the cold, hot or rainy periods of the time.

Some are of the view that place is the best, for the reason that a dog seated in a convenient place can drag a crocodile, and that a crocodile in low ground can drag a dog.

Some say that time is the best. During the daytime the crow kills the owl, and that at night the owl the crow.

नेति कौटल्यः। परस्परसाधका हि शक्तिदेशकालाः।

तैरभ्युच्चितः तृतीयं चतुर्थं वा दण्डस्यांशं मूले पार्ष्ण्यां प्रत्यन्ताटवीषु च रक्षां विधाय कार्यसाधनसहं कोशदण्डं चादाय क्षीणपुराणभक्तमगृहीतनवभक्तमसंस्कृतदुर्गममित्रं, वार्षिकं चास्य सस्यं हैमनं च मुष्टिमुपहन्तुं मार्गशीर्षीं यात्रां यायात्। हैमनं चास्य सस्यं वासन्तिकं च मुष्टिमुपहन्तुं चैत्रीं यात्रां यायात्। क्षीणतृणकाष्ठोदकमसंस्कृतदुर्गममित्रं, वासन्तिकं चास्य सस्यं वार्षिकीं वा मुष्टिमुपहन्तुं ज्येष्ठामूलीयां यात्रां यायात्।

उक्तं मतत्रयमपि प्रतिषेधति–नेति कौटल्य इति। तत्र हेतुमाह–परस्परसाधका हि शक्तिदेशकाला इति। सत्यामपि शक्तौ देशकालाभावे कार्यासिद्ध्या सतोरपि देशकालयोः शक्त्यभावे कार्यासिध्या च तेषां त्रयाणामन्योन्यसापेक्षतयैव कार्यसाधकत्वदर्शनात् समं प्राधान्यमित्यभिप्रायः। इत्थं शक्तिदेशकालबलाबलं चिन्तितम्।

अथ यात्राकालनिरूपणार्थं सूत्रं–

यात्राकाला इति। शत्रुमुद्दिश्य विजिगीषोर्यानं यात्रा तस्याः समुचिताः काला अभिधीयन्त इति सूत्रार्थः।

तैरभ्युच्चित इति। शक्तिदेशकालैः परापेक्षयातिशयं प्राप्तः विजिगीषुः, तृतीयं चतुर्थं वा यथोचित्तं, दण्डस्य त्रेधा चतुर्धा वा विभक्तस्य बलस्य, अंशं मूले स्थानीये, पार्ष्ण्यां पृष्ठे, प्रत्यन्ताटवीषु च विषयान्तेऽरण्येषु

च, रक्षां विधाय रक्षार्थे स्थापयित्वा, कार्यसाधनसहं, कोशदण्डं च कोशं दण्डं च, आदाय, अमित्रमुपहन्तुं, मार्गशीर्षी यात्रां यायात् मार्गशीर्षे मासि शत्रुं प्रति अभियायात्। शत्रोः सुखोपहतव्यतार्थं त्रीणि विशेषणान्याह–क्षीणपुराणभक्तमित्यादि। यदा पुराणं पूर्वभोगसञ्चितं भक्तं क्षीणं नवसंग्राह्यं चागृहीतं दुर्गं चाकृतसमुचितरक्षाविधानं पश्यति, तथाविधे काले समुत्पन्नसस्यग्रहणप्रतिबन्धलक्षणेन नवबीजवापप्रतिबन्धलक्षणेन चोपघातेनैनं योजयितुं यायादित्यर्थः। इह हि वर्षोप्तबीजनिष्पन्नसस्यग्रहणपूर्वको हेमन्ते बीजवाप इत्येको भोगः, हेमन्तोप्तबीजनिष्पन्नसस्यग्रहणो वसन्ते बीजवाप इत्यपरो भोगः, वसन्तोप्तबीजनिष्पन्नसस्यग्रहणपूर्वो वर्षासु बीजवाप इत्यन्य इत्येवं त्रयः प्रत्यब्दं भोगा भवन्ति। तेषु कतमं भोगमुपहन्तुं कतमस्मिन् मासि यात्रां यायादित्याकाङ्क्षायामाह–वार्षिकं चास्य सस्यमित्यादि। अयमर्थः–

'Not so'—says Kauṭalya. Of strength, place and time, each is helpful to the other. A conqueror, possessed of these (three things such as) strength place and time should, after having placed one-third or one-fourth of the army to protect his base to guard against his rear enemy and wild tribes in his vicinity and after taking with him as much army and sufficient treasury to accomplish the work, should march against his enemy during the month of Mārgaśīrṣa (corresponding to November-December) when the formers collection of foodstuffs is old and insipid, and who has not gathered fresh foodstuffs, but also not repaired his fortifications, in order to destroy the enemy's rainy crops and autumnal handfuls (of grains). He should march druing the mouth of Caitra (corresponding to March-April), if he desires to destroy the enemy's autumnal crops and vernal handfuls (of grains). He should march during the month of Jyeṣṭhā (May-June) against the enemy whose storage of fodder, fire wood and water has diminished and who has not repaired his fortification, if he wants to destroy the vernal crops and handfuls of the rainly season.

अत्युष्णमल्पयवसेन्धनोदकं वा देशं हेमन्ते यायात्।

तुषारदुर्दिनमगाधनिम्नप्रायं गहनतृणवृक्षं वा देशं ग्रीष्मे यायात्। स्वसैन्यव्यायामयोग्यं परस्यायोग्यं वर्षति यायात्।

मार्गशीर्षे तैषं चान्तरेण दीर्घकालां यात्रां यायात्। चैत्रं वैशाखं चान्तरेण मध्यमकालां, ज्येष्ठामूलीयमाषाढं चान्तरेण ह्रस्वकालामुपोषिष्यन्। व्यसने चतुर्थीम्। व्यसनाभियानं विगृह्ययाने व्याख्यातम्।

प्रथमं भोगमुपहन्तुं मार्गशीर्षे मासि यायाद्, द्वितीयं चैत्रे, तृतीयं ज्येष्ठामूलीयापराख्ये ज्येष्ठे इति। तत्रासंस्कृतदुर्गस्यामित्रस्य सद्योदुर्गसंस्कारमिच्छतोऽपि ज्येष्ठामूलीये तदपेक्षिततृणकाष्ठोदकादिक्षयात् सुतरामुपघातो भवतीति द्योतयितुं क्षीणतृणकाष्ठोदकमसंस्कृतदुर्गममित्रस्य विशेषणान्तरयोगेन पुनरुपादानमिति ज्ञेयम्। त एते परोपघातानुकूला यात्राकालाः।

यातव्यदेशानुकूलान् यात्राकालानाह–अत्युष्णमित्यादि। यो देशः अतिमात्रोष्णस्वभावः तृणकाष्ठजलानि

वा यत्राल्पानि, तं देशं हेमन्ते यायात्, तदा हि शीतवशादुष्णः किञ्चित् सह्यो भवति, तृणकाष्ठजालानां च नोत्सादो भवतीत्यभिप्रायः।

तुषारदुर्दिनमित्यादि। अनवरतहिमवर्षं गभीरतटाकबहुलं निबिडतृणवृक्षं वा देशं ग्रीष्मे यायात्। तदाहि शैत्यं सह्यं भवतीत्यभिप्रायः।

सामान्यतो वर्षाकाले यानं प्रतिषिद्धम्। तस्य प्रतिप्रसवमाह–स्वसैन्येत्यादि। यस्मिन् देशे स्वसैन्यस्य व्यायामयोग्यभूमिलाभः परसैन्यस्य च तदभावः, तथाविधं देशं वर्षाकालेऽपि यायादित्यर्थः।

उक्तानां मार्गशीर्ष्यादीनां तिसृणां यात्राणां दीर्घकालत्वादौ नियममाह–मार्गशीर्षं तैषं चान्तरेणेति। मार्गशीर्षतैषमासयोर्मध्ये, यात्राम् अर्थान्मार्गशीर्षी, दीर्घकालां यायात्, वर्षाकालस्य दूरविप्रकृष्टतया कृष्यङ्गकर्मणां विलम्बसहत्वेनोपरोधाभावादिति भावः। चैत्रं वैशाखं चान्तरेणेति। अनयोर्मध्ये, मध्यमकालां यायात् अर्थाच्चैत्रीं यात्रां न तु मार्गशीर्षीमिव दीर्घकालामित्यर्थः। ज्येष्ठामूलीयमाषाढं चान्तरेणेति। तयोर्मध्ये, ह्रस्वकालां यायात् अर्थाज्ज्येष्ठामूलीयां न तु दीर्घकालां मध्यमकालां वा वर्षाकालस्य प्रत्यासन्नत्वेन तत्कर्मोपरोधप्रसङ्गादिति भावः। कालह्रस्वत्वपरिच्छेदगमकं यातुर्विशेषणमाह–उपोषिष्यन्निति। उप समीपे शत्रुविषयं गत्वा तद्दाहमात्रं क्षिप्र-

He may march during the dewy season against a country which is of hot climate and in which fodder and water are available only in limited quantities.

He may march during the summer season against a country in which the sun is enshrouded by mist and which is full of deep valleys and thickets of trees and grass.

He may march during the rains against a country which is suitable for the exercise of his own army and which is of the reverse nature for his enemy's army.

He should undertake a long march between the month of Mārgaśīrṣa (November-December) and Taiṣa (December-January). He shall undertake a march of mean length between Caitra (March-April) and Vaiśākha (April-May); and a short march between Jyeṣṭhā (May-June) and Āṣāḍha (June-July) in order to be near the enemy. A fourth variety of march may be made against an enemy who is in trouble. Marching against an enemy in trouble had already been dealt with in the sections 'march after declaring war.'

प्रायशश्चाचार्याः परव्यसने यातव्यम् इत्युपदिशन्ति।

शक्त्युदये यातव्यमनैकान्तिकत्वाद् व्यसनानाम् इति कौटल्यः।

यदा वा प्रयातः कर्शयितुमुच्छेत्तुं वा शक्नुयादमित्रं, तदा यायात्।

अत्युष्णोपक्षीणे कालेऽहस्तिबलप्रायो यायात्। हस्तिनो ह्यन्तस्स्वेदाः कुष्ठिनो भवन्ति, अनवगाहमानास्तोयमपिबन्तश्चान्तरवक्षारा-

सुकरं करिष्यन् न तु ततोऽधिकं युद्धादिकर्म अधिककालसापेक्षं करिष्यन्नित्यर्थः। इह मार्गशीर्ष

तैषमित्यादयो मासार्थाः शब्दाः मार्गशीर्षी तैषीमित्यादिरीत्या स्त्रीप्रत्ययान्ता मूलकोशेषु पठ्यन्ते। तदा मार्गशीर्ष्यादिशब्दाः मृगशीर्षयुक्तपौर्णमासीविशेषाभिधायिनस्तद्युक्तमासविशेषोपलक्षका द्रष्टव्याः। इत्थं मार्गशीर्ष्यादिकास्त्रिविधा यात्रा अभिधाय परव्यसनकाला नाम चतुर्थीमपि यात्रामाह–व्यसने चतुर्थीमिति। परव्यसनदर्शने चतुर्थी मार्गशीर्ष्यादिविलक्षणप्रकारां मार्गशीर्षादिकालनियमरहितां यात्रां यायादित्यर्थः। इदं न व्यसनाभियानं षाड्गुण्याधिकरणगते विगृह्ययानप्रकरणे वितत्याभिहितमित्याह–व्यसनाभियानमित्यादि।

व्यसनाभियानपक्षश्चायमाचार्याणामेवेत्याह–प्रायशश्चाचार्या इत्यादि।

स्वपक्षमाह–शक्त्युदय इति। परापेक्षया विजिगीषोः शक्त्यभ्युच्चये सति, यातव्यं, शक्त्युदयस्यैकान्तफलसाधकत्वादित्यभिप्रायः। परव्यसनानि त्वप्रयोजकान्यनेवम्भूतत्वादित्याह–अनैकान्तिकत्वाद् व्यसनानामिति। परस्य व्यसनसत्त्वेऽप्यात्मनः शक्त्युदयाभावे फलासिध्या परस्य व्यसनाभावेऽप्यात्मनः शक्त्युदयसत्त्वे फलसिध्या च परव्यसनानां फलाननुविहितस्वान्वयव्यतिरेकत्वादित्यर्थः। इति कौटल्यः मन्यते।

शक्त्यभ्युच्चयाभावेऽपि शत्रुकर्शनोच्छेदनान्यतरानुष्ठानमात्रपर्याप्तशक्तियोगमात्मनो यदा पश्यति, तदा यायादिति पक्षान्तरमाह–यदा वा प्रयात इत्यादि।

अथ बलानुरोधेन कालनियममाह–अत्युष्णोपक्षीण इति। अत्युष्णपर्यवसिते, काले ग्रीष्मादौ, अहस्तिबलप्रायो यायात् हस्त्यतिरिक्तखरोष्ट्रादिबलबहुलो यायात् हस्तिबलबहुलस्तु न यायादित्यर्थः। हस्तिबलबहुलस्यायाने कारणमाह–हस्तिनो हीत्यादि। गजा हि बहिरनिर्गच्छद्भिरन्तःस्थितैः स्वेदैर्दूषितत्वचः कुष्ठरोगिणो भवन्ति, जले च स्नानाकरणात् तत्पानाकरणा-

Preceptors are of the view that one should invariably march against an enemy in troubles.

Kauṭalya is of the view that one should march when one's resources are sufficient since the troubles of the enemy could not be anticipated.

When one undertakes to march it should be to reduce or destroy an adversary.

When the weather is not too hot one should march with an army mostly composed of elephants. Elephants with profuse sweat subdued contacts leprosy and when they have no water for bathing and drinking they lose their speed and become obstinate.

श्चान्धीभवन्ति। तस्मात् प्रभूतोदके देशे, वर्षति च हस्तिबलप्रायः यायात्। विपर्यये खरोष्ट्राश्वबलप्रायः। देशमल्पवर्षपङ्कं वर्षति मरुप्रायं चतुरङ्गबलो यायात्।

समविषमनिम्नस्थलह्रस्वदीर्घवशेन वाध्वनो यात्रां विभजेत्

सर्वा वा ह्रस्वकालाः स्युर्यातव्याः कार्यलाघवात्।
दीर्घाः कार्यगुरुत्वाद्वा वर्षावासः परत्र च।।

।। इति कौटलीयार्थशास्त्रे अभियास्यत्कर्मणि नवमाधिकरणे प्रथमोऽध्यायः
शक्तिदेशकालबलाबलज्ञानं यात्राकालाः,
आदितः द्वाविंशतिशततमोऽध्यायः।।

च्चोपजातान्तर्दाहा अन्धतां प्राप्नुवन्तीत्यर्थः। तस्मादिति। उष्णकालगानस्य हस्त्यनर्थावहत्वात्, प्रभूतोदके प्रचुरजले देशे, वर्षति च अर्थात् काले, हस्तिबलप्रायः, यायात्। विपर्यय इति। अप्रभूतोदके देशे अवर्षाकाले च, स्वरोष्ट्राश्वबलप्रायः, यायात्। यस्मिन् वृष्टिनिमित्तः पङ्कोऽल्पो भवति, तं तथाविधं मरुप्रायं देशं वर्षाकालेऽपि हस्त्यश्वरथपादातरूपचतुर्विधसैन्ययुक्तो गच्छन्न दुष्यतीत्याह–देशमल्पवर्षपङ्कमित्यादि।

अध्वनः समत्वविषमत्वादिभिरपि यात्राया ह्रस्वकालत्वादिविभागो भवतीत्याह–समेत्यादि। इह समादिशब्दा भावप्रधानाः, समत्वमदन्तुरत्वं, विषमत्वं दन्तुरत्वं, निम्नत्वं जलरूपत्वं, स्थलत्वमजलरूपत्वं, ह्रस्वत्वं ह्रस्वकालत्वं, दीर्घत्वं दीर्घकालत्वं, तद्वशेन वा तदनुरोधेन वा, अध्वनो यात्रां विभजेत्। तत्र स्थलत्वान्ता अध्वधर्माः, अन्यौ यात्राधर्मौ।।

कार्यवशात् सर्वासामपि यात्राणां ह्रस्वकालत्वदीर्घकालत्वे भवत इत्याह–सर्वा वेत्यादि। या एता अध्वसमत्वविषमत्वादिवशोपजातह्रस्वभावदीर्घभावा उक्ताः, ताः सर्वा अपि, यातव्याः यात्राः, कार्यलाघवात् कार्यस्य क्षिप्रनिर्वर्तनात्, ह्रस्वकालाः, स्युः। कार्यगुरुत्वाद् वा कार्यस्य चिरनिर्वर्तनाच्च, दीर्घाः दीर्घकालाः स्युः। वर्षावासः परत्र चेति। किञ्च वर्षासु वासः स्वदेशकार्यः परविषय एव कार्यवशात् कर्तव्यः स्यादित्यर्थः।।

इति कौटलीयार्थशास्त्रव्याख्यायाम् अभियास्यत्कर्मणि नवमाधिकरणे
प्रथमोऽध्यायः शक्तिदेशकालबलाबलज्ञानं यात्राकालाः,
आदितो द्वाविंशत्यधिकशततमः।।

Hence against a country where water is available in plenty one should march with an army mostly consisting of elephants. Against a country of reverse nature one should march with an army consisting mostly of asses, camels and horses. Against a desert region one should march during the rainy season with less mud, with all the four constituents of the army.

One should chalk out a programme of short distances of to be marched in accordance with the nature of the ground to be covered such as even, uneven, valleys and plains.

When the undertaking is small, march against all types of enemies shall be of small duration, and when it is great, it shall be of long duration, and during the rains encampment shall be made in the country of the enemy.

Thus the one hundred and twenty second chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the first chapter of the ninth Adhikaraṇa dealing with the sections 'Knowledge of power, place, time, strength and weakness; and the time of invasions.'

Chapter 123

137-139. प्रक० बलोपादानकालाः, सन्नाहगुणाः, प्रतिबलकर्म च।

Sections 137 : The Time of Recruiting the Army
138 : The Form of Equipment
139 : Work of Arraying a rival Force

मौलभृतकश्रेणीमित्रामित्राटवीबलानां समुद्दानकालाः।

मूलरक्षणादतिरिक्तं मौलबलम्, अत्यावापयुक्ता वा मौला मूले विकुर्वीरन् इति, बहुलानुरक्तमौलबलः सारबलो वा प्रतियोद्धा व्यायामेन योद्धव्यम् इति, प्रकृष्टेऽध्वनि काले वा क्षयव्ययसहत्वान्मौलानाम् इति, बहुलानुरक्तसम्पाते च यातव्यस्योपजाप-भयादन्यसैन्यानां भृतादीनामविश्वासे, बलक्षये वा सर्वसैन्यानाम् इति, मौलबलकालः।

बलोपादानकाला इति सूत्रम्। बलानां मौलभृतादीनाम् उपादानस्य यथाकार्यं विनियोगस्य काला उच्यन्त इति सूत्रार्थः। अभियास्यता यात्राकालवद् बलोपादानकाला अपि ज्ञातव्या इति तत्कथनम्।

के ते काला इत्याह—मौलेत्यादि। मौलबलं स्थानीयभवं बलं भृतकबलं भृतिस्वीकृतं बलं, श्रेणीबलं जानपदायुधीयगणरूपं बलं, मित्रबलम्, अमित्रबलम्, अटवीबलम् आटविकबलम्, इत्येतेषां षड्विधानां समुद्दानकालाः कार्यविनियोगकालाः।

तेषु मौलबलसमुद्दानकालस्य निमित्तान्याह—मूलरक्षणादतिरिक्तमित्यादि। अयमर्थः—स्थानीयरक्षार्थं यावदपेक्षितं ततोऽधिकं मौलबलं विद्यत इत्यस्मिन् निमित्ते; अथवा अत्यावापयुक्ता अतिमात्रद्रोहचिन्तायुक्ता मौलपुरुषाः मूले विकारं कुर्युः अत इमे आत्मना सहैव नेया इत्यस्मिन् निमित्ते; प्रभूतमनुरागि च मौलबलमुपादायागतः प्रत्यर्थी शूरसैन्ययुक्तो वा सः, अतः प्रयत्नेन युद्धं कर्तव्यं, तत्र मौलबलमेव समर्थं भवतीत्येतस्मिन् निमित्त; बहुयोजनविप्रकृष्टे देशे दीर्घे वा काले शत्रुणा सह युद्धं भवेत्, तत्रावश्यम्भाविनौ क्षयव्ययौ मौलबलान्येव सोढुं शक्नुयुरित्यस्मिन् निमित्ते; बहुलाः स्वाम्यनुरागिणः शत्रुदूताः सम्पतिता अवश्यमुपजापं कुर्युः, भृतादीनि मौलव्यतिरिक्तान्यविश्वास्यानि, अतो मौलबलमेवानुपजाप्यत्वादु-पादेयमित्येतस्मिन् निमित्ते; अथवा सर्वाणि भृतादिसैन्यानि प्राप्तयुग्यपुरुषापचयलक्षणशक्तिक्षयत्वात् पलायिष्यन्त इत्येतस्मिन् निमित्ते च, मौलबलस्य विनियोगकालः प्राप्तो मन्तव्य इति।

The time for the recruitment of troops such as hereditary troops, hired troops, corporation of soldiers, troops belonging to a friend or to an enemy and wild tribes (is as follows :)

When a (conqueror) feels that his hereditary army is more than what is required to protect his base or consists of more soldiers than necessary, some of them may be discharged; or feels that his enemy has a strong hereditary army known for its attachment and as such needs to be fought with sufficient skill on his part; or when he thinks that the roads and weather are favorable it is still the hereditary army that can endure the wear and tear; or when he feels that they are known for their attachment to him, and hired and other kinds of troops could not be relied upon lest they might lend their ears to intrigues of the enemy to be invaded, or when he feels that other types of troops are wanting in strength, then is the time for taking the hereditary army.

प्रभूतं मे भृतबलमल्पं च मौलबलम् इति, परस्याल्पं विरक्तं या मौलबलं, फल्गुप्रायमसारं वा भृतसैन्यम् इति, मन्त्रेण योद्धव्यमल्पव्यायामेन इति, ह्रस्वो देशः कालो वा तनुक्षयव्ययः इति, अल्पसम्पातं शान्तोपजापं विश्वस्तं वा मे सैन्यम् इति, परस्याल्पः प्रसारो हन्तव्यः इति, भृतबलकालः।

प्रभूतं मे श्रेणीबलं शक्यं मूले यात्रायां चाधातुम् इति, ह्रस्व प्रवासः, श्रेणीबलप्रायः प्रतियोद्धा, मन्त्रव्यायामाभ्यां प्रतियोद्धुः कामो, दण्डबलव्यवहारः इति श्रेणीबलकालः।

प्रभूतं मे मित्रबलं शक्यं मूले यात्रायां चाधातुम्, अल्पः प्रवासो मन्त्रयुद्धाच्च भूयो व्यायामयुद्धम् इति, मित्रबलेन वा पूर्वमटवीं नगरी

भृतबलकालस्य निमित्तान्याह–प्रभूतं मे भृतबलमित्यादि। अयमर्थः–मम भृतसैन्यं प्रचुरं, मौलसैन्यमल्पमित्येतस्मिन् निमित्ते; अथवा शत्रोर्मौलसैन्यमल्पं विरक्तं वा वर्तते, अतो भृतबलमेवालं कार्यसाधनायेत्यस्मिन् निमित्ते; अथवा अल्पं दुर्बलं च परस्य भृतसैन्यमित्यस्मिन् निमित्ते; मन्त्रेण तूष्णींयुद्धात्मनाल्पश्रमेण योद्धव्यमित्यस्मिन् निमित्ते; अदूरो गन्तव्यदेशः कालश्च कार्यसिद्धयेऽपेक्षितोऽल्पत्वादल्पक्षयव्ययः इत्यस्मिन् निमित्ते; अल्परदूतागमनं शमितोपजापम् उत्पन्नानुपजाप्यत्वविश्वासं वा मे सैन्यमित्यस्मिन् निमित्ते; परस्य तृणकाष्ठादिप्रवेशनमल्पमेव विहन्तव्यं, तच्च भृतबलेनैव विघातयितुं शक्यमित्येतस्मिन् निमित्ते च, भृतबलस्य विनियोगकालो बोद्धव्यः।

श्रेणीबलकालमाह–प्रभूतं मे श्रेणीबलमित्यादि। अयमर्थः–श्रेणीबलं मे प्रचुरतया स्थानीयरक्षायां शत्रुं प्रत्यभियाने चोभयत्र विनियोक्तुं शक्यमित्येतस्मिन् निमित्ते; अदूरदेशं प्रयाणमदीर्घकालमित्यस्मिन् निमित्ते वा; प्रत्यर्थी मन्त्रेण तूष्णीयुद्धलक्षणेन व्यायामेन प्रकाशयुद्धलक्षणेन च प्रतियोद्धुकाम इत्यस्मिन् निमित्ते वा; प्रत्यर्थी दण्डभीतनृपान्तरार्पितेन बलेन निर्वाह्युद्धव्यवहार इत्यस्मिन् निमित्ते वा श्रेणीबलस्य विनियोगकालः इति।

मित्रबलकालमाह–प्रभूतं मे मित्रबलमित्यादि। अयमर्थः–मम मित्रबलं प्रभूतत्वात् स्थानीये रक्षार्थं

यात्रायां पराभियोगार्थं च निवेशयितुं शक्यमित्यस्मिन् निमित्ते; अविप्रकृष्टदेशकालत्वादल्पं प्रयाणं, तूष्णींयुद्धाच्च–

When he thinks that his hired army is greater than the hereditary force, that his enemy's hereditary army is small and diaffected, while the hired army of the enemy is insignificant and weak, that actual fight is less than treacherous fight, that the place to be covered and time needed first entail no much loss; that his own army is not lazy, is beyond intrigue and is reliable, or that the power of the enemy is little which he has to put down, then is the time to lead a hired army.

When he thinks that his large army of corporation of soldiers can be trusted to defend his base as well as to march against his enemy, or he feels that his absence will be for a short period or his enemy's army of corporate soldiers is desirous of carrying on treacherous fight than an open war, the it is the time for the recruitment of corporation of soldiers.

When he feels that the strength of his ally is capable of garding the base and marching at the same time, that his absence will be for a short period and actual fight is more than treacherous fight,

स्थानमासारं वा योधयित्वा पश्चात् स्वबलेन योधयिष्यामि, मित्रसाधारणं वा मे कार्यं, मित्रायत्ता वा मे कार्यसिद्धिः, आसन्नमनुग्राह्यं वा मे मित्रम्, अत्यावापं वास्य साधयिष्यामि इति मित्रबलकालः।

प्रभूतं मे शत्रुबलेन योधयिष्यामि नगरस्थानम्, अटवीं वा। तत्र मे श्ववराहयोः कलहे चण्डालस्येवान्यतरसिद्धिर्भविष्यतिः; आसाराणामटवीनां वा कण्टकमर्दनमेतत् करिष्यामि; अत्युपचितं वा कोपभयान्नित्यमासन्नमरिबलं वासयेदन्यत्राभ्यन्तरकोपशङ्कायाः; शत्रुयुद्धावर-युद्धकालश्च। इत्यमित्रबलकालः।

बहुतरं प्रकाशयुद्धम्, अतो नातिक्षयव्ययसम्भावनेत्यस्मिन् निमित्ते; परस्याटविकं बलं वा परस्य मित्रबलं वा तन्नगरावस्थितं स्वमित्रबलेन पूर्वं योधयित्वा पश्चात् स्वबलेन योधयिष्यामीत्यस्मिन् निमित्ते; मम यत् कार्यं तद् मित्रस्यापि साधारणमित्यस्मिन् वा निमित्ते; मम कार्यसिद्धिर्मित्रे आयत्तेत्यस्मिन् वा निमित्ते; मम मित्रमन्तरङ्गं मयोपकर्तव्यमित्यस्मिन् वा निमित्ते; मित्रस्य अत्यावापम् अर्थाद् दूष्यबलं शत्रुबलेन व्यापादयिष्यामीत्यस्मिन् वा निमित्ते; मित्रबलस्य विनियोगकाल इति।

अमित्रबलकालमाह–प्रभूतं मे शत्रुबलमित्यादि। अयमर्थः–मम शत्रुबलं दण्डोपनतं प्रभूतं नगरावस्थितं शत्रुबलेन योधयिष्यामि, आटविकं वा शत्रुबलेन योधयिष्यामि, तथोभयोः शत्रुबलयोरायोधनघटनेऽन्यतरवध-लक्षणं ममेष्टं सिध्यति यथा श्ववराहाशिनश्चण्डालस्य श्ववराहयोर्युध्यमानयोरन्यतरवध ईप्सितः सिध्यति तद्वद् इत्यस्मिन् वा निमित्ते; मित्रबलानामाटविकानां च स्वकीयानां ये कण्टका अमित्रबलगतास्तेषां मर्दनसाधनमेतद् अमित्रबलोपादानं करिष्यामीत्यस्मिन् वा निमित्ते, अत्यन्तोपचययुक्तं शत्रुबलम् आत्मना नित्यमनधिष्ठितं विकुर्वीतेति शङ्कायां मन्त्रिपुरोहितसेनापतियुवराजादिविकारलक्षणाभ्यन्तरकोपविरहे च सति

तत् सर्वदा स्वान्तिक एव वासयितुमर्हमित्यस्मिन् वा निमित्ते; अमित्रबलस्य विनियोगकाल इति। अन्यमप्यमित्रबलकालमाह–शत्रुयुद्धावरयुद्धकालश्चेति। शत्रोः स्वशत्रुणा सह यदि प्रवृत्तं युद्ध तर्हि तस्मात् समाप्तात् परो यो युद्धोचितः कालः सोऽपि अमित्रबलकाल इत्यर्थः।

That having engaged the army of his friend to occupy wild tracts, cities or plains and to fight with the enemy's ally, that his friend will be able to accomplish his work and that his success depends upon that of his friend who is near and deserving of obligation or that he has to utilize the excessive force of his friend, then is the time for enlistment of a friend's army.

When he thinks that his enemy has a strong army and that he can make the army of his enemy to fight against the city of an adversary or he could make him fight for a wild tract of land. There I could have my aim fulfilled as in the case of a Caṇḍāla in a fight between a dog and a boar either of them becoming successful; that through the battle he will have the mischievous power of his enemy's allies or of wild tribes destroyed, that he has to make his strong enemy to fight with some body else and thus get rid of internal rebellion caused by his enemy at that the time of battle between enemies or between inferior kings has arrived; then is the time for the exercise of enemy's forces.

तेनाटवीबलकालो व्याख्यातः।

मार्गदेशिकं परभूमियोग्यमरियुद्धप्रतिलोममटवीबलप्रायः शत्रुर्वा बिल्वं बिल्वेन हन्यताम् अल्पः प्रसारो हन्तव्यः इत्यटवीबलकालः।

सैन्यमनेकमनेकजातीयस्थमुक्तमनुक्तं वा विलोपार्थं यदुत्तिष्ठति, तदौत्साहिकम्। भक्तवेतनविलोपविष्टिप्रतापकरं भेद्यं परेषाम्, अभेद्यं तुल्यदेशजातिशिल्पप्रायं संहतं महत्। इति बलोपादानकालाः।

तेषां कुप्यभृतममित्राटवीबलं विलोपभृतं वा कुर्यात्।

यान्यमित्रबलकालस्य निमित्तान्युक्तानि तान्येवाटवीबलकालस्यापीत्यतिदेशभङ्ग्योपदिशति–तेनेत्यादि।

तत्र विशेषमाह–मार्गदेशिकमित्यादि। अयमर्थः–परभूमियनमार्गप्रदर्शनमिति वा, परभूमियुद्धानुरूपायुधशिक्षोपेतमिति वा, अरेर्युद्धे विषये विजिगीषुनियोगात् प्रागेव सिद्धप्रातिपक्ष्यमिति वा, आटविकबलबहुलः शत्रुः अतः स तुल्यजातीयेनाटविकबलेनैव बिल्वफलमिव बिल्वफलेन हन्यतामिति वा, शत्रोस्तृणकाष्ठादिप्रवेशनं स्वल्पमेव विहन्तव्यं तच्चाटविकबलैनैव विघातयितुं शक्यामिति वैतेषु निमित्तेषु आटविकबलस्य विनियोगकालः। इत्थं मौलादीनां षण्णां बलानामुपादानकालो दर्शितः।

सम्प्रत्यौत्साहिकं नाम सप्तममपि बलमुपादेयमस्तीत्याह–सैन्यमनेकमित्यादि। अयमर्थः–सैन्यम्, अनेकम् एको मुख्योऽधिष्ठाता तद्रहितम्, अनेकजातीयस्थं नानाप्रकारदेशावस्थायि, उक्तमनुक्तं वा राज्ञानुज्ञातमननुज्ञातं वा, यद् विलोपार्थम् उत्तिष्ठति परविषयलुण्टनार्थं स्वयमेव समुदितं भवति, तद् औत्साहिकं

स्वोत्साहमात्रप्रवृत्तत्वादौत्साहिकसंज्ञम्। तच्च भेद्यमभेद्यमिति द्विप्रकारमित्याह–भक्तवेतनेत्यादि। भक्तेन प्रत्यहदेयतण्डुलादिना वेतनेन प्रतिमासदेयहिरण्यादिना च विलोपं शत्रुजनपदलुण्टनं विष्टिं दुर्गादिकर्म प्रतापं राजाज्ञानुष्ठानं च करोतीति तथाभूतं, परेषां भेद्यं शक्यभेदनम्। अभेद्यं पराशक्यभेदनं तु, तुल्यदेशजातिशिल्पप्रायं देशजातिशिल्पैर्ये तुल्यास्तद्बाहुल्ययुक्तम् अत एव संहतं नित्योपगतसंघातावस्थम्, अत एव महत् शक्तितः प्रशस्तम्। तस्मादिदमपि यथाकालमुपादेयमित्यर्थात् सिद्धम्। इति बलोपादानकाला इति। व्याख्याता इति शेषः।

मौलादीनां सप्तानां मध्ये द्वयोर्भृतौ विशेषमाह–तेषामिति। मौलादीनां मध्ये, अमित्राटवीबलम् अमित्रबलम् आटविकबलं च, कुप्यभूतं कुप्यं

This also explains the time for the engagement the army of wild tribes.

When he thinks that his army is to march through the path where the wild tribes are living, that the road is unfavourable to his enemy to march on, that his enemy's army consists mostly of wild tribes, that just as a bilva fruit (wood-apple = Aegle Marmelos) is broken by hitting with another bilva, the small army of his enemy is to be destroyed, then is the time for engaging the army of wild tribes.

That army which is vast and consisting of several types of men who are ready to rise even without provision and wages for plunder when told or untold is termed as the enthusiastic one. That army maintained by giving daily food, ready to plunder the enemy's region and destroy fortifications and obeys the order of the king is vincible for the enemy, whereas that which consists of the men of the same country, same caste and same training is invincible and and is called a compact body of great strength. Such are the suitable times for recruiting the army.

Among them, those consisting of wild tribes are to be paid with raw produces or with allowance of plunder.

अमित्रस्य वा बलकाले प्रत्युत्पन्ने शत्रुमवगृह्णीयात्। अन्यत्र वा प्रेषयेत्। अफलं वा कुर्यात्। विक्षिप्तं वा वासयेत्। काले वातिक्रान्ते विसृजेत्। परस्य चैतद् बलसमुद्दानं विघातयेद्, आत्मनः सम्पादयेत्।

पूर्वं पूर्वं चैषां श्रेयः सन्नाहयितुम्।

तद्भावभावित्वान्नित्यसत्कारानुगमाच्च मौलबलं भृतबलाच्छ्रेयः।

वस्त्रास्तरणादि तद्रूपभृतियुक्ते, विलोपभृतं वा शत्रुविषयपरिलुण्टनलब्धद्रव्यात्मकभृतियुक्तं वा कुर्यात्।

मित्रबलविषयमेव विशेषान्तरमाह–अमित्रस्य वेति। शत्रोः, बलकाले प्रत्युत्पन्ने स्वशत्रुयुद्धप्राप्त्या स्वबलोपादानावसरे प्राप्ते, शत्रुं स्वसाह्याय पूर्वमागतं शत्रुसैन्यम्, अवगृह्णीयात् स्वकार्यस्य सावशेषत्वं वदन् स्ववश एव स्थापयेत् नतु तस्मिन्नवसरे विसृजेदित्यर्थः। अन्यत्र वा प्रेषयेत् स्वस्यैव कार्यान्तरमपदिश्येति शेषः। अफलं वा कुर्यात् पणितसाहाय्यदानप्रतिफलहीनं वा कुर्यात्, शत्रुबलं सद्यो विसृजन्निति शेषः।

विक्षिप्तं वा बहुत्र विप्रकीर्णं वा, वासयेत्, सद्यस्समुत्थापनसौकर्यभङ्गार्थमिति शेषः। काले वा अतिक्रान्ते साहाय्यसापेक्षे कालेऽतीते. विसृजेत्। एवं निरूपितं बलोपादानं परकीयमुपघातेन योजयेत्, आत्मायं च परारब्धविघातप्रतिविधानेन सम्पन्नं कुर्याद् विजिगीषुरित्याह-परस्य चैतदित्यादि।

अथ सन्नाहगुणा इति सूत्रम्। सन्नाहस्य बलानामुद्योगस्य गुणाः श्रेयस्त्वभेदाः कथ्यन्त इति सूत्रार्थः। उपात्तानां बलानां सन्नाहे शेषतया प्राप्ते तत्तारतम्यस्य निरूपणं प्राप्तावसरमिति प्रकरणसङ्गतिः।

पूर्वं पूर्वं चैषामिति। मौलभृतादीनामौत्साहिकान्तानां सप्तानां बलानां मध्ये पूर्वं पूर्वं बलं, सन्नाहयितुं, श्रेयः उत्तरमुत्तरमपेक्ष्य प्रशस्ततरं सन्नाहे कार्यसाधकतरम्।

तदेव श्रेयस्त्वं मौलादीनां सहेतुकं क्रमेण निरूपयिष्यन् प्रथमं मौलबलस्य निरूपयति-तद्भावेत्यादि। तद्भावभावित्वात् तस्य स्वामिनः सत्त्वे सत्त्वाद् अर्थात् तदसत्त्वे चासत्त्वात्, नित्यसत्कारानुगमाच्च स्वामिनो मौलेषु विषये सत्कारं आदरः मौलानां स्वामिनि सत्कारोऽनुरागः तस्य नित्यस्य आगमापायरहितस्य अनुगमाद् अविच्छिन्नानुवर्तनाच्च, नित्यसत्कारा-

When the army of the enemy is on the rise one has to obstruct the march and repel the forces. Or divert their advances to some other regions. Or make their movements fruitless. Or scatter them to different regions. Or when the time expires they may be let off. One should try to frustrate the strength of the enemy's army and to increase the strength of ones own.

It is the earlier ones that are better in this order of enumeration, in the matter of preparation.

Hereditary army is always better than the hired army since the former is dependent on the master and is constantly exercised.

नित्यानन्तरं क्षिप्रोत्थायि वश्यं च भृतबलं श्रेणीबलाच्छ्रेयः।

जानपदमेकार्थोपगतं तुल्यसङ्घर्षामर्षसिद्धिलाभं च श्रेणीबलं मित्रबलाच्छ्रेयः। अपरिमितदेशकालमेकार्थोपगमाच्च। मित्रबलममित्रबलाच्छ्रेयः।

आर्याधिष्ठितममित्रबलमटवीबलाच्छ्रेयः। तदुभयं विलोपार्थम्। अविलोपे व्यसने च ताभ्यामहिभयं स्यात्।

ब्राह्मणक्षत्रियवैश्यशूद्रसैन्यानां तेजःप्राधान्यात् पूर्वं पूर्वं श्रेयः सन्नाहयितुम् इत्याचार्याः।

नुरागाच्चेति पाठे अनुरागस्य स्वशब्दत एवोपदानं बोद्धव्यम्, मौलबलं, भृतबलात्, श्रेयः।

नित्यानन्तरमिति। सर्वदैव व्यवधानरहितं पार्श्वस्थमित्यर्थः, अत एव क्षिप्रोत्थायि अविलम्बसज्जीभावि, वश्यं च स्वायत्तं च, भृतबलं, श्रेणीबलाद् अर्थादतथाविधस्वभावात्, श्रेयः।

जानपदमिति। स्वामिजनपदस्थायि, नतु मित्रबलमिवातथाभूतम् एकार्थोपगतं सहभोग्यैकफलोद्देशोपयातं, तुल्यसङ्घर्षामर्षसिद्धिलाभं यद्विषयस्पर्धाक्रोधवान् स्वामी तद्विषयस्पर्धाक्रोधयुक्तं स्वामितुल्यसिद्धिलाभं च, श्रेणीबलं, मित्रबलाद् अनेवम्भूतस्वभावात्, श्रेयः। नन्वेकार्थोपगतं नाम मित्रबलमस्ति, तच्चैवम्भूतमेवेति कथं तदपेक्षया श्रेणीबलस्य श्रेयस्त्वमिति चेत् तत्राह-अपरिमितदेशकालमित्यादि। श्रेणीबलम्, एकार्थोपगमात्

मित्रबलाच्च श्रेयः एकार्थोपगतान्मित्रबलादपि प्रशस्ततरम्, कस्मात्, यस्मात् तद् अपरिमितदेशकालं साहाय्यदाने देशकालप्रतिनियमनिरपेक्षं नतु मित्रबलमिव तत्सापेक्षमित्यर्थः। मित्रबलमित्यादि। स्पष्टार्थम्।

आर्याधिष्ठितमिति। आर्येण सद्गुणयोगविश्वसनीयेन नायकेनाधिष्ठितम्, अमित्रबलम्, अटवीबलात्, श्रेयः। विनियोगे विशेषमाह–तदुभयमिति। अमित्रबलम् अटवीबलमिति द्वयं, विलोपार्थं विलोपमात्रप्रयोजनकं परविषयपरिलुण्टनमात्रे विनियोक्तव्यमित्यर्थः। अविलोपे विलोपातिरिक्ते युद्धादौ, व्यसने च स्वविपत्समये च, विनियुज्यमानाभ्यामिति शेषः, ताभ्यां निमित्तभूताभ्याम्, अहिभयं स्वपक्षकलहः, स्यात्।

अथ बलस्य जातिप्रयुक्तं श्रेयस्त्वमाह–ब्राह्मणक्षत्रियवैश्यशूद्रसैन्यानामिति। तेषां मध्ये, तेजःप्राधान्यात् तेज इह न शौर्यं ब्राह्मणे तदभावात्।

The hired army which is ever near, ready to rise quickly and obedient is better than a corporation of soldiers.

That corporation of local soldiers, sharing the feelings of the ruler and is actuated with similar feelings of rivalry, anger and expectation of success and gain is better than the army of a friend. The army (of corporate soldiers) irrespective of place and time and having the same purpose in view is better. Further the army of a friend is always preferable to the army of an enemy.

The army of an enemy under the command of an Ārya is better than the army of wild tribes. Both of them (armies of enemy and of wild tribes) are eager to plunder. In the absence of plunder, or troubles they prove as dangerous as a lurking snake.

Preceptors are of the view that armies, composed of Brahmins, Kṣatriyas, Vaiśyas and Śūdras the earlier ones are preferable on account of bravery and are easily roused (for war).

नेतिकौटल्यः। प्रणिपातेन ब्राह्मणबलं परोऽभिहारयेत्। प्रहरणविद्याविनीतं तु क्षत्रियबलं श्रेयः, बहुलसारं वा वैश्यशूद्रबलमिति।

तस्माद् 'एवंबलः परः, तस्यैतत् प्रतिबलम्' इति बलसमुद्दानं कुर्यात्।

हस्तियन्त्रशकटगर्भकुन्तप्रासहाटकवेणुशल्यवद्धस्तिबलस्य प्रतिबलम्।

तदेव पाषाणलगुडावरणाङ्कुशकचग्रहणीप्रायं रथबलस्य प्रतिबलम्।

किन्तु धार्मित्वकृतज्ञत्वादिगुणसम्पत्। तस्य प्राधान्यात् मुख्यतया गणनीयत्वात्, पूर्वं पूर्वं सन्नाहयितुं श्रेयः। इत्याचार्याः, मन्यन्त इति शेषः।

तन्मतं निराचष्टे–नेति कौटल्य इति। तत्र हेतुमाह–प्रणिपातेन, ब्राह्मणबलं, परः शत्रुः, अभिहारयेत् स्वायत्तीकुर्यात्। किं तर्हि श्रेय इत्याह–प्रहरणविद्याविनीतं त्विति। शस्त्रविद्याशिक्षितं, क्षत्रियबलं श्रेयः बहुलसारं वा प्रवीरप्रचुरं वा, वैश्यशूद्रबलं, श्रेयः। इतिशब्दः श्रेयस्त्वनिरूपणसमाप्तौ।

प्रतिबलकर्मेति सूत्रम्। समार्थ्यादिना परबलस्यानुरूपं बलं प्रतिबलं तस्य कर्म करणप्रकारोऽभिधीयत इति सूत्रार्थः। सन्नाहगुणवत् प्रतिबलकर्मणोऽपि बलशेषत्वादिह निरूपणसङ्गतिः।

तस्मादिति। यथोक्तसन्नाहगुणावगमानन्तरमित्यर्थः, एवम्बलः परः एवम्प्रकारबलयुक्तः शत्रुः, तस्यैतत् प्रतिबलं तथाविधस्य शत्रोरिदमनुरूपं प्रतियोधनक्षमं बलम्, इति, ज्ञात्वेति शेषः, बलसमुद्दानं बलस्योपादानं, कुर्यात्।

तत्र हस्तिबलस्य प्रतिबलमाह–हस्तियन्त्रशकटगर्भेत्यादि। हस्तीत्यादिपदे प्रशंसायां मतुप्। प्रशस्तहस्त्यादियुक्तमित्यर्थः। तत्र यन्त्रं जामदग्न्यादि, शकटगर्भः शकटरूपी मध्यः, शकटस्येव गर्भो यस्येति वा, कुन्तः 'हस्ताः सप्तोत्तमः कुन्त' इत्यायुधागाराध्यक्षे व्याख्यातलक्षणः, प्रासश्चतुर्विंशत्यङ्गुलः सर्वलोहमयः, हाटकं त्रिकण्टकं कुन्ततुल्यप्रमाणं, वेणुदीर्घप्रतोदः, शल्यः सर्वतोऽयश्शङ्कुमान् लोहदण्डः। एवम्भूतं बलं, हस्तिबलस्य प्रतिबलम्।

रथबलस्य प्रतिबलमाह–तदेवेति। हस्तिबलप्रतिबलमेव, पाषाणादिप्रायं पाषाणो महाशिला लगुडो ह्रस्वगदा आवरणं प्रसिद्धम् अङ्कुशो–

'Not so'—says Kauṭalya. The enemy may order an army of Brahmins by prostrating before them. An of army Kṣatriyas well-trained in weapons are better, while the army of Vaiśyas and Śūdras is advantageous in the numerical strength.

Hence one should recruit the army considering the dictum that "Such is the army of the enemy and this is my army to oppose it."

To oppose an army of elephants one needs—trained elephants, machines (or contrivances), Śakaṭagarbha (a contrivance having an inner part resembling a cart), spear, barbed missiles, tridents, bamboo sticks and iron darts.

In order to oppose an army of charioteers such weapons fitted with stones, clubs, armours, hooks and spears in plenty are needed.

तदेवाश्वानां प्रतिबलम्।

वर्मिणो वा हस्तिनोऽश्वा वा वर्मिणः कवचिनो रथा आवरणिनः पत्तयश्चतुरङ्गबलस्य प्रतिबलम्।।

एवं बलसमुद्दानं परसैन्यनिवारणम्।
विभवेन स्वसैन्यानां कुर्यादङ्गविकल्पशः।।

इति कौटलीयार्थशास्त्रे अभियास्यत्कर्मणि नवमेऽधिकरणे द्वितीयोऽध्यायः
बलोपादानकालाः सन्नाहगुणः प्रतिबलकर्म,
आदितस्त्रयोविंशतिशततमोऽध्यायः।।

दीर्घ लोहमयः सृणिः कचग्रहणी दीर्घफलः साङ्कुशो वेणुः एवम्प्रायं, रथबलस्य प्रतिबलम्।

अश्वानामाह–तदेवेति। तदेव हस्तिप्रतिबलमेव अश्वानां प्रतिबलम्।

वर्मवन्तो गजास्तथाभूता अश्वाः, कवचयुक्ता रथाः, आवरणवन्तः पदातयश्च हस्त्यश्वरथपदात्यात्मकस्य चतुरङ्गसैन्यस्य यथाक्रमं सामान्यतः प्रतिबलं भवतीत्याह–वर्मिणो वा हस्तिन इत्यादि।।

एवं बलसमुद्दानमिति। यथोक्तसन्नाहगुणप्रतिबलकर्मप्रकारज्ञानपूर्वं बलानामुपादानं, परसैन्यनिवारणं शत्रुसैन्यप्रतियोधनशक्तं, विभवेन स्वसैन्यानां मौलभृतादिस्वकीयसैन्यसम्पदानुरूप्येण, अङ्गविकल्पशः हस्त्यश्वादिरूपसेनाङ्गबाहुल्याल्पत्वविभागानुरोधेन, कुर्यात्।।

इति कौटलीयार्थशास्त्रव्याख्यायाम् अभियास्यत्कर्मणि नवमेऽधिकरणे
द्वितीयोऽध्यायः बलोपादानकालाः सन्नाहगुणाः प्रतिबलकर्म,
आदितस्त्रयोविंशत्यधिकशततमः।।

Similar are the weapons to oppose an army of cavalry.

Elephants and horses clad in armour, chariots with protective armour as also armoured soldiers could withstand the forces of the enemy consisting of the four constituents (elephants, chariots, cavalry and infantry).

Thus the one hundred and twenty third chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the second chapter of the ninth Adhikaraṇa dealing with the section : The time of recruiting the army; the form of equipment and work of arraying a rival force.

Chapter 124

140, 141. प्रक० पश्चात्कोपचिन्ता, बाह्याभ्यन्तरप्रकृतिकोपप्रतीकारश्च।

Sections 140 : Annoyance in the Rear
141 : Remedies against internal and external troubles.

अल्पः पश्चात्कोपो महान् पुरस्ताल्लाभः इति। अल्पः पश्चात्कोपोगरीयान्। अल्पं पश्चात्कोपं प्रयातस्य दष्यामित्राटविका हि सर्वतः समेधयन्ति, प्रकृतिकोपो वा। लब्धमपि च महान्तं पुरस्ताल्लाभम् एवंभूते भृत्यमित्रक्षयव्यया ग्रसन्ते। तस्मात् सहस्रैकीयः पुरस्ताल्लाभस्यायोगः, शतैकीयो वा पश्चात्कोप इति न यायात्। सूचीमुखा ह्यनर्था इति लोकप्रवादः।

पश्चात्कोपचिन्तेति सूत्रम्। पुरस्ताल्लाभमुद्दिश्य प्रस्थिते विजिगीषौ पश्चात् पार्ष्णिग्राहाटविकदूष्यादिभिरुत्पाद्यमानो दाहाविलोपादिरनर्थः पश्चात्कोपः, तस्य चिन्ता पुरस्ताल्लाभापेक्षया गुरुलघुभावविचारः क्रियत इति सूत्रार्थः। समुदात्तबलेनापि यानं पश्चात्कोपानर्थस्याभावनिश्चये सत्येव कर्तव्यम् इति तच्चिन्तात्रारभ्यते।

अल्प इत्यादि। गरीयानित्युत्तरवाक्यगतं सामर्थ्यादिहापकृष्य संबध्यते। इतिशब्दानन्तरं च विचार्यत इति शेषः। किं याने सति जायमानः स्वल्पः पश्चात्कोपो गुरुतरत्वेन गणनीयः (पुरस्ताल्लाभमप्युपेक्ष्या-वर्जनीयत्वेनापेक्षणीयः) उताहो प्रभूतः पुरस्ताल्लाभो गुरुतरत्वेन गणनीयः (पश्चात्कोपमप्युपेक्ष्योपादेयत्वे-नापेक्षणीयः) इति विचार्यत इत्यर्थः। तत्राल्पः पश्चात्कोप एव महतः पुरस्ताल्लाभाद् गुरुतर इति निश्चयमाह–अल्पः पश्चात्कोप इत्यादि। तत्र हेतुमाह–अल्पं पश्चात्कोपमित्यादि। स्वल्पमपि हि पश्चात् पार्ष्णिग्राहमात्रेणोत्पादितं कोपं प्रयातस्य विजिगीषोर्दूष्या अमित्रा आटविकाश्च पुरः पार्श्वतश्च वर्धयन्ति, मन्त्रिपुरोहिताद्याभ्यन्तरप्रकृतिकोपो वा तं वर्धयतीत्यर्थः। लब्धमपि चेति। अगणितपश्चात्कोपेन बिजिगीषुणा यानं कृत्वार्जितमपि, महान्तं प्रभूतं, पुरस्ताल्लाभम्, एमम्भूते पश्चात्कोपे वृद्धिप्राप्ते सति, भृत्यमित्रक्षयव्ययाः भृत्येषु मित्रेषु च विषये क्षयव्ययाः कोपप्रशमनार्थाः, ग्रसन्ते कबलयन्ति न शेषयन्तीत्यर्थः। एवञ्च सिद्धं प्रभूतस्यापि पुरस्ताल्लाभस्य पश्चात्कोपापेक्षं फल्गुत्वमवच्छिन्दन् यानं प्रतिषेधति–तस्मादिति। यानलब्धप्रभूत-

सर्वलाभग्रसनात्, पुरस्ताल्लाभस्य आयोगः सिद्धिः, सहस्रैकीयः सहस्रे एकांशमात्रः, पर्यवस्यतीति शेषः। कदासौ सहस्रैकीयत्वकल्पनेत्याह–शतैकीयो वा पश्चात्कोप इति।

Slight annoyance in the rear, and considerable gain in the front. Slight annoyance in the rear is more serious. Traitors, enemies and wild tribes join together on all sides along with the provoked elements of the state. Hence even the gains that have accrued are affected badly by the loss of servants, friends, finance and by expenditure. Thus the profit will be one in a thousand and loss by annoyance in the rear is one in hundred and as such one should not undertake any march. It is well said that calamities are as small as the point of needle.

पश्चात्कोपे सामदानभेददण्डान् प्रयुञ्जीत। पुरस्ताल्लाभे सेनापतिं कुमारं वा दण्डचारिणं कुर्वीत।

बलवान् वा राजा पश्चात्कोपावग्रहसमर्थः पुरस्ताल्लाभमादातुं यायात्। अभ्यन्तर-कोपशङ्कायां शङ्कितानादाय यायात्।

बाह्यकोपशङ्कायां वा पुत्रदारमेषामभ्यन्तरावग्रहं कृत्वा–

पश्चात्कोपजन्योऽनर्थः शते एकांशमात्रो यदि गण्यते तदेत्यर्थः। तथा च पश्चात्कोपाद् दशगुणं पुरस्ताल्लाभस्य फल्गुत्वमित्याशयः। इति न यायादिति। उक्ताद्धेतोः पश्चात्कोपशङ्कायां यानं न कुर्यादित्यर्थः। अपरो व्याख्याप्रकारः–एवञ्च सिद्धं पश्चात्कोपस्य गरीयस्त्वं पुरस्ताल्लाभफल्गुत्वावच्छेदपूर्वमवच्छिनत्ति–तस्मादिति। यानलब्धसर्वलाभग्रसनात्, पुरस्ताल्लाभस्य आयोगः सिद्धिः, सहस्रैकीयः, गण्यते चेदिति शेषः। पश्चात्कोपः शतैकीयः, गणनीय इति शेषः। शेषं समानम्। अल्पोऽपि पश्चात्कोपः प्रवृद्धो भवतीत्युपदेशं द्रढयितुं लोकप्रवादं दर्शयति–सूचीमुखा हीत्यादि। सूचीमुखाः अत्यल्पारम्भाः अर्थादुत्तरकालबहुलाः।

पश्चात्कोपसम्भावनायामपि यथा यानमनुष्ठीयेत तथाह–पश्चात्कोप इति। तस्मिन् सति, सामदानभेद-दण्डान् प्रयुञ्जीत प्रयुज्य पश्चात्कोपं शमयेत् स्वयमप्रयात एव सन्नित्यर्थः। कस्तर्हि पुरस्ताल्लाभं प्रति यायादित्यपेक्षायामाह–पुरस्ताल्लाभ इति। पुरस्ताल्लाभसाधनार्थे, सेनापतिं, कुमारं वा, दण्डचारिणं कुर्यात् सैन्यप्रणेतारं कृत्वा यानं कारयेदित्यर्थः।

यदि बहुलबलयोगी राजा तर्हि पश्चात्कोपप्रतिविधानार्थे बलैकदेशं समर्थं नियुज्य पुरस्ताल्लाभग्रहणाय स्वयमेव वा यायादित्याह–बलवान् वेत्यादि। एष पश्चात्कोपे विधिः। अभ्यन्तरकोपे त्वाह–अभ्यन्तरकोप-शङ्कायामिति। मन्त्रिपुरोहितसेनापतियुवराजानामन्यतमकोपः अभ्यन्तरकोपः तस्य शङ्कायां, शङ्कितान् येषां कोपः संभावितस्तानमात्यादीन्, आदाय यायात् आत्मना सहैव गृहीत्वा यायात्, स्वसान्निध्यैकावग्राह्यत्वात् तत्कोपस्येत्यभिप्रायः।

बाह्यकोपशङ्कायां वेति। राष्ट्रमुख्यान्तपालाटविकदण्डोपनतानामन्यतमकोपो बाह्यकोपो वक्ष्यमाणः तच्छङ्कायां, पुत्रदारम् एषां राष्ट्रमुख्यादीनां पुत्रान् दारांश्च, अभ्यन्तरावग्रहम् अमात्यादिप्रतिबद्धं, कृत्वा, न्यायादिति वक्ष्यमाणेन संबन्धः। बाह्याभ्यन्तरोभयशङ्कासाधारणमाह–

In the event of the annoyance in the rear one should make use of the

four-fold strategem beginning with conciliation. In the case of gain in front either the commander-in-chief or the prince may lead the forces.

A powerful king capable of suppressing the annoyance from the rear may go in person to appropriate the gain in front. If there is any apprehension of internal troubles, he may take with him suspicious leaders.

If he is apprehensive of external troubles, he may keep the sons and wives of the suspicious people under arrest and after splitting forces into serveral divisions to be administered by an officer, he may proceed on his march.

शून्यपालमनेकबलवर्गमनेकमुख्यं च स्थापयित्वा यायात्। न वा यायात्। 'अभ्यन्तरकोपो बाह्यकोपात् पापीयान्' इत्युक्तं पुरस्तात्।

मन्त्रिपुरोहितसेनापतियुवराजानामन्यतमकोपोऽभ्यन्तरकोपः। तमात्मदोषत्यागेन परशक्त्यपराधवशेन वा साधयेत्।

महापराधेऽपि पुरोहिते संरोधनमवस्रावणं वा सिद्धिः, युवराजे संरोधनं निग्रहो वा गुणवत्यन्यस्मिन् सति पुत्रे।

ताभ्यां मन्त्रिसेनापती व्याख्यातौ।

पुत्रं भ्रातरमन्यं वा कुल्यं राज्यग्राहिणमुत्साहेन साधयेत्।

शून्यपालमिति। शून्यपालं शून्यं शत्र्वभियोगप्रयातस्वामिकं स्थानीयं तत्पालकम्, अनेकबलवर्गं परस्परासंहत्यर्थं मौलभृतादिनानाजातीयसैन्यवर्गयुक्तम्, अनेकमुख्यम्, अनेके मुख्याः सैन्याध्यक्षा यस्य तं तथाभूतं, स्थापयित्वा, यायात्। एवं करणेऽप्याभ्यन्तरकोपसाधनमनैकान्तिकमित्यभिप्रायेणाह–न वा यायादिति। अभ्यन्तरकोपस्याशक्यप्रतिविधानतामयाने हेतुं द्योतयितुं बाह्यकोपात् पापीयस्त्वं पूर्वोक्तं स्मारयति–अभ्यन्तरकोप इत्यादि। 'न वा यायादि'त्येतदनन्तरम् 'अहिभयाद्' इत्यधिकपाठो नयचन्द्रिकाया अभिमत इव प्रतीयते।

कोऽसावभ्यन्तरकोप इत्याह–मन्त्रिपुरोहितेत्यादि। तमिति। अभ्यन्तरकोपम्, आत्मदोषत्यागेन स्वदोष आभ्यन्तरकोपस्य कारणं चेत् तत्यागेन, साधयेत् प्रतिविदध्यात्। परशक्त्यपराधवशेन वा मन्त्रिपुरोहितादिदोष आभ्यन्तरकोपस्य कारणं चेत् मन्त्रिपुरोहितादीनां शक्त्यपराधानुरोधेन वा, साधयेत् वधबन्धार्थदण्डैः दण्डयेत्।

पुरोहितादिषु दण्डदानप्रकारमाह–महापराधेऽपीति। तथाभूतेऽपि पुरोहिते, संरोधनं बन्धनम्, अवस्रावणं वा देशान्निर्वासनं वा, सिद्धिः दण्डः, नतु वधो ब्राह्मणत्वादित्यभिप्रायः। युवराजे विषये, संरोधनं, निग्रहो वा बधो वा, सिद्धिः। कदायं बधपक्षस्तत्राह–गुणवत्यन्यस्मिन् सति पुत्र इति। गुणवत्पुत्रान्तरसद्भावे।

ताभ्यामिति। उक्तदण्डाभ्यां पुरोहितयुवराजाभ्यां यद्वा उक्ताभ्यां संरोधननिग्रहाभ्यां, मन्त्रिसेनापती व्याख्यातौ उक्तदण्डौ वेदितव्यौ, तयोरपि संरोधनम्, अब्राह्मणत्वे निग्रहश्च यथापराधं भवत इत्यभिप्रायः।

आभ्यन्तरकोपस्य प्रकारान्तराण्याह–पुत्रमित्यादि। तं, भ्रातरम्, अन्यं वा कुल्यं स्वकुलीनं, राज्यग्राहिणं राज्यजिघृक्षुम्, उत्साहेन साधयेत्

Or he may not. It has already been stated that internal troubles are more serious than external troubles.

By internal trouble is meant the provocation of any one among the minister, the priest, the commander-in-chief and the heir-apparent. The king should avoid such internal enemy either by giving up his own fault or by pointing out of the danger from an external enemy. When the priest is at fault of the gravest treason either he should be confined or banished, and while the heir-apparent is guilty either confining or putting to death is needed provided there is another noble son.

These are applicable to the minister and the commander-in-chief.

When a son, or a brother or any member of the royal family tries to seize power he should be won over by holding out promises.

उत्साहाभावे गृहीतानुवर्तनसन्धिकर्मभ्यामरिसन्धानभयात्। अन्येभ्यस्तद्विधेभ्यो वा भूमिदानैर्विश्वासयेदेनम्। तद्विशिष्टं स्वयंग्राहं दण्डं वा प्रेषयेत्, सामन्ताटविकान् वा। तैर्विगृहीतमतिसन्दध्यात्। अवरुद्धादानं पारग्रामिकं वा योगमातिष्ठेत्।

एतेन मन्त्रिसेनापती व्याख्यातौ।

मन्त्र्यादिवर्जानामन्तरमात्यानामन्यतमकोपोऽन्तरमात्यकोपः। तत्रापि यथार्हमुपायान् प्रयुञ्जीत।

राष्ट्रमुख्यान्तपालाटविकदण्डोपनतानामन्यतमकोपो बाह्यकोपः। तमन्योन्येनावग्राहयेत्। अतिदुर्गप्रतिस्तब्धं वा सामन्ताटविकतत्कुली–

सैनापत्याद्यधिकारनियोजनेन प्रोत्साह्य शमयेत्। उत्साहाभावे उत्साहाशक्तौ, गृहीतानुवर्तनसन्धिकर्मभ्यां तत्परिगृहीतभूम्यादिभोगानुवृत्त्यनुमत्या सन्धिकर्मणा च, साधयेत्, कुतः, अरिसन्धानभयात् 'असाधने स शत्रुणा सह सन्दध्यादि'ति भयात्। अन्येभ्यस्तद्विधेभ्यो वेति। कुल्यान्तरेभ्यः, भूमिदानैः, एनं विश्वासयेत्। तद्विशिष्टं तेन कुल्येन युक्तं, स्वयङ्ग्राहं दण्डं वा 'येन यल्लभ्यते तत् तस्य स्वम्' इति परिभाष्य युध्यमानं बलं स्वयंग्राहदण्डः तं वा, प्रेषयेत् कचिदभियोगार्थम्। सामन्ताटविकान् वा तद्विशिष्टान्, प्रेषयेत्। तैः तथा प्रेषितैः स्वयं ग्राहदण्डसामन्ताटविकैः, विगृहीतं विरोधितं, कृत्वेति शेषः, अतिसन्दध्याद् बन्धयेदित्यर्थः। अतिसन्धानप्रकारमाह–अवरुद्धादानमिति। अवरुद्धस्य स्वयंग्राहदण्डादिभिर्बद्धस्य ग्रहणं, पारग्रामिकं तदाख्यं, योगं वा दुर्गलम्भोपायोक्तम्, अतिष्ठेद् अनुतिष्ठेत्।

उक्तं कुल्यस्य साधनोपायं मन्त्रिसेनपात्योरतिदिशति–एतेनेत्यादि। इत्थं मन्त्र्यादिचतुष्टया-न्यतमकोपलक्षण आभ्यन्तरकोपस्तत्परिहाश्चोक्तः।

अन्तरमात्यकोपलक्षणमाभ्यन्तरकोपस्य प्रकारान्तरं परिभाषते–मन्त्र्यादिवर्जानामित्यादि। मन्त्रिपुरोहित-सेनापतियुवराजव्यतिरिक्ताः येऽन्तरमात्या दौवारिकान्तर्वंशिकादयः तेषामन्यतमस्य कोपोऽन्तरमात्यकोप इति व्यपदिश्यते। तत्प्रशमनेऽपि पूर्वोक्तानुपायान् यथायोगं प्रयुञ्जीतेत्यर्थः।

अथ बाह्यकोपं तत्परिहारं च निरूपयति–राष्ट्रमुख्यान्तपालाटविकदण्डोपनतानामिति। एषां मध्ये, अन्यतमकोपः, बाह्यकोपः तदाख्यः। तम्, अन्योन्येन अवग्राहयेत् राष्ट्रमुख्यस्य कोपमन्तपालादिभिः अन्तपालादीनां

If this is not possible he should be pacified by conciliation by permitting him to enjoy the portion already seized by him or by means of intrigue through an enemy. Or by securing to him land from an enemy or from any other person of inimical character. Or he may be persuaded to go on a mission with an inimical force to receive only the punishment he deserves at the hands of a vassal or wild tribes. Or he may be made to incur the displeasure of such persons. Or one should resort to the policy that is employed in securing an imprisoned prince or in seizing the village of an enemy.

These explain the measures to be taken with respect to provocation of ministers other than the prime-minister and commanders of the army.

By internal ministerial trouble is meant the provocation of ministers other than the prime minister. In such cases also appropriate strategic means should be employed.

What is meant by external troubles is the provocation of the chief of a district, the officer in charge of a boundary, the chief of wild tribes and of a conquered king.

नावरुद्धानामन्यतमेनावग्राहयेत्। मित्रेणोपग्राहयेद् वा, यथा नामित्रं गच्छेत्।

अमित्राद् वा स्त्री भेदयेदेनम्–'अयं त्वा योगपुरुषं मन्यमानो भर्तर्येव विक्रमयिष्यति, अवाप्तार्थो दण्डचारिणममित्राटविकेषु कृच्छ्रे वा प्रवासे योक्ष्यति, विपुत्रदारमन्ते वा वासयिष्यति, प्रतिहतविक्रमं त्वां भर्तरि पण्यं करिष्यति, त्वया वा सन्धिं कृत्वा भर्तारमेव प्रसादयिष्यति, मित्रमुपकृष्टं वास्य गच्छेद्' इति।

प्रतिपन्नमिष्टाभिप्रायैः पूजयेत्।

कोपं राष्ट्रमुख्येनेत्येवं परस्परेण शमयेत्। तस्यावग्रहीतुमशक्यतायामाह–अतिदुर्गप्रतिस्तब्धं वेति। प्रबलदुर्गावष्टम्भं राष्ट्रमुख्यादिं, सामन्ताटविकतत्कुलीनावरुद्धानामन्यतमेन सामन्तेन आटविकेन तत्कुलीनो यस्तदवरुद्धस्तेन वा, अवग्राहयेत् बन्धयेत्। अथवा, मित्रेण स्वीयेन, उपग्राहयेत् संगमयेत् प्राप्तसख्यं कारयेत्, किमर्थं, यथानामित्रं गच्छेद् यथा स शत्रुणा संगतो न स्यादित्येतदर्थमित्यर्थः।

अमित्रसंगमनवारणस्यान्यमुपायमाह–अमित्राद्वेति। स्त्री गूढपुरुषः, एनं बाह्यं राष्ट्रमुख्याद्यन्यतमम्, अमित्राद्, भेदयेत्। किमुक्त्वा भेदयेदित्याह–अयं त्वेत्यादि। अयमर्थः–यं त्वं गन्तुमिच्छसि सोऽयं त्वां परस्य गूढपुरुषं सन्यमानो 'भर्तर्येव विक्रमस्व' इति चोदयिष्यति, भर्तृविक्रमणदृष्टप्रयोजनः दुष्करे दूरदेशप्रवासकरणीये अमित्राटविकसाधनार्थेऽभियोगे वा त्वां स्वसेनाप्रणेतारं कृत्वा नियोजयिष्यति; तव पुत्रान् दारांश्च स्ववशे स्थापयित्वा तद्विरहितमेव त्वां विषयान्ते वा वासयिष्यति; दृष्टभर्तृविक्रमप्रतिघातं त्वां

स्वामिने विक्रेष्यते त्वामेव वा पणस्थानीये स्वामिनेऽर्पयित्वा सन्धिकरणेन स्वामिनं प्रसादयिष्यति; स्वामिन एव वा केनचिन्मित्रेण सह त्वां पणीकृत्य सन्धि कारयिष्यति; इत्युक्त्वेति।

प्रतिपन्नमिति, अङ्गीकृतभेदोपदेशम्, इष्टाभिप्रायैः तदीप्सितार्थलाभैः पूजयेत्।

अप्रतिपन्नस्य शत्रुसंगमविघटनोपायमाह–अप्रतिपन्नस्येति। अनङ्गीकृतभेदोपदेशस्य, संश्रयं भेदयेत् संश्रयभेदनेन तत्संगमं विघटयेदित्यर्थः।

This should be overcome by seting one of them against the other. He who has fortified himself should be caught hold of with the help of a frontier king, or a chief of wild tribe or a scion of his family. Or he may be caused to be arrested by an ally so that he may not combine with an enemy.

A spy may prevent him from combining with an enemy (by saying) : "This enemy, taking you for a disguised agent will cause you to fall upon your own lord; once his aim is realised, he makes you to lead army against enemies or wild tribes, or to sojourn in a troublesome place, or will cause you to live in a far away place depriving you of the company of your sons and wife; once you have lost all your strength, he sells you to your own lord; or having made peace with you, he will please your own lord; hence it is advisable to you to go to the best friend of your lord."

When he agrees to the proposal he should be honoured.

अप्रतिपन्नस्य संश्रयं भेदयेद्–असौ ते योगपुरुषः प्रणिहितः इति।

सत्री चैनमभित्यक्तशासनैर्घातयेद्, गूढपुरुषैर्वा। सहप्रस्थायिनो वास्य प्रवीरपुरुषान् यथाभिप्रायकरणेनावाहयेत्। तेन प्रणिहितान् सत्री ब्रूयात्। इति सिद्धिः। परस्य चैनान् कोपानुत्थापयेत्। आत्मनश्च शमयेत्।

यः कोपं कर्तुं शमयितुं वा शक्तः, तत्रोपजापः कार्यः। यः सत्यसन्धः शक्तः कर्मणि फलावाप्तौ चानुग्रहीतुं विनिपाते च त्रातुं, तत्र प्रतिजापः कार्यः। तर्कयितव्यश्च–कल्याणबुद्धिरुताहो शठ इति।

किमित्युक्त्वेत्याह–असौ ते योगपुरुषः प्रणिहित इतीति। यस्त्वां संश्रयितुमुपस्थितः, स परप्रेषितो गूढपुरुष इत्युक्त्वा।

सत्री चेति। स च, एनम् अप्रतिपन्नं बाह्यं परसंश्रयिणम्, अभित्यक्तशासनैः वध्यतया निश्चिताः पुरुषा अभित्यक्ताः तद्धस्तप्रेषितैर्गूढलेखैः 'अमित्रो गूढं त्वया हन्यताम्' इत्येतादृशार्थप्रतिपादकैः, घातयेत्, अर्थादमित्रेणैव विदिततल्लेखार्थेन। गूढपुरुषैर्वा घातयेद्, अर्थाद् विजिगीषुप्रयुक्तैः। सहप्रस्थायिनो वास्येति। ये शत्रुं संश्रयितं बाह्येन सह प्रस्थिताः तान्, प्रवीरपुरुषान्, यथाभिप्रायकरणेन तदिष्टार्थप्रदानेन, आवाहयेत् स्वपक्षमानयेत्। वाह्येदिति पाठेऽप्ययमेवार्थः। सहप्रस्थायिनश्चेदावाहयितुमशक्यास्तदा किं कर्तव्यमित्याह–तेन प्रणिहितान् सत्री ब्रूयादिति। 'ते प्रवीरपुरुषा विजिगीषुणा त्वां हन्तु प्रणिहिता गूढपुरुषाः' इति सत्री अमित्रं बोधयेदित्यर्थः। इति सिद्धिरिति। अनेन प्रकारेण कोपप्रतीकार इत्यर्थः। तानिमान् आभ्यन्तरबाह्यकोपान् शत्रुपक्षे जनयेत्, स्वपक्षे च शत्रुजनितान प्रतिकुर्यादित्याह–परस्य चैनानित्यादि।

य एष उपजापः कोपोत्पादार्थो भेदः स कुत्र प्रयोक्तव्य इत्याकाङ्क्षायामाह–यः कोपमित्यादि। कोपोत्पादनप्रशमनयोरुभयोरपि यः शक्तः तस्मिन्नेवोपजापः कर्तव्यः। उपजापाभ्युपगमलक्षणः प्रतिजापः कुत्र कर्तव्य इत्याह–य इत्यादि। यः सत्यसन्धः विश्वसनीयः, कर्माणि क्रियानुष्ठाने, फलावाप्तौ अनुग्रहीतुं च प्रतिजापितुरुपकर्तुं च, विनिपाते त्रातुं च विपत्तौ रक्षितुं च, शक्तः, तत्र प्रतिजापः कार्यः। उपजपितुर्वञ्चकत्वसम्भवात् स प्रतिजापित्रा 'वञ्चको न वे'ति परीक्षणीय इत्याह–तर्कयितव्यश्चेत्यादि।

When he refuses to listen he is to be told (in order to split him). "This agent in disguise is sent to separate you from your enemy."

The spy should engage somebody to murder him in secret; or he may be killed by some concealed persons. Or some brave persons may be made to accompany him (and kill him at the opportune moment). The spy shall tell him (this intentions). Thus the matter can be accomplished. One should cause troubles to the enemy. He should ward off those of his own.

In the case of a person capable of warding the troubles intrigue should be made use of. In the case of a reliable person who is able to perform his works and to favour his ally in his success and to afford protection against calamities, then a counter intrigue shall be employed. But one should ascertain whether he is of noble intentions or of a wicked nature.

शठो हि बाह्योऽभ्यन्तरमेवमुपजपति–भर्तारं चेद्धत्वा मां प्रतिपादयिष्यति शत्रुवधो भूमिलाभश्च मे द्विविधो लाभो भविष्यति, अथवा शत्रुरेनमाहनिष्यति हतबन्धुपक्षस्तुल्यदोष-दण्डेन वा उद्विग्नश्च, मे भूयान् कृत्यपक्षो भविष्यति तद्विधे वान्यस्मिन्नपि शङ्कितो भविष्यति अन्यमन्यं चास्य मुख्यमभित्यक्तशासनेन घातयिष्यामि इति।

अभ्यन्तरो वा शठो बाह्यमेवमुपजपति–कोशमस्य हरिष्यामि, दण्डं वास्य हनिष्यामि, दुष्टं वा भर्तारमनेन घातयिष्यामि, प्रतिपन्नं बाह्यममित्राटविकेषु विक्रमयिष्यामि चक्रमस्य सज्यतां वैरमस्य प्रसज्यतां ततः स्वाधीनो मे भविष्यति, ततो भर्तारमेव प्रसादयिष्यामि, स्वयं वा राज्यं ग्रहीष्यामि, वद्ध्वा वा बाह्यभूमिं भर्तृभूमिं चोभयमवाप्स्यामि, विरुद्धं वावाहयित्वा बाह्यं विश्वस्तं घातयिष्यामि शून्यं वास्य मूलं हरिष्यामि इति।

उपजपिता नाम बाह्यो वाभ्यन्तरमुपजपति अभ्यन्तरो वा बाह्यम्। तत्र बाह्यस्योपजपितुः शठस्याभिसन्धीनाह–शठो हि बाह्य इत्यादि। स हि, अभ्यन्तरं वक्ष्यमाणैरभिसन्धिप्रकारैरुपजपति। तानाह–भर्तारमित्यादि। अन्तिम इतिशब्दस्त्रिषु सम्बध्यते। तेनायमर्थः–मयोपजपितोऽभ्यन्तरो मन्त्री स्वामिनं हत्वा तत्स्थाने मां निवेशयिष्यति चेत्, शत्रुवधो भूमिलाभश्चेति द्विप्रकारो लाभौ मे भविष्यतीति; अथवा शत्रुश्चेद् मन्त्रिणं हनिष्यति, तर्हि हतस्य मन्त्रिणो बन्धुवर्गः मन्त्रिवधेनोद्विग्नो मन्त्रितुल्यदोषः क्रुद्धलुब्धादिवर्गश्चेत्येवं कृत्यपक्षो मे बहुतरः सिध्येदिति; विजिगीषुस्तज्जातीयेऽन्यस्मिन्नपि अविश्वस्तो भविष्यति; तेनान्यमन्यं च विजिगीषोर्मुख्यम् अभित्यक्तहस्तद्वारप्रेषितेन कूटलेखेन विजिगीषुवधबन्धादि-कर्तव्यतोपदेशकेन घातयिष्यामीति।

अभ्यन्तरस्योपजपितुः शठस्याभिसन्धीनाह–अभ्यन्तरो वा शठ इत्यादि। अयमर्थः–कोशमस्य बाह्यस्य

हरिष्यामि; अथवा बलमस्य हनिष्यामि; अथवा दुष्टं मे भर्तारमनेन घातयिष्यामि; अथवा प्रतिपन्नमद्भर्तृघाताभ्युपगमं बाह्यं प्रथमममित्रेष्वाटविकेषु च विक्रान्तं कारयित्वा तैः सहास्य सैन्ये सक्ते प्रकर्षेण रूढे चास्य वैरे ममायं विधेयो भविष्यति, तेन मयि भर्तृप्रसादो भविष्यति; अथवा स्वयं बाह्यस्य विधेयीभूतस्य राज्यं ग्रही-

An external man of obstinate temper will carry out an intrigue with an internal person as : "If you kill the (king) lord and come to me I shall derive a twofold benefit as killing the enemy and securing the land, or my enemy kills him (the minister) his relatives having lost him become excited and apprehend danger of punishment, and thus my partisans become apprehensive towards such persons, and in this situation I will be able destroy people proclaiming them to be guilty in public through written orders."

An internal man of obstinate disposition may employ intrigue with an external man—"I shall either plunder his treasury, kill his army, make use of him in killing a wicked king; if my master agrees to, I shall cause him to march against an external enemy or a wild-tribe; let his circle of states be brought to confusion, let him incur enmity with them; then it is easy to keep him under my power and to make conciliation with him, or I myself shall obtain my master's land as well as outside land, or having caused the adversary of my master to march on I shall have my enemy killed in legitimate manner or I shall seize his capital bereft of soldiers."

कल्याणबुद्धिस्तु सहजीव्यर्थमुपजपति। कल्याणबुद्धिना सन्दधीत। शठं 'तथा' इति प्रतिगृह्यातिसन्दध्यात्। इति।।

एवमुपलभ्य,

परे परेभ्यः स्वे स्वेभ्यः स्वे परेभ्यः स्वतः परे।
रक्ष्याः स्वेभ्यः परेभ्यश्च नित्यमात्मा विपश्चिता।।

।। इति कौटलीयार्थशास्त्रे अभियास्यत्कर्मणि नवमाधिकरणे तृतीयोऽध्यायः पश्चात्कोपचिन्ता, बाह्याभ्यन्तरप्रकृतिकोपप्रतीकारश्च, आदितश्चतुर्विंशतिशतः।।

ष्यामि; बद्ध्वा वा बाह्यं तस्य भूमिं भर्तुभूमिं चेत्युभयं शासनीयमवाप्स्यामि; अथवास्य विरोधिनं यंकमप्यानीय तेन बाह्यं विश्वस्तं घातयिष्यामि; अथवा बाह्यस्य स्थानीयमन्याभियोगव्यासङ्गासन्निहितस्वामिकं हरिष्यामि; इत्येतैरभिसन्धिप्रकारैः शठोऽभ्यन्तरो बाह्यमुपजपेदिति।

कल्याणबुद्धिस्त्विति। अशठस्तु, सहजीवी संश्लिष्यैव जीवितुं शीलवान् नतु विरुध्य, अत एव अर्थं हितम्, उपजपति, नानर्थम्, ततश्च कल्याणबुद्धिना सह, सन्दधीत सन्धिं कुर्यात्। शठं, तथेति प्रतिगृह्य 'यथा त्वयोच्यते तथा करोमि' इति तद्वचनमङ्गीकृत्य, अतिसन्दध्याद् वञ्चयेत्। इति शब्द उपायोपदेशसमाप्तौ।।

एवमुपलभ्येति वक्ष्यमाणश्लोकान्वयि।

परे इति। विपश्चिता कार्यतत्त्वविदुषा विजिगीषुणा, एवम् उपलभ्य शठत्वकल्याणबुद्धित्वे निश्चित्य, परे परेभ्यो रक्ष्याः शठत्वादिनात्मविदितापरे परेभ्यो न प्रकाश्याः। स्वे स्वीयास्तथात्मविदिताः, स्वेभ्यो रक्ष्याः न प्रकाश्याः। स्वे तथात्मविदिताः, परेभ्यो रक्ष्याः न प्रकाश्याः। परे तथाविदिताः, स्वतः स्वेभ्यः, रक्ष्याः न प्रकाश्याः। आत्मा स्वेभ्यः परेभ्यश्च नित्यं रक्ष्यः आत्मनः परान् स्वांश्च प्रति योऽभिप्रायोऽनुकूलः प्रतिकूलो वा स स्वेभ्यः परेभ्यश्च कदापि न प्रकाश्य इत्यर्थः।।

इति कौटलीयार्थशास्त्रव्याख्यायामभियास्यत्कर्मणि नवमऽधिकरणे तृतीयोऽध्यायः,
पश्चात्कोपचिन्ता बाह्याभ्यन्तरप्रकृतिकोपप्रतीकारश्च,
आदितश्चतुर्विंशत्यधिकशततमः।।

A man of noble intentions enters into intrigue for the welfare of his friend. Hence one should make an agreement with a noble person. In the case of a man of bad temper one shall simply say "as you like it" and then go on to deceive him.

Hence, enemies from enemies, subjects from subjects, subjects from enemies and enemies from subjects should ever be guarded; and both from his subjects and enemies, a learned man should ever guard his own person.

Thus the one hundred and twenty-fourth chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the third chapter of the ninth Adhikaraṇa dealing with the sections—'Annoyance in the rear and remedies against internal and external troubles.'

Chapter 125

142. प्रक० क्षयव्ययलाभविपरिमर्शः

Section 142 : Loss of Men, Wealth and Profit

युग्यपुरुषापचयः क्षयः। हिरण्यधान्यापचयो व्ययः।

ताभ्यां बहुगुणविशिष्टे लाभे यायात्।

आदेयः, प्रत्यादेयः, प्रसादकः, प्रकोपको, ह्रस्वकालः, तनुक्षयः, अल्पव्ययो, महान्, वृद्ध्युदयः, कल्पो, धर्म्यः, पुरोगश्चेति लाभसम्पत्।

सुप्राप्यानुपाल्यः परेषामप्रत्यादेय इति आदेयः।

विपर्यये प्रत्यादेयः। तमाददानस्तत्रस्थो वा विनाशं प्राप्नोति।

यदि वा पश्येत्–'प्रत्यादेयमादाय कोशदण्डनिचयरक्षाविधानान्यवस्रावयिष्यामि, खनिद्रव्यवहस्तिवनसेतुबन्धवणिक्पथानुद्धृत-

क्षयव्ययलाभविपरिमर्श इति सूत्रम्। युग्यपुरुषापचयः क्षयः धान्यहिरण्यापचयो व्ययः लाभो यानफलं भूम्यादिप्राप्तिः तेषां विपरिमर्शः गौरवलाघवविचारः क्रियत इति सूत्रार्थः। यानहेतुकयोर्बाह्याभ्यन्तरकोपयोर्निरूपणानन्तरं क्षयव्ययावपि तत्त्वाविशेषान्निरूपणीयतया प्राप्तविति सङ्गतिः।

प्रथमं क्षयव्यययोः स्वरूपमाह–युग्यपुरुषापचय इति। युग्यानि वाह्यानि पुरुषाः कर्मकरादयः तेषामपचयः, क्षयः। हिरण्यधान्यापचयः हिरण्यं धनादि धान्यं व्रीह्यादि तयोरपचयः, व्ययः।

ताभ्यामिति। क्षयव्ययापेक्षया, बहुगुणविशिष्टे आदेयत्वप्रत्यादेयत्वादिभिर्द्वादशभिर्गुणैर्युक्ते, लाभे सति, यायात्।

तान् गुणानुद्दिशति–आदेय इत्यादि। इति लाभसम्पत्, उक्तद्वादशप्रकारो लाभस्य गुण इत्यर्थः।

आदेयादिषु लक्षणीयेषु प्रथममादेयं लक्षयति–सुप्राप्यानुपाल्य इत्यादि। यः सुखेन प्राप्तुं शक्यः, प्राप्तश्च सुखेनानुपालयितुं शक्यः, कालान्तरे परैः प्रत्यादातुमशक्यश्च, स आदेयशब्दित इत्यर्थः।

प्रत्यादेयं लक्ष्यति–विपर्यय इत्यादि। सुप्राप्यानुपाल्य एव परैः प्रत्यादातुं शक्यः प्रत्यादेय इत्यर्थः। तमिति। प्रत्यादेयं भूम्यादिलाभम् आददानः, तत्रस्थो वा तत्रैव स्थित्वोपजीवन् वा, विनाशं प्राप्नोति।

विषयविशेषे तमप्याददीतेत्याह–यदि वा पश्येदित्यादि। अयमर्थः–प्रत्यादेये गृहीते तेन तल्लाभनाशात् परस्य कोशं दण्डं व्रीह्यादिसञ्चयं दुर्गप्राकारादिरक्षाविधानं च हीनमापादयिष्यामि, तेन परस्य खनिं

By the term loss of men, the loss of trained persons is meant. By loss of wealth is meant the diminution of gold and grains.

When the profit exceeds both these, thus one should march (against an enemy).

The characteristic features of the profit are :—(of twelve kinds as) : receivable, returnable, pleasing, exciting hatred, quickly realised, with slight diminution, with slight loss, vast in quantity, productive, harmless, righteous and received first.

A profit easily acquired and secured without the necessity of returning it is termed receivable.

That which is of the reverse nature is returnable. Whoever goes to receive a repayable profit or is enjoying it gets destroyed.

When he thinks that—"by taking a repayable profit I shall cause my enemy's treasury, army and other defensive resources to dwindle; I shall exploit to effect the impoverishment of the mines, timber and elephant forests, irrigational works and roads of the traffic of my enemy;

सारान् करिष्यामि; प्रकृतीरस्य कर्शयिष्यामि: आवाहयिष्यामि, आयोगेनाराधयिष्यामि वा, ताः परः प्रतियोगेन कोपयिष्यति; प्रतिपक्षे वास्य पण्यमेनं करिष्यामि; मित्रमवरुद्धं वास्य प्रतिपादयिष्यामि; मित्रस्य स्वस्य वा देशस्य पीडामत्रस्थस्तस्करेभ्यः परेभ्यश्च प्रतिकरिष्यामि; मित्रमाश्रयं वास्य वैगुण्यं ग्राहयिष्यामि, तदमित्रविरक्तं तत्कुलीनं प्रतिपत्स्यते; सत्कृत्य वास्मै भूमिं दास्यामि, इति, संहितसमुत्थितं मित्रं मे चिराय भविष्यति' इति प्रत्यादेयमपि लाभमाददीत। इत्यादेयप्रत्यादेयौ व्याख्यातौ।

अधार्मिकाद् धार्मिकस्य लाभो लभ्यमानः स्वेषां परेषां च प्रसादको भवति। विपरीतः प्रकोपक इति। मन्त्रिणामुपदेशाल्लाभोऽलभ्य-

द्रव्यवनं हस्तिवनं सेतुबन्धं वणिक्पथं चोद्धृतसारं कृत्वा क्षयप्राप्तं करिष्यामि, तेन परस्य प्रकृतीस्तदुपजीविनीरुपजीव्यहान्या कर्शयिष्यामि; लब्धभूमावेव वा तत्फलभोगार्थे परस्य प्रकृतीरानीय वासयिष्यामि, आयोगेन च तदीयसर्वोपचयभोगाभ्यनुज्ञानलक्षणेन ताः प्रीणयिष्यामि, परो मद्गृहीतभूमिप्रत्यादानानन्तरं मद्विहितानुग्रहविपरीताचरणलक्षणेन प्रतियोगेन प्रकृतिकोपमात्मानर्थावहं जनयिष्यति; परस्य प्रतिपक्षाय वा परं लाभापहारक्षीणं द्रव्यग्रहणेनार्पयिष्यामि, अस्य लाभापहारक्षीणस्य परस्य स्थाने स्वमित्रम् अवरुद्धं पुत्रादि वा निवेशयिष्यामि; स्वमित्रस्य स्वस्य वा देशस्य चोरेभ्यः शत्रुभ्यश्च जातां पीडां लब्धभूमिस्थितो भूत्वा प्रतिकर्तुं शक्ष्यामि; अथवा परस्य मित्रम् आश्रयभूतं मध्यमं वा लब्धभूमिस्थितो भूत्वा परस्य युक्तकरग्राहित्वादिगुणहीनतां प्रजापीडकत्वं च बोधयिष्यामि, तथा बोधितं च तत् परस्य मित्रं परस्मिन् विरक्तं भूत्वा परस्य कुलीनं पुत्रादिमवरुद्धं तद्राज्यग्राहित्वेन प्रतिपत्स्यते गृहीतामेव वा परस्य भूमिं परस्य कन्यादानादिसत्कारपूर्वं दास्यामि; इत्यनेन प्रकारेण सत्कृत्य भूमिप्रत्यर्पणलक्षणेन कृतसन्धिकं मया सह सम्भूय व्यापृतं मम चिरस्थायि मित्रं भविष्यति; इत्येवंरूपान् हेतून् यदि पश्येत् तर्हि प्रत्यादेयमपि लाभं

गृह्णीयादिति। इत्यादेयप्रत्यादेयावित्यादि। अनेन प्रकारेणादेयानादेयौ लाभौ भावाभावरूपतया सह निरूपितावित्यर्थः।

प्रसादकप्रकोपकौ निरूपयति–अधार्मिकादित्यादि। अधार्मिकसकाशाद् धार्मिकेण लभ्यमानो लाभः धार्मिकपक्ष्याणामधार्मिकपक्ष्याणां चोभ–

I shall impoverish his subjects, or cause them to migrate, or conspire against him; when they are reduced or conspire against him; when they are reduced to this condition, my enemy inflames their hatred (by oppression); or I shall set my enemy against another enemy, my adversary will give up his hopes and run away to the side of some blood-relations; or having improved his lands, I shall return them to him, and when he is thus brought to ascendency, he will be a lasting friend of mine"—Then he may take even a repayable profit. Thus receivable and repayable profits are explained.

The profit which a virtuous king obtains from a wicked king pleases both his own and other people.

That which is of the reverse nature excites anger.

मानः कोपको भवति, 'अयमस्माभिः क्षयव्ययौ ग्राहितः' इति। दूष्यमन्त्रिणामनादराल्लाभो लभ्यमानः कोपको भवति, 'सिद्धार्थोऽयमस्मान् विनाशयिष्यति' इति। विपरीतः प्रसादकः। इति प्रसादकोपकौ व्याख्यातौ।

गमनमात्रसाध्यत्वाद्ध्रस्वकालः।
मन्त्रसाध्यत्वात् तनुक्षयः।
भक्तमात्रव्ययत्वादल्पव्ययः।
तदात्ववैपुल्यान्महान्।
अर्थानुबन्धकत्वाद् वृद्ध्युदयः।

येषां प्रीतिं जनयतीति स प्रसादक उच्यते। उक्तवैपरीत्येन धार्मिकसकाशादधार्मिकेण लभ्यमानो लाभ उभयेषामपि द्वेषं जनयतीति स प्रकोपक इत्युच्यत इत्यर्थः। कोपकस्यान्यौ प्रकारावाह–मन्त्रिणामित्यादि। मन्त्र्युपदेशानुसारेण कस्यचिल्लाभस्यार्थे समुद्यमे कृतेऽप्यलब्धः स लाभः स्वामिनः प्रद्वेषकरो भवति, 'अयमस्माभिवृथा क्षयव्ययौ ग्राहित' इति मन्त्रिणां शङ्काजनकश्च भवतीत्यर्थः। दूष्यमन्त्रिणामिति। दूष्या ये मन्त्रिणस्तेषाम्, अनादराद् अवज्ञानाद्, लाभः लभ्यमानः, कोपकः शङ्काकरो भवति। शङ्कायास्वरूपमाह–सिद्धार्थोऽयमित्यादि। विपरीतः प्रसादक इति। मन्त्र्युपदेशाल्लभ्यमानो लाभः, दूष्यमन्त्रिणामनादरादलभ्यमानो लाभश्च, प्रसादजनको भवति। इति प्रसादकेत्यादि। व्याख्यातौ पूर्ववत् सह निरूपितौ।

अथ लाभस्याभिसन्धियोग्यत्वप्रयोजकान् ह्रस्वकालत्वादिगुणानाह–गमनमात्रसाध्यत्वादित्यादि। अचिरव्यापारनिष्पाद्यो लाभो ह्रस्वकाल इत्यर्थः।

मन्त्रसाध्यत्वादिति। मन्त्रेण उपजापादिना प्रधानभूतेनाल्पयुद्धवत्तयाल्पयुग्यपुरुषापचयवता साध्यत्वात्, तनुक्षयो नाम लाभः।

भक्तमात्रव्ययत्वादित्यादि। धनग्रहणानपेक्षभक्तदानमात्रतृप्तसैन्यसाध्योऽल्पव्ययो नाम।

तदात्ववैपुल्यादित्यादि। तत्काल एवं प्रचुरतया लभ्यमानो लाभो महान् नाम।

अर्थानुबन्धकत्वादित्यादि। तत्काललभ्यार्थानुबन्ध्युत्तरकाललभ्यार्थको वृद्ध्युदयो नाम।

The profit which one not received, but expected at the advice of ministers excites hatred since they think that "this king has been involved in loss of men and money." That profit obtained without the advice of the treacherous ministers excites hatred since they feel that "having made the proft, the king destroys us." That which is of the reverse nature pleases. Thus the causes for pleasing and provoking are explained.

What is acquired by mere marching is what is acquired soon.

What is realised by negotiation involves a little loss.

What is obtained by expenditure of provisions involves only a small expenditure.

What is of immense value is vast.

निराबाधकत्वात् कल्यः।

प्रशस्तोपादानाद् धर्म्यः।

सामवायिकानामनिर्बन्धगामित्वात् पुरोग इति।

तुल्ये लाभे, देशकालौ शक्त्युपायौ प्रियाप्रियौ जवाजवौ सामीप्यविप्रकर्षौ तदात्वानुबन्धौ सारत्वसातत्ये बाहुल्यबाहुगुण्ये च विमृश्य बहुगुणयुक्तं लाभमाददीत।

लाभविघ्नाः—कामः कोपः साध्वसं कारुण्यं ह्रीः अनार्यभावो मानः सानुक्रोशता परलोकापेक्षा दाम्भिकत्वम् अत्याशित्वं

निराबाधकत्वादित्यादि। उत्तरकालनिरुपद्रवः कल्यः।

प्रशस्तोपादानाद् धर्म्य इति। प्रशस्तं यदुपादानं प्रकाशयुद्धेनार्जनं तेन विषयीकृतो लाभो धर्मानपेतत्वाद् धर्म्यः।

सामवायिकानामित्यादि। सम्भूययायिनां परस्परभागप्रकर्षानियमोपस्थितः प्रकृष्टो लाभः पुरोग इत्युच्यते।

अथ लाभसाम्ये तद्विशेषोपादानस्य निमित्तान्याह—तुल्ये इत्यादि। देशकालादिनिमित्तपर्यालोचनया यस्मिन् लाभे बहुगुणयोगं पश्यति तमुपाददीतेत्यर्थः। तत्र देशस्य कालस्य चैकस्मिन्नेव द्रव्ये गुणविशेषाधान-हेतुत्वं प्रसिद्धम्। शक्तिषु मन्त्रप्रभावोत्साहलक्षणासु पूर्वपूर्वसाध्यो लाभ उत्तरोत्तरसाध्यात् प्रशस्तः। तथा सामादिषु। हिरण्यलाभः सर्वप्रियत्वाद् बहुगुणो, न तथान्यलाभः। जवाजवौ सिद्धिशैघ्र्यविलम्बौ, शीघ्रसिद्धिको हि विलम्बसिद्धिकात् प्रशस्तः। स्वभूमिप्रत्यासन्ना भूमिर्विप्रकृष्टभूम्यपेक्षया श्रेयसीति सामीप्यविप्रकर्षौ

गुणप्रयोजकौ। तत्कालमात्रपर्यवसायिनो लाभादुत्तरकालानुबन्धयुक्त: प्रशस्त इति तदात्वानुबन्धौ गुणहेतू। सारत्वसातत्ये श्रेयस्त्वप्रयोजके, यथा रत्नादे: सारत्वं लवणादे: सातत्यम्। बाहुल्यं संख्यात: परिमाणतश्च बहुत्वं बाहुगुण्यं संख्याद्यबाहुल्येऽपि बहुगुणयोग: ते अपि विमर्शनीये श्रेयस्त्वहेतुत्वात्।

लाभविघ्नानाह–लाभेत्यादि। काम: स्त्रीप्रसङ्ग: स खलूत्साहयरिपन्थित्वाल्लाभं विहन्ति। कोप: रभसप्रवृत्तिहेतुत्वात्। साध्वसम् अप्रगल्भत: शत्रुमित्रादिषु यथार्हव्यवहारविरोधित्वात्। कारुण्यं बहुप्राणिवध-शङ्कया युद्धप्रवृत्तिप्रतिबन्धकत्वात्। ह्री: लज्जा सापराधेऽपि सान्त्वदिन्यभियोगप्रतिबन्धात्

That which is the source of wealth is productive.

What is obtained without trouble is harmless.

What is obtained best is righteous.

What is obtained without any hindrance

from is profit coming first.

When profits accrued from two sources are equal, he should consider the place and time, strength and means, affection and disaffection, intrigue and absence of intrigue, nearness and distance, present and future effects, constant worth or instant worth, plentifulness and usefulness, he should accept only that profit which contains most of the above characteristics.

Obstruction to profit are :—passion, anger, timidness, mercy, bashfulness, living in a non-Āryan way, haughtiness, pity, desire for the other world, adherence to virtuous life, deception, neediness, envy, negligence, inability to endure cold, heat and rain; and faith in the auspiciousness of lunar days and asterisms.

दैन्यम् असूया हस्तगतावमानो दौरात्मिकमविश्वासो भयमनिकार: शीतोष्णवर्षाणा-माक्षम्यं मङ्गलतिथिनक्षत्रेष्टित्वमिति।।

नक्षत्रमतिपृच्छन्तं बालमर्थोऽतिवर्तते।
अर्थो ह्यर्थस्य नक्षत्रं किं करिष्यन्ति तारका:।।
नाधना: प्राप्नुवन्त्यर्थान् नरा यत्नशतैरपि।
अर्थैरर्था: प्रबध्यन्ते गजा: प्रतिगजैरिव।।

इति कौटलीयार्थशास्त्रे अभियास्यत्कर्मणि नवमाधिकरणे
चतुर्थोऽध्याय: क्षयव्ययलाभविपरिमर्श:
आदित: पञ्चविंशशत:।।

अनार्यभाव: नृसंशत्वं विश्वासघातादिप्रवर्तकत्वात्। मान: 'अहं महानि'त्यहङ्कार: सहायविघटकत्वात्। सानुक्रोशता अनुक्रोश उपहाराद्यर्पणनिमित्ता दया तैक्ष्ण्यविषये मृदुवृत्तिप्रयोजकत्वात्। परलोकापेक्षा परलोकविघातकपापयोगशङ्कया दाहविलोपादिवैमुख्यापादकत्वात्। दाम्भिकत्वं विश्वस्तवञ्चकत्वम्। अत्याशित्वं न्यायप्राप्ताभ्यधिकलाभभक्षकत्वम्। दैन्यम् अधमेषु साह्ययाच्ञा। असूया दृष्टगुणेषु

मन्त्र्यमात्यप्रभृतिषु दोषारोपः। हस्तगतावमानः हस्तप्राप्तस्यार्थस्यावज्ञानम्। दौरात्मिकं पीड्यापीड्य-साधारणपीडोत्पादकत्वम्। अविश्वासः विश्वसनीयेऽपि विश्वासाकरणम्। भयम् अभियोगे पराजयशङ्का। परस्य तिरस्क्रिया निकारः तदकरणमनिकारः, अप्रतिकार इति पाठे सिद्धिप्राक्कालपरापतितविनिपात-प्रतिक्रियाननुष्ठानम्। शीतोष्णवर्षाणाम् आक्षम्यं शीतोष्णवर्षासहिष्णुत्वम्। मङ्गलतिथिनक्षत्रेष्टित्वं कार्यारम्भानुकूलशोभनतिथिनक्षत्रापेक्षकत्वम्। दाम्भिकत्वादीनां लाभविघातकत्वं सहायविघटकत्व-प्रवृत्तिप्रतिबन्धकत्वादिना यथायथं बोद्धव्यम्।।

विघ्नेषु विंशतावुक्तेषु अन्तिमस्यातिपातिककार्यविषयतां वक्तुमाह–नक्षत्रमिति। नक्षत्रम् अतिपृच्छन्तम् अतिमात्रं पृच्छन्तं गृहपटलप्रज्वलितवह्निप्रशमनजातीये सद्यःकरणीयेऽपि कार्ये 'नक्षत्रं कार्यारम्भानुकूलं नवे'त्यनुयुञ्जानं, बालम् अप्राज्ञम्, अर्थः प्रवृत्तिफलम्, अतिवर्तते अतिक्रम्य गच्छति। कुतः हि यतः, अर्थस्य साध्यस्य फलस्य, अर्थः धनादि, नक्षत्रम्। इह नक्षत्रशब्देन सिद्ध्युपकरणं लक्ष्यते साधनं भवतीत्यर्थः। तारकाः किं करिष्यन्ति तत्रासाधिका इत्यर्थः।

लाभसाधनेषु धनस्य मुख्यत्वमाविष्कर्तुमाह–नाधना इति। अधनाः धनरूपसाधनरहिताः, नराः यत्नशतैरपि कृतैः, अर्थात् शत्रुजयादिरूपान्, न प्राप्नुवन्ति। अर्थाभावेऽर्थासिद्धिलक्षणं व्यतिरेकमुक्त्वा तत्सत्त्वे तत्सिद्धिलक्षणमन्वयमाह–अर्थैरिति। तैः, अर्थाः प्रबध्यन्ते प्रकर्षेण साध्यतया संबद्धा वर्तन्ते। तत्रोपमामाह–गजाः प्रतिगजैरिवेति। यथा गजाः प्रतिगजैः साधनभूतैः साध्यतया संबद्धास्तद्वत्। नाधना इत्यस्य स्थाने साधना इति पाठे तु मत्वर्थलक्षणया धनादिसाधनवन्त इत्यर्थं कल्पयित्वा त एव यत्नशतैरपि कृतैरर्थान् प्राप्नुवन्ति, न तु धनादिसाधनरहिता इति कथञ्चिद् व्याख्येयम्।।

इति कौटलीयार्थशास्त्रव्याख्यायामभियास्यत्कर्मणि नवमेऽधिकरणे
चतुर्थोऽध्यायः क्षयव्ययलाभविपरिमर्शः,
आदितः पञ्चविंशत्यधिकशततमः।।

Wealth will move away from that childish man who inquires too much about the stars; for wealth itself is the star for wealth, what could mere stars do?

Men of poor accomplishment could not acquire wealth even after trying for it a hundred times; for wealth is controlled by wealth like an elephant is controlled by elephants.

Thus the One hundred and twentyfifth chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the fourth chapter of the ninth Adhikaraṇa dealing with 'Loss of men, wealth and profit'.

Chapter 126

143. प्रक० बाह्याभ्यन्तराश्चापदः

Sections 143 : External and Internal Dangers

सन्ध्यादीनामयथोद्देशावस्थापनमपनयः। तस्मादापदः सम्भवन्ति।

बाह्योत्पत्तिरभ्यन्तरप्रतिजापा। अभ्यन्तरोत्पत्तिर्बाह्यप्रतिजापा। बाह्योत्पत्तिर्बाह्यप्रतिजापा। अभ्यन्तरोत्पत्तिरभ्यन्तरप्रतिजापा। इत्यापदः।

यत्र बाह्या अभ्यन्तरानुपजपन्ति, अभ्यन्तरा वा बाह्यान् तत्रोभययोगे प्रतिजपतः सिद्धिर्विशेषवती। सुव्याजा हि प्रतिजपितारो

बाह्याभ्यन्तराश्चापद इति सूत्रम्। बाह्याः राष्ट्रमुख्यान्तपालादिप्रभवाः अभ्यन्तरा मन्त्रिपुरोहितादिप्रभवाः इत्युभयविधा आपदः चकारात् तत्प्रतिविधानं चोच्यन्त इति सूत्रार्थः।

तासां कारणमाह–सन्ध्यादीनामिति। सन्धिविग्रहादीनां षण्णां गुणानाम्, अयथोद्देशावस्थापनं स्वस्वविषयातिक्रमेण प्रयोगः, अपनयः इति पादश्चोच्यत इति शेषः। तस्माद् अपनयाद्, आपदः, संभवन्ति।

बाह्याभ्यन्तरयोरापदोरुपजपितृप्रतिजपितृभेदात् प्रत्येकं द्वैविध्यं दर्शयन्नापदां चातुर्विध्यमाह–बाह्योत्पत्तिरिति। बाह्याद् राष्ट्रमुख्यादेरुपजापकाद् उत्पत्तिर्यस्याः सा तथाभूता अभ्यन्तरप्रतिजापा अभ्यन्तरो मन्त्र्यादिः प्रतिजापः प्रतिजपिता यथोपजापानुष्ठनाभ्युपगन्ता यस्याः सा तथाभूता विपत् प्रथमा। अभ्यन्तरोत्पत्तिः मन्त्र्याद्यभ्यन्तरोपजपितृका, बाह्यप्रतिजापा राष्ट्रमुख्यान्तपालादिप्रतिजपितृका द्वितीया। बाह्योत्पत्तिर्बाह्यप्रतिजापेति। बाह्योपजपितृका बाह्यप्रतिजपितृका तृतीया। अभ्यन्तरोत्पत्तिरभ्यन्तरप्रतिजपितृकेति चतुर्थी। इत्यापद इति। उभयजातीयोपजपितृप्रतिजपितृके द्वे एकजातीयोपजपितृप्रतिजपितृके द्वे इत्याहत्य चतूरूपा आपद इत्यर्थः।

तासूभययोगवत्योराद्ययोर्विपदोः परिहारार्थम् उपजपितृसमाधानात् प्रतिजपितुः समाधानं प्रशस्तमित्याह–यत्र बाह्या इत्यादि। सिद्धिः सामदानादिना समाधानम्। विशेषवती श्रेयसी। श्रेयस्त्वे हेतुमाह–सुव्याजा हीति। हि यतः, प्रतिजपितारः सुव्याजाः, व्याजा उपजपितृप्रयुक्तो–

Formation of treaty and other settlements when not required is impolicy. That will lead to danger.

Dangers are due to external origin and internal abetment. Of internal

origin and external abetment. Of external origin and external abetment. Of internal origin and internal abetment.

When outsiders carry on intrigue with local men or local men with outsiders there the consequence of the intrigue carried on by the combination of the local and outside persons will be very serious.

भवन्ति, नोपजपितारः। तेषु प्रशान्तेषु नान्यान् शक्नुयुरुपजपितुमुपजपितारः। कृच्छ्रोपजापा हि बाह्यानामभ्यन्तरास्तेषामितरे वा। महतश्च प्रयत्नस्य वधः, परेषाम् अर्थानुबन्धश्चात्मनोऽन्य इति।

अभ्यन्तरेषु प्रतिजपत्सु सामदाने प्रयुञ्जीत। स्थानमानकर्म सान्त्वम्। अनुग्रहपरिहारौ कर्मस्वायोगो वा दानम्।

–पजापाङ्गीकारकारणानि धनग्रहणादीनि तानि सुखोपलभ्यानि सुबहूनि च येषां ते तथाभूताः, भवन्ति। उपजपितारः, न सुव्याजाः अचिन्त्योपजपनकारणा इत्यर्थः। प्रतिजपितुरेकैकस्य प्रशमने कृतेऽपि नवनवप्रति-जपितृप्रादुर्भावे प्रशमयितव्यापरिसमाप्तिः प्रसज्येतेत्याशङ्कायामाह–तेष्वित्यादि। प्रतिजपितृषु केषुचित् कृतसमाधानेषु उपजपितारोऽन्यानुपजपितुमुपजापोद्भेदभयादपारयन्तः स्वयमेव शम्येयुरित्यभिप्रायः। अशक्यश्च कर्तुमुपजापो बाह्यैराभ्यन्तराणाम्, आभ्यन्तरैश्च बाह्यानामसामानाधिकरण्यादित्यभिप्रायवानाह–कृच्छ्रोपजापा हीत्यादि। यद्युपजप्यमानैरन्यैरुपजापो नाभ्युपगम्येत नीयेत चोद्भेदं, तर्हि उपजपितुरुपजपनविषयोऽतिमहान्, यत्नो निष्फलः स्यात्, उपजाप्यानां स्वामिप्रसादरूपार्थानुवृत्तिः सिध्येद्, आत्मनः स्वामिप्रकोपानर्थ-श्चोत्पद्येतेत्याह–महतश्चेत्यादि। वधो घातः नैष्फल्यम्। आत्मनः स्वस्य उपजपितुः। अन्यः अर्थानुबन्धादितरः अनर्थानुबन्ध इत्यर्थः। इदमादर्शविशेषावेक्षितपाठानुरोधि व्याख्यानम्। माधवस्तु 'महतश्च प्रयत्नस्य वधः परेषामर्थानुबन्धश्चात्मनः' इति पाठमाश्रित्यान्यथा व्याचष्टे। तद्यथा–'यदि बाह्याभ्यन्तराणामन्योन्यस्योपजापो दुष्करस्तर्हि त्याज्य एवायमित्यत्राह–महतश्चेत्यादि। उपजापेन परोत्साहवधः। स्वोत्साहफलातिशयश्च स्यादिति भावः' इति।

प्रतिजपितृप्रशमनोपायानाम्–अभ्यन्तरेष्वित्यादि। मन्त्र्यादिषु, प्रतिजपत्सु बाह्यकृतोपजापानुष्ठानाभ्युप-गन्तृषु, सामदाने, प्रयुञ्जीत प्रयुज्य तान् प्रशमयेत्। तत्र साम्नः प्रकारमाह–स्थानमानकर्म सान्त्वमिति। विशिष्टाधिकारयोजनलक्षणं स्थानकर्म छत्रचामरादिप्रतिपादनलक्षणं मानकर्म च सान्त्वापरपर्यायं सामेत्यर्थः। दानस्याह–अनुग्रहपरिहारावित्यादि। अनुग्रहो धनदानं परिहारः आदेयाग्रहणं करमोक्षणं वा तौ, कर्मसु आयोगो वा विशिष्टेषु कर्मसु समग्रफलग्रहणाभ्यनुज्ञा वा, दानम्।

Abettors of an intrigue have a better chance of success than those who perpetrate the same, for when the perpetrators are put down others could not try for intrigue. Outsiders can hardly win over the locals by intrigue, nor can the locals reduce outsiders. Outsiders will find their efforts futile and their they are only conducive to the prosperity of the targetted person.

When locals are found abetting with outsiders the policies of conciliation and gifts, shall be employed to suppress them. By conciliation is meant bestowing of high rank and honour. Favour and remission of

taxes or employment to conduct the works of the state is what is meant by gifts.

बाह्येषु प्रतिजपत्सु भेददण्डौ प्रयुञ्जीत। सत्रिणो मित्रव्यञ्जना वा बाह्यानां चारमेषां ब्रूयुः 'अयं वो राजा दूष्यव्यञ्जनैरतिसन्धातुकामो, बुध्यध्वम्' इति। दूष्येषु वा दूष्यव्यञ्जनाः प्रणिहिता दूष्यान् बाह्यैर्भेदयेयुः, बाह्यान् वा दूष्यैः। दूष्याननुप्रविष्टा वा तीक्ष्णाः शस्त्ररसाभ्यां हन्युः। आहूय वा बाह्यान् घातयेयुरिति।

यत्र बाह्या बाह्यानुपजपन्ति, अभ्यन्तरान् अभ्यन्तरा वा,

अभ्यन्तरप्रतिजपितृविषयं प्रशमोपायमुक्त्वा बाह्यविषयमाह बाह्येष्विति। राष्ट्रमुख्याटविकादिषु, प्रतिजपत्सु, भेददण्डौ प्रयुञ्जीत भेददण्डयोः प्रयोगेण तान् प्रशमयेदित्यर्थः। तत्र भेदप्रयोगप्रकारमाह–सत्रिण इति। ते, एषां बाह्यानां प्रतिजपतां, मित्रव्यञ्जनाः मित्रभावमभिनयन्तः, चारं राज्ञः कपटप्रयोगं ब्रूयुः। कथमिति, अयं राजा दूष्यव्यञ्जनैः आत्मनः प्रियैरेवाप्रियवेषैर्मन्त्र्यादिभिराभ्यन्तरैरुर्जापितृभावं गमितैः, वः युष्मान्, अतिसन्धातुकामः वञ्चयितुमिच्छति। बुध्यध्वम् इदं रहस्यं ज्ञात्वा प्रतिजपितृकर्मणि। मा प्रवर्तध्वमित्यर्थः। इति। मित्रव्यञ्जनत्वस्वीकारेण भेदनमुक्त्वा दूष्यव्यञ्जनत्वस्वीकारेण भेदनमाह–दूष्येषु वेति। राजाप्रियेषु अभ्यन्तरेषु मन्त्र्यादिषु राष्ट्रमुख्यादिषु बाह्येषु वा प्रतिजपत्सु विषये, दूष्यव्यञ्जनाः प्रणिहिताः राजाप्रियवेषतया प्रयुक्ता गूढपुरुषाः, दूष्यान् अर्थात् प्रतिजपतोऽभ्यन्तरान्, बाह्यैर्भेदयेयुः बाह्यैरुपजपितृभिरेव करणभूतैर्भेदयेयुः 'य एते व उपजपितारस्ते राजप्रणिहिता' इति छलोक्त्या तान् प्रतिजपितृकर्मानुष्ठानान्निवर्तयेयुरित्यर्थः। बाह्यान् वा दूष्यैरिति। दूष्यैराभ्यन्तरैरुपजपितृभिः करणभूतैर्बाह्यान् प्रतिजपितृन् भेदयेत्, पूर्ववच्छलोक्त्या तान् प्रतिजपितृकर्मानुष्ठानान्निवर्तयेदित्यर्थः। दण्डप्रयोगप्रकारमाह–दूष्यानिति। तान्, अनुप्रविष्टा वा कार्यव्याजेन तैः सह संभूय वा, तीक्ष्णाः, शस्त्ररसाभ्यां हन्युः। आहूय वेति। 'भवदनुष्ठेयप्रतिजापकर्मानुगुण-माचरिष्यामि' इति वचनेन विश्वास्य वा, बाह्यान् प्रतिजपितृन्, घातयेयुः। इति।

इत्थमुभययोगवत्योराद्ययोरापदोः प्रतिक्रियामुक्त्वा एकयोगवत्योरनन्तरयोराह–यत्रेत्यादि। या बाह्योत्पत्तिर्बाह्यप्रतिजापा, या चाभ्यन्तरोत्पत्तिराभ्यन्तरप्रतिजापा, तयोरुभयोरपि उपजपितृसमाहितिः प्रशस्तेत्यर्थः। तत्र

When outsiders are found abetting the king should employ the policies of dissension and coercion. Spies posing as friends shall tell the outsiders to the effect :—"Mind, this man is desirous of deceiving you with the help of his own spies who are disguised as traitors." Spies disguised as traitors may mingle with traitors and separate them from outsiders, or outsiders from local traitors. Fiery spies may make friendship with traitors and kill them with weapons or poison. Or having invited the plotting outsiders, they may murder the latter.

तत्रैकान्तयोग उपजपितुः सिद्धिर्विशेषवती। दोषशुद्धौ हि दूष्या न विद्यन्ते। दूष्यशुद्धौ हि दोषः पुनरन्यान् दूषयति।

तस्माद् बाह्येषूपजपत्सु भेददण्डौ प्रयुञ्जीत। सत्रिणो मित्रव्यञ्जना वा ब्रूयुः–'अयं वो

राजा स्वयमादातुकामः, विगृहीताः स्थानेन राज्ञा, बुध्यध्वम्' इति। प्रतिजपितुर्वाततो दूतदण्डाननुप्रविष्टास्तीक्ष्णाः शस्त्ररसादिभिरेषां छिद्रेषु प्रहरेयुः। ततः सत्रिणः प्रतिजापितारमभिशंसेयुः।

अभ्यन्तरानभ्यन्तरेषूपजपत्सु यथार्हमुपायं प्रयुञ्जीत। तुष्टलिङ्गमतुष्टं विपरीतं वा साम प्रयुञ्जीत।

हेतुमाह–दोषशुद्धौ हीति। दोष उपजापः तस्योपजपितृदमने न प्रतिषेधासिद्धौः, दूष्या न विद्यन्ते नैव स्युः उपजापेन हि दूष्याणामभिनिर्वृत्तिः सा कथमुपजापाभावे स्यादिति भावः। दूष्यशुद्धौ हीति। दूष्या उपजापदूषितबुद्धयः प्रतिजपितारः तेषां शुद्धौ समाधाने तु कृते, दोषः उपजापः, पुनः भूयः अन्यान् दूषयति, उपजपितारोऽप्रशान्तत्वान्नवनवान् दूष्यान् उपजापकरणेनाभिनिर्वर्तयेयुरिति भावः।

तस्मादिति। उपजपितुरेव शोध्यत्वाद्, बाह्येषु उपजपत्सु, भेददण्डौ प्रयुञ्जीत भेदं दण्डं च प्रयुज्योपजापं प्रतिकुर्यात्। भेदप्रकारमाह–सत्रिणो मित्रव्यञ्जना वेति। ते, ब्रूयुः अर्थादुपजपितॄन्। किमिति, अयं राजा, वः युष्मान्, स्वयम् आदातुकामः प्रतिजपितृद्वारेण ग्रहीतुमिच्छति। अनेन राज्ञा, विगृहीताः, स्थ भवथ। बुध्यध्वं जागृत, न कश्चिदपि विश्वस्योपजपतेत्यर्थः। इति। दण्डप्रकारमाह–प्रतिजपितुर्वेति। प्रतिजापकसकाशाद् वा, अततः उपजपितारमुद्दिश्य संभाषार्थं गच्छतः, अथवा प्रतिजपितुरिति च शेषः। दूतदण्डान् दूतान् दण्डांश्च, अनुप्रविष्टाः, भूत्वेति शेषः, तीक्ष्णाः, शस्त्ररसादिभिः, एषाम् उपजपितॄणां, छिद्रेषु प्रहरेयुः प्रमादस्थानान्युपलभ्य तान् हन्युरित्यर्थः। तत इति। उपजपितृवधानन्तरं, सत्रिणः, प्रतिजपितारम्, अभिशंसेयुः 'उपजपितृवधकारयितायमि'ति मिथ्या ख्यापयेयुः उपजिजपिषोः प्रतिजापकेष्वविश्वासार्थमित्यभिप्रायः।

इत्थं बाह्येषूपजपत्सु भेददण्डयोः प्रयोगमुक्त्वा अभ्यन्तरेषूपजपत्सु सामादीनुपायान् यथायोग्यं प्रयुञ्जीतेत्याह–अभ्यन्तरानित्यादि।

Where outsiders carry on intrigue with outsiders, or local men with local men, the intrigue perpetrated with a definite purpose will be very serious. When guilt is got rid of there will be no guilty persons. When a guilty person is got rid of the guilt will contaminate others.

Hence, when outsiders carry on an intrigue the policies of dissension and coercion are to be employed. Spies disguised as friends may inform them that : "See, this king of yours, with the desire of enriching himself, is naturally provoked against you all." Then fiery spies mixing with the servants and soldiers of the outside abettor may kill him with weapons, poison and other means. The other spies shall then expose or betray the abettor.

When local men carry on intrigue with local men appropriate policies may be adopted. Conciliation may be resorted to with regard to those who keep up the appearance or contentment or who are naturally discontented.

शौचसामर्थ्यापदेशेन व्यसनाभ्युदयापेक्षणेन वा प्रतिपूजनमिति दानम्।

मित्रव्यञ्जनो वा ब्रूयादेतान्–चित्तज्ञानार्थमुपधास्यति वो राजा, तदस्याख्यातव्यम् इति। परस्पराद् वा भेदयेदेनान्–असौ चासौ च वो राजन्येवमुपजपति। इति भेदः।

दाण्डकर्मिकवच्च दण्डः।

एतासां चतसृणामापदामभ्यन्तरामेव पूर्वं साधयेत्। 'अहिभयादभ्यन्तरकोपो बाह्यकोपात् पापीयान्' इत्युक्तं पुरस्तात्॥

पूर्वां पूर्वां विजानीयाल्लघ्वीमापदमापदाम्।
उत्थितां बलवद्भ्यो वा गुर्वीं लघ्वीं विपर्यये॥

॥ इति कौटलीयार्थशास्त्रे अभियास्यत्कर्मणि नवमाधिकरणे
पञ्चमोऽध्यायः बाह्याभ्यन्तराश्चापदः,
आदितः षड्विंशतिशततमः॥

कथम्भूतं साम प्रयोक्तव्यमित्याह–तुष्टलिङ्गमित्यादि। तुष्टिसूचकं वस्तुतोऽतुष्टं साम वा, तद्विपरीतम् अतुष्टिसूचकं वस्तुतस्तुष्टं साम वा प्रयुञ्जीतेत्यर्थः।

दानप्रकारमाह–शौचेत्यादि। शौचं सामर्थ्यं च निमित्तीकृत्य वा बन्धुवियोगादिव्यसनावसरं पुत्रजन्माद्यभ्युदयावसरं वापेक्ष्य वस्त्राभरणादिना यत् सत्करणं तज्जातीयं दानं प्रयुञ्जीतेत्यर्थः।

भेदप्रकारमाह–मित्रव्यञ्जनो वेति। तथाभूतो वा सत्री, एतान् अभ्यन्तरानुपजपितॄन्, ब्रूयात्, कथमिति, 'चित्तज्ञानार्थं राजा वः युष्मान् उपधास्यति अर्थाद्युपधया परीक्षिष्यते, तत् स्वचित्तम्, अस्य राज्ञः आख्यातव्यम्' इति। एवं ह्युच्यमानाः प्रतिजापकाः उपजापं भयान्नाभ्युपगच्छेयुरित्याशयः। प्रकारान्तरमाह–परस्पराद् वेति। मिथो वा, भेदयेत्, एनान् अभ्यन्तरान्, कथमुक्त्वा, असौ च, असौ च, राजनि राज्ञः सकाशे, एवम् अनेन प्रकारेण, वः उपजपति युष्मान् प्रति दोषं बोधयति। इति। इति भेदः एवम्प्रकारो भेदः प्रयोक्तव्य इत्यर्थः।

दण्डप्रकारमाह–दाण्डकर्मिकवच्च दण्ड इति। दाण्डकर्मिकोक्त उपांशुदण्ड इह प्रयोक्तव्य इत्यर्थः।

इत्थं निरूपितप्रकारासु चतसृष्वापत्सु अभ्यन्तरा कृच्छ्रप्रतिकार्यत्वादनर्थातिशयहेतुत्वाच्च प्रथमं प्रतिकर्तव्येत्याह–एतासां चतसृणामित्यादि॥

पूर्वामिति। आपदां 'बाह्योत्पत्तिरभ्यन्तरप्रतिजापा' इत्यादिनोक्तानां चतसृणां मध्ये, पूर्वां पूर्वां, लघ्वीम् उत्तरोत्तरापेक्षया, विजानीयात्, अर्थाच्च पूर्वपूर्वापेक्षयोत्तरोत्तरां गुर्वीम्। अयमुत्सर्गः। अस्यापवादमाह–उत्थितामित्यादि। पूर्वा वा भवतूत्तरा वा या बलवद्भ्य उपजपितृभ्य उत्पन्ना तां पूर्वामपि दुर्बलोपजपितृकोत्तरापेक्षया गुर्वीं विजानीयात्, दुर्बलेभ्यश्चोपजपितृभ्य उत्पन्नामुत्तरामपि प्रबलोपजपितृकपूर्वापेक्षया लघ्वीं विजानीयादित्यर्थः॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अभियास्यत्कर्मणि नवमेऽधिकरणे
पञ्चमोऽध्यायः बाह्याभ्यन्तराश्चापदः,
आदितः षड्विंशत्यधिकशततमः॥

Gifts shall be awarded to a person in recognition of the steadiness in maintaining the purity of his character or under the guise of the anxiety of the well-being.

A spy under the guise of a friend may felt the local persons—"Your king is attempting to read your mind; you should tell him the truth." Or local men may be separated from one another by telling them—"This man as well as the other carry tales to the king about you." This is about dissensions.

Coercive measures may be employed as describe in the section on awards of punishment.

Of these four kinds of dangers internal danger should be got rid of at first. It is already said that internal troubles like the fear from a lurking snake are more serious than external troubles.

If the four types of dangers that which is enumerated first is less grave than the subsequent ones, whether or not it is caused by powerful persons or otherwise.

Thus the one hundred and twenty-sixth chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the fifth chapter of the ninth Adhikaraṇa dealing with the section 'external and internal dangers.'

Chapter 127

144. प्रक० दूष्यशत्रुसंयुक्ताः

Section 144 : Persons Associated with Traitors And Enemies

दूष्येभ्यः शत्रुभ्यश्च द्विविधाः शुद्धाः।

दूष्यशुद्धायां पौरेषु जानपदेषु वा दण्डवर्जानुपायान् प्रयुञ्जीत। दण्डो हि महाजने क्षेप्तुमशक्यः, क्षिप्तो वा तं चार्थं न कुर्यात्। अन्यं चानर्थमुत्पादयेत्। मुख्येषु त्वेषां दाण्डकर्मिकवच्चेष्टेतेति।

शत्रुशुद्धायां यतः शत्रुः प्रधानः कार्यो वा, ततः सामादिभिः सिद्धिं लिप्सेत।

दूष्यशत्रुसंयुक्ता इति सूत्रम्। पूर्वसूत्रमिहानुवर्तते। दूष्याः राजावग्रहचारिणो मुख्याः शत्रवः सहजकृत्रिमादयः तत्संयुक्तास्तत्संबद्धास्तदुत्पन्ना बाह्याभ्यन्तरा आपदस्तत्प्रतीकारश्चाभिधीयन्ते इति सूत्रार्थः।

तासां शुद्धमिश्रभेदं मनसि निधाय शुद्धा विभजते–दूष्येभ्य इत्यादि। दूष्येभ्य एव केवलेभ्य उत्थिताः शत्रुभ्य एव केवलेभ्य उत्थिताः इति द्विप्रकाराः शुद्धा इत्यर्थः।

दूष्यशुद्धायाः प्रतीकारमाह–दूष्यशुद्धायामिति। तस्यां विषये, पौरेषु, जानपदेषु वा, दण्डवर्जान् उपायान् सामदानभेदान्, प्रयुञ्जीत। दण्डस्य वर्जने हेतुमाह–दण्डो हीत्यादि। स हि महाजने पौरजानपदसमूललक्षणे प्रयोक्तुं न शक्यस्तद्विरोधोत्पादकत्वात्, प्रयुक्तो वा साध्यमर्थं न साधयेद् अनर्थं च नवमुत्थापयेदित्यर्थः। सामादिभिरशान्तौ किं कर्तव्यं तत्राह–मुख्येषु त्वेषामित्यादि। ये पौरजानपदानामुपजपितारो मुख्याः, तेषु दाण्डकर्मिकोक्तं विधिमुपांशुदण्डप्रयोगलक्षणमाचरेत्। तावतैव ते शाम्येयुरित्यभिप्रायः।

शत्रुशुद्धाया प्रतीकारमाह–शत्रुशुद्धायामिति। शत्रुमात्रोत्पादिताया मित्रसङ्करहितायामापदि अर्थात् स्वयमेव शत्रुणा साक्षादुत्पादितायां तन्मन्त्र्युत्पादितायां तदमात्योत्पादितायां तन्मन्त्रितदमात्योभयोत्पादितायां चेति चतुष्प्रकारायां, यतः शत्रु यस्मिन्नधीनः सामन्तः, यतः प्रधानः यस्मिन्नधीनो मन्त्री, यतः कार्यो वा अमात्यादिर्वा यस्मिन्नधीनः, ततः सामादिभिः सिद्धिं लिप्सेत तान् सामदानादिभिरभिमुखीकृत्य चतुर्षु पूर्वोक्तापत्प्रकारेषु यथाक्रमं प्रतीकारमन्विच्छेदित्यर्थः।

Innocent persons are of two kinds—those who have disassociated with traitors and those who have kept away from enemies.

The king should employ all strategic means except coersion on citizens and country people who are not traitors. It is difficult to employ punishment on an assembly of influential men, and if inflicted at all it may not produce the desired effect. It may give rise to undesirable consequences. However steps may be taken against their leaders as detailed in the section on awards of punishments.

People not associated with enemies may be won over by acts of conciliation, in case they belong to the category of seditious nature.

स्वामिन्यायत्ता प्रधानसिद्धिः, मन्त्रिष्वायत्तायत्तसिद्धिः, उभयायत्ता प्रधानायत्तसिद्धिः ।

दूष्यादूष्याणामामिश्रितत्वादामिश्रा। आमिश्रायामदूष्यतः सिद्धिः। आलम्बनाभावे ह्यालम्बिता न विद्यते। मित्रामित्राणामेकीभावात् परमिश्रा। परमिश्रायां मित्रतः सिद्धिः। सुकरो हि मित्रेण सन्धिर्नामित्रेणेति।

मित्रं चेन्न सन्धिमिच्छेत्, अभीक्ष्णमुपजपेत्, ततः सत्रिभिरमित्राद् भेदयित्वा मित्रं लभेत। मित्रामित्रसङ्घस्य वा योऽन्तस्थायी तं लभेत। अन्तस्थायिनि लब्धे मध्यस्थायिनो भिद्यन्ते। मध्यस्था-

कस्मिन्नधीनः प्रधानः कस्मिन्नधीनः कार्य इति विवरीतुमाह–स्वामिन्यायत्तेत्यादि। प्रधानसिद्धिः प्रधानप्रतिक्रिया। आयत्तसिद्धिः कार्यशब्दितस्यामात्यस्य प्रतिक्रिया। उभयायत्ता स्वामिमन्त्र्युभयमुखसाध्या। प्रधानायत्तसिद्धिः प्रधानायत्तयोः संहत्यापदुत्पादकयोर्मन्त्र्यमात्ययोः प्रतिक्रिया। ननु स्वयमेव साक्षादापदुत्पादकः शत्रुर्यस्मिन्नधीनः स कस्मान्नोक्तः! उच्यते। स हि शत्रोर्मित्रं वा मित्रमित्रं वा मध्यमादिर्वा स्यादित्यनियत आपदनुत्पादकश्च; नियतस्त्विह वक्तुं प्रक्रान्त आपदुत्पादकश्चेत्यदोषः।

आमिश्रामाह–दूष्यादूष्याणामामिश्रितत्वादिति। दूष्यादूष्यैरुभयैर्मिलित्वा जनितत्वाद्, आमिश्रा तदाख्या दूष्यशुद्धा। आमिश्रायामिति। तस्याम्, अदूष्यतः, सिद्धिः प्रतिक्रिया कार्या। प्रतिक्रियया ह्यदूष्ये दूष्यालम्बनभूते शान्ते तमालम्ब्य चेष्टमानो दूष्यः स्वयमेव शाम्यतीत्याह–आलम्बनाभाव इत्यादि। मिश्रान्तरमाह–मित्रामित्राणामिति। मित्राणाममित्राणां च, एकीभावात् मिश्रणात्, जनितेति शेषः, परमिश्रा शत्रुमिश्रा नाम। परमिश्रायामिति। तस्यां, मित्रतः, सिद्धिः प्रतिक्रिया। तत्र हेतुमाह–सुकरो हीत्यादि।

सन्धिमनभिलषति मित्रे तत् पुनःपुनरुपजप्य ततः सत्रिभिरमित्राद् भेदयित्वा स्ववशे कुर्यादित्याह–मित्रं चेदित्यादि। भूम्येकान्तरत्वभूम्यनन्तरत्वक्रमेण सन्निविष्टस्य मित्रामित्राणां सङ्घस्यावसाने यस्तिष्ठति तं लभेतेत्याह–मित्रामित्रसङ्घस्य वेत्यादि। अन्तस्थायिनि लब्धे मध्ये तिष्ठति

Success of capable agents depends upon the king, success of efforts depends upon ministers, and success of both therefore depend upon both.

Success despite the combination of loyal and traitors is called a mixed success. When they are combined success could be achieved through the loyal people. Nothing that requires a support for its existence can exist. When success depends upon the union of friends and enemies, it is termed

as success contaminated by an enemy. When the enemy also is combined with loyals, the success is achieved through the loyal ones. It is easy to have agreement with a friend rather than with an enemy.

When a friend does not come to terms intrigues should be resorted too often, and then through the agency of spies he should be won over separating him from the enemy. Or attempts may be made to win him over who is the last among the combined friends. When the last among the combined friends is secured those who occupy the middle rank will be separated from each other. Or one could get hold of a king who occupies the middle rank.

यिनं वा लभेत। मध्यस्थायिनि वा लब्धे नान्तस्थायिनः संहन्यन्ते। यथा चैषामाश्रयभेदः तानुपायान् प्रयुञ्जीत।

धार्मिकं जातिकुलश्रुतवृत्तस्तवेन सम्बन्धेन पूर्वेषां त्रैकाल्योपकारानपकाराभ्यां वा सान्त्वयेत्।

निवृत्तोत्साहं विग्रहश्रान्तं प्रतिहतोपायं क्षयव्ययाभ्यां प्रवासेन चोपतप्तं शौचेनान्यं लिप्समानमन्यस्माद् वा शङ्कमानं मैत्रीप्रधानं वा कल्याणबुद्धिं साम्ना साधयेत्।

लुब्धं क्षीणं वा तपस्विमुख्यावस्थापनापूर्वं दानेन साधयेत्। तत् पञ्चविधं देयविसर्गो, गृहीतानुवर्तनम्, आत्तप्रतिदानं,

तं वा लभेत, तेन चान्तस्थायिनः सर्वे भिन्ना भवन्तीत्याह–मध्यस्थायिनं वेत्यादि। न संहन्यन्ते परस्परस्माद् भिद्यन्ते। सर्वथा च मित्रामित्रा यैरुपायप्रकारैराश्रयाद् भिन्ना भवेयुस्तानुपायप्रकारान् प्रयुञ्जीतेत्याह–यथा चैषामित्यादि।

धार्मिकविषयं साम्नः प्रकारमाह–धार्मिकमित्यादि। तं, जातिकुलश्रुतवृत्तस्तवेन जातेरसङ्करविशुद्धत्वादिना कुलस्योदितोदितत्वादिना श्रुतस्य नानाशास्त्रविषयत्वादिना वृत्तस्य विहितानुष्ठाननिष्ठत्वादिना च यः स्तवः तेन, संबन्धेन योनिविद्यादिनिमित्तेन, पूर्वेषां कुलवृद्धानां, त्रैकाल्योपकारानपकाराभ्यां कालत्रयेऽप्युपकर्तृत्वानपकर्तृत्वाभ्यां वा सान्त्वयेत्।

सामसाध्यमाह–निवृत्तोत्साहमिति। निरुत्साहं, विग्रहश्रान्तं चिरयुद्धकरणखिन्नं, प्रतिहतोपायं विफलितसामाद्युपायप्रयोगं, क्षयव्ययाभ्यां युग्यपुरुषापचयहिरण्यधान्याद्यपचयाभ्यां, प्रवासेन च दूराध्वगतागतेन च, उपतप्तं सन्तप्तं, शौचेनान्यं लिप्समानं शुचित्वगुणापेक्षया कमप्यन्यं मित्रत्वेन लब्धुमिच्छन्तम्, अन्यस्माद् वा शङ्कमानं पराविश्वासिनं वा, मैत्रीप्रधानं वा सर्वत्र मित्रभावेन व्यवहार एव परम इति मन्यमानं, कल्याणबुद्धिम् अशठं, साम्ना साधयेत्।

दानसाध्यमाह–लुब्धमिति। गृध्नुं, क्षीणं वा अर्थकृशं वा, तपस्विमुख्यावस्थापनापूर्वं तपस्विनां मुख्यानां च अवस्थापना दानविश्वासार्थं स्थेयीकरणं तत्पूर्वकं, दानेन, साधयेत्।

दानस्य पञ्च प्रकारानाह–तत् पञ्चविधमित्यादि। देयविसर्गः गृहीतभूमौ ब्रह्मदेयादेर्यथापूर्वविमोक्षणम्। गृहीतानुवर्तनं गृहीतस्य पूर्वपुरुषैः

Once a king in the middle rank is secured those occupying extreme ranks could not keep the union. All such measures may be resorted to break their combination.

A righteous king may be pacified by praising his birth, family, learning and character and by pointing out the relationship which his ancestors had, or by describing the benefits and absence of enmity shown to him.

A king who is greedy may be won over by giving gifts through the medium of ascetic and chiefs who have been previously kept with him for the purpose.

Gifts are of five kinds as abandonment of what is to be paid; continuance of what is being given; repayment of what is received, payment of one's own wealth; affording help for a voluntary raid on the property of others.

स्वद्रव्यदानम् अपूर्वं, परस्वेषु स्वयंग्राहदानं चेति दानकर्म।

परस्परद्वेषवैरभूमिहरणशङ्कितम्, अतोऽन्यतमेन भेदयेत्। भीरुं वां प्रतिघातेन, 'कृतसन्धिरेष त्वयि कर्म करिष्यति, मित्रमस्य निसृष्टं; सन्धौ वा नाभ्यन्तर' इति।

यस्य वा स्वदेशाद् अन्यदेशाद् वा पण्यानि पण्यागारतयागच्छेयुः, तान्यस्य 'यातव्याल्लब्धानि' इति सत्रिणश्चारयेयुः। बहुलीभूते शासनमभिव्यक्तेन प्रेषयेत्–एतत् ते पण्यं, पण्यागारं वा मया ते प्रेषितं, सामवायिकेषु विक्रमस्व, अपगच्छ वा, ततः पणशेषमवाप्स्यसि' इति। ततः सत्रिणः परेषु ग्राहयेयुरेतद् अरिप्रदत्तम् इति।

पूर्वमात्तस्य भूम्यादेर्भोगाप्रतिषेधः। आत्तप्रतिदानं गृहीतस्य भूम्यादेः प्रत्यपर्णम्। स्वद्रव्यदानमपूर्वं स्वद्रव्यस्यैवादत्तपूर्वस्य प्रतिनवं दानम्। परस्वेषु स्वयंग्राहदानं 'शत्रुदेशावस्कन्दने तदीयद्रव्येषु त्वया ह्रियमाणं द्रव्यं तथैव भविष्यती'त्येवंरूपं दानम्।

भेदनमेवाह–परस्परद्वेषवैरभूमिहरणशङ्कितमित्यादि। तत्कालापकारजो द्वेषः चिरानुवृत्तापकारप्ररूढं वैरं मित्रामित्राणां मध्ये परस्परद्वेषशङ्काविषयभूतं परस्परवैरशङ्काविषयभूतं परस्परभूमिहरणशङ्काविषयभूतं च, अतोऽन्यतमेन एषां द्वेषादीनामेकतमेन, भेदयेत्। भेदनस्य प्रकारान्तराण्याह–भीरुं वेति। तं, प्रतिघातेन शत्रुबलीयस्तया त्वदभियोगः प्रतिहतो भविष्यतीति प्रतिघातविभीषिकया, भेदयेत्। कृतसन्धिः विजिगीषुणा कृतसन्धानः, एषः, त्वयि, कर्म अभियोगं, करिष्यति। करिष्यतीति कथं ज्ञायते, तत्राह–मित्रमिति। मित्रमस्य, निसृष्टं सन्धिकरणार्थे विजिगीषुसकाशे प्रेषितम्। इत्युक्त्वा भेदयेत्। सन्धौ मित्रामित्रैः क्रियमाणे इति शेषः, त्वं, नाभ्यन्तरः बहिष्कृत इत्यर्थः, इत्युक्त्वा वा भेदयेत्।

प्रकारान्तरमाह–यस्य वेत्यादि। मित्रामित्राणामन्यतमस्य यस्य, स्वदेशाद्, अन्यदेशाद् वा, पण्यानि, पण्यागारतया पण्यागाराङ्गतया, आगच्छेयुः, तानि अस्य, यातव्यात् लब्धानि यातव्येनैव गूढकृतसन्धिना प्रहितानि, इति अनेन प्रकारेण, सत्रिणः, चारयेयुः मृषा वृत्तान्तं प्रवर्तयेयुः। बहुलीभूते मिथ्यावृत्तान्तेऽस्मिन्

सर्वत: प्रसृते सति, शासनं मिथ्यालेखम्, अभिव्यक्तेन निश्चितवध्यभावोऽभिव्यक्त: तस्य हस्ते दत्त्वेत्यर्थ:, प्रेषयेत्। कीदृगर्थकं शासनमित्याह–एतदिति। एतत् ते पण्यं यत्किञ्चिदल्पं मया प्रेषितं

When two kings apprehend the seizure of land from each other due to enmity, seeds of dissension may be sown between them. Of these the timid one may be threatened with destruction and may be told. "Having made peace with another, the king plots against you, his friend is entrusted with making peace with somebody other than yourself."

When from one's own country or from another's country commodities for manufacture going to an enemy's country, spies may spread the rumour that those items are obtained from one whom the enemy wanted to march against. When the items arrive in large quantities the owner may send a message to the enemy—these commodities and merchandise are sent to you by me, kindly declare, war against the combined kings or desert them; you will get the rest of the tribute soon." The spies may inform the other kings of the combination. "These articles are given to him by your enemy.

शत्रुप्रख्यातं वा पण्यमविज्ञातं गच्छेत्। तदस्य वैदेहकव्यञ्जना: शत्रुमुख्येषु विक्रीणीरन्। तत: सत्रिण: परेषु ग्राहयेयु: 'एतत् पण्यमरिप्रदत्तम्' इति।

महापराधानर्थमानाभ्यामुपगृह्य वा शस्त्ररसाग्निभिरमित्रे प्रणिदध्यात्। अथैकममात्यं निष्पातयेत्। तस्य पुत्रदारमुपगृह्य रात्रौ हतमिति ख्यापयेत्। अथामात्य: शत्रोस्तानेकैकश: प्ररूपयेत्। ते चेद्

पण्यागारं वा प्रभूतपण्यवर्गवत्तया पण्यगृहसदृशं पण्यशकटादि वा मया ते प्रेषितं, सामवायिकेषु सम्भूयोत्थायिषु मच्छत्रुसाह्यकारिषु, विक्रमस्व अभियुङ्क्ष्व, अथवा, अपगच्छ तेभ्योऽपसर, अर्थान्मदुपकारार्थं, तत: विक्रमणापसरणान्यतरानुष्ठानानन्तरं, पणशेषं पणितार्थावशिष्टमर्थम्, अवाप्स्यसि मत्सकाशादधिगमिष्यसि। इति एवम्प्रकारार्थकमित्यर्थ:। तत इति। प्रेषणानन्तरं, सत्रिण:, परेषु अन्येषु सामवायिकेषु, एतत् कूटशासनम्, अरिप्रदत्तमिति विजिगीषुणा प्रतिपादितमिति, अपदिश्येति शेष:, ग्राहयेयु:।

प्रकारान्तरमाह–शत्रुप्रख्यातं वेति। शत्रुरिह सामवायिकान्यतम: तत्सम्बन्धित्वेन प्रख्यातं, पण्यं रत्नादि, अविज्ञातं गूढं यथा भवति तथा, विजिगीषुं गच्छेद् विजिगीषोरेव केनाप्युपायेन वशं प्राप्नुयात्। तद् अस्य, वैदेहक व्यञ्जना: वणिग्वेषा: गूढपुरुषा:, शत्रुमुख्येषु शत्रुधर्माणो येऽन्ये सामवायिकास्तेषां मुख्येषु, विक्रीणीरन्। तत: तत्, सत्रिण:, परेषु सामवायिकान्तरेषु, ग्राहयेयु: रक्षिपुरुषैर्ग्राहितं कुर्यु:। कथं कृत्वा, एतत् पण्यम् अरिप्रदत्तम् अरिणा विजिगीषुणा विक्रयार्थं प्रेषितम्, इति अनेन प्रकारेणापदिश्य। एवं कृते 'सामवायिकान्यतमो विजिगीषुणा सह कृतसन्धिरि'ति सामवायिकान्तराणां बुद्धिरुत्पद्येतेत्यभिप्राय:।

अन्यं प्रकारमाह–महापराधानिति। महान् अपराधो यैरात्मन: कृतस्तथाभूतान् अमात्यान्, अर्थमानाभ्यां भूहिरण्यादिदानेन छत्रचामरादिदानेन च, उपगृह्य स्ववशीकृत्य, शस्त्ररसादिना अमित्रे प्रणिदध्यात् 'युष्माभि: शत्रु: शस्त्रेण विषेणाग्निना वा हन्तव्य:' इत्यादिश्य गूढं प्रेषयेत्। प्रेषणे क्रममाह–अथेति। प्रथमम्, एकम्

अमात्यं, निष्पातयेत् स्वान्तिकान्निष्पात्य शत्रुपार्श्वं प्रापयेत्। तस्य पुत्रदारं पुत्रान् दारांश्च, उपगृह्य छन्नरक्षितं कृत्वा, रात्रौ, हतमिति राज्ञा व्यापादितम् इति, ख्यापयेत् मृषाप्रवादमुत्पादयेत्। एतच्च

The conqueror may acquire certain merchandise peculiar to his enemy's country and unknown else where. Spies under the disguise of merchants may sell that merchandise to other important enemies and tell them that the merchandise was given to the conqueror by the enemy (in whose region it was produced).

The conqueror may bestow wealth and honour upon highly treacherous people among the enemies and cause them to live with the enemy armed with weapons, poison and fire. Then one of the ministers of the king may be dismissed. His sons and wife may be concealed and declared that they were killed at night. Thereafter the minister may introduce other ministers (to the enemy).

यथोक्तं कुर्युः, न चैनान् ग्राहयेत्। अशक्तिमतो वा ग्राहयेत्। आप्तभावोपगतो मुख्यादस्यात्मानं रक्षणीयं कथयेत्; अथामित्रशासनम् मुख्यायोपधाताय प्रेषितमुभयवेतनो ग्राहयेत्।

उत्साहशक्तिमतो वा प्रेषयेत्–'अमुष्य राज्यं गृहाण यथास्थितो न सन्धिः' इति। ततः सत्रिणः परेषु ग्राहयेयुः।

एकस्य स्कन्धावारं विवधमासारं वा घातयेयुः, इतरेषु मैत्रीं ब्रुवाणाः। तं सत्रिणः– 'त्वमेतेषां घातयितव्यः' इत्युपजपेयुः।

निष्पतितं प्रति शत्रोर्विजिगीषुद्वेषविश्वासार्थम्। अथ शत्रावात्मास्पदलाभानन्तरम्, अमात्यः पूर्वनिष्पतितः, शत्रोः, तान् अन्यानमात्यान्, एकैकशः एकैकक्रमेण प्ररूपयेद् 'विजिगीषुद्वेषनिष्पतिता एते भवत्पार्श्वोपस्थान-योग्या' इत्येवं प्रदर्शयेत्। ते निष्पतिता अमात्याः, यथोक्तं कुर्युश्चेत् शस्त्रादिना शत्रुं हन्युश्चेत्, एनान्, न च ग्राहयेद् उभयवेतनमुखेन नैव ग्राहयेत्। अशक्तिमतो वा यथोक्तशत्रुघातासमर्थान् वा, ग्राहयेत्, महापराधतया तेषां वध्यत्वादित्यभिप्रायः। एवं विजिगीषुनिष्पतितोऽमात्यः सामवायिकमुख्यं यथा भेदयेत्, तथाह–आप्तभावोपगत इत्यादि। अयमर्थः–शत्र्वाप्तत्वं गतोऽमात्यः 'सामवायिकमुख्यसकाशात् त्वया स्वात्मा रक्षणीयस्तस्याविश्वास्यत्वाद्' इत्येवं शत्रुमुपजपेत्। पश्चाच्चामित्रशासनं कूटकृतम् अमुख्योपघातादेशकं मुख्याय प्रेषितम् उभयवेतनो रक्षिपुरुषैर्ग्राहयेदिति। 'अमुख्याये'ति पाठेऽपि तुल्योऽर्थः।

प्रकारान्तरमाह–उत्साहेत्यादि। शासनमिति पूर्वतः संबध्यते। उत्साहशक्तिमतो वा विक्रमशक्तियुक्तस्य वा सामवायिकान्यतमस्य, शासनं कूटनिर्मितं, प्रेषयेत्। तत् कीदृगर्थकम्, अमुष्य सामवायिकमुख्यस्य, राज्यं गृहाण, यथास्थितो न सन्धिः स्थितप्रकारः सन्धिर्नाङ्गीकृतः। इति ईदृशार्थकमित्यर्थः। ततः पश्चात्, सत्रिणः, परेषु सामवायिकान्तरेषु, ग्राहयेयुः अर्थात् तदेव शासनम्।

अन्यं पक्षमाह–एकस्येति। सामवायिकान्यतमस्य, स्कन्धावारं सेनानिवेशं, विवधं स्वदेशधान्याद्यागमम्, आसारं वा सुहृद्बलागमं वा, घातयेयुः वारयेयुः, अर्थात् सत्रिणः। कथम्भूताः, इतरेषु मैत्रीं ब्रुवाणाः

सामवायिकान्तरेषु मित्रभावं वदन्तः अर्थात् तेभ्यो गोपनाय। तमिति। तं च सामवायिकान्यतमं, सत्रिणः, उपजपेयुः, कथमुपजयेयुः, त्वम्, एतेषां सामवायिकानां, पातयितव्यः। तत् कुत एतैस्ते सन्धिरिति भावः। इति अनेन प्रकारेण।

If they kill the enemy as told, they may be caused to be set free; if they are unable to do so they may be caused to be caught hold ot. Somebody close to the enemy shall tell him that he has to guard his own person from such and such a chief. Then he who receives salaries from both sides may send instructions to destroy the chief.

A king possessed of enthusiasm and power may be told :—"Seize the country of this king as if the treaty is no more valid." Then the spies shall inform the enemy about this decision. Spies should cause the destruction of the cantonment, movement of grains and friends while proclaiming friendship with another. Spies may tell him that other kings are aiming at his life.

यस्य वा प्रवीरपुरुषो हस्ती हयो वा म्रियेत, गूढपुरुषैर्हन्येत ह्रियेत वा, तं सत्रिणः परस्परोपहतं ब्रूयुः। ततः शासनमभिशस्तस्य प्रेषयेत्–'भूयः कुरु ततः पणशेषमवाप्स्यसि' इति। तदुभयवेतना ग्राहयेयुः।

भिन्नेष्वन्यतमं लभेत।

तेन सेनापतिकुमारदण्डचारिणो व्याख्याताः।

साङ्घिकं च भेदं प्रयुञ्जीत। इति भेदकर्म।

तीक्ष्णमुत्साहिनं व्यसनिनं स्थितशत्रुं वा गूढपुरुषाः शस्त्राग्निरसादिभिः साधयेयुः। सौकर्यतो वा तेषामन्यतमः। तीक्ष्णो ह्येकः

प्रकारान्तरमाह–यस्य वेति। यस्य सामवायिकान्यतमस्य सम्बन्धी, प्रवीरपुरुषः, हस्ती हयो वा म्रियेत, स्वयमिति शेषः, गूढपुरुषैः हन्येत ह्रियेत वा, तं सामवायिकान्यतमं, सत्रिणः, परस्परोपहतं ब्रूयुः सामवायिकान्तरैरेव परस्परेण हतं बोधयेयुः, अर्थात् प्रवीरादिम्। ततः पश्चात्, शासनं कूटलेखम्, अभिशस्तस्य आरोपितहननदोषस्य सामवायिकस्य, प्रेषेयत्। शासनार्थमाह–भूयः पुनरपि, कुरु प्रवीरपुरुषादिं घातय, ततः पणशेषम् अवाप्स्यसि। इति अनेन प्रकारेण लिखितार्थमित्यर्थः। तदिति। तच्च शासनम्, उभयवेतनाः विजिगीषोरभिशस्तसामवायिकाच्चोभयतो भृतिग्राहिणः, ग्राहयेयुः अर्थाद् गूढपुरुषैः।

भिन्नेष्वन्यतमं लभेतेति। उक्तैर्भेदनोपायैर्भेदं प्राप्तेषु सामवायिकेषु एकतमं स्वायत्तं कुर्याद् विजिगीषुः।

यदिदमुपदिष्टं भेदनोपायजातं, तत् सेनापतियुवराजसैन्यचारिणां भेदनेऽपि यथायोगम् उपयोक्तव्यमित्याशयेनाह–तेनेत्यादि।

सङ्घवृत्ताधिकरणे वक्ष्यमाणो भेदप्रकारोऽप्यत्र प्रयोक्तव्य इत्याह–साङ्घिकं चेत्यादि। इति भेदकर्मेति। व्याख्यातमिति शेषः।

अथ दण्डविधिप्रकारं तत्प्रयोगविषयं चाह–तीक्ष्णमित्यादि। तीक्ष्णम् अतिमात्रामर्षम्, उत्साहिनं विक्रमिणं, व्यसनिनं मृगयादिप्रसक्तं, स्थितशत्रुं वा दुर्गवन्तं शत्रुं वा, गूढपुरुषाः, शस्त्राग्निरसादिभिः, साधयेयुः हन्युः, अर्थात् सम्भूय। तेष्वन्यतमेन येन शक्ततरतया घातः सुकरः, स वा तान् हन्यादित्याह–सौकर्यतो वेत्यादि। तमेवान्यतमं विवृणोति–

When brave soldiers, elephant or horse dies, or is killed, or carried off by spies, other spies may tell the enemy that the death is due to mutual conflict among his followers. Then a letter may be sent to the accused urging him to continue his job to get the balance of payment. Those who receive a double salary may get hold of him.

When the parties are split one of them may be won over.

This explains, the case of the commander-in-chief, the prince and the officers of the army (of the enemy).

Similarly seeds of dissension may be sown among the combined kings. Thus the (policy of) dissension is explained.

Spies under the disguise may join together to kill the enemy who is fiery, energetic, desirous of hunting and having permanent enmity by means of weapons, fire or poison. By convenience any one of these can accomplish the work.

शस्त्ररसाग्निभिः साधयेत। अयं सर्वसन्दोहकर्म विशिष्टं वा करोति। इत्युपायचतुर्वर्गः।

पूर्वः पूर्वश्चास्य लघिष्ठः। सान्त्वमेकगुणम्। दानं द्विगुणं सान्त्वपूर्वम्। भेदस्त्रिगुणः सान्त्वदानपूर्वः। दण्डश्चतुर्गुणः सान्त्वदानभेदपूर्वः।

इत्यभियुञ्जानेषूक्तम्। स्वभूमिष्ठेषु तु त एवोपायाः। विशेषस्तु। स्वभूमिष्ठानामन्यतमस्य पण्यागारैरभिज्ञातान् दूतमुख्यानभीक्ष्णं प्रेषयेत्, त एनं सन्धौ परहिंसायां वा योजयेयुः, अप्रतिपद्य–

तीक्ष्णो हीति। स हि गूढपुरुषविशेषरूपः, एकः असहायः सन्, शस्त्ररसाग्निभिः, साधयेत् अमर्षिविक्रमिप्रभृतीन् हन्यात्। न केवलं सर्वविधगूढपुरुषसमुदायसाध्ये कर्मायमेकाकी करोति, किन्तु तदपेक्षयोत्कृष्टमपि कर्म करोतीत्याह–अयमित्यादि। इत्युपायचतुर्वर्ग इति। उपायसंबन्धी चतुर्वर्गः सामदानभेददण्डचतुष्टयात्मा, निरूपित इति शेषः।

पूर्व इति। अस्य उपायवर्गस्य मध्ये, पूर्वः पूर्व उपायः, लघिष्ठः उत्तरोत्तरापेक्षयाल्पावयवत्वाद-नायासप्रयोज्यः। अल्पावयवतां विवृणोति–सान्त्वमिति। साम, एकगुणम् एक आत्मैवैको गुणोऽवयवो यस्य तत् तथाभूतम्। दानं हि, द्विगुणं सान्त्वपूर्वं सान्त्वदानोभयावयवकम्। भेदः, त्रिगुणः सान्त्वदानपूर्वः सान्त्वदानभेदत्रितयावयवकः। दण्डः, चतुर्गुणः सान्त्वदानभेदपूर्वः सान्त्वदानभेददण्डाख्यचतुर्गुणोपेतः।

इत्यभियुञ्जानेषूक्तमिति। ये मित्रामित्राः यातव्यमभियोक्तुं प्रस्थिताः कृतशिबिराः, तेषु विषये सामादिविधानमनेन प्रकारेणोक्तमित्यर्थः। तेष्वप्रस्थितेषु स्वस्वभूमिस्थितेष्वपि त इमे उपायप्रयोगाः समाना

इत्याह–स्वभूमिष्ठेषु त्वित्यादि। तुश्चार्थे। विशेषस्त्विति। तत्र विशेषस्तु अभिधीयत इति शेषः। स्वभूमिष्ठानामिति। सम्भूयप्रस्थानात् प्राक् स्वस्वभूमिस्थितानां मित्रामित्राणाम्, अन्यतमस्य, पण्यागारैः प्रभूतैः मणिमुक्तादिभिः पण्यैः सहितानिति शेषः, अभिज्ञातान् परविदितान्, दूतमुख्यान्, अभीक्ष्णं पुनः-पुनः, प्रेषयेत् विजिगीषुः। ते प्रेषिताश्च दूताः, एनं मित्रामित्रान्यतमं, सन्धौ परहिंसायां वा योजयेयुः 'विजिगीषुणा सन्धत्स्व तद्विरोधिषु च विक्रमस्व' इति चोदयेयुरित्यर्थः। अप्रतिपद्यमानमिति। सन्धिमनभ्युपगच्छन्तमेव तं

A fiery one may do it resorting to weapons, poison or fire. He could do it better than all the others could perform jointly. These are the four forms of strategic means.

Among (the four means) the earlier ones enumerated here earlier conciliation is of a single quality. Gift after concilation has two qualities, Dissension has three qualities since it is after conciliation and gift. Coercion has fourfold qualities since it suceeds conciliation, gift and dissension.

These are the means to be employed against those who are adversaries. The same means are applicable to local enemies also. But then there is some difference. Chief messengers known to the manufacturies may be sent again and again to any one of the local enemies in order to employ him for the purpose of making a treaty or for destroying another person. If he agrees to the suggestion the messengers should report the matter to their master of their success.

मानं कृतो नः सन्धिः इत्यावेदयेयुः। तमितरेषामुभयवेतनाः सङ्क्रामयेयुः–अयं वो राजा दुष्टः इति।

यस्य वा यस्माद् भयं वैरं द्वेषो वा, तं तस्माद् भेदयेयुः–'अयं ते शत्रुणा सन्धत्ते, पुरा त्वामतिसन्धत्ते, क्षिप्रतरं सन्धीयस्व, निग्रहे चास्य प्रयतस्व'। इति।

आवाहविवाहाभ्यां वा कृत्वा संयोगमसंयुक्तान् भेदयेत्।

सामन्ताटविकतत्कुलीनावरुद्धैश्चैषां राज्यं निघातयेत्। सार्थव्रजाटवीर्वा। दण्डं वाभिसृतम्। परस्परापाश्रयाश्चैषां जातिसङ्घाश्छिद्रेषु प्रहरेयुः। गूढाश्चाग्निरसशस्त्रेण।।

मित्रामित्रान्यतमं, 'कृतो नः सन्धिरि'ति, आवेदयेयुः मिथ्या वदेयुः। तमिति। तं विजिगीषुणा सह कृतसन्धित्वेन मिथ्याप्रख्यायमानं मित्रामित्राद्यन्यतमम्, अथवा मिथ्याकथ्यमानं सन्धिम्, इतरेषां तदन्येषां मित्रामित्राणाम्, उभयवेतनाः विजिगीषुसकाशात् मित्रामित्रान्यतमसकाशाच्चोभयतो वेतनग्राहिणः, संक्रामयेयुः बोधयेयुः। कथम्, अयं वो राजा दुष्ट इति युष्माकमन्योन्यसन्धेयानामन्यतमोऽयं नृपतिः, दुष्टः स्वयं विजिगीषुणा सन्धिं कृत्वा प्रच्छादनाद् दुर्जनः, इति अनेन प्रकारेण वदन्त इति शेषः। एवं बोधिता मित्रामित्राः स्वान्यतमात् तस्माद् भिद्येरन्नित्यभिप्रायः।

अन्ये प्रकारमाह–यस्य वेति। यस्य यस्माद् भयं वैरं द्वेषो वा, यस्मिन्नित्यार्थं, तं भयवैरद्वेषान्यतमवन्तं, तस्माद् भयवैरद्वेषगोचराद्, भेदयेयुः, अर्थाद् गूढपुरुषाः। कथमुक्त्वा, अयं ते शत्रुणा विजिगीषुणा सह, सन्धत्ते, त्वां, पुरा अतिसन्धत्ते अतिसन्धास्यते, क्षिप्रतरम् अतिशीघ्रं, सन्धीयस्व विजिगीषुणा संहितो भव,

निग्रहे चास्य प्रयतस्व त्वदतिसन्धित्सोरेतस्य मित्रामित्रान्यतमस्यापकारे प्रकर्षेण यत्नं कुरु, इति एवम्, उक्त्वेति शेषः।

अन्यं दण्डप्रकारमाह–आवाहविवाहाभ्यां वेति। आवाहः कन्यास्वीकरणं विवाहः कन्यादानं ताभ्यां वा, संयोगं सम्बन्धं, कृत्वा, असंयुक्तान् सम्बन्धरहितान्, भेदयेत्। त इमे स्वभूमिष्ठेषु भेदनप्रकाराः।

अथ दण्डप्रकारमाहे–सामन्तेत्यादि। सामन्तैर्भूम्यनन्तरैः आटविकैररण्यपतिभिः तत्कुलीनैः तेषां मित्रामित्राणां कुलभवैः अवरुद्धैर्नियन्त्रितैस्तत्पुत्रैश्च, एषां मित्रामित्राणां, राज्यं पुरजनपदादिकं, निघातयेद्, अर्थाद् विजिगीषुः। सार्थव्रजाटवीर्वेति माधवपाठः, सार्थान् वणिक्सम्भारवाहिपशुबृन्दानि

Those who receive double wages should inform the matter "that your king is a wicked one."

When a person has reason to fear or hate another, spies may create dissension saying : "This man is making agreement with your enemy, before long he will deceive you, make haste to effect peace with him, or try to murder him."

Dissension may be effected by the means of bringing about a friendship or by marriage connection between persons who have not been hitherto connected.

Through the aid of a neighbouring king, a wild chief, a scion of the family (of enemy) or an imprisoned prince local enemies may be destroyed. This could be done by a caravan of traders or wild tribes. Or they could be killed by the army. Persons pretending to be the supporters of the local enemy who are of the same caste, may kill him at an opportune time. Disguised spies may employ fire, poison and weapons for this.

वितंसगिलवच्चारीन् योगैराचरितैः शठः।
घातयेत् परमिश्रायां विश्वासेनामिषेण च।।

।। इति कौटलीयार्थशास्त्रेऽभियास्यत्कर्मणि नवमाधिकरणे
षष्ठोऽध्यायः दूष्यशत्रुसंयुक्ताः,
आदितः सप्तविंशतिशततमः।।

व्रजान् गोमहिषादीन् अटवीः द्रव्यहस्तिवनानि च, निघातयेत्। दण्डं वाभिसृतं वनाजीवादिप्रसक्तं सैन्यं च, निघातयेत्। 'सार्थव्रजाटवीभिर्वे'ति मूलादर्शदृष्टे तृतीयान्तपाठे सार्थादिभिः अभिसृतं रक्षकत्वेनाश्रितं, दण्डं च निघातयेदिति योज्यम्। किन्तु तत्र द्वितीयो वाशब्दश्चकारार्थः। परस्परापाश्रयाश्चेति। अन्योन्योपोद्वलिताश्च, जातिसङ्घाः सङ्घवृत्ते वक्ष्यमाणा विच्छिलिकादयः, एषां मित्रामित्राणां, छिद्रेषु प्रमादस्थानेषु, प्रहरेयुः अर्थादिनान्। गूढाश्च तीक्ष्णरसदादयो गूढपुरुषाश्च, अग्निरसशस्त्रेण वह्निविषायुधैः, प्रहरेयुः।।

वक्तव्यशेषं वदन् प्रकरणमुपसंहरति–वितंसेत्यादि। परमिश्राया मित्रामित्रमिश्रणजनितायामापदि, शठः विजिगीषुर्गूढवृत्तिः सन्, वितंसगिलवत् 'वितंसः पक्षिविश्वासार्थपक्षिरूपालेख्ययोगी, देहाच्छादनपटः' इति

माधवः, गिलः भक्ष आमिषं ताभ्यां तुल्यं वर्तमानैः, योगैः कपटोपायैः, आचरितैः प्रयुक्तैः, विश्वासेन स्वस्मिन् विश्वासोत्पादनेन, आमिषेण च सारपण्यादिदानेन च, अरीन्, घातयेत्।।

इति कौटलीयार्थशास्त्रव्याख्यायामभियास्यत्कर्मणि नवमेऽधिकरणे
षष्ठोऽध्यायः दूष्यशत्रुसंयुक्ताः, आदितः
सप्तविंशत्युत्तरशततमः।।

When such enemies are in great number they may be got rid of by making them to drink poisonous liquor; a clever enemy may be killed by spies or by means of poisoned flesh given to him in good faith.

Thus the one hundred and twenty seventh chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the sixth chapter of the ninth Adhikaraṇa dealing with the section 'Persons associated with traitors and enemies.

Chapter 128

145,146. प्रक० अर्थानर्थसंशययुक्ताः, तासामुपायविकल्पजाः सिद्धयश्च।

Sections 145 : Doubts about Wealth and Harm 146 : Success by Alternative Strategic Means

कामादिरुत्सेकः स्वाः प्रकृतीः कोपयति; अपनयो बाह्याः। तदुभयमासुरी वृत्तिः। स्वजनविकारः कोपः परवृद्धिहेतुष्वापद् अर्थोऽनर्थः संशय इति।

योऽर्थः शत्रुवृद्धिमप्राप्तः करोति, प्राप्तः प्रत्यादेयः परेषां भवति, प्राप्यमाणो वा क्षयव्ययोदयो भवति, स भवत्यापदर्थः। यथा–सामन्तानामामिषभूतः, सामन्तव्यसनजो लाभः; शत्रुप्रार्थितो वा स्वभावा–

अर्थानर्थसंशययुक्ता इति सूत्रम्। अर्थो हिरण्यभूम्यादिः, अनर्थस्तन्नाशः शरीरनाशश्च, संशयः अर्थानर्थयोः सन्देहः तैः फलभूतैर्युक्ताः प्रकृतत्वादापद उच्यन्त इति सूत्रार्थः। बाह्योपजापाभ्यन्तरप्रतिजापादयो या आपदः पूर्वमुक्ताः तासामापत्त्वमर्थानर्थप्रयोजकत्वादिति निरूपयितुं प्रकरणमिदमारम्यते।

कामादिरुत्सेक इति। कामक्रोधादिर्दोषः, स्वाः प्रकृतीः मन्त्र्याद्याभ्यन्तरप्रकृतीः, कोपयति विकारयति, अपनयः सन्धिविग्रहादीनामयथावत्प्रयोगः, बाह्या राष्ट्रमुख्यान्तपालादिरूपा बाह्यप्रकृतीः, कोपयति। तद् उभयं कामादिरपनयश्चेत्येतद् द्वयम्, आसुरी वृत्तिः असुरयोग्यो धर्मः, मायावृत्तिर्वा। अतोऽस्य वर्जने महान् यत्नो राजभिः कर्तव्य इत्यभिप्रायः। अस्य स्वजनकोपहेतोः पूर्वमुक्तस्येदं पुनर्वचनमासुरवृत्तित्वेन निन्दार्थम्। स्वजनेत्यादि। तदुभयप्रभवः स्वजनविकारलक्षणो यः कोपः स एव शत्रुवृद्धिनिमित्तेषु जायमानेषु आपद्रूपतां प्रतिपद्यते। सा चापद् अर्थरूपा अनर्थरूपा तदुभयसंशयरूपा चेत्यर्थः।

तत्र कोऽसावापदर्थ इत्याह–योऽर्थ इत्यादि। योऽर्थः उपेक्षावशात् स्वहस्तमप्राप्तः सन् शत्रोरेव वृद्धिं करोति सोऽर्थ एक आपदर्थो भवति, योऽर्थः स्वहस्तप्राप्तोऽपि परैः प्रत्यादेयो भवति सोऽपर आपदर्थः, यो वार्थः प्राप्यमाणतायामतिप्रवृद्धक्षयव्यययोगी भवति सोऽन्य आपदर्थ इत्यर्थः। तमुदाहृत्य दर्शयति–यथेत्यादि। सामन्तानाम् आमिषभूतः बहुसामन्तभोग्य एकेन गृहीतो लाभः। स हि तैः सम्भूयाभियोगिभिः प्रत्यादेयत्वादापदर्थो भवति। सामन्तव्यसनजो लाभ इति। सामन्तस्य गुणप्रातिलोम्यादिव्यसनदशायां तस्मादपहृतो लाभः, स हि तद्व्यसनापगमे प्रत्या–

Excessive desire and passions provoke one's own people, and impolicy provokes external enemies. Both these characterise a demoniac life. Those which are conducive to the prosperity of the enemy are dangerous wealth, provocative wealth and wealth of doubtful consequences.

That wealth, when obtained, increases the prosperity of the enemy, repayable to the enemy though obtained or causes loss of men and money is dangerous wealth. For example, wealth enjoyed in common with the neighbouring kings; wealth accrued at the expense of the neighbour; wealth which is sought by an enemy; wealth naturally acquired; wealth acquired by troubling people at the base or by provoking an enemy in the rear; wealth amassed by destroying a friend or by flouting an agreement of peace or by estranging the circle of states—are the varieties of dangerous wealth.

–धिगम्यो लाभः; पश्चात्कोपेन पार्ष्णिग्राहेण वा विगृहीतः पुरस्ताल्लाभः; मित्रोच्छेदेन सन्धिव्यतिक्रमेण वा मण्डलविरुद्धो लाभ इत्यापदर्थः।

स्वतः परतो वा भयोत्पत्तिरित्यनर्थः।

तयोः 'अर्थो न वे'ति, 'अनर्थो न वा' इति, 'अर्थोऽनर्थः' इति, 'अनर्थः अर्थः' इति, संशयः।

शत्रुमित्रमुत्साहयितुमर्थो न वेति संशयः। शत्रुबलमर्थमानाभ्यामावाहयितुमनर्थो न वेति संशयः। बलवत्सामन्तां भूमिमादातुमर्थोऽनर्थः इति संशयः। ज्यायसा सम्भूययान-मनर्थोऽर्थ इति संशयः।

देयत्वादापदर्थः। शत्रुप्रार्थितो वेत्यादि। स्वभावात् प्रार्थनां विनैव लब्धुं योग्य एव शत्रुणा प्रार्थितः प्रत्यादेयत्वादापदर्थः। शत्रुप्रार्थ्य इति पाठे शत्रुकाम्य इत्यर्थः। पश्चात्कोपेनेति। मूले दूष्यादिकोपेन, पार्ष्णिग्राहेण वा पृष्ठशत्रुणा वा, विगृहीतः बाधितः, पुरस्ताल्लाभः यातव्यसकाशलभ्यो लाभः, आपदर्थः। मित्रोच्छेदेनेति। मित्रस्य दुर्गहरणादिना, सन्धिव्यतिक्रमेण कृतसन्ध्युल्लङ्घनेन वा निमित्तेन, मण्डलविरुद्धः राजमण्डलाननुज्ञातः, लाभः। इत्यापदर्थ इति। एवञ्जातीयो लाभ आपदर्थो विज्ञेय इत्यर्थः।

अनर्थमाह–स्वत इत्यादि। स्वतः योऽर्थो गृह्यते तस्मात्, परतो वा गृह्यमाणमर्थं निमित्तीकृत्यान्यतो वा, भयोत्पत्तिः, इत्यनर्थः एवम्प्रकारोऽनर्थः।

उक्तयोरर्थानर्थयोः संशयमाह–तयोरित्यादि। अर्थानर्थयोः, अर्थो न वेति संशयः अर्थस्य किं भाव उताभाव इत्येवमाकारः अर्थतदभावकोटिकः संशय एकः। अनर्थो नवेति किमनर्थस्य भाव उताभाव इति अनर्थतदभावकोटिको द्वितीयः। अर्थोऽनर्थ इति किम् अर्थः उतानर्थ इति अर्थानर्थकोटिकस्तृतीयः, अनर्थोऽर्थ इति किमनर्थ उतार्थ इति अनर्थार्थकोटिकश्चतुर्थः।

इमान् क्रमेणोदाहरति–शत्रुमित्रमिति। शत्रोर्मित्रम्, उत्साहयितुं शत्रावभियोजयितुं शत्रावभियोजनमित्यर्थः,

अर्थो नवेति अर्थभावाभावकोटिकः संशयः। शत्रुबलमित्यादि। शत्रोः सैन्यम्, अर्थमानाभ्यां भूम्यादिदानबहुमानाभ्याम्, आवाहयितुम् आह्वातुम्, अनर्थो नवेति अनर्थभावाभावकोटिकः। बलवत्सामन्तामिति। प्रबलप्रत्यमित्रां, भूमिम्, आदातुम्, अर्थो–

Wealth causing fear from one's own people or from an enemy is provocative wealth.

In connection with these two kinds of wealth there arise doubts such as : "Is it provocative wealth or not ? Harmless wealth or provocative wealth; First provocative and then harmless and then provocative?

Doubt arises as to whether it is profitable to encourage an enemy or a friend? Doubt arises as to the bestowal of wealth and honour on an enemy's army excites hatred or not? Doubt arises whether the acquirement of wealth is preferable or not? Doubt arises whether it is advisable to march along with a more powerful ally or not?

तेषामर्थसंशयमुपगच्छेत्।

अर्थोऽर्थानुबन्धः, अर्थोनिरनुबन्धः, अर्थोऽनर्थानुबन्धः, अनर्थोऽर्थानुबन्धः, अनर्थो निरनुबन्धः, अनर्थोऽनर्थानुबन्ध इत्यनुबन्धषड्वर्गः।

शत्रुमुत्पाट्य पार्ष्णिग्राहादानमर्थोऽर्थानुबन्धः।

उदासीनस्य दण्डानुग्रहः फलेन अर्थो निरनुबन्धः।

परस्यान्तरुच्छेदनमर्थोऽनर्थानुबन्धः।

–ऽनर्थ इति अर्थानर्थकोटिकः। ज्यायसेति। बलाधिकेन सह, सम्भूययानं यातव्याभियानम्, अनर्थोऽर्थः अनर्थो वार्थो वा इत्यनर्थार्थकोटिकः संशयः। अत्राद्येऽनर्थस्य द्वितीयेऽर्थस्य तृतीयेऽर्थाभावस्य च शङ्का नेति बोद्धव्यम्।

तेषामिति। उक्तानां संशयानां मध्ये, अर्थसंशयम् अर्थमात्रविषयमनर्थस्पर्शरहितं संशयम् 'अर्थो न वा' इत्येवंलक्षणं संशयम्, उपगच्छेत् उपगस्य तथाभूते विषये समुद्युञ्जीतेत्यर्थः।

अथार्थानर्थयोः प्रत्येकमनुबन्धयोगात् तदयोगाच्चानुबन्धनिबन्धनः षड्वर्गो जायत इत्याह–अर्थ इत्यादि। अर्थः 'योऽर्थः शत्रुवृद्धिमप्राप्तः करोति' इत्यादिनोक्त आपदर्थः, तस्य तथाविधेनार्थेनानुबन्धः, अथ तथाविधार्थानुबन्धाभावः, अथ 'स्वतः परतो वा भयोत्पत्तिरित्यनर्थः' इत्युक्तलक्षणेनानर्थेनानुबन्ध इति त्रयः। तथानर्थस्यार्थेनानुबन्धः, अनुबन्धाभावः, अनर्थेनानुबन्ध इति त्रय इत्याहत्य षट्।

तेष्वाद्यमुदाहरति–शत्रुमुत्पाट्येति। यातव्यमरिमुत्साद्य, पार्ष्णिग्राहादानं पृष्ठशत्रोर्ग्रहणम्, अर्थोऽर्थानुबन्धः।

द्वितीयमुदाहरति–उदासीनस्येति। तस्य, फलेन धनादिग्रहणेन, दण्डानुग्रहः स्वसैन्यदानेनोपकारः, अर्थो निरनुबन्धः, अर्थस्यानर्थस्य वा तेनानुत्पादादित्यभिप्रायः।

अर्थमनर्थानुबन्धमुदाहरति–परस्येति। शत्रोः, अन्तरुच्छेदनम् इहान्तशब्देन 'अरेर्नेतुश्च मध्यस्थो

दुर्बलोऽन्तर्धिरुच्यते। प्रतिघातो बलवतः' इति पार्ष्णिग्राहचिन्तोक्तलक्षणोऽन्तर्धिरुच्यते, अन्तर्धेरुच्छेदनम्, अर्थोऽनर्थानुबन्धः बलवतः शत्रोरनिवारणादित्यभिप्रायः। इत्थमर्थत्रिवर्ग उदाहृतः।

Among these one should approve the first—whether it is provocative wealth or not.

The six varieties of harmful wealth are :—wealth productive of wealth; wealth productive of nothing; wealth productive of harm; loss or harm productive of wealth; sustenance of harm for no profit; and harm productive of harm.

By "wealth productive of wealth" is meant the destruction of an enemy in the front resulting in the destruction of an enemy in the rear also.

By "wealth productive of nothing" is meant the wealth acquired by helping a neutral king with the army.

By "wealth productive of harm" is meant the reduction of the internal strength of an enemy.

शत्रुप्रतिवेशस्यानुग्रहः कोशदण्डाभ्यामनर्थोऽर्थानुबन्धः।

हीनशक्तिमुत्साह्य निवृत्तिरनर्थो निरनुबन्धः।

ज्यायांसमुत्थाप्य निवृत्तिरनर्थोऽनर्थानुबन्धः।

तस्य पूर्वः पूर्वः श्रेयानुपसम्प्राप्तुम्। इति कार्यावस्थापनम्।

समन्ततो युगपदर्थोत्पत्तिः समन्ततोर्थापद् भवति।

सैव पार्ष्णिग्राहविगृहीता समन्ततोर्थसंशयापद् भवति।

अनर्थत्रिवर्गमुदाहरति–शत्रुप्रतिवेशस्येति। शत्रोः प्रतिवेशः भूम्यनन्तरः तस्य, कोशदण्डाभ्याम् अनुग्रहः शत्रुविरोधे कोशदण्डदानेन सहकरणम्, अनर्थोऽर्थोऽर्थानुबन्धः प्रथमं कथितः। तत्क्रमेणेहानर्थोऽनर्थानुबन्धः प्रथमं कथनीयः न त्वनर्थोऽर्थानुबन्धः इति चेत्, सत्यं, किन्तु 'तस्य पूर्वः पूर्वः श्रेयानुपसम्प्राप्तुम्' इति वक्ष्यति, तदानुगुण्यार्थमत्र क्रमान्यत्वमादृतम्।

हीनशक्तिमिति। दुर्बलम्, उत्साह्य 'अहं ते सहकरिष्यामि' इति, शत्र्वभियोगे सन्नाह्य, निवृत्तिः ततः स्वयं निवर्तनम्, अनर्थो निरुनुबन्धः धनव्ययादिहेतुत्वात् तदात्वेऽनर्थरूपः, तेन शत्रुनिग्रहासिद्ध्या नार्थानुबन्धो न वा हीनशक्तिकोपस्याकिञ्चित्करतयानर्थानुबन्ध इत्यतो निरनुबन्धश्चेत्यर्थः।

ज्यायांसमिति। प्रबलम्, उत्थाप्य 'तव सहकारी भविष्यामि' इत्युत्साह्य, निवृत्तिः, अनर्थोऽनर्थानुबन्धः धनव्ययहेतुत्वात् तदात्वेऽनर्थः प्रबलकोपनिमित्तकेनानर्थान्तरेणानुबध्यते चेत्यर्थः।

तस्येत्यादि। अनुबन्धषड्वर्गस्य मध्ये अर्थत्रिवर्गे पूर्वपूर्व उपादेयतया प्रतिपत्तुमर्हः, अनर्थत्रिवर्गे तु परिहर्तव्यतया प्रतिपत्तुमर्ह इत्यर्थः। इति कार्यावस्थापनमिति। कार्ययोरर्थानर्थयोः अवस्थापनं स्वरूपतो व्यवस्थापनम्।

अथ देशतोऽवस्थापनमाह–समन्तत इत्यादि। अग्रतः पृष्ठतः पार्श्वतश्च सर्वतो यौगपद्येनार्थोत्पत्तिः

समन्ततोर्थापद् भवति। सैवेत्यादि। समन्ततो युगपदर्थोत्पत्तिरेव पार्ष्णिग्राहेण विरोधिता समन्ततोर्थसंशयापद् भवति।

By "harm productive of wealth "is meant the helping of the neighbouring king of an enemy with men and money.

By "harm productive of nothing" is meant the withdrawal after encouraging or setting a king of scanty resources against another.

By "harm productive of harm" is meant the inactivity after causing excitement to a superior king.

Of the the one's enumerated earlier is better than the succeeding ones. These are the procedures of setting to work.

When the surrounding circumstances are favourable to wealth, it is known as wealth from all sides.

When an enemy in the rear obstructs the wealth coming from all sides, it takes the form of dangerous wealth which generates doubts.

तयोर्मित्राक्रन्दोपग्रहात् सिद्धिः।

समन्ततः शत्रुभ्यो भयोत्पत्तिः समन्ततोनर्थापद् भवति।

सैव मित्रविगृहीता समन्ततोनर्थसंशयापद् भवति।

तयोश्चलामित्राक्रन्दोपग्रहात् सिद्धिः। परमिश्राप्रतीकारो वा।

इतो लाभ इतरतो लाभ इत्युभयतोर्थापद् भवति। तस्यां समन्ततोर्थायां च लाभगुणयुक्तमर्थमादातुं यायात्। तुल्ये लाभगुणे प्रधानमासन्नमनतिपातिनम्, ऊनो वा येन भवेत् तम्, आदातुं यायात्।

उक्तयोरर्थापदर्थसंशयापदोः प्रतीकारमाह–तयोरिति। समन्ततोर्थापत्समन्ततोर्थसंशयापदोः, मित्राक्रन्दोपग्रहात् मित्रस्य पुरस्तान्मित्रस्य आक्रन्दस्य पृष्ठतोमित्रस्य च उपग्रहात् सन्धानेन सहायीकरणात्, सिद्धिः प्रतिक्रिया।

समन्ततो युगपच्छत्रुभ्यो भयोत्पत्तिः समन्ततोनर्थापदित्याह–समन्ततः शत्रुभ्य इत्यादि।

समन्ततोनर्थापदेव मित्रेण स्वानुकूलेन विरोधिता समन्ततोनर्थसंशयापद् भवतीत्याह–सैव मित्रविगृहीतेत्यादि।

तयोः प्रतीकारमाह–तयोरिति। समन्ततोनर्थापत्समन्ततोनर्थसंशयापदोः, चलमित्राक्रन्दोपग्रहात् चलामित्रस्य दुर्गरहितस्य शत्रोः आक्रन्दस्य पृष्ठतोमित्रस्य च उपग्रहात् स्वानुकूलीकरणात्, सिद्धिः प्रतीकारः। परमिश्राप्रतीकारो वेति। परमिश्राया आपदो यः प्रतीकारः 'परमिश्रायां मित्रतः सिद्धिः' इति दूष्यामित्रसंयुक्तप्रकरणे कथितः, स वा तयोः प्रतीकार इत्यर्थः।

एकतोऽपरतश्चेत्युभयतो लाभो यस्यां भवति सोभयतोर्थापदित्याह–इतो लाभ इत्यादि। प्रतीकारमाह–तस्यामिति। उभयतोर्थापदि, समन्ततोर्थायां च समन्ततोर्थापदि च, लाभगुणयुक्तम् 'आदेयः

प्रत्यादेय: प्रसादक' इत्यादिना क्षयव्ययलाभविपरिमर्शप्रकरणे ये लाभगुणा उक्ता: तैर्युक्तम् अर्थम्, आदातुं, यायात्। पूर्वमेका प्रतिक्रिया समन्ततोर्थापदि 'तयोर्मित्राक्रन्दोपग्रहात् सिद्धिरि'त्युक्ता, अन्या त्वत्रोपदिष्टा। तुल्ये लाभगुण इति। लाभगुणे समाने, प्रधानं वा प्रशस्ततरफलं वा, आसन्नं वा देशत: सन्निकृष्टं वा, अनतिपातिनं वा कालातिक्रमासहम् आसन्नकालं वा, अतिपातिनमिति पाठे आत्ययिकमित्यर्थ:, ऊनो वा येन भवेत् तं यस्मिन्ननुपात्ते हीनस्वमात्मन: स्यात् तं वा अर्थाल्लाभम्, आदातुं यायात्।

In the cases of these two success can be achieved by securing the help of a friend and the enemy of the rear-enemy.

When there is reason to apprehend fear from enemies on all sides it is certainly a dangerous trouble.

When a friend comes toward to avert this fear, that trouble becomes involved in doubt.

In the cases of these two, success can be achieved by securing the assistance of a nomadic enemy. The enemy of the rear-enemy may also may be helpful.

When the prospect of acquiring profit from one of the other side is obstructed it is called "dangerous wealth". In this case as also in the case of profit from all sides one should undertake to march for acquiring profitable wealth. When the chance of getting wealth from two sides are equal one should march to secure that which is important, near, unfailing and obtainable by easy means.

इतोऽनर्थ इतरतोऽनर्थ इत्युभयतोनर्थापत्। तस्यां समन्ततोनर्थायां च मित्रेभ्य: सिद्धिं लिप्सेत।

मित्राभावे प्रकृतीनां लघीयस्यैकतोनर्थां साधयेत्। उभयतोनर्थां ज्यायस्या। समन्ततोनर्थां मूलेन प्रतिकुर्यात्। अशक्ये सर्वमुत्सृज्यापगच्छेत्। दृष्टा हि जीवता पुनरापत्ति:, यथा सुयात्रोदयनाभ्याम्।

इतो लाभ इतरतो राज्याभिमर्श इत्युभयतोर्थानर्थापद् भवति।

उभयतोनर्थापदमाह–इतोऽनर्थ इतरतोऽनर्थ इत्यादि। तस्या प्रतीकारमाह–तस्यामिति। उभयतोनर्थापदि, समन्ततोनर्थायां च, मित्रेभ्य:, सिद्धिं प्रतिक्रियां, लिप्सेत। समन्ततोनर्थाया: 'तयोश्चलामित्राक्रन्दोपग्रहात् सिद्धिरि'ति प्रतिक्रिया पूर्वमभिहिता, प्रतिक्रियान्तरं त्वत्रोच्यते।

एष एव मित्रद्वारक: प्रतीकार: एकतोनर्थायामपि भवतीत्यभिसन्धिं मनसि कुर्वन् मित्राभावपक्षे तस्या उभयतोनर्थाया: समन्ततोनर्थायाश्च प्रतीकारमाह–मित्राभाव इति। मित्रसाहाय्यालाभे, प्रकृतीनां मध्ये, लघीयस्या लघुतरया प्रकृत्या तथाविधप्रकृतित्यागेनेत्यर्थ:, एकतोनर्थां, साधयेत् प्रतिकुर्यात्। उभयतोनर्थां, ज्यायस्या प्रशस्यतरप्रकृतित्यागेन, प्रतिकुर्यात्। समन्ततोनर्थां मूलेन मूलं स्थानीयं तत्त्यागेन प्रतिकुर्यात्। अशक्य इति। प्रतीकारे लघुतरप्रकृत्यादित्यागैरशक्ये सति, सर्वम् उत्सृज्य स्वात्मातिरिक्तं सर्वस्वं परित्यज्य,

अपगच्छेत् अन्यत्रापसृत्यात्मानं रक्षेदित्यर्थः। तथात्मरक्षणस्य प्रयोजनं पुनःस्वपदप्राप्तिरूपं सम्भावितमित्याह– दृष्टा हीति। जीवता विपद्यन्यत्रापसृत्य यत्नेनात्मानं रक्षता, पुनरापत्तिः दृष्टा हि पुनः स्वस्थानप्रतिलम्भोऽनुभूतो हि। आत्मरक्षणेन स्वपदपुनःप्राप्तिदर्शनस्य ऐतिहासिकमहापुरुषसमुदाचारसिद्धतां दर्शयितुमाह–यथा सुयात्रोदयनाभ्यामिति। सुयात्रो नलः उदयनो वत्सराजः ताभ्यां विपदि आत्मानं रक्षद्भ्यां पुनरापत्तिर्दृष्टेत्यर्थः। इह 'जीवत पुनरावृत्तिरि' त्यपि पाठः। तदा तु दृष्टेत्यस्य लोकः कर्ता गम्यः। यथा सुयात्रोदयनाभ्यामित्यस्य च जीवित्वा पुनरावृत्तिं प्राप्तवद्भ्यां नलवत्सराजाभ्यां निदर्शनभूताभ्यामित्यर्थः।

उभयतोर्थानर्थामाह–इतो लाभ इति। एकतो लाभः इतरतो राज्याभिमर्शः स्वजनपदाक्रमणम्, इति एवमुभयतोऽर्थानर्थाभ्यां युक्तेत्यर्थः,

When there is harm from one quarter as also from another, it is wealth beset with danger from two sides. In such a case and wealth involved in danger from all sides, success may be obtained with the help of friends.

In the absence of frineds, he should try to ward off harm from one side with, the help of an ally who can be easily won over. He should avoid harm from two sides with the help an ally if superior power. He should prevent harm from all sides with al lthe resources at his disposal. If he is unable to do so, she should run away leaving all his belongings. If only he lives on he could retain what is lost as in the case of Suyātra and Udayana.

Prospect of wealth from one side and fear of attacking the country from other side represents a situation beset with wealth and harm.

तस्यामनर्थसाधको योऽर्थः तमादातुं यायात्; अन्यथा हि राज्याभिमर्शं वारयेत्।

एतया समन्ततोर्थानर्थपद् व्याख्याता।

इतोऽनर्थ इतरतोऽर्थसंशय इत्युभयतोनर्थार्थसंशया। तस्यां पूर्वमनर्थं साधयेत्, तत्सिद्धावर्थसंशयम्।

एतया समन्ततोनर्थार्थसंशया व्याख्याता।

इतोऽर्थ इतरतोऽनर्थसंशय इत्युभयतोर्थानर्थसंशयापत्।

एतया समन्ततोर्थानर्थसंशया व्याख्याता।

तस्यां पूर्वां पूर्वां प्रकृतीनामनर्थसंशयान्मोक्षयितुं यतेत। श्रेयो हि मित्रमनर्थसंशये तिष्ठन्न दण्डः, दण्डो वा न कोश इति।

उभयतोर्थानर्थापद् भवति। तत्र प्रतीकारमाह–तस्यामित्यादि। उक्तायामापदि, योऽर्थ आदीयमानोऽनर्थस्यापि प्रतीकारं प्रयोजयेत् तमर्थमादातुं यायात्। स चेदर्थोऽनर्थप्रतीकाराक्षमः तर्हि अर्थलाभमुपेक्ष्य राज्याभिमर्शमेव प्रतिकुर्यादित्यर्थः।

उभयतोर्थानर्थापद उक्तां प्रतिक्रियां समन्ततोर्थानर्थापद्यतिदिशति–एतया समन्ततोर्थेत्यादि।

अनर्थनिश्चयार्थसंशयवतीमाह–इतोऽनर्थ इति। एकतोऽनर्थनिश्चयः अन्यतोऽर्थसंशय इत्युभयवती उभयतोनर्थार्थसंशया नाम। तत्प्रतिक्रियामाह–तस्यामित्यादि। तस्यां प्रथममनर्थं प्रतिकुर्यात्। अनर्थप्रतीकारे जाते पश्चादर्थसंशयं प्रतिकुर्यादित्यर्थः।

उभयतोनर्थार्थसंशयायामुक्तं प्रतिक्रियाक्रमं समन्ततोनर्थार्थसंशयायामतिदिशति–एतया समन्ततोनर्थेत्यादि।

अथानर्थसंशयार्थनिश्चयवतीमापदमाह–इतोऽर्थ इतरतोऽनर्थसंशय इत्यादि।

उभयतोर्थानर्थसंशयया समानलक्षणा समनप्रतीकारा च समन्ततोर्थानर्थसंशयेत्यभिप्रायेणाह–एतया समन्ततोर्थानर्थसंशयेत्यादि।

तत्प्रतीकारमाह–तस्यामित्यादि। उभयतोर्थानर्थसंशयापदि, प्रकृतीनां स्वाम्यमात्यजनपददुर्ग-कोशदण्डमित्रलक्षणानां मध्ये, पूर्वां पूर्वां प्रकृतिम्, अनर्थसंशयात्, मोक्षयितुं यतेत उत्तरोत्तरस्याः प्रागेव मोचयितुं यत्नं कुर्यात्। पूर्वपूर्वामपेक्ष्योत्तरोत्तरस्या अप्राधान्याद् अप्रधानप्रकृत्यनर्थमोक्षणस्य

Then he should march to acquire that wealth which will enable him to ward off the attack; otherwise he should attempt to avert the attack on his country.

This explains the situation which is beset with wealth and harm on all sides.

When harm from one side and chance to acquire wealth from the other is involved in doubt, it is termed doubt of harm and wealth from two sides. In such a situation he should avoid the harm first and then try to acquire doubtful wealth.

This explains the doubtful situation of harm and wealth from all sides.

When prospect of wealth from one side and doubtful harm from the other side is apprehended, it is the situation of harm and wealth from two sides.

This explains the situation of doubtful harm and wealth from all sides.

In such situations he should attempt to ward off doubts of harm against each of the elements of his sovereignty in order. It is better to have a friend under circumstances of doubtful harm, than the army; the army may be left in doubtful situations but not the treasury.

समग्रमोक्षणाभावे प्रकृतीनामवयवान् मोक्षयितुं यतेत। तत्र पुरुषप्रकृतीनां च बहुलमनुरक्तं वा तीक्ष्णलुब्धवर्जम्। द्रव्यप्रकृतीनां सारं महोपकारं वा। सन्धिनासनेन द्वैधीभावेन वा लघूनि विपर्ययैर्गुरूणि।

क्षयस्थानवृद्धीनां चोत्तरोत्तरं लिप्सेत। प्रातिलोम्येन वा क्षयादीनाम्। आयत्यां विशेषं पश्येत्।

पश्चात्करणेऽनतिदोषादित्यभिप्रायः। अप्रधानप्रकृत्यनर्थमोक्षणविलम्बस्यानतिपीडावहत्वं प्रधानप्रकृत्य-मर्थमोक्षणविलम्बस्यातिपीडावहत्वं च प्रकृतिविशेषनिदर्शनेन स्पष्टयति-श्रेयो हीति। अनर्थसंशये तिष्ठत् मित्रं, श्रेयः अनतिपीडाहेतुतया वरमित्यर्थः। न दण्डः दण्डस्त्वनर्थसंशये तिष्ठन्नतिपीडाहेतुतया नैव वरमित्यर्थः। दण्डो वा न कोश इति। दण्डो वानर्थसंशये तिष्ठन् श्रेयान्, न तु कोशोऽनर्थसंशये तिष्ठन्नित्यर्थः। इतिशब्दः प्रकारे, अनेन प्रकारेणान्यस्यापि पूर्वपूर्वस्यानर्थसंशये तिष्ठतः मोक्षणीयत्वमुत्तरोत्तरस्य तदभावश्च बोद्धव्यमित्यभिप्रायः।

समग्रमोक्षणाभाव इति। प्रकृतयो हि पुरुषा द्रव्याणि च, तेषां सर्वेषां मोक्षणस्याशक्यतायां, प्रकृतीनाम् अवयवान्, मोक्षयितुं यतेत। तत्र विशेषमाह-तत्रेति। अवयवमोचने, पुरुषप्रकृतीनां, बहुलम् अनुरक्तं वा, तीक्ष्णलुब्धवर्जं तीक्ष्णलुब्धाभ्यां वर्जितं, मोक्षयितुं यतेत। द्रव्यप्रकृतीनां मध्ये, सारं महामूल्यं, महोपकारं वा, मोक्षयितुं यतेत। सन्धिनेत्यादि। तेन, आसनेन, द्वैधीभावेन वा, लघुभूतेन गुणेनेत्यर्थं, लघूनि लघुद्रव्याणि, मोक्षयितुं यतेत। विपर्ययैः सन्ध्यादिविपर्ययरूपैर्गुणैः अर्थाद् विग्रहयानसमाश्रयरूपैः, गुरूणि गुरुद्रव्याणि, मोक्षयितुं यतेत। एवं तावद् मोक्षयितव्यं मोक्षणौपयिकं चाभिहितम्।

अथ मोक्षणपरिपाटीमाह-क्षयस्थानवृद्धीनां चेति। शक्तिसिद्ध्योरपचयः क्षयः स्थानं साम्यं प्रकृतिस्थता शक्तिसिद्ध्योरुपचयो वृद्धिः, क्षयादीनां मध्यात्, उत्तरोत्तरं लिप्सेत क्षयात् स्थानं स्थानाद् वृद्धिं च, प्राप्तुमीहेत, न तु क्षयात् वृद्धिमित्यभिप्रायः। प्रातिलोम्येन वा क्षयादीनामिति। प्राप्तवृद्धिरेव वृद्धेः स्थानं स्थानात् क्षयं च प्रतिलोमगत्या लिप्सेतेत्यर्थः। किमर्थमियं प्रतिलोमगत्या लिप्सेत्याकाङ्क्षायामायतौ वृद्धिविशेष-लाभार्थमित्याह-आयत्यां विशेषं पश्येदिति। अनया प्रतिलोमगत्या कमपि वृद्धेरतिशयमुत्तरकाले लभेयेति यदि जानीयादित्यर्थः।

When all the elements of his sovereignty could not be relieved from harm, he should attempt to relieve some of them at least. He should attempt to relieve first those human elements which are most loyal and free from fire brands and greedy men. Of inanimate elements (he should relieve) that which is most precious and useful. Means of agreement of peace, observance of neutrality, and making peace with one and waging war with another are to be the policy towards easy ones while those which require greater efforts may be relieved by other means.

Among deterioration, stagnation and progress, he should desire for that in the forward direction. Or he may choose the reverse order (if found suitable). Particular attention should be given to future prosperity.

इति देशावस्थापनम्।

एतेन यात्रादिमध्यान्तेष्वर्थानर्थसंशयानामुपसंप्राप्तिर्व्याख्याता।

निरन्तरयोगित्वाच्चार्थानर्थसंशयानां यात्रादावर्थः श्रेयानुपसम्प्राप्तुं पार्ष्णिग्राहासार-प्रतिघाते क्षयव्ययप्रवासप्रत्यादेयमूलरक्षणेषु च भवति। तथानर्थः संशयो वा स्वभूमिष्ठस्य विषह्यो भवति।

एतेन यात्रामध्येऽर्थानर्थसंशयानामुपसम्प्राप्तिर्व्याख्याता।

इति देशावस्थापनमिति। अनेन प्रकारेण देशनिमित्तापदां व्यवस्थापनमुक्तमित्यर्थः।

उक्तं देशनिमित्तापद्विषयं विधिं कालनिमित्तापद्यतिदिशति–ऐतेनेत्यादि। उक्तेन देशनिमित्तापत्स्वरूप-प्रतिविधानकथनेन, यात्रादिमध्यान्तेषु यात्राया आदौ मध्येऽन्ते च, अर्थानर्थसंशयानाम्, उपसम्प्राप्तिः अर्थात् प्रतिक्रिया च, व्याख्याता उक्तप्राया, देशस्योक्ताः समन्ततोयुगपदर्थोत्पत्त्यादय आपदस्तत्प्रतिक्रियाश्च पार्ष्णिग्राहाक्रन्दमित्रोपग्रहादयो यात्राया आदिमध्यान्तकालेष्वपि भवन्तीति भावः।

तत्र यात्राया आद्यवस्थायां युगपदर्थाद्युत्पत्तावाह–निरन्तरेत्यादि। यात्रादौ यात्राया आरम्भे, अर्थानर्थसंशयानां, निरन्तरयोगित्वात् युगपद् योगे सतीत्यर्थः, अर्थः, उपसंप्राप्तुम्, आदातुं, श्रेयान् भवति। श्रेयस्त्वं चार्थस्य पार्ष्णिग्राहासारप्रतिघातादिसाधकत्वादित्यभिप्रायेणाह–पार्ष्णिग्राहासारप्रतिघाते इति। पार्ष्णिग्राहस्य पृष्ठशत्रोः आसारस्य यातव्यसुहृद्बलस्य च, प्रतिघाते प्रतिघातार्थमित्यर्थः, क्षयव्ययप्रवास-प्रत्यादेयमूलरक्षणेषु च क्षयो युग्यपुरुषापचयः व्ययो हिरण्यधान्याद्यपचयः प्रवासो दूराध्वगमनं प्रत्यादेयं यातव्यात् प्रत्यादातुं योग्यं तदपहृतं भूम्यादिकम् अर्थादर्थसाध्यसहायोपग्रहनिर्वर्त्यं प्रत्यादेयप्रत्यादानं मूलरक्षणं स्थानीयस्य रक्षणम् इत्येतेषु च फलभूतेष्वित्यर्थः। अर्थो यथा तथानर्थः संशयो वा यात्रादौ स्वभूमिस्थितस्य विजिगीषोः सुखसाध्यो भवतीत्याह–तथानर्थ इत्यादि। विषह्यः सोढुं शक्यः साध्य इत्यर्थः।

यात्रादाविव यात्रामध्येऽप्यर्थानर्थसंशयानां पार्ष्णिग्राहासारप्रतिबन्धादिप्रयोजनवत्त्वाविशेषादुप-सम्प्राप्तिर्बोद्धव्येत्याह–ऐतेनेत्यादि।

The determination of situation in stated. This explains the situation of harm of doubtful nature, wealth in the middle or at the close of march.

Since doubts of wealth and harm are constantly related with all expeditions, it is better to secure wealth with which it is easy to destroy an enemy in the rear and his allies; to record the loss of men and money, to make provisions while sojourning abroad, to make good what is repayable and to defend the state. Further harm or doubtful prospects of wealth in one's own state are always intolerable.

This explains the situation of doubtful harm in the middle of an expedition.

यात्रान्ते तु कर्शनीयमुच्छेदनीयं वा कर्शयित्वोच्छिद्य वाचः श्रेयानुपसम्प्राप्तुं नानर्थः संशयो वा पराबाधभयात्।

सामवायिकानामपुरोगस्य तु यात्रामध्यान्तगोऽनर्थः संशयो वा श्रेयानुपसम्प्राप्तुम-निबन्धगामित्वात्।

अर्थो धर्मः काम इत्यर्थत्रिवर्गः। तस्य पूर्वः पूर्वः श्रेयानुपसम्प्राप्तुम्।

अनर्थोऽधर्मः शोक इत्यनर्थत्रिवर्गः। तस्य पूर्वः पूर्वः श्रेयान् प्रतिकर्तुम्।

अर्थोऽनर्थ इति, धर्मोऽधर्म इति, कामः शोक इति संशयत्रिवर्गः। तस्योत्तरपक्षसिद्धौ पूर्वपक्षः श्रेयानुपसम्प्राप्तुम्।

यात्राया अन्ते तु कर्शनीयमुच्छेदनीयं वा शत्रुं कर्शयित्वोच्छिद्य वा परभूमौ स्थितस्य विजिगीषोरर्थ एवोपसम्प्राप्तियोग्यो भवति, न त्वनर्थः संशयो वा, परस्य रन्ध्रान्वेषिणः सकाशादाबाधस्य सम्भावनादित्याह–यात्रान्ते त्वित्यादि।

सामवायिकानां प्रधानस्यैष विधिः। अप्रधानस्य त्वाह–सामवायिकानामिति। तेषाम्, अपुरोगस्य तु अप्रधानस्य तु, यात्रामध्यान्तगः यात्राया मध्येऽन्ते वा सम्भूतः, अनर्थः संशयो वा, उपसम्प्राप्तुं प्रतिकर्तुं, श्रेयान्, कुतः, अनिबन्धगामित्वात् पुरोगस्य धूर्वहतया सप्रतिबन्धत्वेनान्यत्र गन्तुमशक्तत्वेऽपि अपुरोगस्य प्रतिबन्धरहितस्यान्यत्र गतिसम्भवादित्यर्थः।

अथार्थानर्थसंशयानां प्रत्येकं त्रिवर्गं दर्शयन् वर्ग्याणामितरेतरापेक्षं श्रेयस्त्वमाह–अर्थ इत्यादि। अर्थत्रिवर्गः उपादेयत्रिवर्गः। तस्येति। अर्थत्रिवर्गस्य मध्ये पूर्वः पूर्वः उपसम्प्राप्तुं श्रेयान् कामाद् धर्मः प्रशस्ततरो धर्माच्चार्थ इत्यर्थः।

अनर्थ इत्यादि। अनर्थत्रिवर्गः परिहार्यत्रिवर्गः।

संशयत्रिवर्गमाह–अर्थोऽनर्थ इतीत्यादि। तस्येति। संशयत्रिवर्गस्य मध्ये, उत्तरपक्षसिद्धौ अत्र हि वर्गे अर्थानर्थरूपपक्षद्वयात्मकः प्रथमो वर्गः धर्माधर्मरूपपक्षद्वयात्मको द्वितीयः कामशोकरूपपक्षद्वयात्मकस्तृतीय इति त्रयो वर्ग्याः, तेष्वेकैकस्मिन् उत्तरपक्षस्यानर्थादेः सिद्धौ प्रतिक्रियायां कृतायां, पूर्वपक्षः अर्थादिः, उपसम्प्राप्तुं श्रेयान्।

At the close of an expedition, it is better to acquire wealth either by reducing or destroying a reducible or assailable enemy than to get into a situation of doubtful harm, lest enemies might cause troubles.

In the case of one who is not the leader of a combination of states, it is better to risk the situation of doubtful wealth or harm in the middle or at the close of an expedition, since one is not obliged to continue the expedition.

Wealth, virtue and enjoyment form the aggregate of the three kinds of wealth. Of these it is better to secure the earlier ones at first than the subsequent ones.

Harm, unrighteousness and grief form the aggregate of three kinds of harm. Of these it is better to avoid the first than the one that follows.

Wealth or harm; righteouness or unrighteousness, and enjoyment or grief are the aggregate of three kinds of doubts. Of these it is better to try the first ones rather than the subsequent ones and which it is certain to shake off.

These form the determination of opportunities. Thus the discourse on danger comes to an end.

इति कालावस्थापनम्। इत्यापदः।

तासां सिद्धिः पुत्रभ्रातृबन्धुषु सामदानाभ्यां सिद्धिरनुरूपा, पौरजानपददण्डमुख्येषु दानभेदाभ्यां, सामन्ताटविकेषु भेददण्डाभ्याम्।

एषानुलोमा विपर्यये प्रतिलोमा। मित्रामित्रेषु व्यामिश्रा सिद्धिः। परस्परसाधका ह्युपायाः।

इति कालावस्थापनमिति। अनेन प्रकारेण यात्रादिमध्यान्तकालिकार्थानर्थादिसम्बद्धा व्यवस्था निरूपितेत्यर्थः। इत्यापद इति। प्रपञ्चिता इति शेषः।

तासामुपायविकल्पजाः सिद्धय इति सूत्रम्। उक्तानामापदां सामदानाद्युपायभेदप्रयोगनिबन्धनाः प्रतिक्रिया उच्यन्त इति सूत्रार्थः। पूर्वं तावत् 'तयोर्मित्राक्रन्दोपग्रहात् सिद्धिरि'त्यादिना मित्राद्युपग्रहः साधकतयोक्तः, तदुपायास्त्विदानीमभिधीयन्ते।

तानुपायान् यथाविषयमवस्थापयति–तासां सिद्धिरिति। आपदां प्रतिक्रिया या पूर्वमुक्ता सा, पुत्रभ्रातृबन्धुषु विषये, सामदानाभ्यां सिद्धिरनुरूपा सामदानलक्षणाभ्यामुपायाभ्यां भवन्ती समुचिता सिद्धिः, तेषु सहजानुरागवत्तथा विधेयेषूपायान्तरप्रयोगानौचित्यादित्यभिप्रायः। पौरजानपददण्डमुख्येषु पौरादीनां मुख्येषु विषये यद्वा पौरादिषु राष्ट्रमुख्यान्तेषु चतुर्षु विषये. दानभेदाभ्यां भवन्ती सिद्धिः अनुरूपा सिद्धिः। तेषु सहजस्नेहादिरहिततया सामदण्डप्रयोगानौचित्यादिति भावः। सामन्ताटविकेषु विषये, भेददण्डाभ्यां भवन्ती सिद्धिः, अनुरूपा सिद्धिः, निसर्गविरोधिषु सामदानप्रयोगानौचित्यादित्यर्थः।

एषेति। उक्ता सामाद्युपायद्वारिका नैयमिकी सिद्धिः, अनुलोमा क्रमनियमयुक्ता औत्सर्गिक-स्वस्वगुणानुवर्तित्वलक्षणानुलोम्ययुक्तपुत्रादिविषयत्वादिति भावः। विपर्यये पुत्राद्यानुलोम्याभावे, प्रतिलोमा अव्यवस्थितक्रमा सिद्धिः, द्रोहवृत्तितया प्रतिलोमेषु पुत्रादिष्वपि दण्डप्रयोगात् सिद्धिरेषितव्या भवति, श्लाघ्यगुणयोगानिर्वैरवृत्तितयानुलोमेषु सामन्तादिष्वपि सामप्रयोगात् सिद्धिरेषितव्या भवतीत्यभिप्रायः। मित्रामित्रेष्विति। मित्रेषु अमित्रेषु च विषये, व्यामिश्रा सिद्धिः प्रतिक्रिया संकीर्णा भवति। तेषां हि विकारापत्तौ

As for the success in these circumstances :—in the case of sons, brothers or relatives, it is better to secure relief by means of conciliation and gifts; in the case of citizens, country people or chiefs of the army, it is by means of gifts or sowing the seeds of dissension; in the case of troubles from a neighbouring king or wild tribes, it is by means of sowing the seeds of dissension and coercion.

This is in he order of the enumeration of means; the same may be employed in the reverse order of the situation demands. Success against friends and enemies is achieved by complicated means. These means are mutually helpful.

शत्रोः शङ्कितामात्येषु सान्त्वं प्रयुक्तं शेषप्रयोगं निवर्तयति; दूष्यामात्येषु दानम्। सङ्घातेषु भेदः; शक्तिमत्सु दण्ड इति।

गुरुलाघवयोगाच्चापदां नियोगविकल्पसमुच्चया भवन्ति।

'अनेनैवोपायेन नान्येन' इति नियोगः।

'अनेन वान्येन वा' इति विकल्पः।

'अनेनान्येन च' इति समुच्चयः।

तेषामेकयोगाश्चत्वारस्त्रियोगाश्च; द्वियोगाः षट्; एकश्चतुर्योग इति पञ्चदशोपायाः। तावन्तः प्रतिलोमाः।

तत्तद्विकारप्रशमानुगुणतया सर्व एवोपाया व्यस्ता मिश्रिता वा आनियमेन प्रयोक्तव्या भवन्तीति भावः। तत्रोपायसमुच्चयपक्षे द्वयोर्विरुद्धस्वभावयोरुपाययोः कथमेकार्थसाधकतेत्याशङ्कायामाह–परस्परसाधका ह्युपाया इति। परस्परविरुद्धा अप्युपाया एकस्मिन्नर्थे साध्ये परस्परसहकारिणो भवन्तीत्यर्थः।

उपायविषयं नियमविशेषमाह–शत्रोः शङ्कितामात्येष्विति। शत्रुसम्बन्धिषु क्रुद्धत्वादिदोषात् कृत्यत्वेन शङ्क्यमानेषु अमात्येषु विषये, सान्त्वं साम, प्रयुक्तं सत्, शेषप्रयोगं दानाद्युपायप्रयोगं, निवर्तयति, सान्त्वेनैव कृत्यसिद्ध्या शेषानपेक्षणादिति भावः। दूष्यामात्येष्विति। शत्रोर्दूष्या येऽमात्यास्तेषु, दानं प्रयुक्तं सत्, शेषप्रयोगं निवर्तयति। सङ्घातेष्विति। इह शत्रोरिति निवृत्तम्। सङ्घातेषु विषये, भेदः प्रयुक्तः सन्, शेषप्रयोगं निवर्तयति। शक्तिमत्स्विति। उत्साहादिशक्तियुक्तेषु विषये, दण्ड इति नियम इति शेषः, दण्ड एवेत्यर्थः। इत्थमुपायानां विषयापेक्षा व्यवस्थाभिहिता।

आपद्गुरुलघुभावापेक्षयोपायानां नियोगविकल्पसमुच्चया भवन्तीत्याह–गुरुलाघवयोगाच्चेत्यादि।

नियोगविकल्पसमुच्चयानां स्वरूपमाह–अनेनैवेत्यादि। इह वाक्यत्रयेऽपि 'सिद्धिरि'ति शेषो द्रष्टव्यः।

नियोगादियोगनिबन्धनान् उपायानां प्रकारान् सङ्ख्ष्टे–तेषामिति। सामादीनां मध्ये, एकयोगाः एकेति भावप्रधानो निर्देशः एकेन एकत्वेनैव न तु द्वित्वत्रित्वादिना योगाः प्रयोगो येषां ते तथाभूताः अर्थात् सामैव केवलं प्रयोक्तव्यं दानमेव केवलं भेद एव केवलो दण्ड एव केवल इत्येवं व्यवस्थायुक्ताः, चत्वारः, त्रियोगाश्च त्रिप्रयोगयुक्ताश्च, चत्वारः। यथा–सामदान-

In the case of suspected ministers of an enemy, the employment of conciliation does not need the use of the other means; in the case of treacherous ministers it is by means of gifts; in the case of a combination of states it is by means of dissension and in the case of the powerful it is by coercion.

When serious and light dangers occur together particular means, alternative means or all the means together may be employed.

"By this means alone, and not by any other"—is what is meant by a particular means.

"By this or by another"—is what is meant by alternative means.

"By this as also by another"—is what is meant by all the means.

Of these, the single means as well as the combination of any three means are four; the combinations of any two means are six; and the combination of all the four is one. Thus these are fifteen kinds of strategic means. Of the same number are the means in the reverse order.

तेषामेकेनोपायेन सिद्धिरेकसिद्धिः, द्वाभ्यां द्विसिद्धिः, त्रिभिस्त्रिसिद्धिः, चतुर्भिश्चतुस्सिद्धिरिति।

धर्ममूलत्वात् कामफलत्वाच्चार्थस्य धर्मार्थकामानुबन्धा यार्थस्य सिद्धिः, सा सर्वार्थसिद्धिः।

इति सिद्धियः।

दैवादग्निरुदकं व्याधिः प्रमारो विद्रवो दुर्भिक्षमासुरी सृष्टिः इत्यापदः।

भेदाः, सामदानदण्डाः सामभेददण्डाः दानभेददण्डा इत्येवं चतुष्प्रकाराः। द्वियोगा द्विप्रयोगयुक्ताः, षट्। यथा–सामदाने सामभेदौ सामदण्डौ दानभेदौ दानदण्डौ भेददण्डौ इत्येवं षट् प्रकाराः। एकः चतुर्योगः चतुष्प्रयोगयुक्त एकः प्रकारः। इति एवं, पञ्चदश पञ्चदशप्रकारः, उपायाः। ते चैतेऽनुलोमक्रमप्रयोज्याः। प्रतिलोमक्रमप्रयोज्या अपि पञ्चदशेत्याह–तावन्तः प्रतिलोमा इति। तद्यथा–दण्डभेददानसामानि ऐकैकश्येन चत्वार उपायाः दण्डभेददानानि दण्डभेदसामानि भेददानसामानि दण्डदानसामानीति त्रियोगाश्चत्वारः। दण्डभेदौ दण्डदाने दण्डसामनी भेददाने भेदसामनी दानसामनी इति द्वियोगाः षट्। दण्डादिचतुष्टययुक्त एक इत्याहत्य पञ्चदश प्रतिलोमक्रमिका उपायाः।

एकद्वित्रिचतुर्योगनिबन्धमुपायानां चातुर्विध्यं तन्निर्वर्त्यानां प्रतिक्रियाणामपि चातुर्विध्यं प्रयोजयतीत्यभिप्रायेणाह तेषामित्यादि। इतिशब्दानन्तरं चतुर्विधाः सिद्धय इति शेषः।

या एताः प्रतिक्रियालक्षणाः सिद्धयः प्रपञ्चिताः, ताभिः सिध्यत्सु नानाप्रकारेषु लाभेषु मध्येऽर्थस्य लाभ एव परम इत्युपदेष्टुं तं स्तौति–धर्ममूलत्वादिति। धर्मं प्रति हेतुत्वात्, कामफलत्वात् कामोपभोगसाधकत्वात्, चकारादर्थसाधकत्वाच्च, धर्मार्थकामानुबन्धा धर्मादिसमुच्चयप्राप्तिलक्षणफलौपधायिका, या, अर्थस्य, सिद्धिः लाभः, सा सर्वार्थसिद्धिः धर्मादित्रितयातिरेकेण लोके लब्धव्यार्थाभावादिति भावः।

इतीति। अनेन प्रकारेण, सिद्धयः प्रतिक्रियाः अर्थादपनयप्रभवाणां मानुषीणामापदां, व्याख्याता इति शेषः।

दैवीस्ता आह–दैवादित्यादि। दैवात् पूर्वजन्मसञ्चितादृष्टात्।

One who succeeds by only one means among these is called one of single success; when by two, one of double success, when by three, one of treble success and when by four, one of fourfold success.

Virtue being the basis of wealth and and as enjoyment is the end of wealth, success in achieving that kind of wealth which promotes virtue, wealth and enjoyment is termed success in all.

Thus the varieties of success are enumerated.

Such providential visitations as fire, floods, disease, pestilence, fever, famine and demoniac troubles are dangerous.

तासां दैवतब्राह्मणप्रणिपाततः सिद्धिः।।

अदृष्टिरतिवृष्टिर्वा सृष्टिर्वा यासुरी भवेत्।
तस्यामाथर्वणं कर्म सिद्धारम्भाश्च सिद्धयः।।

इति कौटलीयार्थशास्त्रेऽभियास्यत्कर्मणि नवमेऽधिकरणे सप्तमोऽध्यायः अर्थानर्थसंशययुक्तास्तासामुपायविकल्पजाः सिद्धयश्च, आदितोऽष्टाविंशतिशततमः।।

एतावता कौटलीयस्यार्थशास्त्रस्य अभियास्यत्कर्म नवममधिकरणं समाप्तम्।।

प्रमारः सङ्घशो मरणम्। विद्रवो राष्ट्रात् पलायनम्। दुर्भिक्षम् ईतिबाधा। आसुरी सृष्टिः मूषिकादीनां प्रभूतोत्पत्तिरिति माधवः।

दैवीनामापदां दैवतब्राह्मणनमस्करणात् प्रतीकारो भवतीत्याह–तासामित्यादि।

अवृष्टिरिति। वृष्ट्यभावः अतिवृष्टिर्वा अतिमात्रवर्षणं वा, आसूरी सृष्टिर्वा मूषिकादिप्रभूतोत्पत्तिरूपा वा, या, आपद्, भवेत्, तस्यां विषये, आथर्वणं कर्म अथर्ववेदोक्तं शान्तिकादि, सिद्धारम्भाश्च सिद्धानां तपस्सिद्धियुक्तानां महताम् आरम्भाः शान्तिकर्माणि च, सिद्धयः प्रतीकाराः, भवन्ति।।

या कौटल्यार्थशास्त्रस्य व्याख्या श्रीमूलसंज्ञिता।
तत्राभियास्यत्कर्माधिकरणं नवमं गतम्।।

इति श्रीवञ्चिमण्डलमहाराजाश्रितस्य ताम्रपर्णीतीरवर्त्तितरुवाग्रहारा
भिजनस्य श्रीसीताम्बाश्रीरामसुब्रह्मण्यार्यसूनोर्महामहोपाध्याय
गणपतिशास्त्रिणः कृतिषु कौटलीयार्थशास्त्रव्याख्यायां श्री-
मूलाख्यायाम् अभियास्यत्कर्मणि नवमेऽधिकरणे सप्तमो
ऽध्यायः अर्थानर्थसंशययुक्ताः, तासामुपायविकल्पजाः
सिद्धयश्च। आदितोऽष्टाविंशत्यधिकशततमः।।
इति अभियास्यत्कर्म नवममधिकरणं
समाप्तम्।।

Success in averting these is to be sought by worshipping gods and Brahmins.

Absence of rain, excessive rain or demoniacal troubles are to be redressed by the rites prescribed in the Atharvaveda, or by the rites undertaken by accomplished ascetics.

Thus the one hundred and twenty eighth chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the seventh chapter of the ninth Adhikaraṇa dealing with the section 'doubts about wealth and harm; and success by alternative stretegic means.'

सांग्रामिकं–दशममधिकरणम्।

BOOK TEN : RELATING TO WAR

Chapter 129

147. प्रक० स्कन्धावारनिवेशः।

Section 147 : Encampment

वास्तुकप्रशस्ते वास्तुनि नायकवर्धकिमौहूर्तिकाः स्कन्धावारं वृत्तं दीर्घं चतुरश्रं वा, भूमिवशेन वा, चतुर्द्वारं षट्पथं नवसंस्थानं मापयेयुः। खातवप्रसालद्वाराट्टालकसम्पन्नं भये स्थाने च।

मध्यमस्योत्तरे नवभागे राजवास्तुकं धनुश्शतायाममर्धविस्तारं, पश्चिमार्धे तस्यान्तःपुरम्। अन्तर्वंशिकसैन्यं चान्ते निविशेत। पुरस्तादुपस्थानं,

अथ सांग्रामिकं नाम दशममधिकरणमारभ्यते। संग्राममधिकृत्य कृतं सांग्रामिकमुच्यते। विजिगीषुणा हि शक्तिदेशकालबलाबलादिज्ञानपूर्वं सुविहितबाह्याभ्यन्तरादिविपत्प्रतीकारेणाभियाय संग्रामे करणीये तदीयमङ्गजातं तदारम्भपूर्वोत्तरकालानुष्ठेयमस्मिन्नधिकरणेऽभिधीयते।

तत्र प्रथमं सूत्रं–स्कन्धावारनिवेश इति। युद्धभूम्यासन्नं सैन्यावासस्थानं स्कन्धावारः तस्य निवेशो निर्माणमुच्यत इति सूत्रार्थः।

वास्तुकप्रशस्त इति। वास्तुविद्याविचक्षणश्लाघिते, वास्तुनि प्रदेशे नायकवर्धकिमौहूर्तिकाः नायकः सेनापतिः वर्धकिः स्थपतिः मौहूर्तिकः निर्माणारम्भार्थशुभकालनिश्चायकः इत्येते मिलिताः, स्कन्धावारं, वृत्तं दीर्घं चतुरश्रं वा, भूमिवशेन वा निर्माणभूमियोग्यतानुगुण्येनान्यादृशाकारं वेत्यर्थः, चतुर्द्वारं पूर्वतः पश्चिमतो दक्षिणत उत्तरतश्चेति चतुर्भिर्द्वारैरुपेतं, षट्पथं दुर्गनिवेशोक्तरीत्या प्राक्प्रत्यगायतैस्त्रिभिः दक्षिणोत्तरायतैस्त्रिभिरिति षड्भिः पथिभिर्युक्तं, नवसंस्थानं नवसङ्ख्यसन्निवेशं, मापयेयुः निर्मापयेयुः। खातेत्यादि। खातं परिखा वप्रं प्राकाराधारः सालः प्राकारः द्वारं गोपुरम् अट्टालकः उपरिगृहम् एतैः सम्पन्नं युक्तं, मापयेयुरिति सम्बध्यते। कदैवम्भूतं मापयेयुः, भये स्थाने च पराघातभये चिरावस्थाने च, सम्भाविते इति शेषः।

मध्यमस्येति। वास्तुहृदयस्य, उत्तरे उदग्भवे, नवभागे नवमांशे, राजवास्तुकं राजवासस्थानं, धनुश्शतायामं धनुश्शतदीर्घम्, अर्धविस्तारं पञ्चाशद्धनुर्विस्तारं, कार्यमिति शेषः। मापयेयुरिति वा वर्तते। पश्चिमार्धे तस्येति। राजवास्तुकस्य पश्चिमभागे, अन्तःपुरं राजस्त्रीवासस्थानं, कार्यम्। अन्तर्वंशिकसैन्यं चेति। अन्तःपुररक्षिसैन्यं च, अन्ते अन्तःपुरसमीपे, निविशेत निवेशं लभेत। पुरस्तादिति। राजवास्तुकस्य पुरोभागे, उपस्थानं

On a site considered to be auspicious according to the science of buildings, the leader, the carpenter and the astrologer should measure a circular, rectangular or square spot which should according to landscape, consist of four gates, six roads and nine divisions. There should be ditches, parapets, walls, doors and watch tower, when danger is apprehended.

The royal quarters may be placed in one of the nine divisions of the upper part of the centre of plot having a length of a hundred bows and half of it as its width and on the lower half may be located the harem. The army and the harem are to be placed of its extremity.

दक्षिणतः कोशशासनकार्यकरणानि, वामतो राजौपवाह्यानां हस्त्यश्वरथानां स्थानम्। अतो धनुश्शतान्तराश्चत्वारः शकटमेथीप्रततिस्तम्भसालपरिक्षेपाः। प्रथमे पुरस्तान्मन्त्रिपुरोहितौ, दक्षिणतः कोष्ठागारं महानसं च, वामतः कुप्यायुधागारम्। द्वितीये मौलभृतानां स्थानम् अश्वरथानां, सेनापतेश्च। तृतीये हस्तिनः श्रेण्यः प्रशास्ता च। चतुर्थे विष्टिर्नायको मित्रामित्राटवीबलं स्वपुरुषाधिष्ठितम्। वणिजो रूपाजीवाश्चानुमहापथम्। बाह्यतः लुब्धकश्वगणिनः सतूर्याग्नयः गूढाश्चारक्षाः।

उपतिष्ठन्ते सन्दर्शनार्थिनो राजानमत्रेत्युपस्थानगृहं, कर्तव्यमिति शेषः। दक्षिणत इति। दक्षिणभागे, कोशशासनकार्यकरणानि कोशो रत्नादिस्थानं शासनकरणम् अक्षपटलं कार्यकरणं व्यवहारदशनस्थानम् इत्येतानि, कर्तव्यानि। वामत इति। वामभागे, राजौपवाह्यानां राजवाहनानां, हस्त्यश्वरथानां, स्थानं कर्तव्यम्। अत इति। राजवास्तुकात् परतः, धनुश्शतान्तराः धनुश्शतपरिमाणपरस्परान्तरालाः, चत्वारः, शकटमेथीप्रतति-स्तम्भसालपरिक्षेपाः शकटैः कृतः परिक्षेपः प्रथमः मेथ्यः कण्टकिवृक्षशाखाः तासां प्रततिभिः प्रकृष्टाभिस्ततिभिः कृतः परिक्षेपो द्वितीयः स्तम्भैर्दारुमयैः कृतः परिक्षेपस्तृतीयः सालः प्राकारः तत्कृतः परिक्षेपश्चतुर्थ इत्येते, रक्षार्थं कर्तव्या इति शेषः। प्रथम इति। तेष्वादिमे शकटपरिक्षेपे, पुरस्तात् प्राग्भागे मन्त्रिपुरोहितौ, निवेशनीयाविति शेषः, दक्षिणतः कोष्ठागारं धान्यादिस्थानं, महानसं च पाकशाला च। इह 'अध्यक्षा गुप्तिस्थानं च' इत्यधिकपाठो नयचन्द्रिकायां प्रतिभाति। तत्र अध्यक्षाः समाहर्त्रादयः, गुप्तिस्थानम् आरक्षकबलस्थानम्। वामतः कुप्यायुधागारं कुप्यगृहम् आयुधशाला च, निवेशनीयानि। द्वितीय इति। मेथीप्रततिपरिक्षेपे, मौलभृतानां सैन्यानाम्, अश्वरथानां, सेनापतेश्च, स्थानं कार्यम्। तृतीय इति। स्तम्भपरिक्षेपे, हस्तिनः, श्रेण्यः श्रेणीबलानि, श्रेण्य इत्येतत्स्थाने गोण्य इत्यपपाठः। 'काम्बोजकसौराष्ट्रादयः' इति तु व्याचष्टे माधवः। प्रशास्ता च कण्टकशोधनाध्यक्षश्च, निवेश्याः। चतुर्थ इति। सालपरिक्षेपे, विष्टिः कर्मकरवर्गः, नायकः सेनापतिदशकपतिः, मित्रामित्राटवीबलं स्वपुरुषाधिष्ठितं स्वपुरुषनेतृकं मित्राणाम् अमित्राणां क्रयाद्यधिगतानाम् आटविकानां च बलं, निविशेतेति शेषः। वणिज इति। ते, रूपाजीवाश्च

In front of it is the place for recepion of guests and to the right may be located treasury and office of administration, while to the left is the location for the vehicles of the king such as elephants, horses and chariots. Outside of this and at a distance of hundred bows from each other there should be four divisions made by carts, thorny trees, pillars and walls. In the first may be located the quarters of the prime minister and the priest; on the rightside the store-house and the kitchen and on the left store for raw materials and weapons (may be located). In the second division the quarters of the hereditary army and of horses and chariots and of the commander. On the third there should be place for elephants, corporate army and officer of vigilance. In the fourth division are to be located free labourers, army of friends and the enemy, with their commander. Near the main pathway may be located traders and prostitutes. Outside of this, hunters and keepers of dogs with their trumpets and fire brands as also spies and other sentinels are to be placed.

शत्रूणामापाते कूपकूटावपातकण्टकिनीश्च स्थापयेत्। अष्टादशवर्गाणामारक्षविपर्यासं कारयेत्। दिवायामं च कारयेदपसर्पज्ञानार्थम्।

विवादसौरिकसमाजद्यूतवारणं च कारयेत्। मुद्रारक्षणं च।

सेनानिवृत्तमायुधीयमशासनं शून्यपालोऽनुवघ्नीयात्।।

पुरस्तादध्वनः सम्यक् प्रशास्ता रक्षणानि च।
यायाद् वर्धकिविष्टिभ्यामुदकानि च कारयेत्।।

।। इति कौटलीयार्थशास्त्रे सांग्रामिके दशमेऽधिकरणे
प्रथमोऽध्यायः स्कन्धावारनिवेशः,
आदितः एकोनत्रिंशच्छततमः।।

वेश्याश्च, अनुमहापथं राजपथसमीपे, निविशेरन्। बाह्यत इति। सर्वबहिर्देशे, लुब्धकश्वगणिनः व्याधाः श्वगणजीविनश्च, सतूर्याग्नयः शत्रुबलागमनमात्मना विज्ञातं तूर्यघोषोषणेनाग्निदीपनधूपनैश्च राजादिभ्यः प्रकाशयितुं तूर्याग्निसहिताः, गूढाश्चारक्षाः गोपालादिवेषच्छन्नाः रक्षिपुरुषाश्च शत्रुचारग्रहणार्थाः, निविशेरन्निति शेषः।

शत्रूणामापात इति। येन मार्गेण शत्रूणामापतनं सम्भाव्यते तस्मिन् मार्गे, कूपकूटावपातकण्टकिनीश्च कूटकूपान् तृणच्छन्नान् कूपान् अवपातान् गर्तान् कण्टकिनीः कण्टकयुक्ताः फलकाश्च, स्थापयेत्। अष्टादशवर्गाणां मौलभृतादीनां षण्णां प्रत्येकं पदिकसेनापतिनायकलक्षणैः पतिभिस्त्रिभिर्योगादष्टादशत्वं प्राप्तानां बलानाम्, आरक्षविपर्यासम् अधिष्ठातृव्यत्ययं, कारयेत्, अर्थात् शत्रूपजापपरिहारार्थम्। दिवायामं च दिवासंचारनियमं च, कारयेत्, किमर्थम्, अपसर्पज्ञानार्थे परचारज्ञानार्थम्।

विवादेत्यादि। विवादः परस्परविप्रतिपत्तिः सौरिकं सुरा मद्यपाने समाजः कौतुकगोष्ठी द्यूतम्

अक्षादिदेवनम् एभ्यो वारणं च, अर्थात् सैनिकानां, कारयेत्। मुद्रारक्षणं च प्रवेशनिर्गमयोरनुमति-चिह्नभूतराजकीयमुद्राप्रदर्शननियम इह मुद्रा तस्या रक्षणमनुवर्तनं च, कारयेत्।

सेनानिवृत्तमिति। योद्धुं गतायाः सेनायाः निवृत्तं निवृत्य स्थानीयप्राप्तम्, आयुधीयम् आयुधजीविनम्, अशासनं निवृत्त्यनुमतिलेखरहितं, शून्यपालः सपरिकरराजरहितं स्थानीयं शून्यं तत्पालकः, अनुबन्धीयाद् अनुसरेद् गृह्णीयादित्यर्थः। अन्तपाल इति कचित् पाठः।।

पुरस्तादिति। प्रशास्ता कण्टकशोधनाध्यक्षः, पुरस्तात् सपरिकरराजप्रस्थानात् प्रागेव, वर्धकिविष्टिभ्यां स्थपतिकर्मकराध्यक्षाभ्यां सह, यायात्। पुरस्ताद्यानस्य फलमाह–अध्वनो रक्षणानि च विषमसमीकरण-कण्टकापनयनदुष्टसत्त्वप्रतिरोधकाद्युत्सारणानि च, उदकानि च निर्जलप्रदेशे जलानि च, कारयेत्।।

इति कौटलीयार्थशास्त्रव्याख्यायां साङ्ग्रामिके दशमेऽधिकरणे
प्रथमोऽध्यायः स्कन्धावारनिवेशः,
आदित एकोनत्रिंशदुत्तरशततमः।।

To ward off attack from enemies, wells, mounds and thorns should be placed. Eighteen divisions of guards employed to ensure the safety of the king shall perform the duty in turn. To ascertain the movements of spies a time table of business should be prepared during the day.

Disputes, drinking of liquor, social gathering and gambling are to be avoided. System of passport is to be observed. An officer in charge of a region shall supervise the return of the weapon by the army that has come back, especially when they return without written permission.

The officer along with his retinue shall march in front with carpenters and free labourers to dig wells to make water available.

Thus the one hundred and twenty ninth chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the first chapter of the tenth Adhikaraṇa dealing with the section on 'encampment.'

Chapter 130

148, 149. प्रक० स्कन्धावारप्रयाणं बलव्यसनावस्कन्दकालरक्षणं च।

Sections 148 : March of the Camp
149 : Protection of the Army in Troubles

ग्रामारण्यानामध्वनि निवेशान् यवसेन्धनोदकवशेन परिसङ्ख्याय स्थानासनगमनकालं च यात्रां यायात्। तत्प्रतीकारद्विगुणं भक्तोपकरणं वाहयेत्। अशक्तो वा सैन्येष्वायोजयेत्। अन्तरेषु वा निचिनुयात्।

पुरस्तान्नायकः। मध्ये कलत्रं स्वामी च। पार्श्वयोरश्वा बाहूत्सारः। चक्रान्तेषु हस्तिनः। प्रसारवृद्धिर्वा सर्वतः। वनाजीवः प्रसारः। स्वदेशादन्वायतिर्वीवधः। मित्रबलमासारः, कलत्रस्थानमपसारः। पश्चात् सेनापतिः पर्यायान्निविशेत।

स्कन्धावारप्रयाणमिति सूत्रम्। यथोक्तरीत्या निर्मितं स्कन्धावारमुद्दिश्य राज्ञः सपरिकरस्य प्रयाणमुच्यत इति सूत्रार्थः।

ग्रामारण्यानामिति। ग्रामाणामरण्यानां च, अध्वनि, निवेशान् निवेशयोग्यदेशान्, यवसेन्धनोदकवशेन तृणकाष्ठजलयोगवशेन, परिसंख्याय इयत्तया निर्णीय, स्थानासनगमनकालं च स्थानं पक्षमासाद्यवस्थानम् आसनं पञ्चषदिनाद्यवस्थानं गमनम् एकरात्रमात्रावस्थानम् एषां कालं च, परिसंख्याय, यात्रां यायात्। तत्प्रतीकारद्विगुणमिति। परिसंख्यातदेशकालपर्याप्तभक्तोपकरणतो द्विगुणं, भक्तोपकरणं भक्तं तण्डुलादि उपकरणं वस्त्रादि च, वाहयेत् वाहनमारोप्य नयेत्। अशक्तो वेति। वाहयितुमशक्तश्चेत्, सैन्येषु, आयोजयेत् वहनीयत्वेनार्पयेत्। अन्तरेषु वा तत्तन्निवेशप्रदेशेषु वा, निचिनुयात् पूर्वमेव निचित्य स्थापयेत्।

यातृयानक्रममाह–पुरस्तादिति। सेनाया अग्रे, नायकः सेनापतिदशकपतिः। यायादिति शेषः। मध्ये कलत्रं दारादिकं, स्वामी च राजा च, यायात्। पार्श्वयोः अश्वाः अश्वरूपो दण्डो यायादित्यर्थः। स च बाहुभ्यां पराभिघातवारणार्थं इत्याह–बाहूत्साहर इति। बाहुभ्याम् उत्सारयति पराभ्याघातं वारयतीति तथा। चक्रान्तेषु सेनायाः पश्चाद्भागेषु, हस्तिनः, गच्छेयुः। प्रसारवृद्धिर्वा सर्वत इति। वन्यमुपजीव्ये व्रीहितृणादिद्रव्यं प्रसारः तस्य वृद्धिः प्रभूतः प्रसार इत्यर्थः, स च सर्वतः, यायात्। प्रसारपदार्थमाह–वनाजीव इत्यादि। तत्प्रसङ्गाद् विवधादीनाह–स्वदेशादिति। आत्मनो जनपदाद्, अन्वायतिः अविच्छिन्न आजीवद्रव्यागमः

Taking into consideration the villages to their capacity to supply grass, fire-wood, and water, march of the army should be regulated according to the programme of short and long halts. Items of food and provisions may be carried double the quantity than required in any emergency. If no other means is available the job may be entrusted to the army itself. Of they may be stored in central places.

The commander should move ahead. In the centre the harem and the king. On either side horses and body guards. At the extremity of a circle elephants may be led. Every where excess soldiers shall be placed. they should be familiar with the life in forests. Essential items shall be made available from one's own region without break. The army of an ally and his follows should select their own path. The leaders of the army shall follow in the rear.

पुरस्ताद् अभ्याघाते मकरेण यायात्, पश्चाच्छकटेन, पार्श्वयोर्वज्रेण, समन्ततः सर्वतोभद्रेण, एकायने सूच्या।

पथिद्वैधीभावे स्वभूमितो यायात्। अभूमिष्ठानां हि स्वभूमिष्ठा युद्धे प्रतिलोमा भवन्ति। योजनमधमा, अध्यर्धं मध्यमा, द्वियोजनमुत्तमा, संभाव्या वा गतिः।

आश्रयकारी, सम्पन्नघाती, पार्ष्णिरासारो मध्यम उदासीनो।

वीवधः, सोऽपि सर्वतो गच्छेदित्यर्थः। मित्रबलम् आसारः आसारशब्दितं, कलत्रस्थानम्, अपसारः अपसारशब्दितम्। तदभयमपि सुरक्षितं यायादित्यार्थम्। पश्चादिति। सेनायाः पश्चाद्भागे, सेनापतिः, पर्यायात् स्वस्वसेनापश्चाद्भागक्रमात्, निविशेत तिष्ठेत्।

पुरस्तादिति। पुरोभागे, अभ्याघाते पराभिघाते पराभिघाते शङ्क्यमाने, मकरेण भोगाख्यस्य प्रकृतिव्यूहविशेषस्य प्रभेदो मकरो नाम दण्डभोगमण्डलासंहतव्यूहव्यूहनप्रकरणे वक्ष्यमाणः तेन, यायात्। पश्चाद् अभ्याघाते, शकटेन तदाख्येन भोगभेदेन, यायात्। पार्श्वयोः अभ्याघाते, वज्रेण असंहताख्यस्य प्रकृतिव्यूहस्य प्रभेदो वज्रः तेन, यायात्। समन्ततः अभ्याघाते, सर्वतोभद्रेण मण्डलाख्यस्य प्रकृतिव्यूहस्य प्रभेदः सर्वतोभद्रः तेन, यायात्। एकायने एकैकमात्रगन्तव्ये मार्गे, सूच्या तदाख्येन मण्डलभेदेन, यायात्।

पथिद्वैधीभाव इति। पथो मार्गस्य द्वैधीभावे भूम्यानुगुण्यानानुगुण्याभ्यां द्विरूपत्वे सति, स्वभूमितो यायात् स्वरथाश्वपदातिहस्त्यनुगुणया भूम्या गच्छेत्। सा च युद्धभूमिप्रकरणे वक्ष्यते। स्वभूमितो यानस्य फलमाह–अभूमिष्ठानां हीति। तेषां हि, स्वभूमिष्ठाः, युद्धे, प्रतिलोमा अनाक्रमणीयाः, भवन्ति। कियान् अध्वा दिवस एकस्मिन् गन्तव्य इत्याह–योजनमधमेत्यादि। योजनं षड्गोरुतं तत्परिच्छिन्ना गतिरवरा, सार्धयोजनपरिच्छिन्ना मध्यमा, द्वियोजनपरिच्छिन्ना उत्तमा। उक्ताधिकपरिमाणापि देशकालाद्यानुगुण्येन गतिः सम्भाव्यत इत्याह–सम्भाव्या वा गतिरिति।

प्रस्थितस्य शनैर्यानशीघ्रयानयोर्निमित्तान्याह–आश्रयकारीति। आत्मोदयार्थं कमप्याश्रयं करिष्यन्। एतदादिषु 'इति शनैयादि' ति सम्बध्यते। आत्मोदयार्थं कञ्चिदाश्रयं करिष्यामीत्यस्मिन् निमित्ते शनैर्यायादित्यर्थः। सम्पन्नघातीति शत्रुदेशं सम्पन्नं हनिष्यामीत्यस्मिन् निमित्ते, पार्ष्णिः पार्ष्णिग्राहः

When attack of an enemy is apprehended in front the army shall move in a formation of crocodile fashion, when the same is expected from rear the formation shall be cart-like, when attack is expected from sides the formation shall be like Vajra (diamond-like); from all sides the army shall move in a Sarvatobhadra (compact on all sides) formation and when the army is to move through a narrow path the formation shall be pin-like.

When there are two paths one should march through the favourable path. When compared to an army marching through an unfavourable and one which marches through a favourable path the latter will be in a strong position in a fight being unassailable. The path may be conjectured as inferior for the length of a Yojana, as of middle quality when half the route is unpassable and if smooth for too yojanas, the path may be considered as best.

A slow march should be made, if the invader expects to get some help on the way; wants to destroy the wealth of the enemy, hopes to subdue a rear enemy, the force of on ally,

वा प्रतिकर्तव्यः, सङ्कटो मार्गः शोधयितव्यः, कोशो दण्डो मित्रामित्राटवीबलं विष्टिः ऋतुर्वा प्रतीक्ष्याः, कृतदुर्गकर्मनिचयरक्षालयः क्रीतवलनिर्वेदो मित्रबलनिर्वेदश्चागमिष्यति, उपजपितारो वा नातित्वरयन्ति, शत्रुरभिप्रायं वा पूरयिष्यति इति शनैर्यायात्। विपर्यये शीघ्रम्।

हस्तिस्तम्भसङ्क्रमसेतुबन्धनौकाष्ठवेणुसङ्घातैः, अलाबुचर्मकरण्डदृतिप्लवगण्डिका-वेणिकाभिश्चोदकानि तारयेत्।

तीर्थाभिग्रहे हस्त्यश्वैरन्यतो रात्रावुत्तार्य सत्रं गृह्णीयात्।

आसारः मित्रबलं, मध्यमः अरिविजिगीष्वोर्भूम्यनन्तरो विदिक्स्थः, उदासीनो वा अरिविजिगीषु-मध्यमप्रकृतिबाह्यो वा, प्रतिकर्तव्य इति प्रशमितकोपः कर्त्तव्य इत्यस्मिन् निमित्ते। सङ्कटो मार्गः शोधयितव्य इति विषमो मार्गः सुगमतां नेतव्य इत्यस्मिन् निमित्ते। कोशो धनसंग्रहः, दण्डः स्वसैन्यं विक्षिप्तं मिलिष्यत्, मित्रामित्राटवीबलं मित्रामित्राटविकानां सैन्यं साहाय्यार्थमागमिष्यत्, विष्टिः कर्मकरवर्गः, 'तुर्वा स्वबलसामर्थ्यानुरूपयुद्धयोग्यः कालो वा, प्रतीक्ष्या इति प्रतिपाल्या इत्यस्मिन् निमित्ते। कृतदुर्गकर्मनिच-यरक्षाक्षयः कृतस्य शत्रुणा पूर्वमनुष्ठितस्य दुर्गकर्मणः स्वदुर्गसंस्कारस्य निचयस्य धान्यादिसञ्चयस्य रक्षायाश्च क्षयः, क्रीतबलनिर्वेदः धनदानस्वीकृतस्य सैन्यस्य निर्वेदः, मित्रबलनिर्वेदश्च मित्रबलस्य साहाय्यागतस्य निर्वेदश्च, अर्थात् कालविलम्बनिमित्तः, आगमिष्यति शत्रोः सम्भविष्यति, इत्यस्मिन् निमित्ते। उपजपितारो वा शत्र्वभियोगार्थमस्मानुपजपन्तः शत्रुदूष्या इत्यर्थः, नातित्वरयन्ति अभियोगेऽतित्वरां कर्तव्यां नेच्छन्ति, इत्यस्मिन् वा निमित्ते। शत्रुः, अभिप्रायं विजिगीषुमनोरथं, पूरयिष्यति ऋते युद्धात् सफलयिष्यति, इत्यस्मिन् वा निमित्ते, शनैर्यायात्। विपर्यये यथोक्तनिमित्ताभावे, शीघ्रं यायात्।

सैन्यस्य नद्यादितरणोपायानाह–हस्तिस्तम्भेत्यादि। हस्तिभिः गजैः स्तम्भसंक्रमैः स्तम्भानामुपरि

दारुफलकादिघटनया कल्पितैः संक्रमैः सेतुबन्धैः नौभिः काष्ठसंघातैः वेणुसंघातैश्च, अलाबुचर्मकरण्डादिभिश्च अलाबुभिस्तुम्बीफलकोशैः चर्मकरण्डैश्चर्मावनद्धैर्विदलभाजनैः दृतिभिर्भस्त्राभिः प्लवैरुडुपैः गण्डिकाभिः प्लवनकाष्ठैरिति माधवः वेणिकाभिः रज्जुभिश्च, उदकानि तारयेत्।

तीर्थाभिग्रह इति। तीर्थस्यावतरणस्थानस्य अभिग्रहे परप्रतिरोधे

A Madhyama and a neural power; or to clear a hazarduous path; to improve finances, army, forces of friends, enemies and forest tribes, labourers and seasons, or expects a deterioration of the fortifications and stores of the enemies, distress of hired force expects fatigue of the forces of the ally which is impending, intriguers are against a quick march and the enemy is likely to come to terms. Otherwise a quick march should be made.

Rivers may be crossed by means of elephants, planks spread over the pillars erected, bridges, boats, timber and bundles of bamboos as well as means of dry sour gourds, big baskets covered by skins, rafts, floating timber and ropes.

When the enemy causes obstructions to the ghats were crossing is made, a different location may be chosen and crossing be made using elephants, or horses or at night and the enemy may be caught in an ambuscade.

अनुदके चक्रिचतुष्पदं चाध्वप्रमाणेन शक्त्योदकं बाहयेत्।

दीर्घकान्तारमनुदकं यवसेन्धनोदकहीनं वा कृच्छ्राध्वानमभियोगप्रस्कन्नं क्षुत्पिपासाध्वक्लान्तं पङ्कतोयगभीराणां वा नदीदरीशैलानामुद्यानापयाने व्यासक्तम् एकायनमार्गे शैलविषमे सङ्कटे वा बहुलीभूतं निवेशे प्रस्थिते विसन्नाहं भोजनव्यासक्तम् आयतगतपरिश्रान्तमवसुप्तं व्याधिमरकदुर्भिक्षपीडितं व्याधितपत्त्यश्वद्विपमभूमिष्ठं वा बलव्यसनेषु वा स्वसैन्यं रक्षेत्। परसैन्यं चाभिहन्यात्।

शङ्क्यमाने, हस्त्यश्वैः साधनैः, अन्यतः अतीर्थे, रात्रौ अन्याविदित इत्यर्थः, उत्तार्य, सत्रं धान्वनसङ्कटादिकं कूटयुद्धविकल्पप्रकरणे वक्ष्यमाणं, गृह्णीयात्।

अनुदकाध्वकरणीयमाह–अनुदक इति। तस्मिन्, चक्रिचतुष्पदं चक्रीणि शकटानि चतुष्पदान् बलीवर्दादींश्च, अध्वप्रमाणेन निरुदकमार्गप्रमाणपर्याप्तप्रमाणेन युक्तं, शक्त्या वोढृशक्त्यानुगुण्येन, उदकं वाहयेत्। इत्थं स्कन्धावारप्रयाणं व्युत्पादितम्। अथ

बलव्यसनावस्कन्दकालरक्षणमिति सूत्रम्। अमानितविमानितादीनि बलव्यसनानि अवस्कन्दकाला दीर्घकान्तारगमनादिकाला 'दीर्घकान्तारमनुदकमि'त्यादिना वक्ष्यमाणाः तेभ्यः स्वबलरक्षणमुच्यत इति सूत्रार्थः।

दीर्घकान्तारमित्यादि। दीर्घं कान्तारं दुर्गमो गन्तव्यमार्गो यस्य तत् तथाभूतं, स्वसैन्यं रक्षेत्। अनुदकम् अलभ्यमार्गजलं स्वसैन्यं रक्षेत्। एवमुत्तराण्यपि विशेषणानि प्रत्येकं योज्यानि। **यवसेन्धनोदकहीनं वा**

तृणकाष्ठजलरहितं वा, उदकस्य पुनर्ग्रहणं प्राधान्यद्योतनार्थम्। कृच्छ्राध्वानं कष्टलङ्घ्यमार्गमध्यगतम्। कृच्छ्राध्वगतमिति कचित् पाठः। अभियोगप्रस्कन्नं चिराभियोगावसन्नं, क्षुत्पिपासाध्वक्लान्तम् अशनायोदन्यामार्गगमनैः परिश्रान्तम्, पङ्कतोयगभीराणां वा नदीदरीशैलानाम् अगाधपङ्कानामगाधतोयानां च नदीनां कन्दरपर्वतयोश्च, उद्यानापयाने आरोहणेऽवरोहणे च, व्यासक्तं व्यापृतम्। एकायनमार्गे एकमात्रगन्तव्ये मार्गे, शैलविषमे सङ्कटे वा पर्वतदन्तुरे दुर्गप्रदेशे वा, बहुलीभूतं समूहितम्। निवेशे अवस्थाने, प्रस्थिते यात्रायां, विसन्नाहं शस्त्रावरणादिरहितम्। भोजनव्यासक्तं भोजनव्यापृतम्, आयतगतपरिश्रान्तं दीर्घाध्वगमन-परिखिन्नम्। अवसुप्तं प्राप्तनिद्रम्। व्याधिमरकदुर्भिक्षपीडितं रोगेण सङ्घातमृत्युना सुभिक्षविरहेण वा पीडितम्।

While crossing a long desert without water, arrangements may be made to carry water on carts drawn by cattle according to the needs of the distance to be traversed.

The king should protect his army when it has to traverse a long forest region without water, without grass, fire-wood and drinking water, through a difficult road, harassed by enemy's attacks, suffering from hunger and thirst after a journey, ascending and descending mountainous paths, country full of mise, water pools, rivers and caves, through a crowded and narrow road and when the army is halting, starting or eating, when it is tired from a long march, feeling sleepy, suffering disease, pestilence and famine, when a large section of the infantry, cavalry and elephants is diseased, when it is not sufficiently strong, and under troubles. He should destroy the army of the enemy under such situations.

एकायनमार्गप्रयातस्य सेनानिश्चारग्रासाहारशय्याप्रस्ताराग्निनिधानध्वजायुधसङ्ख्यानेन परबलज्ञानम्। तदात्मनो गूहयेत्।।

पार्वतं वनदुर्गं वा सापसारप्रतिग्रहम्।
स्वभूमौ पृष्ठतः कृत्वा युध्येत निविशेत च।।

।। इति कौटलीयार्थशास्त्रे साङ्ग्रामिके दशमाधिकरणे द्वितीयोऽध्यायः
स्कन्धावारप्रयाणं, बलव्यसनावस्कन्दकालरक्षणं च
आदितस्त्रिंशच्छततमः ।।

व्याधितपत्त्यश्वद्विपं रुग्णपद्गहयगजम्। अभूमिष्ठं वा स्वयुद्धाननुरूपभूमिस्थितं वा। बलव्यसनेषु वा तत्र स्थितं वा, स्वसैन्यं रक्षेत्। परसैन्यं च उक्तविशेषयुक्तमित्यार्थम्, अभिहन्यात्।

परेण सह विग्रहस्य सन्धेर्वानुष्ठाने तद्बलेयत्ताज्ञानस्यापेक्षितत्वात् तदुपायमाह–एकायनमार्गप्रयातस्येति। एकैकमात्रगम्येन मार्गेण प्रस्थितस्य शत्रोः, सेनानिश्चारग्रासाहारादिसंख्यानेन सेनानिश्चारसंख्यानेन एकायनमार्गेणैकैकशो निश्चरत्सैनिकव्यक्तिपरिगणनेन ग्रासो गजादिभोज्यं तत्संख्यानेन आहारो योद्धृपुरुषभोज्यं तत्संख्यानेन शय्याप्रस्तारः शयनीयास्तरणं तत्संख्यानेन अग्निनिधानं चुल्ली तत्संख्यानेन ध्वजसंख्यानेन आयुधसंख्यानेन च, परबलज्ञानं शत्रुसैन्येयत्तानिश्चयः, कार्य इति शेषः। तदात्मन इति। आत्मीये सेनानिश्चारादिकमायुधान्तं स्वबलेयत्ताज्ञापकजातं, गूहयेत् संवृणुयात्।।

पार्वतमिति। 'प्रस्तरं गुहां वा पार्वतम्' इति दुर्गविधानोक्तलक्षणं पर्वतकृतं दुर्गं, वनदुर्गं वा 'खञ्जनोदकं स्तम्बगहनं वा वनदुर्गम्' इत्युक्तलक्षणं वा, सापसारप्रतिग्रहं पराजयेष्वपसरणस्थानमपसार: अभ्यापतत्परबल-प्रतिग्रहणस्थाने प्रतिग्रह: ताभ्यां सहितं, पृष्ठत: कृत्वा सज्जीकृत्येत्यर्थ:, स्वभूमौ आत्मानुगुणायां भूमौ, युध्येत निविशेत च।।

इति कौटलीयार्थशास्त्रव्याख्यायां सांग्रामिके दशमेऽधिकरणे द्वितीयोऽध्याय:
स्कन्धावारप्रयाणं बलव्यसनावस्कन्दकालरक्षणं च,
आदितस्त्रिंशदुत्तरशततम:।।

When the army is passing through a path traversable only by a single man, the commander should ascertain its strength by estimating the quantity of the foodstuffs, grass, bedding and other requisites, fire pots, flags and weapons. He should conceal such items of his own army.

Providing a mountainous or river fortress with all its resources at his back in his own country, he should fight or put up his camp.

Thus the one hundred and thirtieth chapter of the Arthaśāstra of Kauṭalya cames to an end. Here ends the second chapter of the tenth Adhikaraṇa dealing with the section of march of the camp and protection of the army in troubles.

Chapter 131

150-152. प्रक० कूटयुद्धविकल्पाः स्वसैन्योत्साहनं, स्वबलान्यबलव्यायोगश्च।

Sections 150 : Treacherous Fights
151 : Encouragement of One's own Army
152 : Fight Between One's own Army and that of the Enemy

बलविशिष्टः कृतोपजापः प्रतिविहितर्तुः स्वभूम्यां प्रकाशयुद्धमुपेयात्; विपर्यये कूटयुद्धम्।

बलव्यसनावस्कन्दकालेषु परमभिहन्यात्। अभूमिष्ठं वा स्वभूमिष्ठः। प्रकृतिप्रग्रहो वा स्वभूमिष्ठं दूष्यामित्राटवीबलैर्वा भङ्गं दत्त्वा विभूमिप्राप्तं हन्यात्। संहतानीकं हस्तिभिर्भेदयेत्।

पूर्वं भङ्गप्रदानेनानुप्रलीनं भिन्नमभिन्नं प्रतिनिवृत्य हन्यात्।

कूटयुद्धविकल्पा इति सूत्रम्। कपटेन पराभिहननं कूटयुद्धं तस्य भेदा अभिधीयन्त इति सूत्रार्थः।

कूटयूद्धस्य कदा प्रसङ्ग इत्याह-बलविशिष्ट इति। बलेन विशिष्टः शौर्यतः परिमाणेन च परबलादभ्यधिकेन स्वीयबलेन परापेक्षया प्रकृष्टः, कृतोपजापः, प्रतिविहितर्तुः सम्पादितयुद्धयोग्यकालः, स्वभूम्यां स्वयोग्ये देशे, प्रकाशयुद्धम्, उपेयात् अङ्गीकुर्यात्। विपर्यये बलविशिष्टत्वादिविरहे, कूटयुद्धम्, उपेयात्।

पराभिहननकालविशेषानाह-बलव्यसनावस्कन्दकालेष्विति। बलव्यसनेषु अमानितविमानितत्वादिषु, अवस्कन्दकालेषु च दीर्घकान्तारानुदकत्वादिषु, परम् अभिहन्यात्। अभूमिष्ठं वा स्वीयबलानुगुणभूमिस्थितं वा परं, स्वभूमिष्ठः स्वबलानुगुणभूमिस्थितः, अभिहन्यात्। प्रकृतिप्रग्रहो वेति। प्रकृतिं परकीयां प्रगृह्णाति उपजापेन स्वायत्तीकरोतीति तथाभूतो वा भवन्, स्वभूमिष्ठं परम् अभिहन्यात्। दूष्यामित्राटवीबलैर्वेति। स्वीयानि यानि दूष्यबलानि अमित्रबलानि आटविकबलानि च तैर्विजिगीषोर्युद्धसहायभूतैर्निमित्तैः, भङ्गं

दत्त्वा तेषु पराजयमाधायेत्यर्थः, विभूमिप्राप्तं रत्नजयविश्वासात् स्वाननुगुणभूमिगतं परं, हन्यात्। संहतानीकमिति। स्वभूमौ संहत्य स्थितं परबलं, हस्तिभिः, भेदयेत् भेदयित्वाभिहन्यात्।

पूर्वमिति। प्रथमं, भङ्गप्रदानेन परपराजयेन हेतुना, अनुप्रलीनं, भिन्नं सङ्घाद् विश्लिष्य तत इतः स्थितं परानीकमित्यर्थः, अभिन्नं संहतं विजिगीष्वनीकं कर्तृ, प्रतिनिवृत्य प्रत्यावृत्य, हन्यात्। इह 'पूर्वभङ्गे'ति समस्तमपि पठ्यते। पुरस्तादित्यादि। प्रचलम् अभिघातसिद्ध्या निवृत्तम्। विमुखं

He who has a strong army, succeeded in intrigues and applied remedies against dangers may undertake an open fight. Otherwise he shall make a treacherous fight.

He should strike at the enemy when the latter's army is under troubles or is being attacked. Having secured a favourable positon he may take on an enemy in an unfavourable position. He who has control over the elements of his own state may, aided by the enemy's traitors, enemies and inimical wild tribes, create a wrong impression that he is defeated and the enemy entrenched in a favourable position is likely to stir out into an unfavourable position and thereby become an easy farget for destruction. The enemy in become an easy target for destruction. The enemy in a compact body shall be broken by means of elephants.

Misled by the wrong impression of the invader's defeat the enemy may come down to an unfavourable position and in such a case one should turn back and attack the forces of enemy broken or unbroken.

पुरस्तादभिहत्य प्रचलं विमुखं वा पृष्ठतो हस्त्यश्वेनाभिहन्यात्। पृष्ठतोऽभिहत्य प्रचलं विमुखं वा पुरस्तात् सारबलेनाभिहन्यात्।

ताभ्यां पार्श्वाभिघातौ व्याख्यातौ। यतो वा दूष्यफल्गुबलं ततोऽभिहन्यात्।

पुरस्ताद्विषमायां पृष्ठतोऽभिहन्यात्। पृष्ठतो विषमायां पुरस्ताद भिहन्यात्। पार्श्वतो विषमायाम् इतरतोऽभिहन्यात्।

दूष्यामित्राटवीबलैर्वा पूर्वं योधयित्वा श्रान्तमश्रान्तः परमभिहन्यात्। दूष्यवलेन वा स्वयं भङ्गं दत्त्वा 'जितम्' इति विश्वस्तमविश्वस्तः सत्रापाश्रयोऽभिहन्यात्। सार्थव्रजस्कन्धा-वारसंवाहविलोपप्रमत्तमप्रमत्तोऽभिहन्यात्। फल्गुबलावच्छन्नः सारबलो वा परवीरामनुप्रविश्य हन्यात्। गोग्रहणेन श्वापदवधेन वा परवीरानाकृष्य सत्रच्छन्नोऽभिहन्यात्।

वा भङ्गपलायितं वा। हस्त्यश्वेन हस्तिभिरश्वैश्च। पृष्ठत इति। पृष्ठानुसारेण, अभिहत्य, प्रचलं निवर्तमानं विमुखं वा पुरस्तात्, सारबलेन शौर्यवता सैन्येन, अभिहन्यात्।

पुरस्तात्पृष्ठतोभिघातवत् पार्श्वतोभिघातावपि द्रष्टव्यावित्याह–ताभ्यामित्यादि। एकस्मिन् पार्श्वेऽभिहत्य प्रचलमपरस्मिन् पार्श्वेऽभिहन्यादित्यर्थः। यत इति। यत्र, दूष्यफल्गुबलं शत्रुदूष्याणां निस्सारं बलं, ततः तत्र अभिहन्यात्।

भूम्यपेक्षयाभिहननमाह–पुरस्ताद्विषमायामित्यादि। इतरतः अविषमेऽन्यस्मिन् पार्श्वे। अत्राविषमासु भूमिष्वभिहननविधिरभिघातोपद्रवारब्धपलायनानां विषमासु पातनं यथा स्यादित्येवमर्थम्।

दूष्यामित्राटवीबलैर्वेति। तैर्वा स्वकीयैः, पूर्वं योधयित्वा, श्रान्तं तद्वशात् खिन्नं, परम्, अश्रान्तः अभिहन्यात्। दूष्यबलेन वेति। अभक्तियोधित्वात् सुकरभङ्गेन स्वीयेन दूष्यसैन्येन स्वयं प्रथमोपस्थापितेन निमित्तेन, भङ्गं दत्त्वा तत्पराजयमुत्पाद्य, जितमिति विश्वस्तं 'जयो मे लब्ध' इत्युपजातविश्वासम्, अविश्वस्तः, सत्रापाश्रयः सत्रम् अनुपदं वक्ष्यमाणमाश्रितः सन्, अभिहन्यात्। सार्थेत्यादि। सार्थव्रजस्कन्धावाराणां वणिक्सङ्घगोकुलसेनानिवेशानां संवाहे सम्यग्वहने रक्षणे विलोपे लुण्टने च प्रमत्तम्, अप्रमत्तः अभिहन्याद् वा। अन्तश्शूरं स्वबलं बहिरशूरपुरुषच्छन्नं कृत्वा तेन शत्रुवीरान्

Having attacked the front of the enemy, he may strike again when the enemy is on retreat by means of his elephants and horses. When a frontal attack is impossible he should strike from rear and when rear attack is unfavourable he may try a frontal attack with efficient soldiers.

This also applies with regard to attack from sides. Where the enemy's army is weak attack should be directed toward that side.

When it is difficult from front, a rear attack is to be made. When the rear attack is infavourable, a frontal attack should be made. When attack from sides is not possible other means may be resorted to.

Having caused the enemy to engage in a fight with his own army consisting of traitors, enemies and wild tribes and thus making it tired, the invader should strike with his fresh forces. Or having created an impression that he is defeated the invader should launch his attack on the over-confident enemy. Or a vigilant invader should attack the careless enemy when the latter is deluded with the thought that the invader's merchants, camp and carriers have been destroyed. Or having made his strong army to look like a weak one, he may strike at the enemy's brave men while they launch an attack. Or having captured the cattle of the enemy or having destroyed the enemy's fierce animals, he may induce the have soldiers of the enemy to come forward and may slay them.

रात्राववस्कन्देन जागरयित्वानिद्राक्लान्तानवसुप्तान् वा दिवा हन्यात्। सपादचर्मकोशैर्वा हस्तिभिः सौप्तिकं दद्यात्। अहस्सन्नाहपरिश्रान्तानपराह्णेऽभिहन्यात्। शुष्कचर्मवृत्तशर्कराकोश-कैर्गोमहिषोष्ट्रयूथैर्वा त्रस्नुभिरकृतहस्त्यश्वं भिन्नमभिन्नः प्रतिनिवृत्तं हन्यात्। प्रतिसूर्यवातं वा सर्वमभिहन्यात्।

धान्वनवनसङ्कटपङ्कशैलनिम्नविषमनावो गावः शकटव्यूहो नीहारो रात्रिरिति सत्राणि।

अनुप्रविश्य हन्याद् वेत्याह–फल्गुबलावच्छन्न इत्यादि। गोग्रहणेनेति परविषये गवां बलादपहरणेन, श्वापदवधेन वा व्याघ्रवराहादिवधेन वा, परवीरान् तत्प्रतिक्रियोद्यतान्, आकृष्य, सत्रच्छन्नः वनादिच्छन्नः, अभिहन्यात्।

रात्राविति। तदा, अवस्कन्देन सौप्तिकापहारेण तत इत उत्पादितेन जागरयित्वा तद्भयक्षीणनिद्रान् कृत्वा, अनिद्राक्लान्तान् निद्राविरहश्रान्तान् अत एव अवसुप्तान्, दिवा अह्नि, हन्यात्। सपादचर्मकोशैरिति। पादेषु रक्षार्थचर्मकोशसहितैः, हस्तिभिः, सौप्तिकं दद्यात् सुप्तवधं कुर्यात्। अहस्सन्नाहपरिश्रान्तानिति। दिवा आप्राह्णमध्याह्नयुद्धव्यापारपरिखिन्नाम्, अपराह्णे, अभिहन्यात्। शुष्कचर्मवृत्तशर्कराकोशकैरिति। शुष्कचर्मनिर्मिताः वृत्तशर्करा कोशाः वर्तुलाश्मप्रायमृद्विशेषखण्डगर्भाः कोशाः येषां तैस्तथाभूतैः, गोमहिषोष्ट्रयूथैः, त्रस्नुभिः कोशध्वनिश्रवणभीरुभिः, अकृतहस्त्यश्वम् अनवस्थापितहस्त्यश्वम्, भिन्नं तत इतो विक्षिप्तं, प्रतिनिवृत्तं युद्धव्यावृत्तं परबलम्, अभिन्नः सन्, हन्याद् वा। प्रतिसूर्यवातं सूर्यप्रतिमुखं चण्डवातप्रतिमुखं च, सर्वं सर्वविधं बलम, अभिहन्यात्।

'सत्रं गृह्णीयादि'ति 'सत्रापाश्रयोऽभिहन्याद्' इति च प्रागुक्तम्। कानि तानि सत्राणीत्यपेक्षायामाह– धान्वनेत्यादि। धान्वनं 'निरुदकस्तम्बमिरिणं वा धान्वनम्' इति लक्षितं मरुदुर्गे, वनं 'स्वञ्जनोदकं स्तम्बगहनं वा वनदुर्गम्' इति लक्षितं वनदुर्गे, सङ्कटः गुल्मकण्टकलताकण्टकदुष्प्रवेशः प्रदेशः, पङ्कः कर्दमः, शैलः पर्वतः, निम्नं गभीरप्रदेशः, विषमं निम्नोन्नतदेशः, नौः तरीः, इत्येषां द्वन्द्वः। माधवस्तु 'विषममि'ति पठित्वा द्वन्द्वैकवद्भावमाह। नाव इति च न पठति। गावः गोयूथानि, शकटव्यूहः भोगव्यूहभेदो वक्ष्यमाणः, नीहारः अवश्यायः, रात्रिः तमस्या, इति सत्राणि छन्नसञ्चारसाधनानि।

Having reduced the army forces sleepless by harassing them at night, the conqueror may attack the weary soldiers during the day time. Or with his army of elephants enshrouded with cotton and leather dress, he may wage a night-battle with the enemy. Or he may attack the army of the enemy during the afternoon when they are tired by making preparations in the forenooon. Or he may attack a scattered army returing from the battle-field having been attacked by leather bags containing balls of stones shaped as clubs and made to run helter-skelter by cows and buffaloes as well as attack the whole of the army forces when they are facing the sun and the wind.

The places for ambushment of an enemy are a desert, a dangerous spot, marshy places, mountains, valleys, uneven boats, flocks of cows, car-like array of army, mist and night.

पूर्वे च प्रहरणकालाः कूटयुद्धहेतवः।

सङ्ग्रामस्तु निर्दिष्टदेशकालो धर्मिष्ठः।

संहत्य दण्डं ब्रूयात्–'तुल्यवेतनोऽस्मि भवद्भिः सह भोग्यमिदं राज्यं; मयाभिहितः परोऽभिहन्तव्यः' इति। 'वेदेष्वप्यनुश्रूयते समाप्तदक्षिणानां यज्ञानामवभृथेषु–"सा ते गतिर्या शूराणाम्" इतिः 'अपीह श्लोकौ भवतः–

"यान् यज्ञसङ्घैस्तपसा च विप्राः स्वर्गैषिणः पात्रचयैश्च यान्ति।
क्षणेन तानप्यतियान्ति शूराः प्राणान् सुयुद्धेषु परित्यजन्तः।।"

पूर्वे चेति। पूर्वोक्ताः प्रहरणकालाः, चकारात् सत्राणि च, कूटयुद्धहेतवः। इत्थं कूटयुद्धविकल्पा निरूपिताः। अथ

स्वसैन्योत्साहनमिति सूत्रम्। स्वसैन्यस्य प्रकाशयुद्धे समुद्योजनमभिधीयत इति सूत्रार्थः।

सङ्ग्राममस्त्विति। प्रकाशयुद्धं सङ्ग्रामः स तु, निर्दिष्टदेशकालः अमुकदेशे अमुककाले स्वपरसैन्यैः सन्निधाय योद्धव्यमिति सम्भाषितदेशकालः, धर्मिष्ठः धर्मादनपेतः। एतेन कूटयुद्धस्य पापीयस्त्वं प्रकाशयुद्धस्य तेनागतार्थत्वं चोक्तम्।

प्रोत्साहनप्रकारमाह–संहत्येति। सङ्घीभूय स्थितमिति शेषः। दण्डं स्वसैन्यम्, ब्रूयाद्, अर्थाद् राजा। कथम्, तुल्यवेतनोऽस्मि वेतनं लाभः भवल्लाभसमानलाभोऽस्मि। तुल्यलाभतामेव विशदयति–भवद्भिः सह भोग्यमित्यादि। नाहमेकाकी युद्धविजितं राज्यं मोक्ष्ये किन्तु भवत्सहित एव भोक्ष्य इत्यर्थः। तदर्थं भवद्भिरेतावत् कर्तव्यमित्याह–मयाभिहित इत्यादि। मया निर्दिष्टः, परः शत्रुः, अभिहन्तव्यः, अर्थाद् भवद्भिः। इति अनेन प्रकारेण ब्रूयादिति सम्बन्धः। इत्थं स्वयंवचनेन प्रोत्साहनमुक्त्वा मन्त्रिपुरोहितमुखेनापि प्रोत्साहनमाह–वेदेष्वपीत्यादि। सम्यगाप्तऋत्विग्दक्षिणानां यज्ञानामनुष्ठानसमाप्तिषु विषये फलमनुश्रूयत इत्यर्थः। अनुश्रूयमाणं मन्त्रवाक्यमाह–सा ते गतिर्या शूराणामितीति। युद्धत्यक्तजीवितानां शूराणां या गतिः सा सुसमापितयज्ञस्य तव भूयादिति तस्य वाक्यस्यार्थः। एतेन युद्धप्राणत्यागस्य भूरियज्ञानुष्ठानसमानफलत्वमुक्तम्। उक्तवेदार्थोपबृंहणपरौ श्लोकावपि प्रमाणभूतौ स्त इत्याह–अपीह श्लोकौ भवत इत्यादि।

यानित्यादि। यान् वाञ्छितार्थान्। यज्ञसङ्घैः क्रतुशतैरनुष्ठितैरित्यर्थः।

The above-mentioned locations and times are ideal for treacherous fights.

In a righteous battle the place and time are announced at first.

After arraying the soldiers one should address them :—"I am a paid servant like yourselves; this country is to be enjoyed together with you; you have to fight the enemy specified by me". Further "it is declared in the Vedas that after the remuneration is paid at the end of sacrifices and after performing the final ablution—"that is the final goal to be achieved by brave men." About this there are two verses :

"Those brave soldiers who lose their life in a righteous battle are destined to reach immediately the heaven which is attained by Brahmans by performing series of sacrifices by penance and the use of sacrificial instruments."

नवं शरावं सलिलस्य पूर्णं सुसंस्कृतं दर्भकृतोत्तरीयम्।
तत् तस्य मा भून्नरकं च गच्छेद् यो भर्तृपिण्डस्य कृते न युध्येत्।।"

इति मन्त्रिपुरोहिताभ्यामुत्साहयेद् योधान्।

व्यूहसम्पदा कार्तान्तिकादिश्चास्य वर्गः सर्वज्ञदैवसंयोगख्यापनाभ्यां स्वपक्षमुद्धर्षयेत्। परपक्षं चोद्वेजयेत्। 'श्वो युद्धम्' इति कृतोपवासः शस्त्रवाहनं चानुशयीत। अथर्वभिश्च जुहुयात्। विजययुक्ताः स्वर्गीयाश्चाशिषो वाचयेत्। ब्राह्मणेभ्यश्चात्मानमतिसृजेत्।

शौर्यशिल्पाभिजनानुरागयुक्तमर्थमानाभ्यामविसंवादितमनीकगर्भ–

तपसा कायसंक्लेशनलक्षणेन। पात्रचयैश्च पात्रशब्देन योग्यप्रतिग्रहीतृनिर्दर्त्यस्य दानस्य लक्षणात् तथाविधदानशतैरित्यर्थः। एवञ्च सुयुद्धप्राणत्यागिनां शूराणां यज्ञतपोदानशतलभ्यफलातिशायिफलभाक्त्वमनेन श्लोकेनोक्तमिति द्रष्टव्यम्।।

नवमित्यादि। शरावं पात्रविशेषः। तद्धि उदकपूर्णं मन्त्राभिमन्त्रणसंस्कारयुक्तं दर्भसंवीतं युद्धजयाभ्युदय-कालिकं प्राभृतं भर्तृपिण्डार्थमयुध्यमानस्य लभ्यं न भवति, नरके च स पततीति श्लोकार्थः।।

इतीति। वेदेष्वपीत्याद्युक्तेन प्रकारेण, वादयित्वेति शेषः। मन्त्रिपुरोहिताभ्याम्, उत्साहयेद् योधान्।

व्यूहसम्पदेति। अस्य राज्ञः, कार्तान्तिकादिः दैवज्ञनिमित्तज्ञादिः, वर्गश्च, व्यूहसम्पदा व्यूहानां राजकर्तृकाणां सैन्यविन्यासवैचित्र्याणां सम्पत् जयाव्यभिचारित्वगुणयोगः तया, सर्वज्ञदैवसंयोगख्यापनाभ्यां सर्वज्ञख्यापनेन त्रैकालिकफलसिद्धिज्ञत्वख्यापनेन दैवसंयोगख्यापनेन दैवसाक्षात्कारख्यापनेन च, स्वपक्षम्, उद्धर्षयेद् उद्भूतहर्षं कुर्यात्। परपक्षं च, उद्वेजयेद् भग्नोत्साहं कुर्यात्। श्वो युद्धमित्यादि। श्वो युद्धमिति निश्चये सति अद्योपवासं कुर्वन् स्वीयशस्त्रवाहनयोरन्तिके रात्रौ शयीतेत्यर्थः। तयोरर्चनं त्वर्थाक्षिप्तं द्रष्टव्यम्। अथर्वभिश्चेति। शत्रुविध्वंसनैर्मन्त्रैश्च, जुहुयात्। विजययुक्ता इत्यादि। शत्र्वभिभवे श्रीप्राप्तिरूपविजयानुकूलाः, स्वर्गीयाश्च मरणे स्वर्गप्राप्त्यनुकूलाश्च, आशिषः, वाचयेत्, ब्राह्मणैरिति शेषः। ब्राह्मणेभ्यश्चेति। तेभ्यः, आत्मानम्, अतिसृजेत् स्वरक्षणार्थमर्पयेत्।

शौर्यशिल्पेत्यादि। शौर्यशिल्पादिगुणयुक्तं भूमिहिरण्यादिदानच्छत्रा–

"The pitcher well-filled with water, consecrated by darbha grass, let that not be for him; to hell he goes, who won't fight for his lord."

Thus his minister and priest should encourage the army of soldiers.

Astrologers and other followers of the king should instil confidence in the army by pointing out their impregnable nature and divine favour. They should similarly discourage the enemy forces. The day before the battle the king should observe a fast and lie down in his chariot with weapons. He should also perform sacrifices as ordained by the Atharvaveda. Proclamation of success in war and heavenly abode for those who died shall be prophesied. He should also submit himself to Brahmins. The core section of the army should be formed so as to consist of men noted for their bravery, skill, nobility and loyalty and are not displeased with rewards and honours bestowed on them.

कुर्वीत। पितृपुत्रभ्रातृकाणामायुधीयानामध्वजं मुण्डानीकं राजस्थानम्। हस्ती रथो वा राजवाहनमश्वानुबन्धे। यत्प्रायः सैन्यो, यत्र वा विनीतः स्यात्, तदधिरोहयेत्। राजव्यञ्जनो व्यूहाधिष्ठानमायोज्यः।

सूतमागधाः शूराणां स्वर्गमस्वर्गं भीरूणां जातिसङ्घकुलकर्मवृत्तस्तवं च योधानां वर्णयेयुः। पुरोहितपुरुषाः कृत्याभिचारं ब्रूयुः। सत्रिकवर्धकिमौहूर्तिकाः स्वकर्मसिद्धिमसिद्धिं परेषाम्।

भरणादिबहुमानदानाभ्यां नित्यसंवादितं सैन्यं महासैन्यमध्ये स्थापयेत् स्वरक्षार्थमित्यर्थः। पितृपुत्रभ्रातृकाणामिति। पित्रादीनां राज्ञोऽन्तरङ्गसम्बन्धिनाम्, आयुधीयानां राजरक्षार्थधृतायुधानाम्, अध्वजं राजसम्बन्धित्वज्ञापकवेषरहितं, मुण्डानीकं मुण्डं शिरः तदिव प्रधानभूतं सैन्यं, राजस्थानं राजसमानस्थानं कुर्वीत, राजा यत्र तिष्ठति तत्रैव स्थापयेदित्यर्थः। हस्तीति। सः, रथो वा, राजवाहनं राज्ञो वाहनम्, अश्वानुबन्धे अश्वानां रक्षार्थानां साहचर्ये सति, भवेदिति शेषः। पक्षान्तरमाह–यत्प्रायः सैन्य इति। गजाश्वादिवाहनेषु मध्ये यद्वाहनबहुलः सैन्यः, तद् वा वाहनम्, अधिरोहयेत् अधिरोहेत्। यत्र वाहने, विनीतः आरोहणशिक्षितः, स्याद् राजा, तद् वा वाहनम् अधिरोहेत्। राजव्यञ्जन इति। राजवेषधारी कश्चिद्, व्यूहाधिष्ठानं व्यूहस्य अधिष्ठानं शिरः स्थानं सर्वतल्लक्षणोपेतम्, आयोज्यः आयुञ्जानः प्रयोजयितव्यः अधिष्ठापयितव्य इति यावत्। राजा तु शत्रुभिर्लक्षितो मा भूदित्येतदर्थं नैवायोज्य इत्यभिप्रायः।

सूतमागधा इति। सूताः ऐतिहासिकाः मागधाः स्तुतिपाठकाश्च, शूराणां स्वर्गं, भीरूणाम् अस्वर्गं स्वर्गाभावं, योधानां जातिसङ्घकुलकर्मवृत्तस्तवं च जातिर्ब्राह्मणत्वादिः सङ्घः तत्तद्देशीयसङ्घरूपता कुलम् अन्वयाय: कर्म जीविका वृत्तं शीलम् इत्येषां स्तवं च, वर्णयेयुः राज्ञः कथयेयुः। पुरोहितपुरुषा इति। ते, कृत्याभिचारं शत्रुहिंसिनो देवता कृत्या तद्द्वारेण अभिचारः शत्रुहिंसार्थोऽथर्वमन्त्रप्रयोगः कृत्याभिचारः तं, ब्रूयुः पुरोहितारब्धं कथयेयुः। सत्रिकेत्यादि। सत्रिकः सत्री वर्धकिस्तक्षा मौहूर्तिकः युद्धारम्भमुहूर्तनिश्चायकः एते, स्वकर्मसिद्धिं परेषाम् असिद्धिं च ब्रूयुः। सत्रिकस्थाने यन्त्रिकेति क्वचित् पाठः। तदा जामदग्न्यादि-यन्त्रशिल्पी यन्त्रिक इति व्याख्येयम्।

The position for the king is that portion of the army which is assigned to his father, sons, brothers and other men skilled in using weapons and having no flags and head-dress. He should mount an elephant or a chariot, if the army mostly consists of horses; or he may mount that kind of animal of which the army is mostly composed or which is skillfully trained. One who is disguised like the king should attend to the work of arraying the army.

Sooth-sayers and court-bards should describe heaven as the goal for the brave soldiers and hell for the timid, and also extol the caste, society, family, deeds and character of his men. Disciples of the priest should proclaim the auspicious aspects of the witch-craft performed. Spies, carpenters and astrologers should also proclaim the success of their own operation and failure of those of the enemy.

सेनापतिरर्थमानाभ्यामभिसंस्कृतमनीकमाभाषेत – 'शतसाहस्रो राजवधः। पञ्चाशत्साहस्रः सेनापतिकुमारवधः। दशसाहस्रः प्रवीरमुख्यवधः। पञ्चसाहस्रो हस्तिरथवधः। साहस्रोऽश्ववधः। शत्यः पत्तिमुख्यवधः। शिरो विंशतिकम्। भोगद्वैगुण्यं स्वयंग्राहश्च इति। तदेषां दशवर्गाधिपतयो विद्युः।

चिकित्सकाः शस्त्रयन्त्रागदस्नेहवस्त्रहस्ताः, स्त्रियश्चान्नपानरक्षिण्यः पुरुषाणामुद्धर्ष-णीयाः पृष्ठतस्तिष्ठेयुः।

भूयो योधप्ररोचकमाह–सेनापतिरिति। सर्वसेनाध्यक्षः, अर्थमानाभ्याम्, अभिसंस्कृतम् अभिपूजितम्, अनीकम् आभाषेत। आभाषणप्रकारमाह–राजवधः शतसाहस्र इति। केनचिद् भटेन शत्रुराजवधे कृते तस्य सुवर्णलक्षलाभो भवेदित्यर्थः। परसेनापतिकुमारयोरन्यतरवधस्तदर्धलाभ इत्याह–पञ्चाशदित्यादि। प्रवीरपुरुषमुख्यस्य वधः दशसाहस्रलाभः, तदर्धलाभो हस्तिरथान्यतरवधः, साहस्रलाभोऽश्ववधः, शतलाभः पदातिमुख्यवधः इत्याह–दशसाहस्र इत्यादि। शिर इति। छित्त्वानीतं योधसामान्यस्यैकं शिरः विंशतिकं पणविंशतिलाभकम्। योद्धृसामान्यस्य युद्धकालिकं लाभसामान्यमाह–भोगद्वैगुण्यमिति। भोगस्य भक्तवेतनात्मनः क्लृप्तस्य द्वैगुण्यं, स्वयंग्राहश्च युद्धे परस्य सकाशाद् अपह्रियमाणस्य कोशादेरपहर्तृभिर्योधैः स्वत्वेन ग्रहणं च, भवेदिति शेषः। इतिशब्द आभाषणप्रकारसमाप्तौ। तदिति। यथोक्तं राजवधादिविशेषजातं, दशवर्गाधिपतयः पदिकसेनापतिनायका वक्ष्यमाणः, विद्युः जानीयुः।

योद्धृणां शस्त्रव्रणचिकित्साद्यर्थमाह–चिकित्सा इति। शल्यशास्त्रवेदिनः, शस्त्रयन्त्रागदस्नेहवस्त्रहस्ताः शस्त्राणि मण्डलाग्रादीनि यन्त्राणि कङ्कमुखादीनि अगदानि औषधानि स्नेहा घृतादीनि वस्त्राणि व्रणबन्धपट्टार्थानि एतानि हस्ते येषां ते तथाभूताः सन्तः, स्त्रियश्च, अन्नपानरक्षिण्यः योधहितस्वाद्वन्नपानदायिन्यः, पुरुषाणाम् उद्धर्षणीयाः उच्चैर्हृष्यन्त्याभिरिति तथाभूता उद्धर्षणार्था इत्यर्थः, पृष्ठतः युद्धभूमिपश्चाद्भागे, तिष्ठेयुः। इत्थं स्वसैन्यप्रोत्साहनं व्याख्यातम्। अथ

स्वबलान्यबलव्यायोग इति सूत्रम्। स्वसैन्यस्य परसैन्यापेक्षया व्यायोगः विशिष्टमायोजनं व्यवस्थानं दिक्सूर्यवाताद्यानुगुण्यं यथा स्यात् तथा व्यूहरचनमिति यावत्, तदिहाभिधीयत इति सूत्रार्थः।

Having pleased the army with money and honour the commander-in-chief should address it as follows : "A hundred thousand (paṇas) for killing the king (of the enemy); Fifty thousand for killing the commander-in-chief as well as the heir-apparent. Ten thousand for slaying the chief of the brave. Five thousand for destroying an elephant or chariot. One thousand for slaying a horse. One hundred for killing the leader of an infantry. Twenty for bringing a head. Twice the pay for what is seized. This information should be passed on to the leader of every group of ten (men).

Physicians carrying surgical instruments, machines, remedial oils and clothes and women with prepared food and beverage should stand behind uttering encouraging words to fighting soldiers.

अदक्षिणामुखं पृष्ठतस्सूर्यमनुलोमवातमनीकं स्वभूमौ व्यूहेत। परभूमिव्यूहे चाश्वांश्चारयेयुः।

यत्र स्थानं प्रजवश्चाभूमि व्यूहस्य, तत्र स्थितः प्रजवितश्चोभयथा जीयेत। विपर्यये जयति उभयथा स्थाने प्रजवे च।

समा विषमा व्यामिश्रा वा भूमिरिति, पुरस्तात् पार्श्वाभ्यां पश्चाच्च ज्ञेया। समायां दण्डमण्डलव्यूहाः, विषमायां भोगसंहतव्यूहाः। व्यामिश्रायां विषमव्यूहाः।

विशिष्टबलं भङ्क्त्वा सन्धिं याचेत। समबलेन याचितः सन्दधीत। हीनमनुहन्यात्। न त्वेद स्वभूमिप्राप्तं त्यक्तात्मानं वा।।

अदक्षिणामुखमिति। दक्षिणाभिमुख्यस्यामाङ्गलिकत्वात् तदितरदिगभिमुखं, पृष्ठतस्सूर्यम् अप्रतिसूर्यम्, अनुलोमवातम् अप्रतिवातम्, अनीकं, स्वभूमौ तद्योग्यभूमौ, व्यूहेत अवस्थापयेत्। परानीकस्य तद्योग्यभूमौ व्यूहनप्रसङ्गे तद्विघातार्थं स्वीयानश्वांस्तत्र चारयेयुरित्याह–परभूमिव्यूहे चेत्यादि।

यत्रेति। यत्र देशे, व्यूहस्य, स्थानं चिरावस्थानं, प्रजवश्च क्षिप्रक्रिया च, अभूमि अलब्धावकाशम् अशक्यमित्यर्थः, तत्र स्थितः चिरावस्थितः, प्रजवितश्च क्षिप्रक्रियश्च, उभयथा जीयेत परेण परिभूयेत। विपर्यये स्थानप्रजवयोरुभयोः सभूमित्वे, उभयथा स्थाने प्रजवे च स्थितः प्रजवितश्च प्रकारद्वयेनापीत्यर्थः, जयति परं परिभवति। तथा च स्थानप्रजवोभयानुगुणायां भूमौ व्यूहः कार्य इति फलितम्।

व्यूहानुगुण्यस्य भूमिविशेषाश्रयत्वाद् भूमिं विभजते–समेत्यादि। समविषमव्यामिश्रभेदेन त्रिविधा भूमिः पुरःपार्श्वपश्चाद्भागसम्बन्धात् प्रत्येकं त्रिविधेत्यर्थः। तत्र व्यूहव्यवस्थामाह–समायामिति। त्रिप्रकारायां समायां, दण्डमण्डलव्यूहाः दण्डव्यूहा मण्डलव्यूहाश्च, कार्या इति शेषः। विषमायां त्रिप्रकारायां, भोगसंहतव्यूहा भोगव्यूहाः संहतव्यूहाश्च, कार्याः। व्यामिश्रायां तथाभूतायां, विषमव्यूहाः कार्याः। व्यूहानां स्वरूपमधिकरणशेषे वक्ष्यते।

युद्धे शत्रुभङ्गदर्शने विजिगीषुणा कर्तव्यमाह–विशिष्टबलमिति। स्वाभ्यधिकबलं, भङ्क्त्वा भङ्गेन योजयित्वा, सन्धिं याचेत न केवलं नानुप्रहरेत् किन्तु स्वयं सन्धिमभ्यर्थयेत बलाधिकसख्यातिशयार्थमिति भावः। समबलेन भग्नेन, यायितः, सन्दधीत न तु स्वयं सन्धिं याचेतेत्यर्थः। हीनं हीन-

The army should be arrayed without facing the south and with its back turning to the sun, and not facing the wind. If the array is on a place belonging to the enemy, horses should be run.

If the army arrayed in a location of the enemy or is made to run away, it will be defeated by the enemy either as standing or running away. On the other hand it will be victorios whether standing or running.

The even, uneven and complex nature of the ground, in front, in the rear as well as on the sides should be ascertained. In even ground the arraying of army should be straight or in a circular shape; in uneven places arrays of compact nature or of detached bodies should be made. In a location of complex nature uneven array should be made.

Having smashed the enemy forces of greater strength the conqueror should seek for peace. If the armies are of equal strength, he should make peace with when requested for it. In the case of an enemy of inferior strength the invader should attempt to destroy it. But it is not the case with one who has secured a favourable position and is reckless of life.

पुनरावर्तमानस्य निराशस्य च जीविते।
अधार्यो जायते वेगस्तस्माद् भग्नं न पीडयेत्।।

।। इति कौटलीयार्थशास्त्रे सांग्रामिके दशमाधिकरणे तृतीयोऽध्यायः,
कूटयुद्धविकल्पाः स्वसैन्योत्साहनं स्वबलान्यबलव्यायोगश्च।
आदित एकत्रिंशच्छततमः ।।

बलं भग्नम्, अनुहन्यात् अनुबध्य प्रहरेत् पुनरनुन्मज्जनार्थमित्यर्थः। तत्र विशेषमाह–न त्वेवेत्यादि। हीनमपि स्वानुगुणभूमिगतं वा जीवितनिराशं वा नानुहन्यादित्यर्थः।।

जीवितनिराशतया प्रत्यावर्तमानस्य हीनबलस्यापि युद्धवेगो धारयितुमशक्यो यस्मात् तस्माद् भग्नं तं भूयः पीडनेन न प्रकोपयेदित्याह–पुनरावर्तनानस्येत्यादि।।

इति कौटलीयार्थशास्त्रव्याख्यायां सांग्रामिके दशमेऽधिकरणे तृतीयोऽध्यायः
कूटयुद्धविकल्पाः स्वसैन्योत्साहनं स्वबलान्यबलव्यायोगश्च,
आदित एकत्रिंशदुत्तरशततमः।।

When a broken army which has become reckless resumes attacks, its fury will be irresistible; hence he should not harass a broken army.

Thus the one hundred and thirty first chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the third chapter of the tenth Adhikaraṇa dealing with the sections of Treacherous fights, Encouragement of one's own army and fight between one's own army and that of the enemy."

Chapter 132

153,154. प्रक० युद्धभूमयः, पत्त्यश्वरथहस्तिकर्माणि च।

Sections 153 : Battle Fields
154 : Actions of Infantry, Cavalry, Chariots and Elephants

स्वभूमिः पत्त्यश्वरथद्विपानामिष्टा युद्धे निवेशे च।

धान्वनवननिम्नस्थलयोधिनां खनकाकाशदिवारात्रियोधिनां च पुरुषाणां नादेयपार्वतानूपसारसानां च हस्तिनामश्वानां च यथास्वमिष्टा युद्धभूमयः कालाश्च।

समा स्थिराभिकाशा निरुत्खातिन्यचक्रखुरानक्षग्राहिणी अवृक्षगुल्मप्रततिस्तम्भकेदारश्वभ्रवल्मीकसिकतापङ्कभङ्गुरा दरणहीना च रथभूमिः।

युद्धभूमय इति सूत्रम्। युद्धानुगुणाः समस्थिराभिकाशादिलक्षणा भूमय उच्यन्त इति सूत्रार्थः।

स्वभूमिरिति। स्वानुगुणा भूमिः, पत्त्यश्वरथद्विपानां, युद्धे, निवेश च अवस्थाने च, इष्टा अपेक्षिता।

धान्वनवननिम्नस्थलयोधिनामिति। धान्वनदुर्गयोधिनां वनदुर्गयोधिनां निम्नं जलं तद्योधिनां प्राकारबहिर्देशे वृक्षादिशून्ये देशे वा स्थित्वा युध्यमानाः खनकयोधिनः दिवैव युध्यमाना दिवायोधिनः रात्रावेव युध्यमाना रात्रियोधिनः इत्येषामष्टविधानां, पुरुषाणां पदातीनां, नादेयादीनां च नदीसम्बन्धिनां पर्वतसम्बन्धिनाम् अनूपसम्बन्धिनां सरस्सम्बन्धिनां च, हस्तिनाम्, अश्वानां च, युद्धभूमयः युद्धयोग्या भूमयः, कालाश्च तत्तद्भूमियोग्या ऋतवश्च यथास्वम् इष्टाः धान्वनयोधिनां धन्वभूमिरित्यादिक्रमेण नादेयानां नदीभूमिरित्यादिक्रमेण च यथायथमिष्यन्त इत्यर्थः।

रथभूमिमाह–समेति। अदन्तुरा, स्थिरा अशिथिलावयवा, अभिकाशा अभितः काशते भासते तृणाद्यनवच्छन्नत्वात्, निरुत्खातिनी उत्पाटनरहिता, अचक्रखुरा अप्रविशन्तः चक्रखुराः चक्राणि रथाङ्गानि खुराः गवादिशफाश्च यस्यां वा तथाभूता, अनक्षग्राहिणी अक्षश्चक्राधारस्तद्ग्राहिणी न भवति, अवृक्षगुल्मप्रतत्यादिः वृक्षादिरहिता, तत्र गुल्मः सान्द्रपर्णा प्रतानशतगामिनी लता वीरुत्संज्ञा तृणसङ्घातो वा, प्रततिर्लता, स्तम्भः स्थाणुः, केदारः धान्यवापः, श्वभ्रं गर्तः, भङ्गुरं वक्रप्रदेशः, शेषं प्रतीतम्। दरणहीना च दीर्घरेखाकारसुषिररहिता च, रथभूमिः। भङ्गुरदरणहीनेति समस्तपाठे स्तम्भ शब्दात् प्राग् विसर्गान्तं छेत्तव्यम्।

A favourable position for infantry cavalry, chariots and elephants is desirable for both battle and encampment.

Favourable battle fields and season should be secured for men who are trained to fight in desert tracts, forests, valleys, or plains, and for those who are trained to fight from ditches or elevated places, during the day or night, and for elephants bred in the countries with rivers, mountains, marshy lands, or lakes as well as for horses.

That which is even, splendidly firm, free from mounds and pits made by wheels and foot prints of beasts, not causing obstructions to the xle, devoid of trees, plants, ant-hills, sand and thorns is the ground (suitable) for chariots.

हस्त्यश्वयोर्मनुष्याणां च समे विषमे हिता युद्धे निवेशे च।

अण्वश्मवृक्षा ह्रस्वलङ्घनीयश्वभ्रा मन्ददरणदोषा चाश्वभूमिः। स्थूलस्थाण्वश्मवृक्षप्रततिवल्मीकगुल्मा पदातिभूमिः। गम्यशैलनिम्नविषमा मर्दनीयवृक्षा छेदनीयप्रततिः पङ्कभङ्गुरदरणहीना च हस्तिभूमिः।

अकण्टकिन्यबहुविषमा प्रत्यासारवतीति पदातीनामतिशयः।

द्विगुणप्रत्यासारा कर्दमोदकखञ्जनहीना निश्शर्करेति वाजिनामतिशयः।

पांसुकर्दमोदकनलशराधानवती श्वदंष्ट्राहीना महावृक्षशाखाघातवियुक्तेति हस्तिनामतिशयः।

उक्ता रथभूमिरेव हस्त्यश्वमनुष्याणां समे विषमे च देशे युद्धे निवेशे चानुगुणेत्याह–हस्त्यश्वयो-रित्यादि।

अश्वादीनां भूमिं सामान्यत उक्त्वा विशेषत आह–अण्वश्मवृक्षेति। कृशशिलावृक्षा, ह्रस्वलङ्घनीयश्वभ्रा ह्रस्वेनापि लङ्घयितुं शक्यं श्वभ्रं यस्यां सा तथाभूता, मन्ददरणदोषा स्वल्पदरणदोषा च, अश्वभूमिः। मनुष्यभूमिमाह–स्थूलस्थाण्वित्यादि। हस्तिभूमिमाह–गम्यशैलनिम्नविषमेति। गम्याः हस्तिभिः गन्तुं शक्याः शैलाः पर्वताः निम्नानि जलानि विषमाणि दन्तुरस्थलानि च यस्यां सा तथाभूता, मर्दनीयवृक्षा हस्तिमर्दनयोग्यवृक्षयुक्ता, छेदनीयप्रततिः, क्वचिद् 'भञ्जनीयप्रततिरि'ति पाठः। पङ्कभङ्गुरादिहीना च भङ्गुरदरणहीनत्वं हस्तिभूमेः पुनरुच्यते तस्यां तन्नित्ययोगार्थम्। तेनाश्वपदाति- भूम्योस्तद्योगानियमो द्रष्टव्यः।

रथहस्त्यश्वमनुष्याणां भूमेरतिशयलक्षणं गुणविशेषं प्रतिलोमक्रमेणाह–अकण्टकिनीत्यादि। अबहुविषमा बहुनिम्नोन्नतरहिता। प्रत्यासारवती प्रत्यासारः प्रतिनिवर्तनावकाशस्तद्युक्ता। इति पदातीनामतिशय इति। एवम्प्रकारभूमिलाभः पत्तीनाम् अतिशयहेतुरित्यर्थः।

द्विगुणप्रत्यासारेत्यादि। पुरःप्रसारावकाशद्विगुणप्रतिनिवर्तनावकाशा पङ्केन तत्प्रायजलेन च रहिता अश्मप्रायमृद्रहिता च भूमिरश्वानामतिशयहेतुरित्यर्थः।

पांस्वित्यादि। पांसवो रेणवः कर्दमोदकं पङ्किलजलं नलः सुषिराख्यस्तृणविशेषः शरो मुञ्जः तयोराधानानि आधीयते धार्यतेऽनेनेत्याधानमिति।

For elephants, horses and men even or uneven grounds are good either for war or for establishing a camp.

That which is full of small stones, trees and pits that can be jumped over, and mostly free from thorns is the ground for horses.

That which contains big stone, dry or green trees and ant hills, is the ground for infantry.

That which is uneven with assailable hills and valleys with trees that can be pulled down and plants that can be torn and is full of muddy soil and devoid of thorns, is the ground for elephants.

That which is devoid of thorns, not much uneven, but very expansive, is an excellent ground for the infantry.

That which is much expansive, free from mud, water and roots of trees and devoid of piercing gravel is an excellent ground for horses.

तोयाशयाश्रयवती निरुत्खातिनी केदारहीना व्यावर्तनसमर्थेति रथानामतिशयः। उक्ता सर्वेषां भूमिः।

एतया सर्वबलनिवेशा युद्धानि च व्याख्यातानि भवन्ति।

भूमिवासवनविचयो विषमतोयतीर्थवातरश्मिग्रहणं, वीवधासारयोर्धातो रक्षा वा, विशुद्धिः स्थापना च बलस्य, प्रसारवृद्धिर्बाहूत्सारः,

व्युत्पत्त्या मूलशङ्कव इति नयचन्द्रिका। तैर्युक्ता, श्वदंष्ट्राहीना श्वदंष्ट्रा गोकण्टकस्तद्धीना, महावृक्षशाखाघातवियुक्ता महतां वृक्षाणां विटपाभिघातहीना इत्येवम्प्रकारा भूमिः, हस्तिनाम्, अतिशयः।

तोयाशयाश्रयवतीति। तोयाशयैः स्नपनयोग्यजलयुक्तैर्जलाधारैः आश्रयैर्विश्रमस्थानैश्चोपेता, निरुत्खातिनी उत्पाटनरहिता, केदारहीना बीजवापहीना, व्यावर्तनसमर्था प्रतिनिवर्तनयोग्यविस्तारयुक्ता, इतीदृशी भूमिः, रथानाम् अतिशयः। भूप्रकरणमुपसंहरति–उक्तेत्यादि।

एतयेति। यथोक्तप्रकारया भूम्या, एतामाश्रित्यैवेत्यर्थः। सर्वबलनिवेशाः सर्वेषां बलानां निवेशाः निवेशनकर्माणि, युद्धानि च युद्धकर्माणि च, व्याख्यातानि कर्तव्यतया निरूपितानि भवन्ति।

युद्धभूमिमाश्रितानां बलानां कर्मनिरूपणार्थं सूत्रं–पत्त्यश्वरथहस्तिकर्माणीति। पत्त्यादिचतुष्टयस्य कर्माणि अभिधीयन्त इति सूत्रार्थः।

तत्र प्रथममश्वकर्माण्याह–भूमिवासवनविचय इति। भूम्यादीनां त्रयाणां विचयः शोधनं तदश्वैः कर्तव्यमित्यर्थः। तत्र भूमेर्गूढपरबलनिरासो भूमिविचयः, यत्र बलं स्वैरविमुक्तं वसति तत्रोपद्रवपरिहारो वासविचयः, मार्गमध्यगेषु वनेषु चोरोत्सारणं वनविचयः। विषमेत्यादि। विषमादिपञ्चकग्रहणं परानाक्रमणीयस्य निवेशयोग्यस्य प्रदेशस्य पूर्वमेव ग्रहणं विषमग्रहणं, तोयवतो जलपूर्णतटाकादियुक्तस्य प्रदेशस्य पूर्वमेव ग्रहणं तोयग्रहणं, नद्याद्युत्तरणानुकूलस्थानस्य ग्रहणं तीर्थग्रहणं, स्वानुकूलवातानुभावकदेशग्रहणं वातग्रहणं, स्वाप्रतिमुखसूर्यरश्मिपातानुगुणदेशग्रहणं रश्मिग्रहणम्। वीवधेत्यादि। स्वदेशादविच्छिन्न आजीवद्रव्यागमो

वीवधः सुहृद्बलागमनम् आसारः तयोः घातः प्रतिहतिः परस्य, रक्षा वा आत्मीययोस्तु तयोः रक्षणं च, बलस्य सैन्यस्य विशुद्धिर्गूढपरसैनिकप्रवेशदोषपरिहारः, स्थापना च परबलनिमित्तक्षोभावसरे

That which has dusts, muddy soil, water, grass and weeds and which is free from thorns and obstructions from the branches of big trees is an excellent ground for chariots. These are the suitable position.

This explains the nature of the ground which is fit for the camp or battle of all kinds of the army.

Exploration of occupied positions, camps and forests; assuming of strategic positions, water, fording places and positions with regard to the direction of wind and sun; destruction or protection of the commissariat and of troops arriving afresh; supervision and discipline of the army; lengthening the line of the army; protecting the sides of the army;

पूर्वप्रहारो, व्यावेशनं, व्यावेधनमाश्वासो, ग्रहणं, मोक्षणं, मार्गानुसारविनिमयः, कोशकुमाराभिहरणं, जघनकोट्यभिघातो, हीनानुसारणमनुयानं, समाजकर्मेत्यश्वकर्माणि।

पुरोयानप्रकृतमार्गवासतीर्थकर्म बाहूत्सारस्तोयतरणावतरणे स्थानगमनावतरणं विषमसम्बाधप्रवेशोऽग्निदानशमनमेकाङ्गविजयः भिन्नसन्धानमभिन्नभेदनं व्यसने त्राणमभिघातो विभीषिका त्रासन-

स्थैर्यापादनं च, प्रसारवृद्धिः सर्वतो वनाजीवः प्रसारस्तस्य वृद्धिरुपचयः, बाहूत्सारः परबलस्य बाहुभ्यामिवोत्सारणं तेन तद्धेतुभूतं स्वबलोभयपार्श्वयोरश्वानां प्रसरणं लक्ष्यते। पूर्वप्रहारः पूर्वं शत्रुबले प्रहारार्पणं, तदश्वैरेव क्षिप्रकारिभिः क्रियत इत्यर्थः। व्यावेशनं परबलस्यान्तः प्रविश्य विक्षोभणं, व्यावेधनं परबलस्य विविधव्यधोत्पादनम्, आश्वासः आश्वासनं स्वबलस्यात्यायासावसन्नस्यानुबलदानं, ग्रहणं परयोधानामनुगम्यादानं, मोक्षणं परगृहीतस्वीयभटमोचनं, मार्गानुसारविनिमयः मार्गानुसारपरिवृत्तिः स्वबलस्य मार्गमनुगच्छति परे परबलमार्गस्य स्वयमश्वद्वारेणानुगमनमित्यर्थः, कोशकुमाराभिहरणं परकीयस्य कोशस्य कुमारस्य च पररक्ष्यसर्वस्वभूतस्य अभिहरणं परसमक्षं हरणं, जघनकोट्यभिघातः जघने पश्चाद्भागे कोटौ पुरस्तात् पक्षे च अभिघातः, हीनानुसारणं भग्नाश्वयोधानुसारकरणम्, अनुयानं पलायमानपरसैन्यानुगमनं, समाजकर्म विप्रकीर्णस्य सैन्यस्य सङ्घत्वकरणम्, इत्यश्वकर्माणि उक्तप्रकाराण्यश्वसुकराणि कर्माणि।

हस्तिनां कर्माण्याह–पुरोयानमिति। स्वसैन्यस्याग्रे गमनम्, अकृतमार्गवासतीर्थकर्म अकृतानां पूर्वकल्पितानां मार्गाणां वासस्थानानां नद्यवतरणघट्टानां च कल्पनं, बाहूत्सारः बाहुभ्यामिव परसैन्यस्य स्वसैन्यपार्श्वे स्थित्वोत्सारणं, तोयतरणावतरणे नद्यादिजले तत्परिमाणज्ञानार्थं तरणमवतरणं च, स्थानगमनावतरणं स्थानं शत्रुबलक्रमणे पङ्क्तिशोऽवस्थितिः गमनं तथैवाध्वयानम् अवतरणं तथैवोच्चदेशा-देरवरोहणं च, विषमसम्बाधप्रवेशः तृणगुल्मादिदुस्सञ्चरे देशे शत्रुसैन्यसमवायसङ्कटे च प्रवेशः, अग्निदानशमनम् अग्नेः परशिबिरे प्रक्षेपः तस्य स्वशिबिरे परदत्तस्य निर्वापणं च, एकाङ्गविजयः एकेनैव सेनाङ्गेन हस्तिलक्षणेनाश्वादिराहितेनापि शत्रुजयसिद्धिः, भिन्नसन्धानं विशीर्णसैन्यैकीकरणम्, अभिन्नभेदनं सङ्घीभूतस्य परसैन्यस्य विशरणं,

first attack; dispersion (of soldiers); trampling it down, defence; seizing; letting it out; causing the army to take a different direction; carrying the treasury and the princes; falling against the rear of the enemy; chasing the timid; pursuit and concentration—these constitute the activities to which horses are enjoined.

Marching in the front (of the army); preparing the roads afresh; camping grounds and path for bringing water; protecting the sides; firm standing fording and entering into water while crossing pools of water and ascending from them; forced entrance into impregnable places; setting or quenching the fire; the subjugation of one of the four constituents of the army; gathering the dispersed army; breaking a compact army; protection against dangers; trampling and driving it; magnificence, seizing; abandoning; destruction of walls, gates and towers; and carrying the treasury—these constitute the work of elephants.

-मौदार्यं ग्रहणं मोक्षणं सालद्वाराट्टालकभञ्जनं कोशवाहनापवाहनमिति हस्तिकर्माणि।

स्वबलरक्षा चतुरङ्गबलप्रतिषेधः सङ्ग्रामे ग्रहणं मोक्षणं भिन्नसन्धानमभिन्नभेदनं त्रासनमौदार्यं भीमघोषश्चेति रथकर्माणि।

सर्वदेशकालशस्त्रवहनं व्यायामश्चेति पदातिकर्माणि।

शिबिरमार्गसेतुकूपतीर्थशोधनकर्म यन्त्रायुधावरणोपकरणग्रासवहनमायोधनाच्च प्रहरणावरणप्रतिविद्धापनयनमिति विष्टिकर्माणि।।

व्यसने त्राणं शत्र्वाक्रमणकृतायां रात्र्यादिसत्रोत्पादितायां वा विपदि हस्तिभिः रक्षणम्, अभिघातः परसैन्यमर्दनं, विभीषिका केवलदर्शनेनापि भयजननं, त्रासनं मदाद्यवस्थाभवैर्दुष्टचेष्टितैः साध्वसोत्पादनम्, औदार्यं सैन्यमहत्त्वं, ग्रहणं शत्रुभटादिहरणं, मोक्षणं परहृतस्वीयभटादिमोचनं, सालद्वाराट्टालकभञ्जनं सालः प्राकारः द्वारं गोपुरम् अट्टालकः प्राकाराग्रगृहम् एषां भञ्जनं, कोशवाहनापवाहनं कोशस्य राजकीयस्य धनस्य वाहनं सञ्चारणम् अपवाहनं भङ्गावसरेऽपनयनं च, इति एवम्प्रकाराणि हस्तिकर्माणि।

स्वबलरक्षेति। 'प्राकारतुल्यसंस्थानतया रथानां स्वबलरक्षकत्वमि'ति माधवः। चतुरङ्गबलप्रतिषेधः सङ्ग्रामे युद्धे चतुरङ्गस्य परबलस्य वारणं, ग्रहणम् इत्यादिकं षट्कं प्राग् व्याख्यातं, भीमघोषश्च भयङ्करध्वनिकरणं च, इति रथकर्माणि।

सर्वदेशकालशस्त्रवहनमिति। सर्वस्मिन् देशे समविषमादौ काले प्रावृडादौ च शस्त्राणां धारणं, व्यायामश्च युद्धव्यायोगश्च, इति पदातिकर्माणि।

अथ विष्टीनां कर्माण्याह–शिबिरेत्यादि। शिबिरं सेनानिवेशः मार्गः पन्थाः सेतुर्नद्यादौ जलविधारणकरणं कूपः तत्खननं तीर्थं नद्याद्यवतरणस्थानम् एषां शोधनकर्म तृणाद्युन्मूलनादिना शुचीकरणं, यन्त्रादिपञ्चकवहनम्, आयोधनाच्च प्रहरणावरणप्रतिविद्धापनयनं युद्धभूमेरायुधानां कञ्चुकादीनां बाणविद्धभटादीनां चान्यतोऽपनयनम्, इति विष्टिकर्माणि अनायुधीयाः कर्मकराः विष्टयस्तेषां कर्माणि।।

Protections of one's own army; repeating the attack made by all the four constituents of the (of positions) during the time of battle; gathering a dispersed army; breaking the array of the enemy forces; frightening it, magnificence; and fearful noise—these constitute the work of chariots.

Carrying of weapon incessantly to all places and fighting constitute the work of the infantry.

Examining of the camps, roads, bridges, wells and rivers; carrying the machines, weapons, armours, instruments and provisions; carrying away the men that are knoked down along with their weapons and armours form the work of the free labourers.

कुर्याद् गवाश्वव्यायोगं रथेष्वल्पहयो नृपः।
खरोष्ट्रशकटानां वा गर्भमल्पगजस्तथा।।

।। इति कौटलीयार्थशास्त्रे सांग्रामिके दशमाधिकरणे चतुर्थोऽध्यायः
युद्धभूमयः पत्त्यश्वरथहस्तिकर्माणि,
आदितो द्वात्रिंशच्छततमः।।

कुर्यादिति। अल्पहयोऽल्पाश्वः, नृपः, रथेषु गवाश्वव्यायोगम् अश्वैः सह बलीवर्दानां योजनं, कुर्यात्। तथा अल्पगजः नृपः, खरोष्ट्रशकटानां गर्भं कुर्यात् खरोष्ट्रयुक्तशकटसम्बद्धं सैन्यगर्भं कुर्याद् गजव्याप्यं सैन्यगर्भं गजाभावात् खरोष्ट्रयुक्तशकटव्याप्तं कुर्यादित्यर्थः।।

इति कौटलीयार्थशास्त्रव्याख्यायां साङ्ग्रामिके दशमेऽधिकरणे
चतुर्थोऽध्यायः युद्धभूमयः पत्त्यश्वरथहस्तिकर्माणि,
आदितो द्वात्रिंशच्छततमः।।

The king with a limited number of horses may combine bulls with horses; likewise when he is deficient in elephants he may fill up the middle portion of his army with mules, camels and carts.

Thus the one hundred and thirty second chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the fourth chapter of tenth Adhikaraṇa dealing with the sections on battle fields and action of infantry, cavalry, chariots and elephants.

Chapter 133

155-157. प्रक० पक्षकक्षोरस्यानां बलाग्रतो व्यूहविभागः, सारफल्गुबलविभागः, पत्त्यश्वरथहस्तियुद्धानि च।

Sections 155 : Array of Troups in Wings, Flanks and Front

156 : Strong and Weak Troops

157 : Battle with Infantry, Cavalry, Chariots and Elephants

पञ्चधनुश्शतावकृष्टदुर्गमवस्थाप्य युद्धमुपेयाद्, भूमिवशेन वा। विभक्तमुख्यामचक्षुर्विषये मोक्षयित्वा सेनां सेनापतिनायकौ व्यूहेयाताम्।

शमान्तरं पत्तिं स्थापयेत्। त्रिशमान्तरमश्वम्। पञ्चशमान्तरं रथं, हस्तिनं वा। द्विगुणान्तरं त्रिगुणान्तरं वा व्यूहेत। एवं यथासुखमसम्बाधं युध्येत।

पक्षकक्षोरस्यानां बलाग्रतो व्यूहविभाग इति सूत्रम्। पक्षौ पञ्चव्यूहात्मना स्थाप्यमानस्य बलस्य बहिः पुरस्तात्कोट्यौ कक्षौ पश्चादन्तःपार्श्वे उरस्यं मध्यम् एषां पञ्चानां समूहविशेषाणां बलाग्रतः बलस्य सैन्यस्य अग्रं परिमाणं तदनुगुण्येन, व्यूहविभागः व्यूहस्य विन्यासस्य विभजनम्, अभिधीयत इति सूत्रार्थः। व्यूहविभागपूर्वं युध्यमानस्यैव सैन्यस्य जयलाभो भवतीति व्यूहविभागस्येह कथनम्।

पञ्चधनुश्शतावकृष्टदुर्गमिति। पञ्चभिर्धनुश्शतैर्विप्रकृष्टं दुर्गं स्कन्धावारः यस्मात् तत् तथाभूतम्, अवस्थाप्य कृत्वा, युद्धं युद्धस्थलम्, उपेयात् स्वीकुर्यात्। युद्धभूमिं स्कन्धावारात् पञ्चधनुश्शतविप्रकृष्टां कुर्यादित्यर्थः। भूमिवशेन वेति। लभ्यमानभूमिपरिमाणानुरोधेन पञ्चधनुश्शतदूरविप्रकृष्टां तदधिकदूरविप्रकृष्टां तन्न्यूनदूरविप्रकृष्टां वा युद्धभूमिं कुर्यादित्यर्थः। विभक्तमुख्यामिति। प्रतिग्रहदेशपक्षकक्षोरस्येषु विभज्य निवेशितप्रधानां, सेनाम्, अचक्षुर्विषये मोक्षयित्वा प्रतिव्यूहरचनशङ्कया परदृष्ट्यगोचरे स्थापयित्वा, सेनापतिनायकौ सेनापतिः पदिकदशकपतिः नायकस्तद्दशकाधिपतिः एतौ, व्यूहेयातां विभज्य विन्यस्येताम्।

पदात्यादीनां व्यूहनप्रकारानाह–शमान्तरमिति। शमान्तरं शमश्चतुर्दशाङ्गुलः तत्परिमितम् अन्तरं पत्त्योर्मिथोऽन्तरालं यस्मिन् कर्मणि तत् तथा, पत्तिं स्थापयेत्। पत्तित्रिगुणान्तरालमश्वं, पत्तिपञ्चगुणान्तरालं रथं हस्तिनं च स्थापयेदित्याह–त्रिशमान्तरमित्यादि। पदात्यादीनां चतुर्णां बहुत्वेऽन्तरालमानमवरकल्पेनोक्त्वा तेषां बहुत्वे मध्यमोत्तमकल्पाभ्यामन्तरालमानं विधत्ते–द्विगुणान्तरमित्यादि। तत्तदुक्तमानद्विगुणान्तरालं तत्त्रिगुणान्तरालं वा पत्त्यादिचतुष्टयं स्थापयेदित्यर्थः। अन्तरालमानवर्धनस्य फलमाह–एवमित्यादि। असम्बाधं संमर्दरहितम्।

Having firmly established a camp at a distance of five hundred bows the invader should start the battle. After keeping the vanguard of the army on a favourable position not visible to the enemy the commander-in-chief and the leader should form the rest of the army into array.

The infantry should be arrayed at a distance of a Śama (= 14 aṅgulas) between two soldiers, cavarly with three Śamas; chariots with four Śamas and elephants with twice or thrice the distance with such spacing between the section of the army one should fight without confusion.

पञ्चारत्नि धनुः, तस्मिन् धन्विनं स्थापयेत्। त्रिधनुष्यश्वम्। पञ्चधनुषि रथं हस्तिनं वा। पञ्चधनुरनीकसन्धिः पक्षकक्षोरस्यानाम्।

अश्वस्य त्रयः पुरुषाः प्रतियोद्धारः। पञ्चदश रथस्य, हस्तिनो वा, पञ्च चाश्वाः। तावन्तः पादगोपाः वाजिरथद्विपानां विधेयाः।

त्रीणि त्रिकाण्यनीकं रथानामुरस्यं स्थापयेत्। तावत् कक्षं पक्षं चोभयतः। पञ्चचत्वारिंशद् एवं रथा व्यूहे भवन्ति।

अथ धन्विविषयमुत्तमोत्तमाश्वादिविषयं चान्तरालविधिमाह–पञ्चेत्यादि। पञ्चारत्नि पञ्चहस्तं, धनुः तत्संज्ञम्। तस्मिन् धनुर्मितेऽन्तराले, धन्विनं धानुष्कं, स्थापयेत्। त्रिधनुषि पञ्चदशहस्तान्तराले, अश्वं स्थापयेत्। पक्षादीनां पञ्चानामनीकानां परस्परान्तरालं कियत् कर्तव्यमित्याह–पञ्चधनुरिति। पक्षकक्षोरस्यानां पक्षौ बलस्य बहिः पुरस्तात्कोट्यौ कक्षौ पश्चादन्तःपार्श्वे उरस्यं मध्यम् इत्येषां पञ्चानामनीकानाम्, अनीकसन्धिः अनीकमिथोन्तरालं, पञ्चधनुः पञ्चविंशतिहस्तमानम्।

अश्वादीनामग्रगा भूत्वा शत्रुं ये प्रतियुध्यन्ते, तेषां संख्यामाह–अश्वस्य त्रय इत्यादि। पञ्चदशेति। तावन्तः प्रतियोद्धारः, रथस्य, हस्तिनो वा गजस्य च। पञ्च चाश्वा इति। एकैकस्य रथस्य गजस्य च त्रयः पुरुषा न केवलमग्रयायिनः किन्तु पञ्च पञ्चाश्वा अप्यग्रयायिन इत्यर्थः, तावन्त इति। पञ्च, पादगोपाः पादरक्षकाः, वाजिरथद्विपानां, विधेयाः कर्तव्याः। तदेवं रथस्यैकस्य पुरोगाः पुरुषाः पञ्चदश पञ्चाश्वाः पादगोपाश्च पञ्चेति सिद्धम्।

यथोक्तपुरुषादियुक्ता रथा उरस्यस्यानीकस्य कति स्थापनीया इत्याह–त्रीणीति। रथानां त्रीणि त्रिकाणि पृथक् पृथगेकपङ्क्तिरूपतया मिलितस्थितानि त्रीणि त्रितयानि, उरस्यम् अनीकं स्थापयेत् मध्यानीकात्मना कल्पयेत्। एवं नव रथा मध्यानीके भवन्ति। तावदिति। उरस्यानीकतुल्यरथपरिमाणं, कक्षं कक्षानीकं, पक्षं च पक्षानीकं च, उभयतः उभयोः पार्श्वयोः कोट्योश्च भवतीत्यर्थः। अनेन प्रकारेण उरस्यादिपञ्चानीकात्मके व्यूहे प्रत्येकं नवरथयोगात् सङ्कलनया पञ्चचत्वारिंशद् रथा भवन्तीत्याह–पञ्चेत्यादि।

A bow means five aratnis (5 x 24 = 120 angulas), and archers should be stationed at a distance of five bows (from one line to another). The cavalry should be at a distance of three bows, chariots and elephants should be located with a space having five bows. The intervening space between wings, flanks and front of the army should be five bows.

There should be three men to oppose a horse. For a chariot the requirement is fifteen; as also for elephant; and five men for a horse. Thus much servants should be assigned to horse, chariot and elephant.

Three groups of three chariots each should be stationed in front; the same number on the two flanks and the two flanks and the two wings. Thus is an array of chariots there should be forty five chariots.

द्वे शते पञ्चविंशतिश्चाश्वाः, षट्शतानि पञ्चसप्ततिश्च पुरुषाः प्रतियोद्धारः। तावन्तः पादगोपा वाजिरथद्विपानाम्।

एष समव्यूहः। तस्य द्विरथोत्तरा वृद्धिरा एकविंशतिरथादित्येवमोजा दश समव्यूहप्रकृतयो भवन्ति।

पक्षकक्षोरस्यानामतो विषमसंख्याने विषमव्यूहः। तस्यापि द्विरथोत्तरा वृद्धिरा एकविंशतिरथादित्येवमोजा दश विषमव्यूहप्रकृतयो भवन्ति।

अतः सैन्यानां व्यूहशेषमावापः कार्यः। रथानां द्वौ विभागा–

रथानां पञ्चचत्वारिंशत्त्वेऽश्वादीनां सिध्यन्तीमियत्तामाह–द्वे शते इत्यादि। एकैकस्य रथस्य पञ्चाश्वत्वात् पञ्चचत्वारिंशतो रथानाम् अश्वाः पञ्चविंशत्यधिकद्विशतसंख्या भवन्ति, एकैकस्याश्वस्य पुरोयायिपुरुषत्रित्वयोगात् तावतामश्वानां पुरोयायिपुरुषाः पञ्चसप्तत्यधिकषट्छतसंख्या भवन्तीत्यर्थः। तावन्त इत्यादि। अश्वानां यावन्तः पुरोयायिपुरुषाः तावन्तः पादगोपाः, तथा रथानां द्विपानां च यावन्तः पुरोयायिनोऽश्वाः पुरुषाश्च तावन्तः पादगोपा भवन्तीत्यर्थः।

एष समव्यूह इति। यथोक्तः समव्यूह इत्युच्यते त्रिकतुल्यत्वादित्यर्थः। तस्येति। व्यूहावयवस्य त्रिकस्य, द्विरथोत्तरा द्वौ द्वौ रथावुत्तरौ पूर्वां पूर्वां प्रकृतिं कृत्वा वर्धमानौ यस्याः सा तथाभूता, आ एकविंशतिरथात् यावदेकविंशतिरथा वर्धिता भवन्ति तावत्पर्यन्तेत्यर्थः, वृद्धिः, इत्येवम् अनेन प्रकारेण, ओजाः अयुग्माः त्रिकप्रकृतौ द्वियोगेन पञ्च पञ्चके द्वियोगेन सप्त सप्तके द्वियोगेन नव नवके द्वियोगेनैकादश एकादशके द्वियोगेन त्रयोदश त्रयोदशके द्वियोगेन पञ्चदश पञ्चदशके द्वियोगेन सप्तदश सप्तदशके द्वियोगेन एकोनविंशतिः एकोनविंशतौ द्वियोगेनैकविंशतिरित्येवमयुग्मरूपा इत्यर्थः, दश समव्यूहप्रकृतयो भवन्ति समव्यूहनयोनयः प्रभेदा जायन्ते।

विषमव्यूहमाह–पक्षकक्षोरस्यानामिति। तेषाम्, अतो व्यूहाङ्गतो, विषमसंख्याने व्यूहाङ्गसङ्ख्यासाम्यविरहे इत्यर्थः, विषमव्यूहः। विषमव्यूहस्यापि द्विरथोत्तरैकविंशतिरथपर्यन्तवृद्ध्या दशायुग्मरूपा विषव्यूहयोनयो भेदा भवन्तीत्याह–तस्यापीत्यादि।

अथावापविधिमाह–अत इति। एषु समविषमव्यूहेषु, सैन्यानां, व्यूहशेषं व्यूहनादवशिष्टं सैन्यम्, आवापः कार्यः आवापतां नेतव्यम्।

(In an array) there should be two hundred and twenty five horses; and six hundred and seventy five men (to fight the enemy). Thus much servants shall be assigned to protect horses, chariots and elephants.

This forms an even array of troops. The number of chariots in this array may be increased by two and two till the increased number amounts to twenty one; thus the array of odd number of chariots gives rise to ten odd varieties.

When wings, flanks and front are formed in odd numbers the array is uneven. There also, it may be increased by two and two till the increased number amounts to twenty one and such these are ten odd arrays.

-वङ्गेष्वावापयेत्। शेषमुरस्यं स्थापयेत्। एवं त्रिभागोनो रथानामावापः कार्यः। तेन हस्तिनामश्वानाम् आवापो व्याख्यातः।

यावदश्वरथद्विपानां युद्धसम्बाधं न कुर्यात्, तावदावापः कार्यः।

दण्डबाहुल्यमावापः। पत्तिबाहुल्यं प्रत्यावापः। एकाङ्गबाहुल्यमन्वावापः। दूष्यबाहुल्य-मत्यावापः।

परावापात् प्रत्यावापादाचतुर्गुणादाष्टगुणादिति वा विभक्तः सैन्यानामावापः कार्यः।

आ समन्तादुप्यत इति व्युत्पत्त्या आवापः प्रक्षेपः। व्यूहावशिष्टं सैन्यं व्यूहेषु प्रक्षेप्तव्यमित्यर्थः। प्रक्षेपणप्रकारमाह-रथानामित्यादि। व्यूहनशिष्टानां रथानां त्रिधा विभक्तानां, द्वौ त्रिभागो, अङ्गेषु बहिःपुरस्तात्कोट्योः पश्चादन्तः पार्श्वयोश्चेत्येतेषु, आवापयेत्। शेषम् अवशिष्टं त्रिभागम्, उरस्यं स्थापयेत् मध्यगं कुर्यात्। आवाप्यत्वेनावशिष्टस्य सैन्यस्य व्यूढसैन्यापेक्षया परिमाणतोऽधिकत्वे न्यूनत्वे समत्वे वा कथमावापः कर्तव्य इत्यत्राह-एवं त्रिभागोन इत्यादि। व्यूढं स्थानीकमपेक्ष्य त्रिभागन्यून एव रथावापः कर्तव्यः, न तु ततोऽधिकस्तेन वेत्यभिप्रायः। रथन्यायं हस्तिष्वश्वेषु चातिदिशति-तेनेत्यादि। हस्तिनोऽश्वांश्च त्रेधा विभज्य द्वौ त्रिभागौ पक्षकक्षयोः शेषमुरस्ये च प्रक्षिपेदित्यर्थः।

यावदिति। यत्परिमाणं बलशेषं व्यूहेषु प्रक्षिप्यमाणम्, अश्वरथद्विपानां, युद्धसम्बाधं युद्धसंमर्दे, न कुर्यात्, तावत् आवापः कार्यः। त्रिभागोन इत्यादयस्तु विधयः प्रदर्शनार्था इति भावः।

प्रत्यावापादीन् आवापविशेषान् वक्तुमावापदार्थमाह-दण्डबाहुल्यमिति। दण्डस्य बलस्य व्यूहरचनविनियुक्तस्य बाहुल्यं व्यूहरचनातिरिक्तबलप्रक्षेपेण वर्धनम्, आवापः आवापपदार्थः। पत्तिबाहुल्यं पदातिमात्रेण वर्धनं, प्रत्यावापः। एकाङ्गबाहुल्यमिति। एकेनाङ्गेनाश्वगजरथान्यतमबलेन वर्धनम्, अन्वावापः। दूष्यबाहुल्यमिति। दूष्या राजावग्रहचारिणो मुख्यास्तद्बाहुल्यम्, अत्यावापः।

व्यूढे परकीयबले यावान् आवापः तदपेक्षया चतुर्गुणाद्यष्टगुणपर्यन्तप्रमाणः स्वविभवानुगुण्येन वा सैन्यानामावापः कार्य इत्याह-परावापादिति। इह वाशब्दः 'एवं त्रिभागोन' इति व्यूढस्वबलापेक्षया पूर्वमुक्ता-

Thus the surplus of the army may be distributed. (to other flanks). Two thirds of the surplus) chariots may be added to the flanks and the wings; the rest being arranged in front. Thus the added surplus of chariots

should be one third less (than the number added to the flanks and wings). This also explains the distribution of the surplus elephants and horses.

Addition of surplus horses, chariots and elephants should be made as occasion necessitates, but it should not create confusion in fighting.

Excess of the army is termed as Āvāpa (surplus). Surplus of infantry alone is Pratyāvāpa (absence of surplus). Excess of any one of the four constituents is called Anvāpa (similar to surplus). Excess of traitors is called Atyāvāpa (dangerous surplus). In accordance with one's own resources, one should increase one's army from four to eight times the excess of the enemy's army or the deficiency in the enemy's infantry.

रथव्यूहेन हस्तिव्यूहो व्याख्यातः। व्यामिश्रो वा हस्तिरथाश्वानाम्। चक्रान्तयोर्हस्तिनः, पार्श्वयोरश्वमुख्या, रथा उरस्ये। हस्तिनामुरस्यं रथानां कक्षावश्वानां पक्षाविति मध्यभेदी। विपरीतोऽन्तभेदी।

हस्तिनामेव तु शुद्धः। सान्नाह्यानामुरस्यम्, औपवाह्यानां जघनं, व्यालानां कोट्याविति।

-दावापप्रमाणादस्यावापप्रमाणस्य पक्षान्तरत्वद्योतनार्थः। इह परावापादित्येतदनन्तरं 'प्रत्यावापाद्' इत्यधिकं पठ्यते। तच्च नातिप्रयोजनकम्। तदित्थं त्रीणि त्रिकाण्यनीकं रथानामुरस्यं स्थापयेद्' इत्यादिना रथव्यूहोऽभिहितः।

रथव्यूहविधानं हस्तिव्यूहेऽतिदिशति-रथव्यूहेनेत्यादि। हस्तिप्रधानो व्यूहो हस्तिव्यूहः। तत्र हस्तिनां संख्या रथव्यूहोक्तया रथसंख्यया समाना, न तु ततोऽधिकेत्यभिप्रायः। हस्तिरथाश्वमिश्रणरूपो वा हस्तिव्यूहः कर्त्तव्य इत्याह-व्यामिश्रो वेत्यादि। करणप्रकारमाह-चक्रान्तयोरिति। चक्रस्य सैन्यस्य अन्तयोः बहिःपुरस्तात्कोट्योः पक्षशब्दवाच्ययोः, हस्तिनः, स्थाप्या इति शेषः। पार्श्वयोः पश्चादन्तःकक्षयोर्जघनापरपर्याययोः, अश्वमुख्याः स्थाप्याः। अश्वा मुख्या इति व्यस्तमपि पठ्यते। रथाः, उरस्ये मध्ये, स्थाप्याः। एवंविधहस्त्यादिस्थापनयुक्तो हस्तिव्यूहस्यैकः प्रकार इत्यभिप्रायः। द्वितीयं प्रकारमाह-हस्तिनामित्यादि। इति मध्यभेदी अयं प्रकारो मध्यभेदीत्युच्यते मध्ये हस्तिस्थापनरूपविशेषवत्त्वादित्यर्थः। तृतीयं प्रकारमाह-विपरीत इति। उक्तप्रकारद्वयविपरीतः-पार्श्वापरपर्याययोः कक्षयोर्गजाः रथाः पक्षयोः उरस्येऽश्वा इत्येवंविध-हस्त्यादिविन्यासवानित्यर्थः, अन्तर्भेदी पश्चादन्तःपार्श्वयोर्हस्तिस्थापनरूपविशेषवत्त्वादन्तर्भेदीत्युच्यते। अनेन न्यायेन प्रथमः प्रकारः पक्षभेदीति व्यपदेष्टुमर्हः पक्षयोर्हस्तिविन्यासरूपविशेषवत्त्वादिति बोद्धव्यम्।

अथ शुद्धं व्यूहमाह-हस्तिनामेव तु शुद्ध इति। केवलानां गजानाम्, अश्वादिमिश्रणरहितः शुद्धो व्यूहो भवति। तत्र सान्नाह्यादीनां त्रिविधानां गजानां विन्यासस्थानान्याह-सान्नाह्यानामिति। युद्धयोग्यानाम्, उरस्यं मध्यं, स्थानमिति शेषः। औपवाह्यानां राजवाहनानां, जघनं पश्चादन्तःपार्श्वे, स्थानम्। व्यालानां दुष्टगजानां, कोट्यौ पक्षौ, स्थानम्। इतिशब्दः शुद्धहस्तिव्यूहकथनसमाप्तौ।

The array of chariots explains the array of elephants also. There could be a mixing of the array of elephants, chariots and horses. Of the extremities of circles, the elephants, on the flanks, principal horses and at the front chariots may be arrayed. An array with elephants in front, flanks

with chariots and wings with horses could break the centre of the enemy's army. The reverse of this could break the extremities.

An array of elephants alone could be formed. The war elephants are to be placed in front, those trained for riding on the flanks and rogue elephants on the wings should be placed.

अश्वव्यूहो वर्मिणामुरस्यं शुद्धानां कक्षपक्षाविति।

पत्तिव्यूहः पुरस्तादावरणिनः पृष्ठतो धन्विन इति। शुद्धाः।

पत्तयः पक्षयोरश्वाः पार्श्वयोः, हस्तिनः पृष्ठतो रथाः पुरस्तात्, परव्यूहवशेन वा विपर्यास इति। व्यङ्गबलविभागः। तेन त्र्यङ्गबलविभागो व्याख्यातः।

दण्डसम्पत् सारबलं पुंसाम्। हस्त्यश्वयोविशेषः—कुलं जातिः सत्त्वं वयःस्थता प्राणो वर्ष्म जवस्तेजः शिल्पं स्थैर्यमुदग्रता विधेयत्वं सुव्यञ्जनाचारतेति।

शुद्धेऽश्वव्यूहेऽश्वानां स्थापनप्रकारमाह—अश्वव्यूह इत्यादि। वर्मिणां वर्म कवचं तद्वतामश्वानाम्। शुद्धानां वर्मरहितानामित्यर्थः।

शुद्धे पत्तिव्यूहे पत्तीनां स्थापनप्रकारमाह—पत्तिव्यूह इत्यादि। पुरस्तात् कोट्योः। आवरणिनः कवचिनः पत्तयः। पृष्ठतः पश्चादन्तःपार्श्वयोः। शुद्धा इति। अव्यामिश्रा गजादिव्यूहा दर्शिता इत्यर्थः।

अथ मिश्रव्यूहे दर्शयितव्ये प्रथमं द्विसेनाङ्गमिश्रमाह—पत्तय इत्यादि। इह पार्श्वयोरित्यन्तेनैको व्यङ्गबलविभाग उक्तः, पुरस्तादित्यन्तेनापरः, परव्यूहेत्यादिना चान्यः। तत्र परव्यूहवशेन वेत्यादेरयमर्थः—उक्तव्यवस्थाद्वयव्यत्ययोऽपि शत्रुव्यूहभञ्जनानुगुण्यमवेक्ष्य कर्तव्य इति। व्यङ्गबलविभागेऽप्ययं न्यायोऽनुसर्तव्य इत्याह—तेनेत्यादि। इत्थं पक्षादीनां बलाग्रतो व्यूहविभागः प्रपञ्चितः।

अथ बलानां सारफल्गुभाववशादपि विभागं वक्तुं सूत्रयति—सारफल्गुबलविभाग इति। साराणां पितृपैतामहत्वनित्यत्वादिदण्डसम्पद्युक्तानां फल्गूनां तदतिरिक्तानां च बलानां पत्त्यादीनां विभागः विभज्य पक्षादिषुनिवेशनम् अभिधीयत इति सूत्रार्थः।

तत्र पदात्यादीनां सारबलत्वं व्यवस्थापयति—दण्डसम्पदिति। यः 'पितृपैतामहो नित्यो वश्य' इत्यादिना प्रकृतिसम्पत्प्रकरणेऽभिहिता सा, सारबलं पुंसां पदातीनां सारबलत्वमित्यर्थः। हस्त्यश्वयोः कुलजातिसत्त्वादिरूपा गुणविशेषा एवं सारबलत्वमित्याह—हस्त्यश्वयोर्विशेष इत्यादि। तत्र कुलम् एकप्रभवत्वं, जातिर्भद्रमन्द्रत्वादिः, सत्त्वं धैर्यं, वयःस्थता कर्मक्षमवयःप्राप्तिः, प्राणः कायबलं, वर्ष्म समुचितोत्सेधायाम-परिणाहयोगित्वं, जवो वेगः, तेजः पराक्रमणशीलत्वं परिभवासहिष्णुता वा, शिल्पं सुशिक्षितत्वं

In an array of horses alone there should should be, the front by horses with mail armour and the flanks and wings by horses without armour.

In an array of infantry alone, there should be men dressed in mail armour in front, archers in the rear and men without armour.

In an infantry, men on the wings, horses on flanks, elephants on the rear and chariot in front (is to be arranged), but there could be changes in

this order so as to oppose the array of the enemy's army. This is how two of the constituents are formed. This also explains the modes in which three constituents of the army (is involved).

A strong infantry is the core of army. In the cases of elephants and horses other consideration are (to be taken into account) such as their breed, birth, strength, youth, vitality, capacity to run even in advanced age, fury, skill, firmness, magnanimity, obedience and good habits.

पत्त्यश्वरथद्विपानां सारत्रिभागमुरस्यं स्थापयेद्, द्वौ त्रिभागौ कक्षं पक्षं चोभयतः। अनुलोममनुसारम्। प्रतिलोमं तृतीयसारम्। फल्गु प्रतिलोमम्। एवं सर्वमुपयोगं गमयेत्।

फल्गुबलमन्तेष्ववधाय वेगोऽभिहुतो भवति। सारबलमग्रतः कृत्वा कोटीष्वनुसारं कुर्यात्। जघने तृतीयसारं, मध्ये फल्गुबलमेतत् सहिष्णु भवति।

स्थैर्यं प्रहारेऽप्यारब्धकर्मापरित्यागित्वम्, उदग्रता उच्छ्रितमुखत्वं, विधेयत्वं नियन्तृवश्यता, सुव्यञ्जनाचारता शोभनलक्षणत्वं शोभनचेष्टितत्वं च। नन्विह रथानां सारबलत्वं कस्मान्नोक्तम्। उच्यते। तेषां हि सारबलत्वं नेतृपुरुषाश्वद्वारकं वक्तव्यं, तच्च पुरुषाश्वयोः सारबलत्वं नेतृपुरुषाश्वद्वारक वक्तव्यं, तच्च पुरुषाश्वयोः सारबलत्ववचनेनैवोक्तप्रायमित्यदोषः।

यथोक्तरूपं पत्त्यादिसारं व्यूहे कथमुपयुञ्जीतेत्यपेक्षायामाह–पत्त्यश्वरथद्विपानामिति। तेषां, सारत्रिभागं सारस्य त्रिधा विभक्तस्यैकं त्रिभागम्, उरस्यं स्थापयेत् उरस्यात्मना निवेशयेत् मध्यगतं कुर्यादित्यर्थः। द्वौ त्रिभागौ, कक्षं पक्षं चोभयतः कक्षात्मना पक्षात्मना चेत्युभयात्मना, स्थापयेत्–तयोस्त्रिभागयोरेकं पश्चादन्तःपार्श्वयोरपरं पुरस्तात्कोट्योश्चार्धशो निवेशयेदित्यर्थः। एष उत्तमसारस्य विनियोगप्रकारः। तदपेक्षया किञ्चिदवरस्यानुसाराख्यस्य सारभेदस्य विनियोगमाह–अनुलोममनुसारमिति। स्थापयेदिति वर्तते। अनुसारं बलम्, अनुलोमं स्थापयेत् उत्तमसारस्य पृष्ठतो निवेशयेत्। अनुलोमं ह्यनुसारमुच्यते यत् पृष्ठगं भवति। प्रतिलोमं तु तद्विपरीतं पुरोगतम्। अनुसारात् किञ्चिदवरस्य सारभेदस्य विनियोगमाह–प्रतिलोममिति। तृतीयसारं द्वितीयभूतानुसारापेक्षया तृतीयं सारं, प्रतिलोमं स्थापयेत् उत्तमसारप्राग्गतं कुर्यात्। अथ फल्गुनो बलस्य विनियोगमाह–फल्गिवति। तत्, प्रतिलोमं स्थापयेत् तृतीयसारस्यापि पुरस्थितं कुर्यादित्यर्थः। एवमिति। अनेन प्रकारेण, सर्वं सर्वप्रकारं बलम्, उपयोगं, गमयेत् नयेत्।

किमर्थं सारे विद्यमाने फल्गुबलस्याग्रतो निवेशनमित्यत्राह–फल्गुबलमिति। तत्, अन्तेषु पक्षादीनामग्रेषु, अवधाय निवेश्य, युध्यमानेनेति शेषः, वेगः आपततां प्रतिबलानामग्रिमो जवः, अभिहुतः कृतहोमः पुरःस्थितफल्गुबलरूपाग्निसात्कारप्रशमित इत्यर्थः, भवति। क्षयोऽपि तद्वशात् फल्गु–

One third of the best of the infantry, cavalry and elephants should be arrayed in the front; two thirds on both the flanks and wings. The array should be according to the strength in direct order. That which is arranged in a mixed manner may be in the reverse order. Weak troops should be in the reverse order. Thus one should properly make use of the constituents.

Stationing the weak troops at the extremities one would be liable to the onslaught of the enemy. Having stationed the cream of the army in

front, one should make the wings equally strong. One-third of the best in the rear and weak troops in the centre will be able to resist the enemy.

व्यूहं तु स्थापयित्वा पक्षकक्षोरस्यानामेकेन द्वाभ्यां वा प्रहरेत्। शेषैः प्रतिगृह्णीयात्।

यत् परस्य दुर्बलं वीतहस्त्यश्वं दूष्यामात्यकं कृतोपजापं वा, तत् प्रभूतसारेणाभिहन्यात्। यद् वा परस्य सारिष्ठं, तद् द्विगुणसारेणाभिहन्यात्। यदङ्गमल्पसारमात्मनः, तद् बहुनोपचिनुयात्। यतः परस्यापचयस्ततोऽभ्याशे व्यूहेत, यतो वा भयं स्यात्।

बलस्य मनाग् भवन् सारबलस्येव नातिदोषावह इत्यभिप्रायः। अभिहत इत्यपि माधवपाठः। फल्गुबलविषयत्वापादनेन क्षपितसामर्थ्य इति तदर्थः। अभिहूलित इति त्वपपाठः। व्यूहान्तरं तत्फलं चाह–सारेत्यादि। अग्रतः सारबलस्य कोटिष्वनुसारबलस्य कक्षयोस्तृतीयसारस्य मध्ये फल्गुबलस्य च निवेशनतोऽपि व्यूहो जायते; तथा व्यूढं सैन्यं परबलवेगेन नाभिभूयते चेत्यर्थः।

अथ व्यूढे सैन्ये योधनप्रकारमाह–व्यूहं त्विति। तं, स्थापयित्वा, पक्षकक्षोरस्यानां पक्षयोः पुरस्तात्कोट्योः कक्षयोः पश्चादन्तःपार्श्वयोः उरस्यस्य मध्यस्य चेत्येतषां पञ्चधा विभक्तानां मध्ये, एकेन अङ्गेन, द्वाभ्यामङ्गाभ्यां वा, प्रहरेत् अर्थाद् विजिगीषुः परबलम्। शेषैः त्रिभिरङ्गैः, प्रतिगृह्णीयात् प्रतीच्छेद्, अर्थात् स्वयं प्रहारप्रवृत्तं परबलम्।

परबले प्रहारस्थानमाह–यदिति। परस्य यत् सैन्यं, दुर्बलम् अल्पबलं, वीतहस्त्यश्वं सारमपि हस्त्यश्वरहितं, दूष्यामात्यकं दूष्याः क्रुद्धभीतादिरूपा अमात्या यस्मिंस्तत् तथाभूतं, कृतोपजापं वा कृतभेदनं वा, तत् सैन्यं, प्रभूतसारेण प्रचुरेण सारबलेन, अभिहन्यात्। यद्वेति। यत् परय सारिष्ठं सारतमं बलं, तत्, द्विगुणसारेण तदपेक्षया द्विगुणसारेण बलेन, अभिहन्यात्। यदिति। यद् आत्मनः, अङ्गं पत्त्याद्यन्यतमम्, अल्पसारं, तद् बहुना प्रभूतेनाङ्गेन, उपचिनुयाद् वर्धयेत्। पराभिघातानुगुणमात्माभयानुगुणं च व्यूहनविशेषमाह–यत इत्यादि। परव्यूहस्य सम्बन्धिनि यस्मिन् पक्षकक्षाद्यन्यतमे सेनाङ्गापचयो दृश्यते तस्यान्तिके वा, यतः पक्षकक्षाद्यन्यतमाद् भयं सम्भाव्यते तस्यान्तिके वा स्वबलं व्यूहेतेत्यर्थः। तदित्थमुभयथा व्यूहविभागविधिः प्रतिपादितः। अथ युद्धकर्माभिधातव्यम्। तत्र

पच्यश्वरथहस्तियुद्धानि इति सूत्रम्। पत्त्यादीनां चतुर्णां युद्धान्युच्यन्त इति सूत्रार्थः।

Having formed an array he should strike the enemy with one or two of the divisions on the wings, flanks and front. With the rest he should put up resistence.

When the enemy's force is weak, with a lesser number of horses and elephants and is infiltrated with the intrigue of traitors and treacherous ministers, the conqueror should attack with most of his best troops. When attacking a strong enemy, he should increase his numerical strength doublefold. The weak section of his enemy should be strengthened with increasing number. He should array his troops on that side on which the enemy is weak or from which danger is apprehended.

अभिसृतं परिसृतमतिसृतमपसृतमुन्मथ्यावधानं वलयो गोमूत्रिका मण्डलं प्रकीर्णिका व्यावृत्तपृष्ठमनुवंशमग्रतः पार्श्वाभ्यां पृष्ठतो भग्नरक्षा भग्नानुपातः इत्यश्वयुद्धानि।

प्रकीर्णिकावर्जान्येतान्येव, चतुर्णामङ्गानां व्यस्तसमस्तानां वा घातः, पक्षकक्षोरस्यानां च प्रभञ्जनमवस्कन्दः सौप्तिकं चेति हस्तियुद्धानि।

उन्मथ्यावधानवर्जान्येतान्येव स्वभूमावभियानापयानस्थितयुद्धानीति रथयुद्धानि।

तत्रादावश्वकर्माणि त्रयोदशरूपाण्याह–अभिसृतमित्यादि। इदमित्थं व्याचक्षते–स्वबलात् परबलं प्रति पूर्वमभिसरणम् अभिसृतं, परबलस्य पुरः पृष्ठतः पार्श्वे चाभिहत्य परितो भ्रमणं परिसृतं, परबलं मध्यतो भित्त्वा सूचीवदभिगमनम् अतिसृतं, तेनैव मार्गेण पुनर्निर्गमनम् अपसृतं, बहुभिरश्वैरितस्ततश्चोन्मथ्याव-भज्यावधानं पुनरेकत्रावस्थानम् उन्मथ्यावधानं, द्विधासूचिमार्गेणाभिगमनं वलयः, गोमूत्रवद् वक्रगत्या प्रवृत्तिर्गोमूत्रिका, परबलस्यैकदेशमवच्छिद्य तत्परिवेष्टनं मण्डलं, सर्वगतीनां साङ्कर्येण प्रयोगः प्रकीर्णिका, अपसारं कृत्वा पुनरतिसरणं व्यावृत्तपृष्ठं, परबलाभिमुखस्य स्वबलस्यानुवर्तनम् अनुवंशं, प्रहरतामेव युद्धान्निवृत्य स्वबलप्रवेश इत्यन्ये, भग्नानां स्वबलानाम् अग्रतः पार्श्वाभ्यां पृष्ठतो भ्रमणं भग्नरक्षा, भग्नस्य परबलस्यानुवर्तनं भग्नानुपातः इति।

हस्तियुद्धान्याह–प्रकीर्णिकावर्जानीति। अलघुवपुरशक्यप्रकीर्णिकातिरिक्तानि, एतान्येव अभिसृतादीनि, चतुर्णाम् अङ्गानां पत्त्यादीनां व्यस्तसमस्तानां वा घातः, पक्षकक्षोरस्यानां च प्रभञ्जनम् अवमर्दनम्, अवस्कन्दः छिद्रमुपलभ्य प्रहारः, सौप्तिकं सुप्तघातः, इति हस्तियुद्धानि।

रथकर्माण्याह–उन्मथ्यावधानवर्जानीति। उन्मथ्यावधानव्यतिरिक्तानि, एतान्येव हस्तिकर्माण्येव, स्वभूमौ अभियानापयानस्थितयुद्धानि 'समास्थिराभिकाशे' त्यादिना लक्षितायां स्वयोग्यायां भूमौ स्थित्वा अभियानं परबलाभिक्रमणम् अपयानं परबलमभिभूयापसरणं स्थितयुद्धं च कृतपरिरक्षस्य शत्रोः प्राकारं परिवृत्य चिरमवस्थाय तेन सह योधनं च, इत्येतानि च, रथयुद्धानि।

Running towards; running round; running beyond; running back; disturbing the enemy's halt; gathering the troops; curving encircling; miscellaneous actions; removal of the rear, pursuit of the frontal line, flanks and rear; protection of the broken army; and jumping upon the broken army—such are the forms of waging war with horses.

The same varieties with exception to miscellaneous actions; the destruction of the four constituents of the army, either single or combined; the dispersion of the flanks, wings and front trampling down and attacking an army when it is asleep—such are the varieties of waging war with elephants.

The same varieties with the exception of disturbing the enemy's halt, running towards, running back; and fighting from the position already taken—such are the varieties of waging war with chariots.

सर्वदेशकालप्रहरणमुपांशुदण्डश्चेति पत्तियुद्धानि।।

एतेन विधिना व्यूहानोजान् युग्मांश्च कारयेत्।
विभवो यावदङ्गानां चतुर्णां सदृशो भवेत्।।

द्वे शते धनुषां गत्वा राजा तिष्ठेत् प्रतिग्रहे।
भिन्नसङ्घातनं तस्मान्न युध्येताप्रतिग्रहः ।।

।। इति कौटलीयार्थशास्त्रे सांग्रामिके दशमाधिकरणे पञ्चमोऽध्यायः
पक्षकक्षोरस्यानां बलाग्रतो व्यूहविभागः, सारफल्गुबल-
विभागः, पत्त्यश्वरथहस्तियुद्धानि च।
आदितस्त्रयस्त्रिंशच्छततमः ।।

पत्तियुद्धान्याह–सर्वदेशकालेत्यादि। स्पष्टार्थम् ।।

एतेन विधिनेति। उक्तेन कल्पेन, ओजान् अयुग्मान्, युग्मांश्च समांश्च, व्यूहान्, कारयेत्। कथं, यावद् यथा, चतुर्णाम् अङ्गानां द्विपहयरथपत्तीनां, विभवः समृद्धिः, सदृशो भवेद् व्यूहानामनुरूपः स्यात्। अङ्गविभवानुरूप्येण व्यूहान् निवेशयेदित्यभिप्रायः।।

युद्धे प्रवृत्ते क्व राजा तिष्ठेदित्यत्राह–द्वे शते धनुषां गत्वेति। व्यूहाद् धनुर्द्विशतमानमन्तरालं विहाय, राजा, प्रतिग्रहे सैन्यपृष्ठे, तिष्ठेत्। प्रतिग्रह इति प्रथमान्तपाठे तात्स्थ्यात् ताच्छब्द्यं बोद्धव्यम्। किमर्थं, तस्माद् भिन्नसंघातनं परबलकृताभिघातभिन्नानां स्वबलानाम् एकीकरणलक्षणं प्रयोजनं राज्ञः सैन्यपृष्ठावस्थानात् सिध्यतीत्यर्थः। अत एवाह–न युध्येताप्रतिग्रह इति। अनाश्रितसैन्यपृष्ठो न युद्धं कुर्यादित्यर्थः।।

इति कौटलीयार्थशास्त्रव्याख्यायां साङ्ग्रामिके दशमेऽधिकरणे
पञ्चमोऽध्यायः, पक्षकक्षोरस्यानां बलाग्रतो व्यूहविभागः
सारफल्गुबलविभागः पत्त्यश्वरथहस्तियुद्धानि।
आदितस्त्रयस्त्रिंशच्छततमः।।

Attacking in all places and at all times and striking by surprise are the varieties of waging war with infantry.

In this manner he should form odd or even arrays, keeping the strength of the four constituents of the army equal.

Reaching a distance of two hundred bows, the king should take his position together with the reserve of his army and without reserve forces he should not attempt to fight; for it is by the reserved forces that dispersed troops are collected together.

Thus the one hundred and thirty third chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the fifth chapter of the tenth Adhikaraṇa dealing with the section of 'Army of troops in wings, blanks and front; strong and weak troops and battle with infantry cavalry chariots and elephants."

Chapter 134

158, 159. प्रक० दण्डभोगमण्डलासंहतव्यूहव्यूहनं तस्य प्रतिव्यूहस्थापनं च।

Sections 158 : Array of Army Like a Staff, a Snake, a Circle or in Detached Order

159 : Array of the Army Against that of an Enemy

पक्षावुरस्यं प्रतिग्रह इत्यौशनसो व्यूहविभागः। पक्षौ कक्षावुरस्यं प्रतिग्रहः इति बार्हस्पत्यः।

प्रपक्षकक्षोरस्या उभयोः दण्डभोगमण्डलासंहताः प्रकृतिव्यूहाः। तत्र तिर्यग्वृत्तिर्दण्डः। समस्तानामन्वावृत्तिर्भोगः। सरतां सर्वतोवृत्तिः मण्डलः। स्थितानां पृथगनीकवृत्तिरसंहतः।

दण्डभोगमण्डलासंहतव्यूहव्यूहनमिति सूत्रम्। दण्डव्यूहव्यूहनं भोगव्यूहव्यूहनं मण्डलव्यूहव्यूहनम् असंहतव्यूहव्यूहनमिति चतुर्विधं व्यूहनमुच्यत इति सूत्रार्थः।

तत्र शुक्रबृहस्पत्योर्मतभेदमाह–पक्षाविति। पक्षौ बहिःपुरस्तात्कोट्यौ, उरस्ये मध्यं, प्रतिग्रहः सैन्यपृष्ठदेशः, इति, चतुरवयव इति शेषः, औशनसः उशनसोक्तः, व्यूहविभागः। पक्षौ बहिःपुरस्तात्कोट्यौ, कक्षौ पश्चादन्तःपार्श्वे, उरस्यं मध्यं, प्रतिग्रहः सैन्यपृष्ठम्, इति, षडवयव इति शेषः, बार्हस्पत्यः बृहस्पत्युक्तः, व्यूहविभाग इति संबध्यते।

प्रपक्षकक्षोरस्या इति। वक्ष्यमाणरीत्वा प्रविभक्तानि पक्षकक्षोरस्यानि बहिःकोट्यन्तःपार्श्वमध्यसैन्यानि येषां ते तथाभूताः, उभयोर्दण्डभोगमण्डलासंहताः शुक्रबृहस्पतिमतयोर्द्वयोरपि दण्डाद्यात्मना चतुर्भेदा इत्यर्थः, प्रकृतिव्यूहाः, भवन्तीति शेषः। तेषां लक्षणमाह–तत्रेति। चतुर्षु दण्डादिव्यूहेषु मध्ये, तिर्यग्वृत्तिर्दण्डः तिरश्चीनावस्थानो दण्डसंज्ञो व्यूहः। समस्तानामिति। औशनसमते कक्षवर्जितानां चतुर्णां बार्हस्पत्यमते कक्षाभ्यसह षण्णामित्यर्थः, अन्वावृत्तिः अनुबन्धेनावृत्तिः वृत्तबहुलतया स्थितिः, भोगः तत्संज्ञः। सरतामिति। शत्रुसैन्याभिमुखं गच्छतां, सर्वानीकानां, सर्वतोवृत्तिः एकीभावेन सर्वतो व्यापारवत्त्वं, मण्डलः तत्संज्ञः। स्थितानामिति। शत्रुबलाभिमुख्येन सर्वतो व्यापारवत्त्वं, मण्डलः तत्संज्ञः। स्थितानामिति। शत्रुबलाभिमुख्येन चलनात् पूर्वं 'पञ्चधनुरनीकसन्धिरि'ति नियमानुसारितयावस्थितानां चतुर्णां षण्णां वानीकानां, पृथगनीकवृत्तिः

शत्रुबलाभिमुख्येन चलनेऽप्यसंहतानीकतया वृत्तिर्वर्तनं पूर्वस्थितामसंहतिमपरित्यज्यैव चेष्टमानतेत्यर्थः, असंहतः तदाख्यो व्यूहः। इत्थं शुक्रबृहस्पतिमतानुगुणं लक्षणमभिहितम्।

According to Uśanas the arraying of the army are (of four kinds as) the two wings, the front and the rear. According to the school of Bṛhaspati it is as two wings, the two flanks, the front and the rear. The natural forms of the array of the army, such as that like a staff, like a snake, like a circle and in detached order, are the varieties of the above two forms of the array consisting of wings, flanks and front. The stationing of the army so as to stand abreast is called a staff-like array. Stationing the army like a line after line is called snake-like array. Stationing of the army so as to face all direction is called a circle-like array. Detached arrangement into small bodies is termed a detached array.

पक्षकक्षोरस्यैः समं वर्तमानो दण्डः। स कक्षाभिक्रान्तः प्रदरः; स एव पक्षाभ्यां प्रतिक्रान्तो दृढक; स एवातिक्रान्तः पक्षाभ्यामसह्यः; पक्षाववस्थाप्योरस्याभिक्रान्तः श्येनः; विपर्यये चापं चापकुक्षिः प्रतिष्ठः सुप्रतिष्ठश्च। चापपक्षः सञ्जयः; स एवोरस्यातिक्रान्तो विजयः; स्थूलकर्णपक्षः स्थूलकर्णः; द्विगुणपक्षस्थूलो विशालविजयः; त्र्यभि-

अथ स्वमतेन दण्डादीनामन्यल्लक्षणं कक्षानङ्गीकर्तृशुक्रमतविरुद्धं बृहस्पतिमताविरुद्धमाह–पक्षकक्षोरस्यैरिति। पक्षादिभिः पञ्चभिरनीकैः, समम् अवैषम्येण, वर्तमानः स्थानगमनादि कुर्वन्, दण्डः दण्डव्यूहः। एष च प्रकृतिव्यूहः। एतद्विकारान् प्रदरादीन् लक्षयति–स इति। स दण्डः, कक्षाभिक्रान्तः पश्चादन्तःपार्श्वाभ्यां परबलाभिमुखं क्रममाणः, प्रदरः तदाख्यो दण्डविकारः। स एवेति। उक्त एव दण्डः, पक्षाभ्यां बहिःपुरस्तात्कोटिभ्यां, प्रतिक्रान्तः प्रतिलोमं क्रममाणः, अर्थात् कक्षाभिमुखमागच्छतः प्रतिबलस्य पीडनार्थं, दृढकः तदाख्यो दण्डविकारः। स एवेति। दृढक एव, अतिक्रान्तः पक्षाभ्यां बहिःकोटिभ्यामतिशयेन क्रान्तः परबलस्यान्तर्गाढं प्रविष्ट इत्यर्थः, असह्यः तदाख्यः। पक्षाविति। द्वौ पक्षौ, अवस्थाप्य स्वस्थाने स्थापयित्वा, उरस्याभिक्रान्तः उरस्येन परबलाभिमुखं क्रममाणः, श्येनः तदाख्यः। विपर्यय इत्यादि। उक्तप्रदरादिचतुष्टयवैपरीत्ये चापं चापकुक्षिः प्रतिष्ठः सुप्रतिष्ठश्च इति क्रमाच्चत्वारो व्यूहा भवन्तीत्यर्थः। तत्र कक्षाभ्यामभिक्रान्तः यः प्रदर उक्तस्तद्विपरीतः कक्षाभ्यां प्रतिक्रान्तश्चापव्यूहः। यः पक्षाभ्यां प्रतिक्रान्तो दृढक उक्तस्तस्य विपरीतः पक्षाभ्यामभिक्रान्तश्चापकुक्ष्याख्यो व्यूहः। यः पक्षाभ्यामतिक्रान्तोऽसह्य उक्तस्तस्य विपरीतः पक्षाभ्यां प्रतिक्रान्तः प्रतिष्ठाख्यो व्यूहः। यः पक्षाववस्थाप्योरस्याभिक्रान्तः श्येन उक्तस्तस्य विपरीत उरस्येन पक्षाभ्यां चाभिक्रान्तो यद्वातिक्रान्तः सुप्रतिष्ठनामा व्यूहः। एवमष्टौ दण्डव्यूहस्य विकारान् दर्शयित्वा भूयो विकारमाह–चापपक्ष इति। चापाकारौ पक्षौ यस्य स तथाभूतः, सञ्जयः तदाख्यो दण्डविकारः। स एवेति। दण्ड एव, उरस्यातिक्रान्तः उरस्येन परबलस्यान्तःप्रविष्टः, विजयः तदाख्यः। स्थूलकर्णपक्ष इति। स्थूलकर्णौ पक्षौ यस्य स तथाभूतः, स्थूलकर्णः तदाख्यः। स्थूणाकर्णः इत्यादर्शेषु पाठः। द्विगुणपक्षस्थूल इति। द्विगुणः विजयापेक्षया पक्षयोः स्थूलः, विशालविजयः तदाख्यः। द्विगुणपक्षस्थूण–

That which is of equal strength on its wings, flanks and front is a staff-like array. When its flanks are made to project in front, it is called pradara (breaking array); the same is called dṛḍhaka (firm) when its wings and

flanks are stretched back; the same is called asahya (irresistible) when its wings are lengthened; when having formed the wings the front portion is made to bulge out, it is called Śyena (an eagle like array). The same four varieties are termed cāpa (bow), cāpakukṣi (the centre of a bow), pratiṣṭha (a hold) and supratiṣṭha (a strong-hold) when they are arranged in a reverse form. When the wings are arranged like a bow it is called Sañjāya (victory); the same with projected front is called vijaya (conqueror); that with its flanks and wings formed like a staff, is called sthūlakarṇa (big ear); the same with its front made twice as strong as the conqueror, is called viśālavijaya (vast victory); that which has its wings stretched forward is called camūmukha (face of the army);

-क्रान्तपक्षश्चमूमुखः; विपर्यये झषास्यः। ऊर्ध्वराजिर्दण्डः सूची; द्वौ दण्डौ वलयः; चत्वारो दुर्जयः। इति दण्डव्यूहाः।

पक्षकक्षोरस्यैर्विषमं वर्तमानो भोगः। स सर्पसारी गोमूत्रिका वा। स युग्मोरस्यो दण्डपक्षः शकटः; विपर्यये मकरः; हस्त्यश्वरथैर्व्यतिकीर्णः शकटः पारिपतन्तकः। इति भोगव्यूहाः।

पक्षकक्षोरस्यानाम् एकीभावे मण्डलः। स सर्वतोमुखः सर्वतोभद्रः, अष्टानीको दुर्जयः। इति मण्डलव्यूहाः।

इति तु त्रिष्वादर्शेषु पठ्यते। त्र्यभिक्रान्तपक्ष इति। कक्षादित्रिकाभिक्रान्तौ पक्षौ यस्य स तथाभूतः, चमूमुखः तदाख्यः। विपर्यय इति। त्र्यभिक्रान्तोरस्यत्वे, त्र्यभिक्रान्तकक्षत्वे वा, झषास्यः तदाख्यः। ऊर्ध्वराजिरिति। उपरि परबलाभिमुखी राजिर्बलश्रेणी यस्य स तथाभूतः, दण्डः सूची तदाख्यः। द्वौ दण्डौ वलय इति। 'पक्षकक्षोरस्येषु तिर्यक्स्थितौ द्वौ दण्डौ यस्य स वलयाख्य' इति माधवः। चत्वारो दुर्जय इति। दण्डावित्यनुवृत्तं बहुवचनान्ततया विपरिणम्यते। पक्षकक्षोरस्येषु प्रत्येकं चत्वारो दण्डाः तिर्यग्दण्डाकारा बलश्रेण्यो यत्र भवेयुः स दुर्जयाख्य इत्यर्थः। इति दण्डव्यूहा इति। एवं दण्डप्रदरदृढकादयोऽष्टादशप्रकारा दण्डव्यूहा उक्ताः।

भोगव्यूहानाह-पक्षकक्षोरस्यैरिति। पक्षादिभिः, विषमं वर्तमान इति समं वर्तमानो हि उक्तः पूर्वं तद्विपरीत इत्यर्थः, भोगः तदाख्यो व्यूहः सर्पकायकुटिलावस्थानत्वादित्यर्थः। स इति। भोगव्यूहः, सर्पसारी सर्पवदेकाकारः, गोमूत्रिका वा गोमूत्रवद् बहुधा विभिन्नाकारो वा, इति द्विधेति शेषः। स इति। भोगः, युग्मोरस्यः द्विधाविभक्तदण्डाकरमध्यः, दण्डपक्षः दण्डौ एकैकदण्डाकारौ पक्षौ यस्य स तथाभूतः, शकटः तदाख्यः। विपर्यये मकर इति। द्विधाविभक्तदण्डाकारपक्षः एकदण्डाकारोरस्यो मकराख्य इत्यर्थः। हस्त्यश्वरथैरित्यादि। शकटव्यूह एव हस्त्यश्वरथैः संकीर्णः पारिपतन्तकसंज्ञ इत्यर्थः। इति भोगव्यूहा इति। अनेन प्रकारेण सर्पसार्यादयः पञ्च व्यूहा उक्ताः।

मण्डलव्यूहं लक्षयति-पक्षकक्षोरस्यानामिति। तेषाम्, एकीभावे पूर्वोक्तानीकसन्धिरूपमन्तरालं विनान्योन्यमेलने, मण्डलः तदाख्यो व्यूहः। 'सरतां सर्वतो वृत्तिर्मण्डलः' इति पूर्वं लक्षितस्येदं स्वाभिमतं लक्षणम्।

the same in reverse form is called jhaṣāsya (face of the fish). The staff

like array in which one is made to stand behind another is called sūcī (a pin-like array); when the array is of two such lines it is called valaya (aggregate), and when of four lines, it is called durjaya (an invincible array). These are the forms of staff-like arrays.

In the snake-like array wings, flanks and front are of equal depth. It is called sarpasārī (serpentine movement) or gomūtrikā (literally like the course of cow's urine). When it consists of two lines in front and has its wings arranged as in the front and has its wings arranged as in the staff-like array it is called Śakata (cart-like array); the reverse of this is called makara (crocodile-like array). The array of Śakata formed with the inclusion of elephants, horses and chariots is called Pāripatantaka. These are the varieties of snake-like formations.

When there is the unision of the wings, flanks and front in a formation it is called maṇḍala (circle). This is also called Sarvatomukha (facing all directions), Sarvatobhadra (all auspicious), aṣṭānīka (one of eight divisions) and vijaya (victory)—these are the varieties of the circle-like array.

पक्षकक्षोरस्यानाम् असंहतादसंहतः। स पञ्चानीकानामाकृति स्थापनाद् वज्रो गोधा वा। चतुर्णामुद्यानकः काकपदी वा। त्रयाणामर्धचन्द्रिकः कर्कटकशृंङ्गी वा। इत्यसंहतव्यूहाः।

रथोरस्यो हस्तिकक्षोऽश्वपृष्ठोऽरिष्टः।

पत्तयोऽश्वा रथा हस्तिनश्चानुपृष्ठमचलः।

हस्तिनोऽश्वा रथाः पत्तयश्चानुपृष्ठमप्रतिहतः।

स इति। मण्डलः, सर्वतोमुखः चतुर्दिक्षु प्रतिबलाभिमुखः, सर्वतोभद्रः सर्वतोभद्राख्यः। अष्टानीको दुर्जय इति। युग्मोरस्यश्चतुष्पक्षो द्विकक्षो मण्डलः दुर्जयसंज्ञः। इति मण्डलव्यूहा इति। बहुत्वाविवक्षया मण्डलव्यूहावित्यर्थः। अनुक्तोह्यत्वाभिप्रायं वा बहुत्वम्।

'स्थितानां पृथगनीकवृत्तिरसंहत' इति पूर्वे लक्षितस्य स्वीयं लक्षणमाह–पक्षकक्षोरस्यानामित्यादि। पक्षादीनां पञ्चानां स्थाने परबलाभिमुखगमने चासंहतत्वादसंहताख्यो व्यूहः इत्यर्थः। असंहतः पक्षकक्षोरस्यानां पञ्चानामनीकानां वज्राद्याकारेण स्थापनाद् वज्राख्यो गोधाख्य इति द्विरूपो भवतीत्याह–स पञ्चानीकानामित्यादि। चतुर्णामिति। आकृतिस्थापनादिति वर्तते। चतुर्णां पक्षयोरुरस्यस्य प्रतिग्रहस्येत्येषाम्, आकृतिस्थापनाद्, उद्यानकः काकपदो वा। त्रयाणामिति'। पक्षयोः प्रतिग्रहोर स्थान्यतरस्येत्येवं त्रयाणाम्, आकृतिस्थापनाद्, अर्धचन्द्रिकः, कर्कटक शृंङ्गी वा। इत्यसंहतव्यूहा इति। एवं षट्प्रकाराः असंहतयूहा।

एवं दण्डभोगमण्डलासंहताख्यान् भेदानभिधाय व्यूहस्यान्यांस्त्रीन् भेदानाह–रथोरस्य इति। रथमध्यः, हस्तिकक्षः द्विपा अन्तःपार्श्वयोर्यस्य स तथा, अश्वपृष्ठः, अर्थात् पत्तिपक्षश्च, अरिष्टः रिष्टमशुभं न विद्यतेऽस्मिन्निति कृत्वा तदाख्यः।

पत्तय इति। ते अर्थात् पक्षयोः, अश्वाः अर्थादुरस्ये, रथाः कक्षयोः, अनुपृष्ठं हस्तिनश्च, यस्मिन् भवन्ति स इति शेषः, अचलः तदाख्यः।

हस्तिन इत्यादि। ते पक्षयोः, अश्वाः उरस्ये, रथाः कक्षयोः, पत्तयश्चानुपृष्ठं पृष्ठे पदातयश्च, यत्र भवन्ति स इति शेषः, अप्रतिहतः तदाख्यो व्यूहः। इति दण्डभोगमण्डलासंहतव्यूहव्यूहनमुक्त्वा प्रतिव्यूहस्थापनमभिधातु सूत्रं–

When wings, flanks and front are stationed apart it is an array of detached order. When five divisions of an army are arranged in a detached order it is called vajra (diamond) or godha (allegator); when four divisions it is called udyānaka (park) or kākapadi (crow's foot); when it is three divisions it is called ardhacandrika (half moon) or karkaṭakaśṛṅgī (the claw of a crab)—these are varieties of array in detached order.

The array in which chariots form the front, elephants the wings and horses the rear is called ariṣṭa (auspicious).

The array in which infantry, cavalry, chariots and elephants stand one behind the other is called acala (immovable).

The array in which elephants, horses, chariots and infantry stand in order are behind the other other is called apratihata (invincible).

तेषां प्रदरं दृढकेन घातयेत्; दृढकमसह्येन; श्येनं चापेन; प्रतिष्ठं सुप्रतिष्ठेन; सञ्जयं विजयेन; स्थूलकर्णं विशालविजयेन; पारिपतन्तकं सर्वतोभद्रेण। दुर्जयेन सर्वान् प्रतिव्यूहेत।

पत्त्यश्वरथद्विपानां पूर्वं पूर्वमुत्तरेण घातयेत्। हीनाङ्गमधिकाङ्गेन चेति।

अङ्गदशकस्यैकः पतिः पदिकः; पदिकदशकस्यैकः सेनापतिः;

तस्य प्रतिव्यूहस्थापनमिति। तस्य उक्तस्य बलव्यूहस्य प्रतिबलव्यूहस्थापनमभिधीयत इति सूत्रार्थः।

उक्तानां प्रदरादीनां व्यूहानां मध्ये कतमं कतमेन प्रतिव्यूहेन घातयेदित्याकाङ्क्षायामाह–तेषां प्रदरमित्यादि। दण्डव्यूहभेदतया मण्डलव्यूहभेदतया चोक्तो यो दुर्जयव्यूहः, स सर्वेषामपि व्यूहानां प्रतिघातक्षमः प्रतिव्यूहो भवतीत्याह–दुर्जयेन सर्वान् प्रतिव्यूहेतेति।

व्यूहानां प्रत्येकं प्रतिव्यूहनियममुक्त्वा सेनाङ्गानां पत्त्यादीनां प्रतिबलनियममाह–पत्त्यश्वरथद्विपाना-मित्यादि। पत्तिमश्वेन अश्वं रथेन रथं द्विपेन च घातयेदित्यर्थः। हीनाङ्गमिति। अवरसारपरिमाणम् अङ्गम्, अधिकाङ्गेन अधिकसारपरिमाणेनाङ्गेन, घातयेदित्यनुषज्यते। चकारो वाक्यार्थसमुच्चये। इतिशब्दः प्रतिबलनियमविधिसमाप्त्यर्थः।

सेनाङ्गानां विभागसंघातादिकर्मकर्तव्यत्वसूचकास्तदधिपतिना संकेताः कल्पनीया इति वक्ष्यति। तमेवाधिपतिं लक्षयंस्त्रिधा विभज्य दर्शयति–अङ्गदशकस्येति। इहाङ्गशब्देन प्रधानभूते रथहस्तिरूपे व्यूढे सेनाङ्गे गृह्येते, तेन रथदशकहस्तिदशकयोरित्यर्थः, एकः पतिः भर्ता, पदिकः तत्संज्ञः। ननु अस्मिन् प्रधानाङ्गदशकारब्धे व्यूहेऽन्ययोरप्यङ्गयोरश्वपत्तिरूपयोरवश्यम्भावात् तत्संख्याप्यभिधानीया। सत्यं, किन्तु अर्थसिद्धा सेति कृत्वा नोक्ता। अर्थसिद्धिश्चेत्थम्–एकैकस्य रथस्य हस्तिनो वा पुरोयायिनः पञ्च पादगोपाः पञ्चेत्याहत्य दशानामश्वानां योगाद् रथदशकेनाश्वशतकमाक्षिप्तं भवति। तथा एकैकस्याश्वस्य त्रयः पुरोयायिनः पुरुषास्त्रयः पादगोपा इत्याहत्य षण्णां पत्तीनां योगादश्वशतकेन पत्तीनां षट्शतमाक्षिप्तं भवतीति। एवञ्च

रथानां हस्तिनां वा दशकस्याश्वशतकपत्तिषट्शताभ्यां युक्तस्य नेता पदिकसंज्ञ इत्युक्तं भवति। पदिकदशकस्येति। पदिकानां दशकस्य स्वस्वनेय-

Of these the conqueror should assail the pradara (breaking point) by means of the dṛḍhaka (firmness), dṛḍhaka by means of asahya (irresistible), Śyena (eagle-line) with cāpa (bow), pratiṣṭha (hold) by means of supratiṣṭha (strong hold); Sañjaya (victory) with vijaya (conqueror); sthūlakarṇa (big ear) by means of viṣālavijaya (vast victory) Pāripatantaka with Sarvatobhadra. By durjaya (invincible array) all the arrays of the enemy may be resisted.

Of infantry, cavalry, chariots and elephants he should strike the earlier ones with subsequent ones. A small constituent of the army may be assailed with a bigger one.

For every ten members each of the constituents of the army these should be one commander called padika, ten padikas under a senāpatī, ten senāpatis under a nayaka (leader).

तद्दशकस्यैको नायक इति। स तूर्यघोषध्वजपताकाभिः व्यूहाङ्गानां संज्ञाः स्थापयेद् अङ्गविभागे सङ्घाते स्थाने गमने व्यावर्तने प्रहरणे च।

समे व्यूहे देशकालसारयोगात् सिद्धिः।।

यन्त्रैरुपनिषद्योगैस्तीक्ष्णैर्व्यासक्तघातिभिः।
मायाभिर्दैवसंयोगैः शकटैर्हस्तिभूषणैः।।
दूष्यप्रकोपैर्गोयूथैः स्कन्धावारप्रदीपनैः।
कोटीजघनघातैर्वा दूतव्यञ्जनभेदनैः।।
दुर्गं दग्धं हृतं वा ते कोपः कुल्यः समुत्थितः।
शत्रुराटविको वेति परस्योद्वेगमाचरेत्।।

बलसहितस्य, एकः पतिः, सेनापतिः तत्संज्ञः। तद्दशकस्येति। सेनापतिदशकस्य, एकः पतिः, नायकः इति आख्यायत इति शेषः। स इत्यादि। नायकः, व्यूहाङ्गानां व्यूढहस्त्यादीनाम्, अङ्गविभागे संहतानामङ्गानां विभजने, संघाते विभक्तानां पिण्डीभावे, स्थाने गतिनिवृत्तौ, गमने गतिकरणे, व्यावर्तने अभियोधनात् प्रत्यावर्तने, प्रहरणे च अभियोधने च करणीये इति शेषः। तूर्यघोषध्वजपताकाभिः संज्ञाः स्थापयेत् तूर्यघोषविशेषैः ध्वजपताकाविशेषैश्च संकेतान् स्थापयेत्। ईदृशे तूर्यघोषे श्राविते विभागसंघातादिष्विदमिदं कर्त्तव्यम् ईदृशीषु ध्वजपताकासु प्रदर्शितास्विदमिदं कर्त्तव्यमिति संकेतान् कल्पयित्वानुतिष्ठेदित्यर्थः।

समे व्यूह इति। दण्डादिव्यूहेषु स्वबलपरबलयोः समानेषु सत्सु, देशकालसारयोगात् देशः समविषमादिः कालः रात्र्यादियोधिनां रात्र्यादिः सारः शौर्यादिः एषां योगात्, सिद्धिः जयः, भवतीति शेषः।।

श्लोकत्रयमेकान्वयमाह–यन्त्रैरित्यादि। यन्त्रैः जामदग्न्यादिभिः, उपनिषद्योगैः औपनिषदिके वक्ष्यमाणैर्विषधूमाम्बुदूषणादिभिरुपायैः, व्यासक्तघातिभिस्तीक्ष्णैः अन्यासक्तचित्तपुरुषहननशीलैस्तीक्ष्ण-

संज्ञितैर्गूढपुरुषैः, मायाभिः असदर्थप्रदर्शनीभिरिन्द्रजालविद्याभिः, दैवसंयोगैः राज्ञो दैवसाक्षात्कारख्यापनैः, हस्तिभूषणैः शकटैः हस्त्युचितवेषाच्छादनादिच्छन्नस्वरूपैरनोभिः, दूष्यप्रकोपैः शत्रुदूष्याणां कोपोत्पादनैः, गोयूथैः अग्रे गोवृन्दनिवेशनैः, स्कन्धावारप्रदीपनैः शिबिरसन्दीपनैः, कोटीजघनघातैर्वा कोट्योः पक्षयोः जघनयोः कक्षयोश्च घातैरकाण्डप्रहारदानैर्वा, दूतव्यञ्जनभेदनैः दूतवेषाणां चाराणामुपजापकरणैश्च, परस्योद्वेगमाचरेदित्यग्रिमेणान्वयः। शत्रोर्भयोत्पादनेनैव स्वार्थमन्विच्छेत् न

The constituent of the array of the army should be called after the names of trumpet sounds, flags and ensigns, in the matter of gathering the forces, in camping, in marching, is turning back and in making onslaughts.

In the array of equal strength the success depends upon the place and time of action.

By the display of the army, by the use of contrivances, by the activities of fiery spies, by witchcraft, by proclaiming the divinity of the king, by cart covered with the housings and ornaments of elephants;—

by inciting traitors, by arranging cattle in front, by setting fire to the camp, by destroying the wings and rear forces of the enemy, by sowing dissension through men disguised as servants;—

or by telling the enemy that his fort was burnt, stormed, or some member of his family or an enemy or a wild chief has risen in rebellion;—by such and other means the conqueror should cause excitement to the army.

एकं हन्यान्न वा हन्यादिषुः क्षिप्ता धनुष्मता।
प्राज्ञेन तु मतिः क्षिप्ता हन्याद् गर्भगतानपि।।

इति कौटलीयार्थशास्त्रे साङ्ग्रामिके दशमाधिकरणे षष्ठोऽध्यायः,
दण्डभोगमण्डलासंहतव्यूहव्यूहनं तस्य प्रतिव्यूहस्थापनं च।
आदितश्चतुस्त्रिंशच्छततमः।।
एतावता कौटलीयार्थशास्त्रस्य सांग्रामिकं
दशममधिकरणं समाप्तम्।।

–त्वगतिकगतिभूतेन सन्दिग्धजयेन युद्धेनेत्यर्थः। भूयोऽप्युद्वेगहेतूनाह–दुर्गमिति। दग्धं हतमित्यादौ इतिशब्दः प्रत्येकं सम्बध्यते। दुर्गं दग्धमिति तव दुर्गदाहो जात इत्यनेन हेतुना वा, हतमिति वा तव दुर्गं स्वायत्तीकृतमित्यनेन वा, ते कुल्यः कोप इति वा त्वत्कुलभवपुरुषनिमित्तो जनपददाहाद्यनर्थरूपः कोप उत्पन्न इत्यनेन वा, ते शत्रुः सामन्तः, समुत्थित इत्यनेन वा, ते आटविकः समुत्थित इत्यनेन वा, परस्योद्वेगम् आचरेत्।।

युद्धान्मन्त्रो बलवत्तरः कार्यसिद्धावित्याह–एकमित्यादि। धानुष्केण बाणः प्रयुक्तः परं हन्यान्न वेति संशयः, घ्नन्नपि वा एकमेव हन्यान्न ततोऽधिकम्। प्रज्ञावता तु केवला मतिरात्मनः प्रयुक्ता परं हन्यादेव,

घ्नती च नैकं परं किन्तु तदीयान् गर्भस्थानपि जनान् हन्तीत्यहो मतेरिष्वपेक्षया शक्त्यतिशयवत्तेत्यर्थः। अत एवाहुः-

"युद्धं सर्वात्मना त्याज्यं राज्यकामेन धीमता।
उपायैस्त्रिभिरादानमर्थस्याह बृहस्पतिः।।" इति।।
व्याख्यायामर्थशास्त्रस्य श्रीमूलाख्यानभाजने।
साङ्ग्रामिकाधिकरणं दशमं समपूर्यत।।

इति श्रीवञ्चिमण्डलमहाराजाश्रितस्य ताम्रपर्णीतीरवर्तितरुवाग्रहाराभिजनस्य
श्रीसीताम्बाश्रीरामसुब्रह्मण्यार्यसूनोर्महामहोपाध्याय
गणपतिशास्त्रिणः कृतिषु कौटलीयार्थशास्त्रव्याख्यायां
सांग्रामिके दशमेऽधिकरणे षष्ठोऽध्यायः, दण्डभोगमण्डलासंहतव्यूहव्यूहनं तस्य प्रतिव्यूहस्थापनम्,
आदितश्चतुस्त्रिंशच्छततमः।।
सांग्रामिकं दशममधिकरणं समाप्तम्।

An arrow sent by an archer may or may not kill a single man, but skillfully devised intrigue by wise men can kill even those who are in the womb.

Thus the one hundred and thirty fourth chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the sixth chapter of the tenth Adhikaraṇa dealing with the sections 'Array of army like a staff, a snake, a circle or in detached order; and Array of the army against that of an enemy.

The tenth Adhikaraṇa 'Relating to war' is concluded.

संघवृत्तम्–एकादशमधिकरणम्।

BOOK ELEVEN : THE CONDUCT OF CORPORATIONS

Chapter 135

160, 161. प्रक० भेदोपादानानि, उपांशुदण्डश्च।

Sections 160 : Causes of Dissension 161 : Secret Punishment

सङ्घलाभो दण्डमित्रलाभानामुत्तमः। सङ्घा हि संहतत्वादघृष्याः परेषाम्।ताननुगुणान् भुञ्जीत सामदानाभ्याम्। विगुणान् भेददण्डाभ्याम्।

काम्बोजसुराष्ट्रक्षत्रियश्रेण्यादयो वार्ताशस्त्रोपजीविनः। लिच्छिविकव्रजिकमल्लक-मद्रककुकुरकुरुपाञ्चालादयो राजशब्दोपजीविनः।

अथ सङ्घवृत्तं नामैकादशमधिकरणमारभ्यते। विजिगीषुभूमौ तदनन्तरभूमौ वा वास्तव्यानां प्रत्येकक्षुद्रत्वेऽपि संघीभावासादितशक्तीनां वार्ताशस्त्रोपजीविनामभटानामेव स्वायत्तीकरणोपाया अस्मिन्नधिकरणे सूत्रद्वयेनाभिधीयन्ते। तत्र प्रथमं

भेदोपादानानीति सूत्रम्। भेदानां संघविश्लेषोपायानाम् उपादानानि प्रयोगा उच्यन्त इति सूत्रार्थः।

संघलाभ इत्यादि। संघस्य यथोक्तरूपस्य मुख्याधिष्ठितस्य लाभः सहायत्वेन प्राप्तिः, दण्डमित्रलाभानाम् उत्तमः दण्डमित्रोभयलाभा ये बहुरूपास्तेषां मध्ये प्रशस्तः, सैन्यत्वेन मित्रत्वेन, चोपयोक्तुं योग्यत्वादित्यभिप्रायः। अस्त्वेवं संघलाभो दण्डमित्रोभयलाभप्रकारः कश्चित्, तस्य कथं तदुत्तमत्वं तत्राह–संघा हीति। ते हि, संहतत्वात् संघातासादितशक्तित्वात्, अधृष्याः परेषां शत्रूणामजय्याः। यद्यपि भृतादिभटानामपि संहतत्वमस्ति, तथापि तद् अन्यकारितं, संघस्य तु तत् स्वोत्साहकारितमित्यन्यापेक्षया शक्तिमत्तरमिति भावः। तानिति। संघान्, अनुगुणान् अविरुद्धान्, सामदानाभ्यां भुञ्जीत स्वायत्तीकुर्यात्। विगुणान् प्रतिकूलान्, भेददण्डाभ्यां भुञ्जीतेति संबध्यते।

के ते संघिन इत्याह—काम्बोजेत्यादि। काम्बोजेषु सुराष्ट्रेषु च जनपदविशेषयोर्या: क्षत्रियश्रेण्यस्तदादय: आदिग्रहणाद् वैश्यादिश्रेण्योऽपि गृह्यन्ते, तदन्तर्गता जना इत्यर्थ:, वार्ताशस्त्रोपजीविन:। लिच्छिविकेत्यादि। लिच्छिविकादिदेशसप्तकवास्तव्या आदिपदादन्धकवृष्ण्यादयश्च, राजशब्दोपजीविन: राजनाममात्रं वहन्त: संघमुपजीवन्तीत्यर्थ:।

The acquisition of the help of corporations is better than the acquisition of an army, a friend or profits. Corporations are invincible for the enemies because of their compact nature. The conqueror should secure and enjoy the services of corporation after winning them over by conciliation and gifts. Those who are opposed may be destroyed by dissension and punishment.

The corporations of warrior of the kṣatriya caste belonging to the countries of the Kamboja and Surāṣtra live by agriculture and wielding weapons. The corporations of Licchivika, Vrajaka, Mallaka, Madraka, Kukkura, Kuru, Pāñcāla and other countries live by the title of a Rāja (king).

सर्वेषामासन्ना: सत्रिण: सङ्घानां परस्परन्यङ्गद्वेषवैरकलहस्थानान्युपलभ्य क्रमाभिनीतं भेदमुपचारयेयु: -'असौ त्वा विजल्पति' इति। एवमुभयत:। बद्धरोषाणां विद्याशिल्पद्यूत-वैहारिकेष्वाचार्यव्यञ्जना बालकलहानुत्पादयेयु:। वेशशौण्डिकेषु वा प्रतिलोमप्रशंसाभि: सङ्घमुख्यमनुष्याणां तीक्ष्णा: कलहानुत्पादयेयु:; कृत्यपक्षोपग्रहेण वा।

कुमारकान् विशिष्टच्छन्दिकया हीनच्छन्दिकानुत्साहयेयु:।

सर्वेषामिति। उक्तानां वार्ताशस्त्रोपजीविनां राजशब्दोपजीविनां चेत्युभयविधानां, सङ्घानाम्, आसन्ना: केनापि निमित्तेनासत्तिं प्राप्ता भूत्वा, सत्रिण:, परस्परन्यङ्गद्वेषवैरकलहस्थानानि परस्परस्य न्यङ्गं दोषवचनं द्वेषो वाक्पारुष्यादिकृतो रोष: वैरम् अपकारादिनिमित्तं द्रोहचिन्तनं कलहस्थानं परप्रार्थितैकामिषप्रार्थित्वादि एतानि, उपलभ्य छिद्रभूतान्यासाद्य, क्रमाभिनीतं क्रमेणाभिमुखतां नीतं सङ्घिनं, भेदं विश्लेषम्, उपचारयेयु: प्रापयेयु:। कथमिति, असौ त्वा त्वां, विजल्पति अपवदति, इति उक्त्वेति शेष:। एवमुभयत इति। अनेन प्रकारेण भेद्यावुभावपि भेदमुपचारयेयुरित्यर्थ:। बद्धरोषाणामिति। अन्योन्यरूढामर्षाणां सङ्घिनां, विद्याशिल्पद्यूत-वैहारिकेषु विद्या आन्वीक्षिक्यादि: शिल्पम् अस्त्रशिक्षादि द्यूतं प्रसिद्धं वैहारिकं प्रश्नोत्तरादि एतेषु विषये, आचार्यव्यञ्जना: आचार्यवेषा: सत्रिण:, बालकलहान् बालानां पुत्राणामध्याप्यमानानां कलहान्, उत्पादयेयु: 'असौ त्वामज्ञमाचष्ट' इत्यादिभिर्भेदवचनैरित्यभिप्राय:। वेशशौण्डिकेषु वेति। वेशशब्द इह वेश्यावृत्ति: वेश्यासु सुराविक्रयिषु च प्रसक्तानामिति शेष:, सङ्घमुख्यमनुष्याणां संघेषु ये मुख्यपुरुषास्तेषां, प्रतिलोमप्रशंसाभि: प्रतीपश्लाघाभि: अर्थात् स्वप्रेरितवेश्याशौण्डिककृताभि:, तीक्ष्णा:, कलहान् परस्पर-वाक्कलहान्, उत्पादयेयु:। कृत्यपक्षोपग्रहेण वेति। संघमुख्यमनुष्याणां ये कृत्या: क्रुद्धलुब्धभीतावमानिता: तेषामुपग्रहेण स्वानुकूलीकरणेन वा, कलहान् उत्पादयेयु:।

कुमारकानिति। हीनच्छन्दिकान् इष्टभोग्यवृत्तिश्छन्दिका सा हीना अल्पा प्रभूतवृत्त्यपेक्षया येषां तांस्तथाभूतान्, कुमारकान् संघेषु मुख्येभ्य: किञ्चिदवरा राजपुत्रकल्पा: कुमारका: तान्, विशिष्टच्छन्दिकया विशिष्टया उत्कृष्टया छन्दिकया तत्तुल्येन कुमारान्तरेणानुभूयमानया, उत्साहयेयु: अमर्षवत:

Spies gaining access to all these should find out feelings of jealousy, hatred and other causes and sow the seeds of a well-planned dissension among them and should tell one of them—"this man decries you." This should be tried on both the parties—spies disguised as teachers should create childish embroils among those of mutual enmity on occasions of disputes on certain points of science, arts, gambling or sports. Fiery spies may generate quarrel among the leaders of corporations by praising inferior leaders in taverns and theatres or by taking sides with despised people.

Princes of low birth may be equated with those of high born (in social matters).

विशिष्टानां चैकपात्रं विवाहं हीनेभ्यो वारयेयुः। हीनान् वा विशिष्टैरेकपात्रे विवाहे वा योजयेयुः। अवहीनान् वा तुल्यभावोपगमने कुलतः पौरुषतः स्थानविपर्यासतो वा। व्यवहारमवस्थितं वा प्रतिलोमस्थापनेन निशामयेयुः। विवादपदेषु वा द्रव्यपशुमनुष्याभिघातेन रात्रौ तीक्ष्णाः कलहानुत्पादयेयुः। सर्वेषु च कलहस्थानेषु हीनपक्षं राजा कोशदण्डाभ्यामुपगृह्य प्रतिपक्षवधे योजयेत्, भिन्नानपवाहयेद् वा। एकदेशे समस्तान् वा निवेश्य भूमौ चैषां पञ्चकुलीं दशकुलीं वा कृष्यां निवेशयेत्। एकस्था हि शस्त्रग्रहणसमर्थाः स्युः। समवाये चैषामत्ययं स्थापयेत्।

कुर्युः, 'समाने कुमारत्वे त्वं हीनवृत्तिरन्यो विशिष्टवृत्तिरि' त्याद्युक्त्वेति भावः।

विशिष्टानां चेति। उत्कृष्टानाम्, एकपात्रम् एकपङ्क्तिभोजनं, विवाहं कन्यादानादानसंबन्धं, हीनेभ्यः वारयेयुः। वारणे ह्युभयेषां विरोधः स्यादिति भावः। भेदप्रकारान्तरमाह–हीनान् वेति। निकृष्टान्, विशिष्टैः सह, एकपात्रे विवाहे वा, योजयेयुः निर्बन्धवतः कुर्युरित्यर्थः। तथाकरणे हि विशिष्टास्तन्मतमननुवर्तमानास्तेभ्यो भिन्नाः स्युरित्यभिप्रायः। कुलेन पौरुषेण स्थानभेदेन वा हीनान्। विशिष्टतुल्यत्वाङ्गीकारणायां निर्बन्धवतः कुर्युरित्याह–अवहीनान् वेत्यादि। व्यवहारमवस्थितमित्यादि। सङ्घेषु यं कमपि व्यवहारमुत्पन्नं तन्मुख्यकृतनिर्णयमित्यर्थः, प्रतिलोमस्थापनेन निर्णयविपरीतन्यायसमर्थनेन, निशामयेयुः बोधयेयुः अर्थाद् व्यवहर्तारम्। विवादपदेषु वेति। तीक्ष्णाः, रात्रौ, द्रव्यपशुमनुष्याभिघातेन संधिसंबन्धिनां द्रव्यादीनामभिघातेन स्वयंकृतेन सङ्घिपरस्परकृततया मिथ्याख्यापितेनेत्यर्थः, विवादपदेषु, कलहान् साहसादिविवादपदप्रयोजकान् परस्परकलहान्, उत्पादयेयुः। ईदृशेषु सर्वप्रकारेषु कलहस्थानेषु राजा हीनपक्षं हिरण्यादिदानेन दण्डेन च स्वपक्षे प्रवेश्य प्रतिपक्षवधे प्रेरयेद्, भिन्नान् संघादन्यत्र नयेद् वेत्याह–सर्वेषु चेत्यादि। ये भिन्नास्तान् सर्वान् वा एकस्मिन् देशे निवेश्य एषां भूमौ कुलपञ्चकं कुलदशकं वा कृषिकर्मणि नियोजयेदित्याह–एकदेश इत्यादि। समस्तानामेकस्थानस्थितेः फलमाह–एकस्था हीत्यादि। अविप्रकीर्णा हि शस्त्रग्रहणकाले लघुसमुत्थाः स्युरिति भावः। समवाये चैषामिति। अपवाहितनिवेशितानां सङ्घिनां संघाभावे, अत्ययं दण्डं, स्थापयेत्।

They may prevent the superiors from inter-dining or to inter-marry with inferiors. Or they may persuade the inferiors to inter-dine or inter-marry with superiors. People of low birth, bravery and social position may

be persuaded to claim equal status with superiors. They may misrepresent the legal position to one of the disputants to create confusion. Fiery spies may bring about quarrel among them at night by destroying the things, beasts or persons concerned in some legal disputes. In all such disputes, the conqueror should help the inferior party with money and coercion and set them to destroy the enemy or he should remove them to some other place. All such people may be settled in a region and make them to cultivate lands under the designation of "five households" and "ten households". If only they are placed together they could be used to wield weapons. Specified fines should also be fixed against any treacherous combinations among them.

राजशब्दिभिरवरुद्धमवक्षिप्तं वा कुल्यमभिजातं राजपुत्रत्वे स्थापयेत्। कार्तान्तिकादिश्चास्य वर्गो राजलक्षण्यतां सङ्घेषु प्रकाशयेत्। सङ्घमुख्यांश्च धर्मिष्ठानुपजपेत्– 'स्वधर्ममुष्य राज्ञः पुत्रे भ्रातरि वा प्रतिपद्यध्वम्' इति। प्रतिपन्नेषु कृत्यपक्षोपग्रहार्थमर्थं दण्डं च प्रेषयेत्। विक्रमकाले शौण्डिकव्यञ्जनाः पुत्रदारप्रेतापदेशेन 'नैषेचनिकम्' इति मदनरसयुक्तान् मद्यकुम्भान् शतशः प्रयच्छेयुः।

चैत्यदैवतद्वाररक्षास्थानेषु च सत्रिणः समयकर्मनिक्षेपं सहिरण्याभिज्ञानमुद्राणि हिरण्यभाजनानि च प्ररूपयेयुः; दृश्यमानेषु च सङ्घेषु 'राजकीयाः' इत्यावेदयेयुः। अथावस्कन्दं दद्यात्।

राजशब्दोपजीविनां सङ्घविश्लेषणोपायमाह–राजशब्दिभिरिति। राजनामधारकैर्लिच्छिविकादिभिः, अवरुद्धम्, अवक्षिप्तं वा परिभूतं वा, कुल्यं कुलोत्पन्नम्, अभिजातं गुणवन्तं, राजपुत्रत्वे स्थापयेत् 'असौ राजपुत्र' इति कल्पयेत्। कार्तान्तिकादिश्च दैवज्ञसामुद्रिकादिश्च, वर्गः, अस्य राजपुत्रत्वे स्थापितस्य, राजलक्षण्यतां राजलक्षणयुक्तत्वं, सङ्घेषु राजशब्दयधिष्ठितेषु, प्रकाशयेत्। सङ्घमुख्यांश्च धर्मिष्ठान्, उपजपेत्, कथमिति, अमुष्य राज्ञः पुत्रे भ्रातरि वा राजशब्द्यवरुद्धे विषये, स्वधर्मम् अवरोधादिक्लेशनिवारणलक्षणं, प्रतिपद्यध्वं स्वीकुरुध्वम्, इति अनेन प्रकारेण। प्रतिपन्नेषु अभ्युपेतोपजापेषु सङ्घमुख्येषु, कृत्यपक्षोपग्रहार्थं कृत्यानां क्रुद्धलुब्धभीतादीनां स्वपक्षेऽनुप्रवेशनार्थम्, अर्थं द्रव्यं, दण्डं च सैन्यं च, प्रेषयेत्। अनेनोपायेन राजशब्दिनः सङ्घेभ्यो भिन्ना भवेयुरित्यभिप्रायः। विक्रमकाल इति। विक्रमावसरे प्राप्ते, शौण्डिकव्यञ्जनाः सौरिकवेषाः सत्रिणः, पुत्रदारप्रेतापदेशेन पुत्राणां दाराणां च स्वीयानां मरणं निमित्तं कल्पयित्वेत्यर्थः, नैषेचनिकमिति मृतोद्देशेन देयमिदं मद्यं नैषेचनिकाख्यमिति, वदन्त इति शेषः, मदनरसयुक्तान् मदकरविषयुक्तान्, मद्यकुम्भान्, शतशः, प्रयच्छेयुर्दद्युः, अर्थात् सङ्घेभ्यः।

उपायान्तरमाह–चैत्यदैवतद्वाररक्षास्थानेषु चेति। देवालयदैवतद्वारेषु रक्षास्थानेषु च, सत्रिणः, समयकर्मनिक्षेपं सङ्घपतिना सह संवित्करणार्थं निक्षेपद्रव्यं, सहिरण्याभिज्ञानमुद्राणि हिरण्यैरभिज्ञानमुद्रया च सहितानि, हिरण्यभाजनानि च, प्ररूपयेयुः सङ्घा यथा जानीयुस्तथा प्रकाशयेयुः। दृश्यमानेषु, सङ्घेषु, कस्यैते हिरण्यभारा इति साक्षात् पृच्छत्स्विति

He may install as the heir apparent a prince born of high family but

dethroned or imprisoned by those corporates having a claim to the suffix 'Rāja' (king). Spies under the guise of astrologers and others should bring to the notice of the corporations, the royal characteristics of the prince. He should induce the virtuous leaders of the corporations to acknowledge their duty to the king (prince) and his son or brother. Once they are prevailed upon the conqueror should send men and army for the purpose of winning over other partisans. On occasion of any affray spies under the guise of vintners should send potfuls of liquor mixed with the Madana juice for the purpose of toast (naiṣecanika) to the departed son or wife. Near the steps of altars, temple and other places guarded by sentinals, spices should declare the existence of a treasure with gold and gold coins, and once the corporates are convinced it may declared as "belonging to the king." When the corporates make a claim for that they may be challenged for war.

सङ्घानां वा वाहनहिरण्ये कालिके गृहीत्वा सङ्घमुख्याय प्रख्यातं द्रव्यं प्रयच्छेत्। तदेषां याचिते 'दत्तममुष्मै मुख्याय' इति ब्रूयात्।

एतेन स्कन्धावाराटवीभेदो व्याख्यातः।

सङ्घमुख्यपुत्रमात्मसम्भावितं वा सत्री ग्राहयेत्–'अमुष्य राज्ञः पुत्रस्त्वं शत्रुभयादिह न्यस्तोऽसि इति; प्रतिपन्नं राजा कोशदण्डाभ्याम् उपगृह्य सङ्घेषु विक्रमयेत्; अवाप्तार्थस्तमपि प्रवासयेत्।

बन्धकीपोषकाः प्लवकनटनर्तकसौभिका वा प्रणिहिताः स्त्रीभिः

शेषः, राजकीया इति आवेदयेयुः कथयेयुः तत्त्वगोपनाभिनयार्थमिति भावः। इह 'राजकीया' इत्यस्य स्थाने 'विक्रीताः' इति पाठो दृश्यते। स तु न हृद्यः। अथ एवं भेदसंविधानानन्तरम्, अवस्कन्दं दद्यात् सङ्घस्य बलाक्रमणं कुर्यात्।

अन्यं भेदोपायमाह–संघानां वेति। तेषां, वाहनहिरण्ये वाहनं हिरण्यं च, कालिके गृहीत्वा नियतकालप्रतिदेयमृणं कालिकं तत्त्वेनादाय, सङ्घमुख्याय, द्रव्यं कालप्रत्यर्पणीयं हिरण्यादि, प्रख्यातं प्रयच्छेत् बहुजनसमक्षं प्रत्यर्पयेत्। तदिति। तद् द्रव्यम्, एषां सङ्घानां, याचिते प्रत्यर्पयेति सङ्घैर्याच्ञायां कृतायामित्यर्थः, 'दत्तममुष्मै मुख्याय' इति ब्रूयात्। तेन हि मुख्यसङ्घयोर्भेदो भवेदिति भावः।

य एष राजशब्द्यादिभेदने उपायविधिरुक्तः, तमेव स्कन्धावारप्रविष्टाटविकभेदनेऽप्यति–दिशति–एतेनेत्यादि।

उपांशुदण्ड इति सूत्रम्। रहोवध उच्यत इति सूत्रार्थः।

सङ्घमुख्यपुत्रमिति। तम्, आत्मसम्भावितम्' अहं महानि 'त्यहङ्कारवन्तं, स्त्री, ग्राहयेत् बोधयेत्। कथमिति, अमुष्य राज्ञः विजिगीषोः, पुत्रः त्वं, शत्रुभयाद्, इह सङ्घे, न्यस्तः असि इति। प्रतिपन्नमिति। अभ्युपगतोपजापं तं, राजा कोशदण्डाभ्याम् आत्मदत्ताभ्याम्, उपगृह्य ससहायं कृत्वा, सङ्घेषु विक्रमयेत्। अवाप्तार्थ इत्यादि। सङ्घमुख्यपुत्रविक्रमणेन सङ्घनिग्रहरूपे स्वार्थे सिद्धे तमपि हन्यादित्यर्थः।

प्रकारान्तरमाह–बन्धकीपोषका इति। कुलटापोषकाः, प्लवकादयो

Or having seized the draught animal and gold as security deposit from corporations some major items may be presented to the chieftain. When the corporation comes forward to redeem it, it may be told that it was already given to the chief.

This explains the method of sowing the seeds of dissension in camps and wild tribes.

Or a spy may instigate a self-confident son of the chief of corporation : "your are the son of such and such a king; and are kept here under the apprehension of danger from the enemies; and when he is deluded by this belief the conqueror may assist him with money and men and set him against the corporations and when the object in view is realised the conqueror may banish him.

परमरूपयौवनाभिः संघमुख्यानुन्मादयेयुः। जातकामानामन्यतमस्य प्रत्ययं कृत्वान्यत्र गमनेन प्रसभहरणेन वा कलहानुत्पादयेयुः। कलहे तीक्ष्णाः कर्म कुर्युः–'हतोऽयमित्थं कामुकः' इति।

विसंवादितं वा मर्षयमाणमभिसृत्य स्त्री ब्रूयात्–'असौ मां मुख्यस्त्वयि जातकामां बाधते; तस्मिन् जीवति नेह स्थास्यामि' इति घातमस्य प्रयोजयेत्।

प्रसह्यापहृता वा वनान्ते क्रीडागृहे वापहर्तारं रात्रौ तीक्ष्णेन घातयेत्। स्वयं वा रसेन। ततः प्रकाशयेद–'अमुना मे प्रियो हतः' इति।

जातकामं वा सिद्धव्यञ्जनः सांवननिकीभिरोषधीभिः संवास्य

वा व्याख्यातचराः, प्रणिहिताः गूढपुरुषकर्मणि व्यापारिताः, स्त्रीभिः, परमरूपयौवनाभिः, सङ्घमुख्यान्, उन्मादयेयुः मोहयेयुः। जातकामानामिति। तथाभूतानां सङ्घमुख्यानाम्, अन्यतमस्य, प्रत्ययं कृत्वा तत्कामितस्त्रीसमागमसङ्केतविश्वासं जनयित्वा, अन्यत्र ततोऽपरस्मिन् संङ्घमुख्ये, गमनेन, प्रसभहरणेन वा अर्थात् 'त्वदभिसरणप्रस्थितामसावन्यः सङ्घमुख्यो बलादपहृतवानि'ति मिथ्याकल्पितेन, कलहान् उत्पादयेयुः। कलह इत्यादि। सङ्घमुख्यमिथः कलहे प्रवृत्ते, तीक्ष्णाः, कर्म सङ्घमुख्यरहोवधलक्षणं, कुर्युः, स्वयं हत्वा च 'कामुकोऽयं प्रतिकामुकेनैवं हत' इति ख्यापयेयुरित्यर्थः।

विसंवादमसहमाने सङ्घमुख्ये विधिरेष उक्तः। सहमाने विधिमाह–विसंवादितं वा मर्षयमाणमित्यादि। अभिसृत्य स्वयमुपगम्य। मुख्यः सङ्घमुख्यः। बाधते वारयति। इह त्वदन्तिके। इति, उक्त्वेति शेषः।

प्रकारान्तरमाह–प्रसह्यापहृता वेति। एकेन कृतसङ्केता तदन्येन बलादपहृता वा, वनान्ते वनसमीपे, क्रीडागृहे वा सङ्केतस्थानभूते, अपहर्तारं, रात्रौ गूढमित्यर्थः, तीक्ष्णेन घातयेत्। स्वयं वा रसेन पानादौ विषमिश्रणेन घातयेत्। ततः घातानन्तरं, प्रकाशयेत् प्रख्यापयेत्, कथमिति, अमुना प्रतिकामुकेन, मे प्रियो हत इति।

जातकामं वेति। स्त्रियामुत्पन्नोत्कण्ठं, सिद्धव्यञ्जनः सिद्धवेषः सत्री,

Keepers of prostitutes or dancers, players and actors may gain access and persuade the chiefs of corporations by presenting women with bewitching beauty and youth. By creating an impression in their mind that the woman had gone to another or was carried away by another lover a quarrel may be initiated. In the ensuing altercation fiery spies may perform their task and declare "he has been killed in consequence of his love".

A woman having been forgiven by her estranged lover may approach the chief and say : "This chief is creating trouble since I love you and while he is alive it will not be possible for one to come to your house" and thus induce the former to slay the latter.

A woman forcefully kidnapped at night and led to a forest arbour may cause his death by fiery spies. 'She may kill the fellow herself by using poison. Then she may declare that this person of mine has been murdered by such and such a person.

रसेनातिसन्धायापगच्छेत्। तस्मिन्नपक्रान्ते सत्रिणः परप्रयोगमभिशंसेयुः।

आढ्यविधवा गूढाजीवा योगस्त्रियो वा दायनिक्षेपार्थं विवदमानाः सङ्घमुख्यानुन्मादयेयुः इति। अदितिकौशिकस्त्रियो नर्तकीगायना वा। प्रतिपन्नान् गूढवेश्मसु रात्रिसमागमप्रविष्टां-स्तीक्ष्णा हन्युर्बद्ध्वा हरेयुर्वा।

सत्री वा स्त्रीलोलुपं सङ्घमुख्यं प्ररूपयेत्–'अमुष्मिन् ग्रामे दरिद्रकुलमपसृतं; तस्य स्त्री राजार्हा, गृहाणैनाम्' इति। गृहीतायामर्धमासान्तरं सिद्धव्यञ्जनो दूष्यः सङ्घमुख्यमध्ये प्रक्रोशेत्–'असौ

सांवननिकीभिः वशीकरणप्रयोजनाभिः, ओषधीभिः, संवास्य, रसेन विषेण मिश्रिताभिरोषधीभिरित्यर्थः, अतिसन्धाय हत्वा, अपगच्छेत्। तस्मिन् सिद्धव्यञ्जने, अपक्रान्ते हत्वापगते सति, सत्रिणः, परप्रयोगम् अभिशंसेयुः प्रतिकामुकप्रेरितः स सिद्ध इति प्रख्यापयेयुः।

प्रकारान्तरमाह–आढ्यविधवा इति। ताः, गूढाजीवाः सधवा अपि दारिद्र्यवशाद् व्यभिचारेण या जीवन्ति ताः, योगस्त्रियो वा कपटस्त्रियो वा स्त्रीवेषाः पुरुषा वेत्यर्थः, दायनिक्षेपार्थं दायार्थे निक्षेपार्थे च, विवदमानाः, सङ्घमुख्यान् उन्मादयेयुः विवादनिर्णयापदेशेन सङ्घमुख्यानुपगम्य व्यामोहयेयुरित्यर्थः। अदितिकौशिकस्त्रिय इति। अदितयो नानादेवालेख्यप्रदर्शनवृत्तयः स्त्रियः कौशिकस्त्रियः व्यालग्राहिस्त्रियश्च, नर्तकीगायना वा, सङ्घमुख्यान् उन्मादयेयुः। प्रतिपन्नानिति। अभ्युपेतसमागमसङ्केतान् सङ्घमुख्यान्, गूढवेश्मसु, रात्रिसमागमप्रविष्टान् रात्रौ स्त्रीसमागमार्थं प्रविष्टान्, प्रविष्टा इति पाठे तीक्ष्णविशेषणं व्याख्येयम्। तीक्ष्णाः, हन्युः, बद्ध्वा हरेयुर्वा।

प्रकारान्तरमाह–सत्री वेति। सः, स्त्रीलोलुपं स्त्रीचपलं, संघमुख्यं, प्ररूपयेत् आवेदयेत्, कथमिति, अमुष्मिन् ग्रामे, दरिद्रकुलम्, अपसृतं वृत्त्यर्थमन्यदेशं गतम्। तस्य कुलप्रधानस्य, स्त्री, राजार्हा रूपादिना राजोपभोगयोग्या, एनां गृहाण भार्यात्वेन स्वीकुरुष्व इति। गृहीतायामिति। तथा तस्यां स्वीकृतायाम्, अर्धमासान्तरम् अर्धमासः अन्तरं व्यवधानकालो यस्मिन् कर्मणि तद् यथा भवति तथा, सिद्धव्यञ्जनः, दूष्यः राजावग्रहचारी, संघमुख्यमध्ये संघमुख्यानां मध्ये, प्रक्रोशेत् आक्रन्देत्, कथमुक्त्वा, असौ संघ–

A spy disguised as an ascetic may administer medicines purported to attract women towards a lover who is fond of the lady and then he disappear after cheating the fellow. When he has gone away spies may declare that it was done by the enemy.

Widows, ladies driven to prostitution and men in the disguise of women may dispute among themselves on a claim of deposit and captivate the chiefs of corporation with their beauty. Women painters, dancing girls and singers may do the same act. When they are attracted and thus led to secret venues, they may killed by fiery spies or may be dragged away after binding their with ropes.

A spy may approach a chieftain fond of women and say : "In this village there is a poor family; the poor man has gone away; his wife deserves to be a consort of the king, you may take her". After he has followed the advice and half a month has elapsed, an ascetic spy may accuse the chief before the members of the corporation by saying :

मे मुख्यां भार्यां स्नुषां भगिनीं दुहितरं वाधिचरति' इति। तं चेत् सङ्घो निगृह्णीयात्, राजैनमुपगृह्य विगुणेषु विक्रमयेत्। अनिगृहीते सिद्धव्यञ्जनं हि रात्रौ तीक्ष्णाः प्रवासयेयुः। ततस्तद्व्यञ्जनाः प्रक्रोशेयुः—'असौ ब्रह्महा ब्राह्मणीजारश्च' इति।

कार्तान्तिकव्यञ्जनो वा कन्यामन्येन वृतामन्यस्य प्ररूपयेत्—'अमुष्य कन्या राजपत्नी राजप्रसविनी च भविष्यति; सर्वस्वेन प्रसह्य वैनां लभस्व' इति। अलभ्यमानायां परपक्षमुद्धर्षयेत्। लब्धायां सिद्धः कलहः।

भिक्षुकी वा प्रियभार्यं मुख्यं ब्रूयात्—'असौ ते मुख्यो यौवनोत्सिक्तो भार्यायां मां प्राहिणोत्; तस्याहं भयाल्लेख्यमाभरणं

मुख्यविशेषः, मे मुख्यां भार्यां, स्नुषां पुत्रभार्यां, भगिनीं, दुहितरं वा, अधिचरति बलात् स्वीकृत्योपभुङ्क्ते इत्युक्त्वा। तमिति। तमधिचरन्तं निवेदितं मुख्यं, संघः, निगृह्णीयाच्चेद्, राजा, एनं निगृह्यमाणं संघमुख्यम्, उपगृह्य स्वपक्षेऽनुप्रवेश्य, विगुणेषु स्वप्रतिकूलेषु, विक्रमयेद् उद्योजयेद्। अनिगृहीत इति। तस्मिन् संघमुख्ये संघेनाकृतनिग्रहे सति, सिद्धव्यञ्जनं सिद्धवेषं प्रक्रोष्टारं तं दूष्यं, रात्रौ तीक्ष्णाः, प्रवासयेयुः हन्युः। तत इति। अनन्तरं, तद्व्यञ्जनाः सिद्धव्यञ्जनाः प्रक्रोशेयुः, कथमिति, असौ, अनिगृहीतः संघमुख्यः, ब्रह्महा सिद्धब्राह्मणस्य हन्ता, ब्राह्मणीजारश्च सिद्धब्राह्मणभार्याजारश्च, इति।

पक्षान्तरमाह—कार्तान्तिकव्यञ्जनो वेति। दैवज्ञवेषो वा, कन्याम्, अन्येन संघमुख्येष्वन्यतमेन, वृताम्, अन्यस्य, प्ररूपयेद् बोधयेत्, कथमिति, अमुष्य कन्या अन्येन वृता, राजपत्नी राजप्रसविनी च भविष्यति यमियं पतित्वेन वरयति यं च प्रसूते तावुभौ राजभावं प्राप्स्यतः। सर्वस्वेन सर्वस्वदानेन, प्रसह्य वा बलात्कारेण वा, एनां लभस्व स्वायत्तीकुरुष्व, इति। अलभ्यमानायामिति। एवं बोधितेन संघमुख्येन कृतयत्नेन तस्यामनासाद्यमानायां सत्यां, परपक्षं परस्य पूर्ववरयितुः पक्षम्, उद्धर्षयेत् उत्साहयेद् उत्तरकालकन्यायाचित्रा भग्नाशेन सह विरोधयेत्। लब्धायां सत्यां, सिद्धः कलहः, अर्थात् तत्पूर्ववरयितुः सङ्घमुख्यस्य पश्चात् तत्सकाशात् तां लब्धवतश्च।

प्रकारान्तरमाह–भिक्षुकी वेति। सा वा, प्रियभार्यं, मुख्यं संघ-

"This man has illegally kept my chief wife, daughter-in-law, sister or daughter." If the corporation is to punish the chief, the conqueror may take the side of the corporation; and the king will show favour to such a leader who despises the wicked. If the wicked chief is not punished by the corporation fiery spies disguised as mendicants will kill him during night. Thereafter the mendicant spies should declare : "This man is a killer of Brahmins as well as an adulterer or a Brahmin woman."

A spy disguised as an astrologer may describe to a chief the destiny of a maiden betrothed to another and say : "His daughter is destined to be the wife of a king; and she will deliver a son who is bound to be a ruler, try your best to purchase her or take her by force." If she could not be secured the other party may be encouraged. In case she is secured a quarrel is sure to ensue.

A mendicant woman may inform a chief who is devoted to his wife : "The other chief being proud of his youthfulness has sent one to entice your wife; being afraid of him I have taken with me his letter and jewelry (sent to your wife); now that your wife is free of sin, secret steps may be taken against his attempts. I shall remain with you till he is punished."

गृहीत्वागतास्मि; निर्दोषा ते भार्या; गूढमस्मिन् प्रतिकर्तव्यम्। अहमपि तावत् प्रतिपत्स्यामि' इति। एवमादिषु कलहस्थानेषु स्वयमुत्पन्ने वा कलहे तीक्ष्णैरुत्पादिते वा हीनपक्षं राजा कोशदण्डाभ्यामुपगृह्य विगुणेषु विक्रमयेदपवाहयेद् वा।

सङ्घेष्वेवमेकराजो वर्तेत। सङ्घाश्चाप्येवमेकराजादेतेभ्योऽतिसन्धानेभ्यो रक्षयेयुः।

सङ्घमुख्यश्च सङ्घेषु न्यायवृत्तिहितः प्रियः।
दान्तो युक्तजनस्तिष्ठेत् सर्वचित्तानुवर्तकः।।

।। इति कौटलीयार्थशास्त्रे सङ्घवृत्ते एकादशाधिकरणे प्रथमोऽध्यायः भेदोपादानानि उपांशुदण्डश्च, आदितः पञ्चत्रिंशच्छततमः।

एतावता कोटलीयस्यार्थशास्त्रस्य सङ्घवृत्तमेकादशमधिकरणं समाप्तम्।।

मुख्यं, ब्रूयात्, कथमिति, असौ मुख्यः, यौवनोत्सिक्तः यौवनदृप्तः, ते भार्यायां मां प्राहिणोत् त्वद्भार्यासमागमघटनार्थं मां दूतीं प्रेषितवान्। अहं भयात् तस्य लेख्यं कामलेखम्, आभरणं कामप्राभृतरूपं भूषणं च, गृहीत्वा, आगता, अस्मि। निर्दोषा ते भार्या। गूढम्, अस्मिन् प्रतिकर्तव्यम् अयं हन्तव्यः।अहमपि, तावत् एतद्धननावधिकं कालं, प्रतिपत्स्यामि त्वदन्तिकावस्थानलक्षणां प्रतिपत्तिमास्थास्ये, इति। तङोऽकरणमनित्यत्वात्। एवमादिष्विति। एवञ्जातीयेषु कलहस्थानेषु कलहकारणेषु, स्वयं गूढपुरुषोपजापं विनैव, उत्पन्ने वा, तीक्ष्णैरुत्पादिते वा, कलहे, हीनपक्षं, राजा, कोशदण्डाभ्यां धनेन सैन्येन च, उपगृह्य स्वीकृत्य, विगुणेषु स्वप्रतिकूलेषु, विक्रमयेद् उद्योजयेत्। अपवाहयेद् वा विक्रमणाशक्तौ स्वविषयान्निर्वासयेद् वा।

संघेष्विति। तेषु विषये, एवम् उक्तेन प्रकारेण, एकराजः एको राजा, वर्तेत चेष्टेत। एवं वर्तमाने राज्ञि सङ्घानां वृत्तिमाह–संघाश्चापीत्वादि। तेऽपि एवं चेष्टमानात्रृपालात् तदुत्पादितेभ्यो वञ्चनेभ्य आत्मानं रक्षेयुरित्यर्थः। तदेवं संघेषु राज्ञो राज्ञि च संघानां वृत्तिरुक्ता।

अथ संघमुख्यस्य संघेषु वृत्तिमाह–संघमुख्यश्चेति। स च, संघेषु विषये, न्यायवृत्तिहितः न्याययुक्तया वृत्त्या हितकारी प्रियः इष्टानुष्ठायी,

दान्तः अनुद्धतः, युक्तजनः युक्ता आत्मना समवेताः स्वचित्तानुवर्तिनो जना यस्य स तथाभूतः, सर्वचित्तानुवर्तकः सर्वसंधिमतानुवर्ती, तिष्ठत।।

व्याख्यायामर्थशास्त्रस्य श्रीमूलाख्यानभाजने।
सङ्घवृत्ताधिकरणमेकादशमपूर्यत।।

इति श्रीवञ्चिमण्डलमहाराजाश्रितस्य ताम्रपर्णीतीरवर्तितरुवाग्रहाराभिजनस्य
श्रीसीताम्बाश्रीरामसुब्रह्मण्यार्यसूनोर्महामहोपाध्याय
गणपतिशास्त्रिणः कृतिषु कौटलीयार्थशास्त्रव्याख्यायां
श्रीमूलाख्यायां सङ्घवृत्ते एकादशेऽधिकरणे प्रथमोऽध्यायः,
भेदोपादानानि उपांशुदण्डश्च। आदितः पञ्चत्रिंशच्छततमः।
सङ्घवृत्तमेकादशमधिकरणं समाप्तम्।।

In such and other kinds of brawls or on occasions caused by oneself or through fiery spies, the conqueror should assist the inferior party with money and men and in the case of wicked people he should act against them or banish them.

Thus he should remain as the only king of all corporations. The corporations under the protection of the monarch should guard themselves against all kinds of treachery.

The chief of corporation should endeavour himself to all by his just actions and by controlling his passions he should cater to the interest of all.

Thus the one hundred and thirtyfifth chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the first chapter of the eleventh Adhikaraṇa dealing with the sections 'Causes of Dissension and Secret Punishment.'

The eleventh Adhikaraṇa dealing with the conduct of corporation is concluded.

आबलीयसं–द्वादशमधिकरणम्।

BOOK TWELVE : CONCERNING A POWERFUL ENEMY

Chapter 136

162. प्रक० दूतकर्माणि।

Section 162 : Duties of Messenger

'बलीयसाभियुक्तो दुर्बलः सर्वत्रानुप्रणतो वेतसधर्मा तिष्ठेत्। इन्द्रस्य हि स प्रणमति, यो बलीयसो नमति' इति भारद्वाजः।

'सर्वसन्दोहेन बलानां युध्येत, पराक्रमो हि व्यसनमपहन्ति; स्वधर्मश्चैष क्षत्रियस्य; युद्धे जयः पराजयो वा' इति विशालाक्षः।

नेति कौटल्यः। सर्वत्रानुप्रणतः कुलैडक इव निराशो जीविते वसति। युध्यमानश्चाल्प-सैन्यः समुद्रमिवाप्लवोऽवगाहमानः सीदति। तद् विशिष्टं तु राजानमाश्रितो दुर्गमविषह्यं वा चेष्टेत।

अथ द्वादशम् आबलीयसं नामाधिकरणमारभ्यते। प्रबलं कञ्चिदपेक्ष्य हीनबलोऽबलः तदपेक्षयातिशयेन हीनबलोऽबलीयान् तमधिकृत्य प्रवृत्तं तत्कृत्यप्रतिपादकत्वाद् आबलीयसमुच्यते। अथवा कञ्चिदपेक्ष्यातिशयेन बलयुक्तो बलीयान् तद्भिन्नोऽबलीयान् अर्थादतिशयप्रतियोगी दुर्बलः तमधिकृत्य प्रवृत्तम् आबलीयसम्। प्रबलेऽभियोक्तरि दुर्बलेन यत् कर्तव्यं तदस्मिन्नधिकरणे प्रतिपाद्यते। तत्र

दूतकर्मेति प्रथमं सूत्रम्। दूतव्यापारोऽभिधीयत इति सूत्रार्थः। प्रबलस्य सन्धेयत्वात् सन्धेश्च दूतमुखत्वात् सन्धियाचनलक्षणानां दूतकर्मणामिहाभिधानम्।

तत्र मतभेदान् दिदर्शयिषुरादौ भारद्वाजमतमाह–बलीयसेति। तेन, अभियुक्तः, दुर्बलः, सर्वत्र सर्वविधेऽपि परिभवे, अनुप्रणतः तदनुवर्तनपरः, वेतसधर्मा तिष्ठेत् यथा सर्वविधेऽपि जवे नम्रीभूय स्रोतसोऽनुवर्तनं कुर्वन् वञ्जुलस्तिष्ठति तथा स्थितिं कुर्यादित्यर्थः। न च बलीयांसं प्रति प्रणामो दुर्बलस्य लाघवाय, प्रत्युत गौरवावहोऽपीत्यभिप्रायेणाह–इन्द्रस्य हीत्यादि।

विशालाक्षमतमाह–सर्वसन्दोहेनेत्यादि। सर्वबलसमूहसाहित्येन युध्वा जयमरणान्यतरप्राप्तिरेव क्षत्रियस्य स्वधर्मो न तु शत्रुपादपतनमित्यर्थः।

मतद्वयमपि प्रतिषेधति–नेतीति। प्रणामवृत्तौ दोषमाह–सर्वत्रानुप्रणत इत्यादि। तथाभूतो हि, कुलमेष इव स्वयूथभ्रष्टस्त्रासाज्जीवितनिराशः कथञ्चिद् वसतीत्यर्थः। योधने दोषमाह–युध्यमानश्चेत्यादि। अप्लवः तरणसाधनरहितः। सीदति नश्यति। अतः किं कर्तव्यमित्याह–तदिति। तस्मात्, विशिष्टं तु राजानं शत्र्वपेक्षयाधिकबलमन्यं भूपतिं, दुर्गं

A king of poor resources attacked by a powerful enemy should act like a cane bending every where. Bhāradvāja says : "He who bows down before a powerful adversary is in fact bows down before Indra.

Viśālākṣa is of the view that : "a weak king should fight it out with all his resources, for bravery destroys all troubles; fighting is the duty the Kṣatriya, no matter whether one wins or loses a battle."

'Not so'—says Kauṭalya. He who bows down to one and all like a crab on the banks of a river lives in despair. He who fights with his meagre army perishes like a man attempting to cross the sea without a boat. Hence a weak king should seek the protection of a powerful king or maintain himself in an impregnable fort.

त्रयोऽभियोक्तारो धर्मलोभासुरविजयिन इति। तेषामभ्यवपत्त्या धर्मविजयी तुष्यति; तमभ्यवपद्येत परेषामपि भयात्। भूमिद्रव्यहरणेन लोभविजयी तुष्यति; तमर्थेनाभ्यवपद्येत। भूमिद्रव्यपुत्रदारप्राणहरणेन असुरविजयी; तं भूमिद्रव्याभ्यामुपगृह्याग्राह्यः प्रतिकुर्वीत।

तेषामुत्तिष्ठमानं सन्धिना मन्त्रयुद्धेन कूटयुद्धेन वा प्रतिव्यूहेत। शत्रुपक्षमस्य सामदानाभ्यां; स्वपक्षं भेददण्डाभ्याम्। दुर्गं राष्ट्रं स्कन्धावारं वास्य गूढाः शस्त्ररसाग्निभिः साधयेयुः।

सर्वतः पार्ष्णिमस्य ग्राहयेत्; अटवीभिर्वा राज्यं घातयेत्; तत्कुलीनावरुद्धाभ्यां वा हारयेत्।

अविषह्यं वा धर्षयितुमशक्यं दुर्गं वा, आश्रितः, चेष्टेत व्याप्रियेत, अर्थादभियोक्तरि विषये।

चेष्टाभेदान् वक्तुं तद्विषयभूतानभियोक्तृन् विभजते–त्रय इत्यादि। तेषामिति। त्रयाणां मध्ये, धर्मविजयी, अभ्यवपत्त्या तवाहमित्यात्मार्पणेन, तुष्यति। तं धर्मविजयिनम्, अभ्यवपद्येत, परेषामपि भयात् न केवलं धर्मविजयिभयात् किन्तु शत्र्वन्तरभयादपि। न केवलं स्वयं न बाधतेऽभ्यवपत्तारं धर्मविजयी, किन्तु शत्र्वन्तरभयादपि स रक्षतीत्यभिप्रायः। भूमिद्रव्यहरणेनेत्यादि। अर्थेन अभ्यवपद्येत धनादिदानेनावर्जयेत्। असुरविजयी भूमिद्रव्यपुत्रदारप्राणानां सर्वेषामप्यपहरणेन तुष्यति, अतस्तं भूमिद्रव्ययोर्दानेनावर्ज्य तद्धस्तगोचरमप्राप्त एव एनं सन्ध्यादिना प्रतिकुर्यादित्याह–भूमिद्रव्यपुत्रेत्यादि।

तेषामिति। धर्मविजयिलोभविजय्यसुरविजयिनाम्, अन्यतमम्, उत्तिष्ठमानम् अभियुञ्जानं, सन्धिना मन्त्रयुद्धेन कूटयुद्धेन वा वक्ष्यमाणप्रकारेण, प्रतिव्यूहेत अपकुर्वीत। तत्र मन्त्रयुद्धस्य प्रकारमाह–शत्रुपक्षमिति।

अस्य प्रबलस्याभियोक्तुः, शत्रुपक्षं, सामदानाभ्यां, प्रतिव्यूहेत। स्वपक्षम् अमात्यादिप्रकृतिवर्गं, भेददण्डाभ्यां, प्रतिव्यूहेत। कूटयुद्धप्रकारमाह–दुर्गमिति। दुर्गं स्थानीयं, राष्ट्रं जनपदं, स्कन्धावारं वा सेनानिवेशं वा, अस्य, गूढाः गूढपुरुषाः, शस्त्ररसाग्निभिः आयुधप्रहारविषाग्निदाहैः, साधयेयुः।

सर्वत इति। पृष्ठतः पार्श्वतश्च, पार्ष्णिम्, अस्य अभियोक्तुः, ग्राहयेत्। अटवीभिर्वेति। आटविकैर्वा, राज्यं दुर्गजनपदादिकं घातयेत्।

Invaders belong to three categories : a just conqueror, a demon-like conqueror and a greedy conqueror. Among them, the just conqueror is satisfied with mere obeisance; hence a weak one should seek his protection. A greedy conqueror feels happy with his gain in land and wealth; hence such a fellow may be persuaded by wealth. A demoniac conqueror satisfies himself by seizing the land, treasure, sons and wives and by killing the weak one. Such a person should be kept at a distance by offering him land and wealth.

When one of these conquerors is on the point of rising against a weak king, the latter should avert the invasion by concluding a treaty of peace, battle of intrigue, or a treacherous fight. He may reduce the people of the enemy by conciliation or giving gifts and should put down his own men either by causing dissension or by punishment. Spies under various guises may capture the enemy's fort, country or camp with the aid of weapons, poison or fire.

He may harass the rear of the enemy on all sides, or destroy the courty of the enemy with the aid of wild tribes or set up a seion of the enemy's family or an imprisoned princes to seize the enemy's territory.

अपकारान्तेषु चास्य दूतं प्रेषयेत्। अनपकृत्य वा सन्धानम्।

तथाप्यभिप्रयान्तं कोशदण्डयोः पादोत्तरमहोरात्रोत्तरं वा सन्धिं याचेत।

स चेद् दण्डसन्धिं याचेत, कुण्ठमस्मै हस्त्यश्वं दद्याद्, उत्साहितं वा गरयुक्तम्।

पुरुषसन्धिं याचेत, दूष्यामित्राटवीबलमस्यै दद्याद् योगपुरुषाधिष्ठितम्। तथा कुर्याद् यथोभयविनाशः स्यात्। तीक्ष्णबलं वास्मै दद्यात्, यदवमानितं विकुर्वीत। मौलमनुरक्तं वा, यदस्य व्यसनेऽपकुर्यात्।

तत्कुलीनावरुद्धाभ्यामिति। अभियोक्तुः कुलीनो ज्ञातिः अवरुद्धः पुत्रादिः ताभ्यां वा, हारयेत्, राज्यम्।

इत्थमपकारान् कृत्वा तदनन्तरं सन्धानार्थे दूतं प्रेषयेदित्याह–अपकारान्तेषु चेत्यादि। अपकारबाधिते हि शत्रौ सन्धिः प्रयुज्यमानः तप्तलोहन्यायेनावश्यं फलतीत्यभिप्रायः। सर्वथैवापकारकरणाशक्तौ त्वाह–अनपकृत्य वा सन्धानमिति। याचनीयमिति शेषः।

तथाप्यभिप्रयान्तमिति। सुवर्णादिपणनेन दण्डपणनेन वा याचितेऽपि सन्धौ अभियानादनिवर्तमानं प्रबलं, कोशदण्डयोः पूर्वपणितसंख्यस्य धनस्य सैन्यस्य च, पादोत्तरं चतुर्थांशाधिकं, सन्धिं याचेत पूर्वपणितं

सुवर्णलक्षसन्धिम् अश्वादिशतसन्धिं वानभ्युपगच्छति सन्धेये सुवर्णलक्षं पञ्चविंशतिसहस्राधिकं कृत्वा अश्वादिशतं पञ्चविंशत्यधिकं कृत्वा च भूयः सन्धिं याचेतेत्यभिप्रायः। अहोरात्रोत्तरं सन्धिं याचेतेत्य-स्यायमर्थः-इयतो मासानिदं कर्तव्यमिति पूर्वपणितं माससन्धिमनुपगच्छति सन्धेये पुनस्तमधिकदिवसयुक्तं कृत्वा याचेतेति।

पणितयोः कोशदण्डयोर्दानविधिमाह-स इति। अबलीयान्, दण्डसन्धिं सैन्यसन्धिं, याचेत चेत्, अस्मै सन्धेयाय, कुण्ठं कर्माशक्तं, हस्त्यश्वं, दद्यात्। वा अथवा, उत्साहितं शूरं, गरयुक्तं मासार्धमासाद्यभ्यन्तरकालमारकविषयुक्तं कृत्वा, दद्यात्।

पुरुषसन्धिं याचेतेति। पदातिदानसन्धिं चेत् प्रार्थयेत्, दूष्यामित्राटवीबलं दूष्यबलम् अमित्रबलम् आटविकबलं च, अस्मै सन्धेयाय, दद्यात्, कथम्भूतं, योगपुरुषाधिष्ठितं योगपुरुषैः विषधूमाम्बुदानादिना दूष्यादिबल-

Once the enemy is put to troubles he should send messenger to him. He may make peace with him without offending him.

If the enemy is still bent on march, the weak the king may sue for peace by offering more than one fourth of his wealth and army, the payment being made after the lapse of a day and night.

If the enemy demands a portion of the army for making peace, he may be given such of his elephants and cavalry as are uncontrollable or as are contaminated with poison.

If surrendering of chief men is put forward as condition, he may send such section of the army as is full of traitors, enemies and wild tribes under ethe command of a trusted officer. Thus both his enemy and his own undesirable army may perish. He may be provided with an army of fiery men, so that it may turn against the enemy when ill-treated. Or he may send his own hereditary army who are faithful and capable hurting the enemy on occasions of trouble.

कोशसन्धिं याचेत, सारमस्मै दद्यात्, यस्य क्रेतारं नाधिगच्छेत्; कुप्यमयुद्धयोग्यं वा।

भूमिसन्धिं याचेत, प्रत्यादेयां नित्यामित्रामनपाश्रयां महाक्षयव्ययनिवेशां वास्मै भूमिं दद्यात्।

सर्वस्वेन वा राजधानीवर्जेन सन्धिं याचेत बलीयसः।।

यत् प्रसह्य हरेदन्यस्तत् प्रयच्छेदुपायतः।
रक्षेत् स्वदेहं न धनं का ह्यनित्ये धने दया।।

।। इति कौटलीयार्थशास्त्रे आबलीयसे द्वादशेऽधिकरणे
प्रथमोऽध्यायः, दूतकर्मणि सन्धियाचनम्।
आदितः षटत्रिंशच्छततमः।।

-मारणक्षमैर्गूढपुरुषैरधिष्ठितम्। तथा कुर्यादिति। तेन प्रकारेण संविधानं कुर्यात्, यथा येन प्रकारेण, उभयविनाशः दूष्यादिबलशत्रुबलयोरुभयोर्विनाशः, स्यात्। तीक्ष्णबलं वेत्यादि। विकुर्वीत कुपितं सद् अपकुर्यात्। व्यसने अपकुर्यात् अपकारस्थानं प्रतीक्ष्यापकारं कुर्यात्।

कोशसन्धिं याचेतेति। तं चेत् प्रार्थयेत, सारं महार्घं रत्नादि, अस्मै सन्धेयाय, दद्यात्। सारं विशिनष्टि-यस्य सारस्य दत्तस्य, क्रेतारं तदनुरूपमूल्यदानशक्तं, नाधिगच्छेत। कुप्यमिति। अयुद्धयोग्यं कुप्यं वा वस्त्रास्तरणादि वा, दद्यात्।

भूमिसन्धिमित्यादि। नित्यामित्रां नित्यसन्निहितशत्रुकाम्। अनपाश्रयां दुर्गरहिताम्। महाक्षयव्ययनिवेशां महान्तौ क्षयव्ययौ युग्यपुरुषधान्यापचयौ यस्य स तथाभूतो निवेशो यस्यां तां तथाभूताम्।

सर्वस्वेन वेत्यादि। राजधानीवर्जेन स्ववासार्थे राजधानीं वर्जयित्वा बलीयसः बलवत्तरस्य सकाशादित्यर्थः।।

यदित्यादि। प्रसह्य बलात्कारेण। अस्य बलीयान्। उपायतः सन्धिव्याजेन। का ह्यनित्ये धने दयेति। सति देहे नष्टधनप्रत्यार्जनमपि सुकरमिति कृत्वा तस्मिन् दयावश्यं कर्तव्येत्यर्थः।।

इति कौटलीयार्थशास्त्रव्याख्यायाम् आवलीयसे द्वादशेऽधिकरणे
प्रथमोऽध्यायः, दूतकर्मणि सन्धियाचनम्।
आदितः षट्त्रिंशच्छततमः।।

If the invading enemy desires to make peace on condition of his paying a certain amount of wealth, he may give the enemy such precious articles as do not find a purchaser or such raw products as are of no use in war.

If the enemy desires to make peace on condition of his ceding a part of his land, he should provide the enemy with that kind of land which he can recover, which always under the threat of another enemy, which possesses no protective defences or which can only be colonised at considerable cost of money and men.

He (a weak king) should make peace surrendering his whole state except the captial, when he is confronted with a strong enemy.

He should contrive the enemy to accept some thing which another enemy is likely to take away by force; and he should take more care of his person than wealth, for of what interest is perishing wealth?

Thus the one hundred and thirtysixth chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the first chapter of the twelfth Adhikaraṇa dealing with the section 'Duties of a messenger.'

Chapter 137

163. प्रक० मन्त्रयुद्धम्

Section 163 : Battle of Intrigue

स चेत् सन्धौ नावतिष्ठेत, ब्रूयादेनम्–"इमे षड्वर्गवशगा राजानो विनष्टाः तेषामनात्मवतां नार्हसि मार्गमनुगन्तुं; धर्ममर्थं चावेक्षस्व; मित्रमुखा ह्यमित्रास्ते ये त्वां साहसमधर्ममर्थातिक्रमं च ग्राहयन्ति; शूरैस्त्यक्तात्मभिः सह योद्धुं साहसं; जनक्षयमुभयतः कर्तुमधर्मः; दृष्टमर्थं मित्रमदुष्टं च त्यक्तुमर्थातिक्रमः; मित्रवांश्च स राजा भूयश्चैतेन अर्थेन मित्राण्युद्योजयिष्यति यानि त्वा सर्वतोऽभियास्यन्ति; न च मध्यमोदासीनयोर्मण्डलस्य वा परित्यक्तः; भवांस्तु परित्यक्तो ये त्वां समुद्युक्तमुपप्रेक्षन्ते–भूयः क्षयव्ययाभ्यां युज्यतां; मित्राच्च भिद्यतां; अथैनं परित्यक्तमूलं सुखेनोच्छेत्स्याम इति। स भवान् नार्हति मित्रमुखानाममित्राणां श्रोतुं, मित्राण्युद्वेजयितुम्, अमित्रांश्च श्रेयसा योक्तुं, प्राणसंशयमनर्थं चोपगन्तुम्" इति। यच्छेत्।

तथापि प्रतिष्ठमानस्य प्रकृतिकोपमस्य कारयेद् यथा सङ्घवृत्ते

मन्त्रयुद्धमिति सूत्रम्। मन्त्रः प्रज्ञोत्कर्षः तेन युद्धं शत्रोर्मत्युत्पादनादिना वञ्चनं मन्त्रयुद्धं, तदभिधीयत इति सूत्रार्थः। सन्धिं याचितः शत्रुर्यदि नोपगच्छेत्, तदा किं कर्तव्यमित्येतदिहोपदिश्यते।

स चेत् सन्धौ नावतिष्ठेतेत्यादि। 'इमे' इत्यादिः 'प्राणसंशयमनर्थं वोपगन्तुम्' इत्यन्तो वचनप्रकारः। इमे नामग्रहणपूर्वं निदर्शिताः। मित्रमुखा अमित्राः मित्रभावं वाचा बहिर्नाटयन्तः परमार्थतः शत्रव इत्यर्थः त्यक्तात्मभिः उपेक्षितदेहैः। योद्धुं साहसं योधनमविचारितानुष्ठानमित्यर्थः दृष्टमर्थं करगतं पणितमर्थं कोशादिम्। एतेनार्थेन त्वदस्वीकृतेन सन्धिद्रव्येण। त्वा सर्वतोऽभियास्यन्ति त्वां परिवार्याभियोक्ष्यन्ते। न च परित्यक्तः अर्थात् सन्धियाचकोऽभियोज्यः। मध्यमोदासीनमण्डलास्तव सुखोच्छेदाय शक्तिक्षयं बहुभिः प्रकारैः प्रतीक्षमाणाः सन्तस्त्वामिदानीं कृताभियोगमुपेक्षन्ते इत्याह–ये त्वामित्यादिना। यत् त्वामिति पाठे उपेक्षणकर्तारो गम्याः। 'उच्छेत्स्यामहे' इति पाठे आत्मनेपदमार्षम्। श्रोतुम् अर्थादुपदेशान्। अनर्थम् अर्थहानिम्। यच्छेदिति। गृहीतयथोक्तोपदेशाय सन्ध्यर्थं दद्यादित्यर्थः।

तमप्युपदेशमनभ्युपगच्छति सन्धेये कर्तव्यमाह–तथापीत्यादि। एवमुपदेशे कृतेऽपि, प्रतिष्ठमानस्य अभियुञ्जानस्य, अस्य, प्रकृतिकोपम्

If he does not keep peace, he should be told—"These kings perished because of their attachment to the aggregate of six enemies and it is not befitting of you to follow the path of those mindless people, be mindful of virtue and wealth; your enemies make you to commit the offences of unrighteousness and violation of wealth through the cooperation of your friends; it is not wise to fight with brave and reckless enemies; unrighteousness will lead to loss of people on both the sides; it is violation of wealth to abandon the wealth at hand and the friend of no mean character; a king having friends could again make use of the wealth to gather more friends who will always follow you; the adversary has not lost his influence over the circle of Madhyama and neutral states, but you have lost that power over them, who are, therefore, waiting for an opportunity to attack you—(hence) patiently bear the loss of men and money; break peace with that friend, now that he has lost his base he could easily be uprooted. You should not listen to the words of your enemies coming through the mouth of your friends, you should not expose your friends to trouble, you should not bestow benefits on enemies and should not involve yourself in dangers that is likely to cost your life and prosperity. If he agrees, peace should be effected.

व्याख्यातं, योगवामने च। तीक्ष्णरसदप्रयोगं च। यदुक्तमात्मरक्षितके रक्ष्यं, तत्र तीक्ष्णान् रसदांश्च प्रयुञ्जीत।

बन्धकीपोषकाः परमरूपयौवनाभिः स्त्रीभिः सेनामुख्यानुन्मादयेयुः। बहूनामेकस्यां द्वयोर्वा मुख्ययोः कामे जाते तीक्ष्णाः कलहानुत्पादयेयुः। कलहे पराजितपक्षं परत्रापगमने यात्रासाहाय्यदाने वा भर्तुर्योजयेयुः।

कामवशान् वा सिद्धव्यञ्जनाः सांवननिकीभिरोषधीभिरतिसन्धानाय मुख्येषु रसं दापयेयुः।

वैदेहकव्यञ्जनो वा राजमहिष्याः सुभगायाः प्रेष्यामासन्नां कामनिमित्तमर्थेन अभिवृष्य परित्यजेत्। तस्यैव परिचारकव्यञ्जनोपदिष्टः सिद्धव्यञ्जनः सांवननिकीमोषधीं दद्याद्– वैदेहकशरीरेऽव–

अमात्यादिभेदनं, कारयेत्। कथं, यथा येन प्रकारेण, सङ्घवृत्ते, व्याख्यातम् उपदिष्टम् अर्थाद् भेदनं, योगवामने च योगवामनप्रकरणे व्याख्यास्यते च। तथेति शेषः। घातनमाह–तीक्ष्णरसदप्रयोगं चेति। कारयेदिति वर्तते। उक्तमेव विवृणोति–यदुक्तमित्यादि। स्पष्टार्थम्।

सेनामुख्यवध इति सूत्रम्। वधो भेदनस्याप्युपलक्षणम्। सेनामुख्यानां भेदनघातने उच्येते इति सूत्रार्थः। तयोः पूर्वोक्तयोः सेनामुख्या अपि विषया इति प्रकरणारम्भः।

भेदनोपायमाह–बन्धकीपोषका इत्यादि। बहूनामित्यादि। बहूनां त्रिप्रभृतीनां मुख्यानाम्। कलहे इत्यादि। परत्रापगमने पूर्वाश्रितपक्षापहानेन विजिगीषुपक्षाश्रवणे। भर्तुः स्वामिनो विजिगीषोः। यात्रासाहाय्यदाने वा विजिगीषुयात्रासाह्यकरणे च।

घातनोपायमाह–कामवशान् वेत्यादि। सेनामुख्येषु मध्ये ये कामवशगास्तान् सिद्धवेषाः स्त्रीसंवननप्रयोजनाभिरोषधीभिः सह विषम् अतिसन्धानार्थं तन्मित्रव्यञ्जनद्वारेण प्राशयेयुरित्यर्थः।

राज्ञो विषदानविधानमाह–वैदेहकव्यञ्जनो वेति। वणिग्व्यञ्जनः, राजमहिष्याः, सुभगायाः सुन्दर्याः, प्रेष्यामासन्नाम् अन्तरङ्गपरिचारिकां, कामनिमित्तं भोगार्थम्, अर्थेन अभिवृष्य प्रचुरधनवर्षणेन सम्भाव्य, परित्यजेत् पुनर्नोपगच्छेत्। तस्यैवेति। वैदेहकव्यञ्जनस्यैव, परिचारकव्यञ्जनोपदिष्टः परिचारकवेषेण पुरुषेण प्रेरितः, सिद्धव्यञ्जनः, सांवननिकीम् ओषधीं, दद्यात्,

Inspite of the advice given, if the enemy proceeds on his own way, disaffection of his subjects may be created as detailed in the case of the corporation of chiefs as also in the section of enticement of enemy by secret means. Fiery spies or administration of poison should be tried. What has been described in connection with self protection is to be followed here and fiery spies and poisoners may be suitably employed.

Keepers of prostitutes should excite passion in the minds of the commanders of enemy soldiers employing women of youth and beauty. When one or two of them are thus captivated fiery spies should bring about quarrels among them. They should prevail upon the defeated person and offer help to migrate else where or to proceed to help the master.

धातयेति। सिद्धे सुभगाया अप्येनं योगमुपदिशेद्–राजशरीरेऽवघातव्या इति। ततो रसेनातिसन्दध्यात्।

कार्तान्तिकव्यञ्जनो वा महामात्रं राजलक्षणसम्पन्नं क्रमाभिनीतं ब्रूयात्। भार्यामस्य भिक्षुकी–'राजपत्नी राजप्रसविनी वा भविष्यसि' इति।

भार्याव्यञ्जना वा महामात्रं ब्रूयात्–'राजा किल मामवरोधयिष्यतिः तवान्तिकाय पत्रलेख्यमाभरणं चेदं परिव्राजिकयाहृतम्' इति।

सूदारालिकव्यञ्जनो वा रसप्रयोगार्थं राजवचनमर्थं चास्य

किमित्युक्त्वा, वैदेहकशरीरे, अवघातव्या क्षेप्तव्या तद्वशीकरणार्थम्, इत्युक्त्वा। सिद्धे इति। तथाकरणेन वैदेहकवशीकरणे सिद्धे सति, वैदेहके तद्वश्यतामात्मनोऽभिनयति सतीति यावत्, सुभगाया अपि राजमहिष्या अपि, एनम् उक्तं, योगं सांवननिकौषधिप्रयोगम्, उपदिशेत्, किमित्युक्त्वा, राजशरीरे, अवघातव्या अर्थाद् औषधिः, इत्युक्त्वा। ततो रसेनातिसन्दध्यादिति। तस्मिन् योगे विषयोजनेन राजानं घातयेदित्यर्थः।

महामात्रभेदनमाह–कार्तान्तिकव्यञ्जनो वेति। लक्षणादिना भविष्यदर्थादेष्टा कार्तान्तिकः तद्व्यञ्जनो गूढपुरुषो वा, महामात्रं, राजलक्षणसम्पन्नं ब्रूयात् 'त्वं राजा भविष्यसी'ति वदेत्। कथम्भूतं, क्रमाभिनीतं बहुकृत्वो निजादेशसंवादप्रदर्शनेनाभिमुखीकृतं विश्वासितमित्यर्थः। भार्यामिति। अस्य महामात्रस्य, भार्यां,

भिक्षुकी, ब्रूयादिति सम्बध्यते, किमिति, 'राजपत्नी राजप्रसविनी वा भविष्यसी 'ति। इत्थं वचनेन महामात्रस्य राजत्वलोभोदयाद् राज्ञा सह विरोधो जायेतेत्यभिप्रायः।

प्रकारान्तरमाह–भार्याव्यञ्जना वेति! निजरूपगुणाद् महामात्रस्य भार्यात्वं प्राप्य तदतिसन्धानावसरं प्रतीक्षमाणा बन्धकीत्यर्थः, महामात्रं ब्रूयात्, कथमिति, राजा किल माम् अवरोधयिष्यति स्वान्तःपुरं नेष्यति, तव अन्तिकाय इदं पत्रलेख्यम् आभरणं च, राजदत्तमिति शेषः, परिव्राजिकया दूतीभूतया, आहृतम् इति। अनेन निमित्तेन महामात्रस्य राज्ञि द्वेषो जायेतेत्यभिप्रायः।

प्रकारान्तरमाह–सूदारालिकव्यञ्जनो वेति। पाचकसूपकार–

Spies under the guise of mendicants should administer medicinal potions to infatuated lovers and through them administer poison to the chieftains.

A spy under the guise of a merchant may shower wealth upon an immediate maid servant of the beautiful queen under the plea of winning love and then give her up. A spy gaining a job under the merchant may give a medicinal preparation to another working as a servant of the said maid servant and say that to get it applied on the body of the merchant through which he is captivated. On her attaining success (the maid servant) may inform the queen that the same drug may be applied to the body of the king to secure his love and then charge the drug for poison.

A spy under the disguise of an astrologer may gain confidence of the prime minister and tell him that the latter possesses all the physiognomical signs of a king and thus delude him. A mendicant woman may tell his wife that "She will become a queen or will give birth to a king."

A harlot disguised as a minister's wife may tell him that "the king is troubling me; and an ascetic woman has brought to me this letter and jewelry" from him.

लोभनीयमभिनयेत्। तदस्य वैदेहकव्यञ्जनः प्रतिसन्दध्यात्; कार्यसिद्धिं च ब्रूयात्। एवमेकेन द्वाभ्यां त्रिभिरित्युपायैरेकैकमस्य महामात्रं विक्रमायापगमनाय वा योजयेदिति।

दुर्गेषु चास्य शून्यपालासन्नाः सत्रिणः पौरजानपदेषु मैत्रीनिमत्तमावेदयेयुः "शून्यपालेनोक्ता योधाश्च अधिकरणस्थाश्च–कृच्छ्रगतो राजा जीवन्नागमिष्यति न वा; प्रसह्य वित्तमार्जयध्वममित्रांश्च हत" इति। बहुलीभूते तीक्ष्णाः पौरान् निशास्वाहारयेयुः, मुख्यांश्चाभिहन्युः–'एवं क्रियन्ते, ये शून्यपालस्य न शुश्रूषन्ते' इति।

व्यञ्जनो वा, रसप्रयोगार्थं पानपानीयादिषु विषयोजनार्थं, राजवचनं, राजवचनादिति पाठो न समञ्जसः। अर्थं च धनं च, अस्य रसप्रयोगस्य, लोभनीयं प्रभूतत्वेन हेतुना कामयितव्यम्, अभिनयेत् स्वस्मै राज्ञा दत्तं व्यपदिशेत्। तदस्येति। अस्य राज्ञः, तत् उक्तं कर्म, वैदेहकव्यञ्जनः विषविक्रेतृवेषो गूढपुरुषः, प्रतिसन्दध्यात संवादयेत्, 'राजवचनाद् मया त्वत्सूदारालिकहस्ते विषं दत्तं, तत् किमर्थमिति तु न वेद्मि' इत्यादिकथनेन

सूदारालिकवचने महामात्रस्य विश्वासं जनयेदित्यभिप्रायः। कार्यसिद्धिं च ब्रूयादिति। तेन विषेण सद्योमरणलक्षणं कार्यं सिध्येदिति च वदेदित्यर्थः। अनेन प्रकारेण सामाद्युपायैर्व्यस्तैः समस्तैर्यथासम्भवं मिलितैर्वा राज्ञ एकैकं महामात्रं राज्ञा सह विरोधितं कृत्वा योधनायापसरणाय वा सन्नाहयेदित्याह–एवमेकेनेत्यादि। इत्थं महामात्राणां राज्ञो भेदनमभिहितम्।

अथ शून्यपालात् पौराणां भेदनमाह–दुर्गेषु चेति। स्थानीयेषु च, अस्य परस्य राज्ञः, शून्यपालासन्नाः शत्र्वभियोगप्रयाणवशाद् राज्ञा विरहितं स्थानीयं शून्यं तत्पालस्तद्रक्षकः तस्य आसन्नाः आप्तत्वाभिनयिनः सत्रिणः, पौरजानपदेषु, मैत्रीनिमित्तं शून्यपालविषयानुरागोत्पादनार्थम्, आवेदयेयुः प्रज्ञापयेयुः। शून्यपालेनोक्ता इत्यादिनावेदनीयार्थोपन्यासः। कृच्छ्रगत इत्यादिना च शून्यपालवचनोपन्यासः। प्रसह्य बलात्कारेण। अमित्रांश्च हत स्वरवशत्रूंश्च व्यापादयत। बहुलीभूत इति। सर्वतः प्रसृते सति अर्थाच्छून्यपालाज्ञाप्रवादे, तीक्ष्णाः, पौरान्, निशासु रात्रिषु, आहरयेयुः बलादाहरतः प्रयोजयेयुः, मुख्यांश्च अभिहन्युः। एवं क्रियन्त इति। इत्थं बलादभिहन्यन्ते, के, ये शून्यपालस्य, न शुश्रूषन्ते आराधनं न कुर्वन्ति, इति अनेन प्रकारेण, अभिहननसमगे वदन्त इति शेषः। एतच्च शून्यपाले परिवादसभारोपार्थम्।

A spy under the guise of a cook may tell him (the minister) that the king has given to the former much covetous wealth for administering poison. Another spy may under the disguise of a merechant testify to the fact. He may also say that the job (of securing poison) has been acomplished. Thus putting to use one, two or three of the strategic means, ministers of the king one after the other may be induced to set out on an expedition or to go away from the place.

Spies attached to the officer-in-charge of the enemy's region may inform the citizens and country people residing in fortified towns to generate friendship, thus :—The officer exhorts the wariors and departmental officers and says that "the king has hardly escaped form danger and scarcely returns to life. Earn wealth by force and destroy the adversaries". When the information spreads everywhere fiery spies collect together the citizens and kill their leaders. "This is what happens to those who do not obey the officer.

शून्यपालस्थानेषु च सशोणितानि शस्त्रवित्तवत्धनान्युत्सृजेयुः। ततः सत्रिणः– 'शून्यपालो घातयति, विलोपयति च' इत्यावेदयेयुः।

एवं जानपदान् समाहर्तुर्भेदयेयुः।

समाहर्तृपुरुषांस्तु ग्राममध्येषु रात्रौ तीक्ष्णा हत्वा ब्रूयुः–'एवं क्रियन्ते, ये जनपदमधर्मेण बाधन्ते'; इति।

समुत्पन्ने दोषे शून्यपालं समाहर्तारं वा प्रकृतिकोपेन घातयेयुः। तत्कुलीनमवरुद्धं वा प्रतिपादयेयुः।।

अन्तःपुरपुरद्वारद्रव्यधान्यपरिग्रहान्।
दहेयुस्तांश्च हन्युर्वा ब्रूयुरस्यार्तवादिनः।।

इति कौटलीयार्थशास्त्रे आबलीयसे द्वादशेऽधिकरणे द्वितीयोऽध्यायः
दूतकर्मणि वाक्ययुद्धं दूतकर्म समाप्तं मन्त्रयुद्धम्,
आदितः सप्तत्रिंशच्छततमः।।

हननस्य शून्यपालकारितत्वप्रतीतिजननार्थं कर्तव्यमाह-शून्यपालस्थानेषु चेति। शून्यपालवास्तुषु, सशोणितानि रुधिराङ्कितानि, शस्त्रवित्तबन्धनानि आयुधानि धनबन्धनरज्जूश्च, उत्सृजेयुः। तत इति। इत्थं शून्यपालापराधसम्भावनानुकूलसंविधानकरणानन्तरं, सत्रिणः, आवेदयेयुः पौरान् बोधयेयुः, कथमिति, शून्यपालो घातयति, विलोपयति च धनमाहारयति च, इति।

एवमिति। अनेन शून्यपालपौरभेदनन्यायेन, जानपदान्, समाहर्तुः समाहर्तृसकाशाद्, भेदयेयुः।

अथ जानपदेभ्यः समाहर्तारं भेदयितुमुपायमाह-समाहर्तृपुरुषांस्त्विति। समाहर्तुरधश्चरान् पुरुषान्, ग्राममध्येषु, रात्रौ, तीक्ष्णाः हत्वा ब्रूयुः। वक्तव्यप्रकारमाह-एवं क्रियन्ते इत्यादि। एवं स्वीयपुरुषहननेन तदपख्यातिसृष्ट्या च जानपदेभ्यः समाहर्ता विरज्य भिद्येतेत्यभिप्रायः।

इत्थं सत्र्यादिभिरारोपिते दोषे सर्वतः प्रथां प्राप्ते सति शून्यपालं समाहर्तारं वा प्रकृतिभिरेकलोष्टवधेन सत्रिणो घातयेयुः; परस्य ज्ञातिं तत्पुत्रं वावरुद्धं राज्ये निवेशयेयुश्चेत्याह-समुत्पन्न इत्यादि।।

अध्यायप्रान्ते श्लोकमाह-अन्तःपुरेत्यादि। अस्य शत्रोः, अन्तःपुरपुरद्वारद्रव्यधान्यपरिग्रहान् अन्तःपुरं गोपुरं काष्ठादिद्रव्याणां शाल्वादिधान्यानां च संग्रहागाराणि च, दहेयुः। तांश्च अन्तःपुरादीन् अर्थात् तत्पालकांश्च, हन्युर्वा। आर्तवादिनः दाहहननाभ्यामन्यकृताभ्यामिवात्मानमार्तिमन्तमभिनयन्तः, अस्य पौरस्य जानपदस्य च ब्रूयुः स्वकृतं दाहादिकमकृत्यं पौरजानपदकृतमिति वदेयुरित्यर्थः।।

इति कौटलीयार्थशास्त्रव्याख्यायाम् आबलीयसे द्वादशेऽधिकरणे द्वितीयोऽध्यायः
दूतकर्मणि वाक्ययुद्धं दूतकर्म समाप्तं मन्त्रयुद्धम्,
आदितः सप्तत्रिंशच्छततमः।।

They may leave weapons soaked with blood and other articles like rope (to convince the people of the role of the other). Then the spies should declare : "The officer is killing and looting the wealth."

Thus spies may cause disagreement between citizens and collector-general.

Spies should kill the officer under the collector-general during night and declare : "Thus will be treated those who subject the people to unjust oppression."

Once the officer as well as the collector-general are accused, spies may kill them under the excuse of the anger of people. In their place a member of their family or one who is imprisoned may be employed.

Spreading the false news of the danger of the enemy spies may set fire to the harem, the gates of the town, store-house of grains and other things and kill the sentinels who guard them.

Thus the one hundred and thirty seventh chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the second chapter of the twelfth Adhikaraṇa dealing with the section on 'battle of intrigue.'

Chapter 138

164, 165. प्रक० सेनामुख्यवधः मण्डलप्रोत्साहनं च।

Sections 164 : Killing of Commander-in-Chief 165 : Inciting a Circle of States

राज्ञो राजवल्लभानां चासन्नाः सत्रिणः पत्त्यश्वरथद्विपमुख्यानां 'राजा क्रुद्धः' इति सुहृद्विश्वासेन मित्रस्थानीयेषु कथयेयुः। बहुलीभूते तीक्ष्णा कृतरात्रिचारप्रतीकाराः गृहेषु 'स्वामिवचनेन आगम्यताम्' इति ब्रूयुः, तान् निर्गच्छत एवाभिहन्युः। 'स्वामिसन्देशः' इति चासन्नान् ब्रूयुः। ये च प्रवासितास्तान् सत्रिणो ब्रूयुः-'एतत्तद् यदस्माभिः कथितं, जीवितुकामेन अपक्रान्तव्यम्' इति।

येभ्यश्च राजा याचितो न ददाति तान् सत्रिणो ब्रूयुः-"उक्तः शून्यपालो राज्ञा 'अयाच्यमर्थमसौ चासौ मा याचते; मया प्रत्याख्याताः शत्रुसंहिताः; तेषामुद्धरणे प्रयतस्व' इति"। ततः पूर्ववदाचरेत्।

सेनामुख्यवधप्रकरणस्यार्थशेषमाह-राज्ञ इति। तस्य, राजबल्लभानां च, आसन्नाः मित्रवेषाः, सत्रिणः, पत्त्यश्वरथद्विपमुख्यानां पत्त्यादिशब्दैस्तत्तदध्यक्षा गृह्यन्ते मुख्यशब्देन महामात्राः तेषां, मित्रस्थानीयेषु, सुहृद्विश्वासेन सौहार्दविस्रम्भेण, कथयेयुः, कथमिति, राजा क्रुद्ध इति पत्त्यध्यक्षादीन् प्रति राजा कुपित इति। बहुलीभूत इति। राजकोपप्रवादे सर्वतः प्रसृते सति, तीक्ष्णाः, कृतरात्रिचारप्रतीकाराः सज्जितरात्रिसंचारदोष-प्रतिक्रियाः सन्तः, गृहेषु गत्वेति शेषः, स्वामिवचनेन आगम्यताम् अर्थात् स्वाम्यन्तिकम्, इति, ब्रुयुः। तान् पत्त्यध्यक्षादीन्, निर्गच्छत एव, अभिहन्युः, स्वामिसन्देश इति च स्वाम्याज्ञयेदमस्माभिः कृतमिति च, आसन्नान् मित्रवेषान् सत्रिणः, ब्रूयुः। तथोक्ताश्च सत्रिणः अनेन राजसकाशानपक्रान्तमुख्यादिगतिनिदर्शनेन तदपक्रान्तपूर्वान् प्रत्यात्मना पूर्वं कथितस्य राजदोषस्य प्रत्यक्षदृष्टतां बोधयेयुः शेषापक्रमणार्थमित्य-भिप्रायकमाह-ये च प्रवासित इत्यादि। इह अपक्रान्तव्यमित्यार्षम्, अपक्रमितव्यमिति हि भाव्यम्।

उपजापस्य प्रकारान्तरमाह-येभ्यश्च राजा याचितो न ददातीत्यादि। मा मां। प्रत्याख्याताः याचितार्थदानेन न सम्भाविताः, अर्थादयाच्ययाचितारः पुरुषविशेषाः। शत्रुसंहिताः अदाननिमित्तात् कोपाच्छत्रुणा सङ्गताः। इतिशब्दानन्तरमन्य इतिशब्दोऽध्याहर्तव्यः। ततः पूर्ववदाचरेदिति। पूर्ववदाचरणं तु तीक्ष्णैः कतिपयानां रात्रौ घातनम् अघातितानां तद्वधनिदर्शनेन राजसकाशादपक्रामणं च पूर्वोक्तं द्रष्टव्यम्।

Spies in the service of the king or his courtiers after gaining confidence say in the presence of other friends that "the king is angry" with the chief of infantry, cavalry, chariots and elephants (as also of ministers). When they mingle together, fiery spies guarding themselves against night watches, may, under the king's order invite the chiefs to a certain house saying "you come as per the orders of the king" and while they return to their own residences slay them. "This is the order of the king"; they may tell the other spies. Spies may tell those who have been banished from the country : "This is what we told you and if you want to live, you may go elsewhere.

Spies may tell those who were refused by the king by not giving their prayer :—"The officer in charge of waste lands is instructed by the king (as follows): "This particular person has begged of me what he should not demand; I have refused to grant his request and hence has gone to the side of my enemy; try to redeem them." Thereafter the spies may proceed in their usual way.

येभ्यश्च राजा याचितो ददाति, तान् सत्रिणो ब्रूयुः–"उक्तः शून्यपालो राज्ञा - अयाच्यमर्थमसौ चासौ च मा याचते; तेभ्यो मया सोऽर्थो विश्वासार्थे दत्तः शत्रुसंहिताः। तेषामुद्धरणे प्रयतस्व इति।" ततः पूर्ववदाचरेत्।

ये चैनं याच्यमर्थं न याचन्ते, तान् सत्रिणो ब्रूयुः–"उक्तः शून्यपालो राज्ञा–याच्यमर्थमसौ चासौ च मा न याचते; किमन्यत् स्वदोषशङ्कितत्वात्; तेषामुद्धरणे प्रयतस्व इति।" ततः पूर्ववदाचरेत्।

एतेन सर्वः कृत्यपक्षो व्याख्यातः।

प्रत्यासन्नो वा राजानं सत्री ग्राहयेत्–'असौ चासौ च ते महामात्रः शत्रुपुरुषैः सम्भाषते' इति। प्रतिपन्ने दूष्यानस्य शासनहरान् दर्शयेत्–'एतत्तत्' इति।

सेनामुख्यप्रकृतिपुरुषान् वा भूम्या हिरण्येन वा लोभयित्वा स्वेषु विक्रमयेदपवाहयेद् वा। योऽस्य पुत्रः समीपे दुर्गे वा प्रतिवसति,

याचितार्थदानसम्भावितविषयेऽप्युपजापमाह–येभ्यश्च राजा याचितो ददातीत्यादि। शत्रुसंहिताः शत्रुणा सङ्गताः अर्थात् ते याचितारः।

याच्यार्थयाचितृविषयेऽप्युपजापमाह–ये चैनं याच्यमर्थं न याचन्त इत्यादि। किमन्यदिति। अयाचने निमित्तं स्वदोषशङ्कितत्वातिरिक्तं न किञ्चिद् भवितुमर्हतीत्यर्थः।

उक्तं मुख्यभेदनप्रकारं क्रुद्धलुब्धभीतवर्गेऽतिदिशति–एतेनेत्यादि।

इत्थं महामात्रादीनां राजसकाशाद् भेदनमभिहितम्। इदानीं महामात्रादिसकाशाद् राज्ञो भेदनमाह–प्रत्यासन्नो वेति। आप्तच्छद्मा, सत्री, राजानं, ग्राहयेद् बोधयेत्। कथमित्याह–असौ चासौ चेत्यादि। प्रतिपन्न

इति। सत्रिवचनेऽङ्गीकृते सति, अस्य दूष्यान् विजिगीषोर्दूषणीयत्वेन बध्यान्, शासनहरान् महामात्रं प्रति शासननेतॄन् पथि गृहीतान्, दर्शयेद् अर्थात् राज्ञे, एतत् तदिति यन्मयोक्तं पूर्वं तत् प्रत्यक्षं जातमिति, कथयन्निति शेषः।

सेनामुख्यप्रकृतिपुरुषान् वेति। सेनामुख्याः बलाध्यक्षाः प्रकृतयः अमात्यादयः पुरुषाः भृतकाः एतान् वा, भूम्या हिरण्येन वा लोभयित्वा 'भूमिहिरण्ये वो दास्यामी'त्युपप्रलोभ्य, स्वेषु, विक्रमयेत् अभियोजयेत्,

Spies may tell those who have been granted their request by the king. "The king has asked the officer in charge of waste land that." These particular persons have requested me.to grant what should not be granted; I have granted the request to gain their confidence; but they have gone to the side of the enemy. Try to redeem them". Thereafter the spies may do what is needed in their usual way.

The spies may tell those who do not demand their due from the king—"The king has told the officer the waste land—"Such and such person do not demand their dues from me. What else can be the reason other than their feeling of guilt; try to redeem them." Thereafter the spies may act in their usual way.

This explains the treatment of all partisans.

A spy in the service of a king should inform him—"Such and such ministers of his are found conversing with the enemy's men" When he is convinced the spy may point out some treacherous person as the representatives of the enemy and say—"this is that."

Commanders of the army, ministers and other officers may be tempted by offering land and gold to attack their own men or to send them away. If one of the sons of the commander lives near by or in fort, he may be seduced by the spies saying :

तं सत्रिणोपजापयेत्—'आत्मसम्पन्नतरस्त्वं पुत्रः तथाप्यन्तर्हितः; तत् किमुपेक्षसे। विक्रम्य गृहाण; पुरा त्वा युवराजो विनाशयति' इति।

तत्कुलीनमवरुद्धं वा हिरण्येन प्रतिलोभ्य ब्रूयात्—'अन्तर्बलं प्रत्यन्तस्कन्धमन्यं वास्य प्रमृद्नीहि' इति।

आटविकानर्थमानाभ्यामुपगृह्य राज्यमस्य घातयेत्।

पार्ष्णिग्राहं वास्य ब्रूयाद्—'एष खलु राजा मामुच्छिद्य त्वामुच्छेत्स्यति; पार्ष्णिमस्य गृहाणः त्वयि निवृत्तस्याहं पार्ष्णिं ग्रहीष्यामि' इति। मित्राणि वास्य ब्रूयात्—अहं वः सेतुः; मयि विभिन्ने सर्वानेष वो राजाप्लावयिष्यति' इति। 'सम्भूय वास्य यात्रां

अपवाह्येद् वा स्वेभ्योऽपसारयेद् वा। प्रकारान्तरमाह—य इति। यः, अस्य सज्ञः, पुत्रः, समीपे राजधान्यां, दुर्गे वा अन्तपालदुर्गस्थाने वा, प्रतिवसति, तं, सत्रिणा, उपजापयेत्, कथमुक्त्वा, त्वम् आत्मसम्पन्नतरः पुत्रः

युवराजभूतपुत्रापेक्षया अतिशयेनात्मसम्पद्युक्त: पुत्र:, तथापि, अन्तर्हित: नियन्त्रितोऽसि। तत् तस्मात्, किमुपेक्षसे, विक्रम्य गृहाण, अर्थाद् राज्यभागम्। युवराज:, त्वा त्वां, विनाशयति पुरा विनाशयिष्यति, अर्थादात्मसम्पदतिशययोगनिमित्तादमर्षात्। इति।

प्रकारमन्यमाह–तत्कुलीनमित्यादि। अन्तर्बलं मौलबलम्। प्रत्यन्तस्कन्धं स्कन्ध: सैन्यं विषयान्तस्थितं सैन्यमित्यर्थ:। अन्यं वा प्रत्यन्तस्कन्धातिरिक्तं स्कन्धं वा। अन्तामिति पाठश्चिन्त्यार्थ:। प्रमृद्नीहि विध्वंसय।

प्रकारान्तरमाह–आटविकानित्यादि। अर्थमानाभ्यां धनेन पूजया च। उपगृह्य स्वार्थत्तीकृत्य। इत्थं सेनामुख्यवधशेषो व्याख्यात:।

मण्डलप्रोत्साहनमिति सूत्रम्। दशराजकं मण्डलं तस्य प्रोत्साहनं बलवत्तरमभियोक्तारं प्रति समुद्योजनम् उच्यत इति सूत्रार्थ:।

तत्र पार्ष्णिग्राहप्रोत्साहनमाह–पार्ष्णिग्राहं वेत्यादि। त्वयि निवृत्तस्य त्वामभियुञ्जानस्य। मित्रप्रोत्साहनमाह–मित्राणि वास्येत्यादि। सेतु: पराभियोगनिरोधक:। आप्लावयिष्यति नाशयिष्यति। सामवायिकप्रोत्साहनमाह–सम्भूय वेति। संघीभूय वा, अस्य परस्य, यात्रां विहनाम

You area worthy son; still you are neglected; why are you indifferent? Seize power by force before the heir apparent destroys you."

A scion of the family or one who is imprisoned my be tempted by gold and be told : —"Desroy the inner strength of the enemy or a portion in the border of his country or some other region.

Or having seduced the wild tribes with money and rewards they may be prompted to destroy the region of the enemy.

Or the enemies rear-enemy may be told :—"This king having destroyed me will certainly destroy you; hence attack his rear and seize it; after your turn back, I shall attack his rear." His friends may be told :— "I am, as it were a bridge to you all; if I am broken the enemy king will plunge you all."

विहनाम' इति। तत्संहतानामसंहतानां च प्रेषयेत्–'एष खलु राजा मामुत्पाट्य भवत्सु कर्म करिष्यति। बुध्यध्वम्, अहं व: श्रेयानभ्यवपत्तुम्' इति।।

मध्यमस्य प्रहिणुयादुदासीनस्य वा पुन:।
यथासन्नस्य मोक्षार्थं सर्वस्वेन तदर्पणम्।।

।। इति कौटलीयार्थशास्त्रे आबलीयसे द्वादशेऽधिकरणे तृतीयोऽध्याय:
सेनामुख्यवध: मण्डलप्रोत्साहनं च
आदितोऽष्टात्रिंशच्छततम: ।।

विहतां करवाम। तत्संहतानामिति। तेन परेण सह संहतानां सामवायिकानाम्, असंहतानां तदन्येषां च, प्रेषयेत्, अर्थात् सन्देशहरम्। सन्देशप्रकारमाह–एष खल्वित्यादि। कर्म उच्छेदनम्। अभ्यवपत्तुं श्रेयान् विपदि योग्यतर:।।

मध्यमस्येति। मध्यमस्य, उदासीनस्य वा, यथासन्नस्य आसत्तिमनतिवर्तमानस्य स्वप्रत्यासन्नस्येत्यर्थः। त्वदर्पणं 'तत्राहमस्मि रक्षणीयः सर्वथे'त्येवंरूपमात्मार्पणं, तदर्पणमिति पाठे तस्मिन् आत्मनोऽर्पणमित्यर्थः। सर्वस्वेन सर्वस्वपणनेन, प्रहिणुयात् प्रेषयेत् अर्थादबलीयान्। किमर्थं, मोक्षार्थं बलीयसोऽभियुञ्जानात् स्वस्य मोचनार्थम्।।

इति कौटलीयार्थशास्त्रव्याख्यायाम् आबलीयसे द्वादशेऽधिकरणे
तृतीयोऽध्यायः सेनामुख्यवधः मण्डलप्रोत्साहनं च,
आदितोऽष्टात्रिंशच्छततमः।।

"Let us join together to thwart his march." Accordingly a message may be sent to individuals or combined forces—"This king having done with me will turn towards you for the work; beware if of; I am the best for you to rely upon."

To avoid the danger from an immediate enemy, a king should frequently send to a Madhyama or a neutral king (proper things) or one may put one's whole property at the disposal of the enemy.

Thus the one hundred and thirty eighth chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the third chapter of the twelfth Adhikaraṇa dealing with the sections on 'Killing of commander-in-chief; and inciting a circle of states.

Chapter 139

166, 167. प्रक० शस्त्राग्निरसप्रणिधयः, वीवधासारप्रसारवधश्च।

Sections 166 : Spies With Weapons, Fire and Poison

167 : Destruction of Suppiy, Stores and Granaries

ये चास्य दुर्गेषु वैदेहकव्यञ्जनाः, ग्रामेषु गृहपतिकव्यञ्जनाः, जनपदसन्धिषु गोरक्षकतापस- व्यञ्जनाः, ते सामन्ताटविकतत्कुलीनावरुद्धानां पण्यागारपूर्वं प्रेषयेयुः–'अयं देशो हार्य' इति। आगतांश्चैषां दुर्गे गूढपुरुषानर्थमानाभ्याम् अभिसत्कृत्य प्रकृतिच्छिद्राणि प्रदर्शयेयुः। तेषु तैः सह प्रहरेयुः।

स्कन्धावारे वास्य शौण्डिकव्यञ्जनः पुत्रमभित्यक्तं स्थापयित्वा अवस्कन्दकाले रसेन प्रवासयित्वा 'नैषेचनिकम्' इति मदनरसयुक्तान् मद्यकुम्भाञ्छतशः प्रयच्छेत्। शुद्धं वा मद्यं पाद्यं वा मद्यं

शस्त्राग्निरसप्रणिधय इति सूत्रम्। शस्त्राग्निरसानां प्रणिधयः गूढप्रयोगा अभिधीयन्त इति सूत्रार्थः। प्रोत्साहितस्य मण्डलस्य परं प्रति अनुत्थाने उत्थानविलम्बे वा दृष्टे यद् विजिगीषुणा कर्त्तव्यं, तदिहोच्यते।

तत्र शस्त्रप्रणिधिमाह–ये चेत्यादि। अस्य परस्य। दुर्गेषु स्थानीयेषु। जनपदसन्धिषु जनपदपरस्परा-भ्यन्तरेषु। सामन्ताटविकतत्कुलीनावरुद्धानां परनिसर्गविरोधिनां सामान्तादीनाम्। पण्यागारपूर्वं मार्गापेक्षित-पण्यागारसंविधानपुरस्सरम्। प्रेषयेयुः पुरुषान्। प्रहिणुयुः। प्रेष्यमाणपुरुषार्पणीयं सन्देशमाह–अयं देशो हार्य इतीति। 'परस्यैष देशो बहुच्छिद्रत्वाद् युष्माभिर्हर्तुं शक्यः, तत् सद्य एवागच्छते'ति सन्दिश्येत्यर्थः। आगतांश्चेति। आगतान्, एषां सामन्ताटविकादीनां, गूढपुरुषान्, अर्थमानाभ्यां धनेन पूजया च, अभिसत्कृत्य उपचर्य, प्रकृतिच्छिद्राणि प्रकृतीनामन्योन्यक्रोधभयादीनि रन्ध्राणि, प्रदर्शयेयुः, तेभ्यः। तेषु दर्शितेषु च्छिद्रेषु तैः सह प्रहरेयुः।

रसप्रणिधिमाह–स्कन्धावारे वेति। अस्य परस्य, स्कन्धावारे, शौण्डिकव्यञ्जनः सौरिकवेषः सत्री, सौरिकेति क्वचित् पाठः। अभित्यक्तं वध्यं कञ्चित्, पुत्रं स्थापयित्वा स्वपुत्रत्वेन व्यपदिश्य, अवस्कन्दकाले

रात्रिविलोपादिकाले, रसेन विषेण, प्रवासयित्वा मारयित्वा, नैषेचनिकमिति मृतसन्तर्पणार्थमित्यपदेशेन, मदनरसयुक्तान् मादकविषमिश्रान्, मद्यकुम्भान्, शतशः, प्रयच्छेद् दद्यात्। विश्वासार्थं पक्षान्तरमाह -शुद्धं वा मद्यमित्यादि। शुद्धं विषसम्बन्धरहितम्। पाद्यं मारणापेक्षिताया विषमात्रायाश्चतुर्थांशः

The spies of the conqueror residing as traders in the forts of the enemy and those who are living as cultivators in the villages as well as those who are living as cowherds or ascetics in in the district borders of the country, may send through merchants, information to another's neighbouring enemy, or a wild chief or a scion of the enemy's family, or an imprisoned prince, that the enemy's "country is to be captured." When the secret emissaries arrive as per invitation, they may be pleased with rewards or wealth and honour and shown the weak points of the enemy. With the help of the emissaries the spies should strike at the weak points of the enemy.

A spy having disguised himself as a vintner, may put a condemned person in the camp of the enemy as though he were the son, and then kill him during the night and then distribute hundreds of potfuls of liquor mixed with the juice of the Madana plant as toast to the departed.

दद्यादेकमहः, उत्तरं रससिद्धं प्रयच्छेत्। शुद्धं वा मद्यं दण्डमुख्येभ्यः प्रदाय मदकाले रससिद्धं प्रयच्छेत्।

दण्डमुख्यव्यञ्जनो वा 'पुत्रमभित्यक्तम्' इति–समानम्।

पक्वमांसिकौदनिकशौण्डिकापूपिकव्यञ्जना वा पण्यविशेषमवघोषयित्वा परस्पर-सङ्घर्षेण कालिकं समर्घतरमिति वा परानाहूय रसेन स्वपण्यान्यपचारयेयुः।

सुराक्षीरदधिसर्पिस्तैलानि वा तद्व्यवहर्तृहस्तेषु गृहीत्वा स्त्रियो बालाश्च रसयुक्तेषु स्वभाजनेषु परिकिरेयुः; 'अनेनार्घेण विशिष्टं वा भूयो दीयताम्' इति तत्रैवावकिरेयुः।

पादः तावन्मात्रयुक्तम्। एकम् अहः प्रथमं दिवसम्, अत्यन्तसंयोगे द्वितीया। उत्तरं द्वितीयादिकम् अहः। रससिद्धिं पर्याप्तविषयोगनिष्पन्नम्। सेनामुख्याः प्रथममन्यं पाययित्वा पश्चात् स्वयं पिबन्तीति समुदाचारः, तस्मात् तेभ्यः शुद्धं मद्यं प्रथमं दत्त्वा तत्पानमत्तत्वदशायां विषयोगनिष्पन्नं दद्यादित्याह–शुद्धं वा मद्यं दण्डमुख्येभ्य इत्यादि।

दण्डमुख्यव्यञ्जनो भूत्वा वा सत्री शौण्डिकव्यञ्जनवत् पुत्रमभित्यक्तं स्थापयित्वावस्कन्दकाले रसेन व्यापाद्य च नैषेचनिकापदेशेन मदनरसयुक्तान् मद्यकुम्भान् प्रयच्छेदित्याह–दण्डमुख्येत्यादि।

पक्वमांसान्नसुरापूपान्यतमविक्रयिव्यञ्जना वा भूत्वा स्वस्वपण्यगतं गुणविशेषं प्रख्याप्य परस्परस्पर्धया कालान्तरदेयमूल्यं लघुतरार्घं चेत्युक्त्वा परानाहूय विषेण स्वपण्यानि मिश्रयित्वा प्रयच्छेयुरित्याह–पक्वमांसिकौदनिकेत्यादि। कालिकं कालान्तरदेयमूल्यम्। समर्थतरं सङ्गतमूल्यं समर्घे युक्ततरमूल्यं समर्घतरं लघुतरमूल्यमित्यर्थः।

सुरेत्यादि। सुरादीनि पञ्च वा, तद्व्यवहर्तृहस्तेषु गृहीत्वा सुरादिविक्रयिहस्तेभ्य आदाय, स्त्रियो बालाश्च, रसयुक्तेषु विषयुक्तेषु, स्वभाजनेषु, परिकिरेयुः तदन्तर्गतविषसंमिश्रता यथा स्यात् तथा परिलुलितानि कुर्युः! अनेन अर्घेण पूर्वोक्तादन्येन मूल्येन, दीयतां, विशिष्टं वा भूयो दीयतां, पण्यम् इति वदन्त इति शेषः। तत्रैव विक्रेतृभाजनेष्वेव, अवकिरेयुः प्रत्यर्पयेयुः स्वापराधपरिहारार्थम्।

For a day he may distribute pure liquor or slightly contaminated liquor and later poisoned liquor. To the chiefs also he may give pure liquor to start with and once they are intoxicated, they may be administered poisonous liquor.

One disguised as the chief of the army may put a condemned son and the rest of the procedure is the same.

Spies disguised as expert in trading cooked flesh, cooked liquor and cakes may compete with each other in proclaiming in public the sale of a fresh supply of their special articles at cheap price, and may sell the articles mixed with poison to the customers from the enemy ranks.

Women and children may receive, in their poisoned vessels, liquor, milk, curd, ghee or oil from traders of such articles and thereafter pour those fluids back into the vessels of traders saying "give us more of the same or better things at a given price."

एतान्येव वैदेहकव्यञ्जनाः पण्यविक्रयेणाहर्तारो वा हस्त्यश्वानां विधायवसेषु रसभासन्ना दद्युः।

कर्मकरव्यञ्जना वा रसाक्तं यवसमुदकं वा विक्रीणीरन्। चिरसंसृष्टा वा गोवाणिजका गवामजावीनां वा यूथान्यवस्कन्दकालेषु परेषां मोहस्थानेषु प्रमुञ्चेयुः। अश्वखरोष्ट्रमहिषादीनां दुष्टांश्च तद्व्यञ्जना वा चुचुन्दरीशोणिताक्ताक्षान्; लुब्धकव्यञ्जना वा व्यालमृगान् पञ्जरेभ्यः प्रमुञ्चेयुः; सर्पग्राहा वा सर्पानुग्रविषान्; हस्तिजीविनो वा हस्तिनः।

अग्निजीविनो वा अग्निमवसृजेयुः।

गूढपुरुषा वा विमुखान् पत्त्यश्वरथद्विपमुख्यानभिहन्युः; आदीपयेयुर्वा मुख्यावासान्। दूष्यामित्राटविकव्यञ्जनाः प्रणिहिताः पृष्ठाभिघातमवस्कन्दप्रतिग्रहं वा कुर्युः। वनगूढा वा प्रत्यन्तस्कन्धमुपनिष्कृष्याभिहन्युः।

एतान्येवेति। सुराक्षीरादीन्येव, वैदेहकव्यञ्जनाः, पण्यविक्रयेण सुरादिरूपपण्यविक्रयापदेशेन, आहर्तारो वा, हस्त्यश्वानां विधायवसेषु विधासु हस्त्यन्नेषु यवसेषु घासेषु च, रसं विषम्, आसन्नाः, दद्युः।

कर्मकरव्यञ्जना वेत्यादि। रसाक्तं विषमिश्रम्। चिरेत्यादि। चिरसंसृष्टाः। चिरकृतसख्याः। मोहस्थानेषु इतिकर्तव्यतामौढ्यावसरेषु। प्रमुञ्चेयुः विसृजेयुः व्याकुलतातिशयार्थम्। अश्वखरोष्ट्रेत्यादि। तद्व्यञ्जनाः अश्वादिवाणिजकव्यञ्जनाः। चुचुन्दरीशोणिताक्ताक्षान् चुचुन्दरी उग्रविषो मूषिकजातिविशेषः तद्रुधिरयुक्त-नयनान्। लुब्धकेत्यादि। लुब्धकव्यञ्जनाः व्याधवेषाः। हस्तिनः गजान्, प्रमुञ्चेयुरिति सम्बध्यते।

अग्निप्रणिधानमाह–अग्निजीविनो वेत्यादि।

गूढपुरुषा वेत्यादि। मुख्यावासान् मुख्यानां वासस्थानानि। दूष्यामित्रेत्यादि। प्रणिहिताः परेषु प्रयुक्ताः। पृष्ठाभिघातं पृष्ठतोऽनुगम्य हननम्। अवस्कन्दप्रतिग्रहम् अवस्कन्दं प्रतिग्रहं च, अवस्कन्दः सौप्तिकापहारः प्रतिग्रहः अभिगच्छत्परबलप्रत्यवस्थानम्। वनगूढा वेत्यादि। प्रत्यन्तस्कन्धं विषयान्ते रक्षार्थं निवेशितं सैन्यम्। उपनिष्कृष्य समीपे समाकृष्य।

वीवधासारप्रसारवध इति सूत्रम्। स्फुटार्थम्।

Spies disguised as merchants may purchase the above articles and shall manage that these are given to the elephants and horses along with their food items, by convincing their keepers.

Spies under the garb of servants may sell poisoned grass or water. Those who trade in cattles may let off herds of cows and goats in tempting places so as to divert the attention of the enemy during times of attack. They may let off such animals as are ferocious among horses, mules, camels, buffaloes and other beasts, having smeared the eyes of those animals with the blood of a musk-rat; spies as hunters may let off cruel beasts from traps; spies as snake charmers may let off highly poisonous snakes and those who keep elephants may let off elephants.

Those who live by making use of fire may set fire (to camp etc.)

Secret spies may kill from behind the chiefs of infantry, cavalry, chariots and elephants or they may set fire to the residences of chieftains. Traitors, enemies and wild tribes employed in various guises may destroy the enemy's rear or obstruct his reinforcement, spies living in forests may enter the bordering regions of the enemy's country and devastate it.

एकायने वीवधासारप्रसारान् वा।

ससङ्केतं वा रात्रियुद्धे भूरितूर्यमाहत्य ब्रूयुः–'अनुप्रविष्टाः स्मो लब्धं राज्यम्' इति। राजावासमनुप्रविष्टा वा सङ्कुलेषु राजानं हन्युः।

सर्वतो वा प्रयातमेनं म्लेच्छाटविकदण्डचारिणः सत्रापाश्रयाः स्तम्भवाटापाश्रया वा हन्युः।

लुब्धकव्यञ्जना वावस्कन्दसङ्कुलेषु गूढयुद्धहेतुभिरभिहन्युः।

एकायने वा शैलस्तम्भवाटखञ्जनान्तरुदके वा स्वभूमिबलेनाभिहन्युः। नदीसरस्तटाकसेतुबन्धभेदवेगेन वाप्लावयेयुः। धान्वनवननिम्नदुर्गस्थं वा योगाग्निधूमाभ्यां नाशयेयुः।

एकेत्वादि। एकायने एकैककमगम्ये सङ्कुचितसङ्कटे मार्गे। वीवधासारप्रसारान् वीवधो धान्यादिप्राप्तिः आसारः सुहृद्बलागमः प्रसारस्तृणकाष्ठादिप्रवेशः एतान्। अभिहन्युरिति वर्तते।

ससङ्केतं वेत्यादि। 'भूरितूर्याघातपूर्वं स्वपक्षजयोद्घोषणं रात्रियुद्धे परबलभयोत्पादनार्थं कर्तव्यमि'त्येवंरूपः समयः सङ्केतः तद्युक्तं यथा भवति तथा। अनुप्रविष्टाः अर्थात् परस्य स्थानीयम्। संकुलेषु तुमुलेषु।

सर्वतो वेत्यादि। एनं राजानम्। सत्रापाश्रयाः सत्रं 'धान्वनवनसङ्कटे'त्यादिना साङ्ग्रामिकतृतीयाध्याये लक्षितं मरुदुर्गादिकं तदाश्रयाः। स्तम्भवाटापाश्रयाः स्तम्भवाटः स्तम्भयुक्ता वृतिः तदाश्रयाः, अथवा स्तम्भापाश्रया वाटापाश्रयाश्च। स्तम्भवनापाश्रया इति क्वचित् पाठः।

लुब्धकेत्यादि। अवस्कन्दसङ्कुलेषु अवस्कन्दनिमित्तेषु तुमुलेषु। गढयुद्धहेतुभिः कूटयुद्धविकल्पप्रकरणोक्तैः।

एकायने वेत्यादि। शैलस्तम्भवाटखञ्जनान्तरुदके शिलाप्राये स्तम्भवाटप्राये खञ्जनोदके अन्तरुदके च प्रदेशे। अभिहन्युः अर्थात् परबलम्। नद्यादिभेदनप्रवर्तितजलप्रवाहवेगेनाकृष्टं कृत्वा परं नाशयेयुरित्याह–नदीसरस्तटाकेत्यादि। धान्वनदुर्गस्थं वनदुर्गस्थं निम्नदुर्गस्थं च परं कपटोपायप्रयुक्तेनाग्निना धूमेन च नाशयेयुरित्याह–धान्वनेत्यादि।

They may destroy the supply, stores and other things when they are being transported through a narrow path passable by a single man.

According to a pre-conceived plan, they may, during a night-battle enter the enemy's capital and flowing a number eof trumpets, cry aloud : "We have entered into the capital, and the country has been conquered." Entering into the royal residence and in the tumult kill the king.

When the king tries to escape through one direction or other, Mlecchas, wild tribes, or chiefs of the army lying in ambush concealed behind a pillar or fence may slay him.

Or spies under the guise of hunters may slay the king when he is directing the attack or in the tumult of a treacherous battle.

Or they may kill the enemy when he is marching through a narrow path passable only by a single man; or on a mountain, or near the trunk of a tree, or in water. Or they may cause the enemy to be washed away by floods by breaking a dam across a river, or of a lake or pond. Or when the enemy is entrenched in a wild fort, forest or ditch they may be destroyed by poisonous fire and smoke.

सङ्कटगतमग्निना, धान्वनगतं धूमेन, निधानगतं रसेन, तोयावगाढं दुष्टग्राहैरुदकचरणैर्वा तीक्ष्णाः साधयेयुः।

आदीप्तावासात् निष्पतन्तं वा–

योगवामनयोगाभ्यां योगेनान्यतमेन वा।
अमित्रमतिसन्दध्यात् सक्तमुक्तासु भूमिषु।।

।। इति कौटलीयार्थशास्त्रे द्वादशेऽधिकरणे चतुर्थोऽध्यायः
शस्त्राग्निरसप्रणिधयः, वीवधासारप्रसारवधश्च,
आदित एकोनचत्वारिंशच्छततमः।।

सङ्कटगतमिति। अशक्यप्रवेशनिर्गमो देशः सङ्कटः तद्गतम्, अग्निना, धान्वनगतं धन्वदुर्गस्थं, धूमेन, निधानगतं निधानं गूढकोशस्थानं तद्गतं, रसेन विषेण, तोयावगाढं जलमग्नं, दुष्टग्राहैः दुष्टनक्रैः, उदकचरणैर्वा दुर्गलम्भोपाये (1 अध्याये) वक्ष्यमाणैस्तोयसञ्चरणसाधनैर्वा, तीक्ष्णाः साधयेयुः निगृह्णीयुः।

आदीप्तावासादित्यादि श्लोकान्वयि। योगवामनयोगाभ्यामिति। आदीप्तावासाद् निष्पतन्तम् अग्निदीपिताद् वासस्थानान्निष्क्रामन्तम्, उक्तासु भूमिषु धान्वनादिषु, सक्तं स्वरक्षार्थं कृतासङ्गम्, आमित्रं, योगवामनयोगाभ्यां योगवामनेन दुर्गलम्भोपाये वक्ष्यमाणेन योगेन च योगातिसन्धानाध्याये दर्शयिष्यमाणेन, अन्यतमेन योगेन वा परातिसन्धानोपायेषु पूर्वप्रदर्शितेष्वेकतमेन वा, अतिसन्दध्यात्।।

इति कौटलीयार्थशास्त्रव्याख्यायाम् आबलीयसे द्वादशेऽधिकरणे चतुर्थोऽध्यायः
शस्त्राग्निरसप्रणिधयः वीवधासारप्रसारवधश्च
आदित एकोनचत्वारिंशच्छततमः।।

Enemy concealed in a thicket should be destroyed by fire, placed in a forest fort by smoke and occupying a ditch by poison, and taking refuge in water, the enemy may be annihilated with the use of crocodile and other beasts, or by means of navigating water the spy should kill them.

When the enemy is running away from a house on fire—they be killed by means described in chapters dealing with "the enticement of enemy by secret means" or by any other means.

Thus the one hundred and thirty ninth chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the fourth chapter of the twelfth Adhikaraṇa dealing with the section of 'Spies with weapons, fire and poison; and 'destruction of supply stores and granaries.'

Chapter 140

168-170. प्रक० योगातिसन्धानं, दण्डातिसन्धानम्, एकविजयश्च।

Sections 158 : Capture by Secret Means
169 : Capture by Means of Army
170 : Complete Victory

दैवतेज्यायां यात्रायाममित्रस्य बहूनि पूज्यागमस्थानानि भक्तितः। तत्रास्य योगमुब्जयेत्।

देवतागृहप्रविष्टस्योपरि यन्त्रमोक्षणेन गूढभित्तिं शिलां वा पातयेत्। शिलाशस्त्रवर्षमुत्तमागारात्, कवाटमवपातितं वा, भित्तिप्रणिहितमेकदेशबन्धं वा परिघं मोक्षयेत्। देवतादेहस्थप्रहरणानि वास्योपरिष्टात् पातयेत्। स्थानासनगमनभूमिषु वास्य गोमयप्रदेहेन गन्धोदकावसेकेन वा रसमतिचारयेत् पुष्पचूर्णोपहारेण वा। गन्धप्रतिच्छन्नं वास्य तीक्ष्णं धूममतिनयेत्। शूलकूपमवपातनं वा शयनासनस्याधस्ताद् यन्त्रबद्धतलमेनं कीलमोक्षणेन प्रवेशयेत्। प्रत्यासन्ने वामित्रे जनपदाज्जनमवरोधक्षममतिनयेत्। दुर्गाच्चानवरोधक्षममपनयेत्।

योगातिसन्धानमिति सूत्रम्। कपटोपायेन वञ्चनमुच्यत इति सूत्रार्थः।

उपायप्रयोगावसरं वक्तुमाह–दैवतेज्यायामिति। दैवतपूजायां, यात्रायां दैवतोत्सवयात्रायाम्, अमित्रस्य शत्रोः, पूज्यागमस्थानानि पूजार्हागमनप्रसङ्गाः, भक्तितः दैवतभक्तिवशात्, सम्भवन्तीति शेषः। तत्र, अस्य अमित्रस्य अमित्रमुद्दिश्येत्यर्थः, योगम् उपायम्, उब्जयेत् प्रसारयेत् प्रयुञ्जीतेत्यर्थः।

योगप्रकारानाह–देवतागृहप्रविष्टस्येत्यादि। यन्त्रमोक्षणेन यन्त्रस्य गूढभित्तिशिलयोर्धारकस्य बन्धमोचनेन। शिलेत्यादि। उत्तमागारात् शिरोगृहात्। अवपातितम् अवस्थानाधाराद् विश्लेषितम्। भित्तिप्रणिहितं भित्तौ गूढनिवेशितम्। एकदेशबन्धम् असमग्रबन्धम् अत एव लघुमोक्षणीयमित्यर्थः। परिघं दण्डम्। देवतेत्यादि। अस्य राज्ञः। स्थानासनेत्यादि। गोमयप्रदेहेन गोपुरीषलेपेन। रसं विषम्। अतिचारयेत् सम्मिश्रयेत्। पुष्पचूर्णोपहारेण देवतानिर्माल्यकुसुमकुङ्कुमक्षोदोपदया। गन्धेत्यादि। गन्धप्रतिच्छन्नं सुरभिद्रव्यगन्धाभिभूतविषगन्धयोगम्। तीक्ष्णं विषदुष्टम्। अतिनयेत्। अतिशयेन ग्राहयेत्। शयनासनयोरधस्ताद् यन्त्ररचिततलमेनं शूलयुक्तकूपरूपे पातनगर्ते यन्त्रकीलमोक्षणेन प्रवेशयेदित्याह–शूलेत्यादि। अवपातनं पातनगर्तम्। शूलरूपमवपातनमिति कचित् पाठः। प्रत्यासन्ने वामित्र

There are several places of worship of gods, festivals and spots of pilgrimages. Countrivances (to kill the enemy) may be placed there.

An enemy be killed when he enters the temple by letting to full on him a stone or a wall by means of loosening a mechanical contrivance. Stones and weapons may be showered on his head from the top; or a door panel may be let to fall or an iron bar loosely fitted to a wall may be let to fall over him; Weapon kept concealed on the idol of the god may be caused to fall on him. The floor of such places where he usually stands, sits or walks may be besprinkled with poison mixed with cowdung or with pure water or under the guise of offering flowers to him or scented powders. Or he may be poisoned with scented smoke. By removing the fastenings made under a cot or seat, he may be made to fall into a pit containing pointed spears. When the enemies are near by, he may be led from one place to another to facilitate his imprisonment. People who should not be arrested may be removed from the fort.

प्रत्यादेयमरिविषयं वा प्रेषयेत्। अनपदं चैकस्थं शैलवननदीदुर्गेष्वटवीव्यवहितेषु वा पुत्रभ्रातृपरिगृहीतं स्थापयेत्।

उपरोधहेतवो दण्डोपनतवृत्ते व्याख्याताः।

तृणकाष्ठम् आ योजनाद् दाहयेत्। उदकानि च दूषयेद्; अवास्रावयेच्च। कूटकूपाव-पातकण्टकिनीश्च बहिरुब्जयेत्।

सुरुङ्गामभित्रस्थाने बहुमुखीं कृत्वा विचयमुख्यानभिहारयेद्, अमित्रं वा। परप्रयुक्तायां वा सुरुङ्गायां परिखामुदकान्तिकीं खानयेत्, कूपशालामनुसालं वा। अतोयकुम्भान्, कांस्यभाण्डानि वा शङ्कास्थानेषु

इति। शत्रावन्तिकस्थे, जनपदात् तदीयाद्, जनम्, अवरोधक्षमम् अवरोधयोग्यम्, अतिनयेत् अतिशयेन नयेद् अवरोधार्थम्। दुर्गाच्च, अनवरोधक्षमम् अवरोधायोग्यं जनं, शत्रुणावरुद्धमित्यर्थः। अपनयेत् मोचयेदित्यर्थः। नीयमानो जनश्चेत् प्रत्यादेयस्तदा तं तच्छत्रुविषयं प्रेषयेदप्रत्यादानायेत्याह–प्रत्यादेयमित्यादि। जनपदमिति। तम्, एकस्थम् एकस्य राज्ञः शत्रुभूतस्य शासने स्थितं, शैलवननदीदुर्गेषु, अटवीव्यवहितेषु प्रदेशेषु वा, पुत्रभ्रातृपरिगृहीतं शत्रोः पुत्रैर्भ्रातृभिश्च स्वस्वायत्तीकृतं, स्थापयेत् कारयेत्।

उक्तजातीयान् प्रबलपरोपरोधहेतून् अन्यानपि अधिकरणान्तरोक्तान् स्मारयति–उपरोधहेतव इत्यादि। दण्डोपनतवृत्ते षाड्गुण्याधिकरणस्य पञ्चदशाध्याये।

भूयोऽपि योगानाह–तृणकाष्ठमिति। तृणानि काष्ठानि च, शत्रोरपेक्षितानि, आ योजनाद् योजनमितं प्रदेशमभिव्याप्य, दाहयेद् अमित्रस्य लभ्यानि मा भूवन्नित्येतदर्थम्, उदकानि च, दूषयेत् अर्थाद् विषेण। अवास्रावयेच्च कूलसेतुभेदनादिना निर्गालयेच्च। कूटेत्यादि। तत्र कूटकूपाः गूढा अन्धवः, अवपातास्तृणादि-च्छन्ना गर्ताः, कण्टकिन्यः कण्टकयुक्ता आयसरज्जवः। बहिः प्राकारबाह्ये परबलागमनमार्गे। उब्जयेत् निर्मापयेत्।

यत्रामित्रोऽवतिष्ठते तत्र भूविवरं बहुमुखं कारयित्वा तत्र विचयप्रधानान् अमित्रं च व्यासज्जयेदित्याह–सुरुङ्गाममित्रस्थान इत्यादि। अभिहारयेद् अभियोजयेत्। प्राकारान्तःप्रवेशार्थं परेण कृता चेत् सुरुङ्गा, तर्हि तत्प्रतिघातार्थमुदकदर्शनपर्यन्तावगाढं खेयं खानयेदित्याह–परप्रयुक्तायां चेत्यादि। परिखाखननस्यासुकरतायां प्राकारायामानुसारिणीं कूपशालां

They should be misled to enter an enemy's country which is to be restored (to the conqueror at a later time). The enemy's people should be kept under the protection of the sons and brothers (of the conquerors in some forts on a mountain or in the midst of a river separated from the enemy's country by wild tracts of land.

The reasons for such restriction is explained in the chapter on 'the conduct of a conquered king.'

Grass and fire wood should be set on fire as far as a yojanā water should be polluted and caused to flow away on muds, wells, pits and thorns outside the fort may be destroyed. The mouth of the underground tunnel of the fort of the enemy may be widened and those who search for the same may be brought there or an enemy. The tunnel made by an enemy may be deepened till water from the nearby ditch flows into it, as also wells near the fortwall of the enemy. Empty water pots or bronze vessels may be placed over the place of the tunnel so that it could be easily located. Once the path of the tunnel is known a counter tunnel may be dug. Or having opened the middle of the tunnel from above it may be filled with smoke and water.

स्थापयेत् खाताभिज्ञानार्थम्। ज्ञाते सुरुङ्गापथे प्रतिसुरुङ्गां कारयेत्। मध्ये भित्त्वा धूममुदकं वा प्रयच्छेत्।

प्रतिविहितदुर्गो वा मूले दायादं कृत्वा प्रतिलोमामस्य दिशं गच्छेत्–यतो वा मित्रैर्बन्धुभिराटविकैर्वा संसृज्येत, परस्यामित्रैर्दूष्यैर्वा महद्भिः; यतो वा गतोऽस्य मित्रैर्वियोगं कुर्यात्, पार्ष्णिं वा गृह्णीयात्, राज्यं वास्य हारयेत्, वीवधासारप्रसारान् वा वारयेत्; यतो वा शक्नुयाद् आक्षिकवदपक्षेपेणास्य प्रहर्तुं; यतो वा स्वं राज्यं त्रायेत्, मूलस्योपचयं वा कुर्यात्। यतः सन्धिमभिप्रेतं लभते, ततो वा गच्छेत्।

सहप्रस्थायिनो वास्य प्रेषयेयुः–'अयं ते शत्रुरस्माकं हस्तगतः

निर्मापयेदित्याह–कूपेत्यादि। अनुसालं सालः प्राकारः तद्दैर्ध्यानुसारेण। 'यस्य चायामः' इत्यव्ययीभावः। सुरुङ्गामार्गशङ्काविषयेषु स्थलेषु खाताभिज्ञापकचिह्नतया निर्जलघटान् कांस्यस्तूपान् वा स्थापयेदित्याह–अतोयकुम्भानित्यादि। सुरुङ्गामार्गे परकीये ज्ञाते प्रतिसुरुङ्गां कारयेत्, सुरुङ्गापथमध्ये च रन्ध्रं कृत्वा तदन्तर्विषधूमं विषोदकं वा दद्यादित्याह–ज्ञात इत्यादि।

यावच्छक्तिकृतदुर्गरक्षाविधानो वा दुर्बलः स्थानीये पुत्रं स्थापयित्वा स्वयम् आत्मानमभियुञ्जानस्य

शत्रोरनिष्टोत्पादनानुकूलां दिशं गच्छेदित्येवं पक्षान्तरमाह–प्रतिविहितदुर्गो वेत्यादि। दायादं पुत्रम्। प्रतिलोमां शत्रुप्रतिकूलाम्! प्रतिलोम्यप्रकारान् दर्शयति–यतो वा मित्रैरित्यादि। यां दिशं गतः स्वमित्रबान्धवाटविकैः सह संसर्गं शत्र्वपकारार्थे लभेत, शत्रोरभित्रैस्तदपकरणशक्तैर्दूष्यैर्वा संसृष्टो भवेत्; यां गतः शत्रोस्तन्मित्रयोगं विघटयेत्, पृष्ठं वा गृह्णीयात्, राज्यं वा शत्रोरपहरेत्, शत्रोर्वीवधासारप्रसारान् वा निरुन्ध्यात्, यां गतः कपटाक्षपातनेनेवाक्षदेवी कपटप्रयोगेण शत्रुं प्रहर्तुं शक्तो भवेत्, यां गतः स्वं राज्यं वा रक्षेत्, मूलं वोपचिनुयादित्यर्थः। यां दिशं गतः स्वाभिमतप्रकारं सन्धिं लभेत, तां दिशं गच्छेदित्याह–गतः सन्धिमित्यादि।

योगान्तरमाह–सहप्रस्थायिनो वेति। प्रतिलोमदिग्गतस्य सहयायिनो गूढपुरुषाः, अस्य शत्रोः, प्रेषयेयुः अर्थात् सन्देशम्। सन्देशप्रकारमाह–

A weak king, having arranged for the defence of the fort by a scion of the family may proceed in an opposite direction where it is possible for him to meet with friends, relatives or wild tribes or with his enemies treacherous friends of great strength or where he may separate his enemy from the latter's friends or where he may capture the enemy's rear, or country or where he will be in a position to prevent the movements of the supplies to his enemy or form where he could strike his enemy by false means or means to defend his own country and to strengthen his hereditary army. Or he may go to any other place whence he can obtain peace on his own terms.

पण्यं विप्रकारं वापदिश्य हिरण्यमन्तस्सारबलं प्रेषयस्व, एनमर्पयेम बद्धं प्रवासितं वा' इति। प्रतिपन्ने हिरण्यं सारबलं चाददीत।

अन्तपालो वा दुर्गसम्प्रदानेन बलैकदेशमतिनीय विश्वस्तं घातयेत्।

जनपदमेकस्थं वा घातायतुमित्रानीकमावाहयेत्; तदवरुद्धदेशमतिनीय विश्वस्तं घातयेत्।

मित्रव्यञ्जनो वा बाह्यस्य प्रेषयेत्–'क्षीणमस्मिन् दुर्गे धान्यं स्नेहाः क्षारो लवणं वाः तदमुष्मिन् देशे काले च प्रवेक्ष्यति; तदुपगृहाण' इति। ततो रसविद्धं धान्यं स्नेहं क्षीरं लवणं वा दूष्यामित्राटविकाः प्रवेशयेयुः; अन्ये वा अभित्यक्ताः।

तेन सर्वभाण्डवीवधग्रहणं व्याख्यातम्।

अयं ते शत्रुरित्यादि। पण्यमपदिश्य हिरण्यं प्रेषयस्व, विप्रकारमपदिश्य अन्तस्सारबलं प्रेषयस्वेति सम्बन्धः। एनं त्वच्छत्रुम्। अर्पयेम अर्थात् तुभ्यम्। प्रवासितं मारितम्। सन्देशमभ्युपेत्य हिरण्ये सारबले च प्रेषिते तदुभयं स्वयं गृह्णीयादित्याह–प्रतिपन्न इत्यादि।

पक्षान्तरमाह–अन्तपालो वेति। स वा, दुर्गसम्प्रदानेन स्वाधिष्ठितदुर्गप्रदानेन, बलैकदेशं शत्रुसैन्यस्यैकदेशम्, अतिनीय अतिशयेन नीत्वा अशक्यापयानं देशं प्रापय्येत्यर्थः, विश्वस्तं घातयेत्।

प्रकारान्तरमाह–जनपदमिति। तम्, एकस्थम् एकीभूय स्वाविधेयतया स्थितं, घातयितुं निग्रहीतुम्, अमित्रानीकम्, आवाहयेत् आनाययेत्। तद्, अवरुद्धदेशं दुष्करनिर्गमनं देशम्, अतिनीय, विश्वस्तं, घातयेत्।

अन्यं पक्षमाह–मित्रव्यञ्जनो वेति। स वा, बाह्यस्य शत्रोः, प्रेषयेत्, अर्थात् सन्देशम्।

तत्स्वरूपमाह–क्षीणमस्मिन्नित्यादि। तद् धान्यादि। उपगृहाण त्वमपहृत्य स्वीकुरुष्व। एवं सन्देशप्रेषणानन्तरं विषयोगदूषितं धान्यादिकं दूष्यामित्राटविकाः विजिगीषुसम्बन्धिनः इतरे वा अभित्यक्ताः यथानिर्दिष्टे देशे काले च प्रवेशयेयुरित्याह–ततो रसविद्धमित्यादि।

अनेनैव प्रकारेण सर्वान् भाण्डवीवधान् रसविद्वान् कृतवा शत्रुणा ग्राहयेदित्याह–तेन सर्वेत्यादि।

Allies of such a person may be sent with the message—"This man, your enemy, has fallen into our hands; under plea of merchandise send gold and a strong army; we will hand over to you bound in chains or banish him." If agreed he may receive gold and strong army.

The officer in charge of the boundaries may lead a section of the army into the castle of the enemy and slay him in good faith. Under the plea of destroying some people in a locality he may take the division of the enemy to some place and kill them in good faith.

Pretending to be a friend he may send information to an out sider :—"In this fort grains, oil jaggery and salt is almost exhausted hence at this place and time such items will be brought, you may seize them." Thereafter poisoned grains, oils, jaggery and salt will be brought by traitors and wild tribes; or by other deceitful person.

This explains the seizure of all kinds of supply.

सन्धिं वा कृत्वा हिरण्यैकदेशमस्मै दद्यात्। विलम्बमानः शेषम्। ततो रक्षाविधानान्यवस्रावयेत्; अग्निरसशस्त्रैर्वा प्रहरेत्; हिरण्यप्रतिग्राहिणो वास्य वल्लभाननुगृह्णीयात्।

परिक्षीणो वास्मै दुर्गं दत्त्वा निर्गच्छेत् सुरुङ्गया। कुक्षिप्रदरेण वा प्राकारभेदेन निर्गच्छेत्।

रात्राववस्कन्दं दत्त्वा सिद्धस्तिष्ठेत्; असिद्धः पार्श्वेनापगच्छेत्; पाषण्डच्छद्मना मन्दपरिवारो निर्गच्छेत्; प्रेतव्यञ्जनो वा गूढैर्निर्ह्रियेत; स्त्रीवेषधारी वा प्रेतमनुगच्छेत्।

दैवतोपहारश्राद्धप्रहवणेषु वा रसविद्धमन्नपानमवसृज्य कृतोपजापो दूष्यव्यञ्जनैर्निष्पत्य गूढसैन्योऽभिहन्यात्।

प्रकारान्तरमाह–सन्धिं वेत्यादि। हिरण्यैकदेशं हिरण्यस्य पणितस्य कमपि भागम्। शेषदानविलम्बसाध्यमाहतत इति। ततः शेषदानविलम्बनवशादित्यर्थः, रक्षाविधानानि शत्रुकरणीयानि अवस्रावयेत् 'अभियोज्यः संहितः' इति विश्वासोत्पादद्वारेण उपेक्षयेदित्यर्थः। अग्निरसशस्त्रैर्वा प्रहरेत् अर्थादबलावितरक्षाविधानं शत्रुम्। हिरण्यप्रतिग्राहिणः उत्कोचग्रहणशीलान्, अस्य शत्रोः, वल्लभान् वा, अनुगृह्णीयात् उत्कोचदानेनावर्जयेत् तत्प्रहारार्थम्।

परिक्षीणो वेति। सर्वथा शत्रुनिवारणाशक्तः, अस्मै शत्रवे, दुर्गं दत्त्वा, सुरुङ्गया भूविवरेण, निर्गच्छेत्। कुक्षिप्रदरेण वा प्राकारभेदेन निर्गच्छेदिति। प्राकारस्य कुक्षौ यतः प्रदरोऽस्ति ततो भित्त्वा वा निस्सरेत्।

प्रकारान्तरमाह–रात्राविति। तदा, अवस्कन्दं सौप्तिकापहारं, दत्त्वा उत्पाद्य, सिद्धस्तिष्ठेत्, लब्धार्थश्चेत् तिष्ठेत्। असिद्धः, पार्श्वेन वक्रोपायेन, अपगच्छेत् न तु तिष्ठेत् प्राणापायभयात्। पार्श्वे प्रपञ्चयति–

पाषण्डच्छद्मनेति। पाषण्डवेषेण, मन्दपरिवार: अल्पपरिजन:, निर्गच्छेत्। प्रेतव्यञ्जनो वा, गूढै: गूढपुरुषै:, निर्हियेत आसन्दीवद्धो नगराद् बहिर्नीयेत, स्त्रीवेषधारी वा प्रेतभार्याच्छद्मा वा, प्रेतं निर्हियमाणम्, अनुगच्छेत्।

दैवतेत्यादि। देवबलिषु श्राद्धेषु उद्यानभोजनेषु च, रसविद्धं विषमिश्रम्, अन्नपानम्, अवसृज्य दत्त्वा, दूष्यव्यञ्जनै: दूष्यवेषै:, निष्पत्य स्वपक्षात् परपक्षं प्रविश्य, कृतोपजाप:, गूढसैन्य: गढै: स्वसैन्यैरुपेत:, अभिहन्यात्।। अथ

Having made peace with the conqueror, he (weak king) may give the former part of the gold promised. The rest may be given gradually. Thus he may induce the conqueror to slacken his defensive measures and then strike at him with fire, poison or weapons and pacify the courtiers of the conqueror who are to collect gold.

If his resources are exhaused, a weak king may go away, abandoning his fort by way of a tunnel. He may escape by a newly made hole or by breaking the parapet of the fort.

He may make a night-attack against the conqueror and if successful remain in his place; if not successful run away through a side path, or disguised as a heretic he may escape with a small retinue, or he may let himself carried off by spies as a corpse, or disguised as a woman following a corpse.

On the occasion of feeding people in temples, or funeral ceremonies of garden parties he may make use of poisoned food and drinks and having conspired with the traitors of his enemy he may attack the adversary with concealed army.

एवं गृहीतदुर्गो वा प्राश्यप्राशं चैत्यमुपस्थाप्य दैवतप्रतिमाच्छिद्रं प्रविश्यासीत; गूढभित्तिं वा दैवतप्रतिमायुक्तं भूमिगृहम्। विस्मृते सुरुङ्गया रात्रौ राजावासमनुप्रविश्य सुप्तममित्रं हन्यात्। यन्त्रविश्लेषणं वा विश्लेष्याधस्तादवपातयेत्। रसाग्नियोगेनावलिप्तं गृहं जतुगृहं वाधिशयानममित्रमादीपयेत्।

प्रमदवनविहाराणामन्यतमे वा विहारस्थाने प्रमत्तं भूमिगृहसुरुङ्गागूढभित्तिप्रविष्टास्तीक्ष्णा हन्यु:, गूढप्रणिहिता वा रसेन। स्वपतो वा निरुद्धे देशे गूढा: स्त्रिय: सर्परसाग्निधूमानुपरि मुञ्चेयु:।

प्रत्युत्पन्ने वा कारणे यद्यदुपपद्येत तत्तदमित्रेऽन्त:पुरगते गूढसञ्चार: प्रयुञ्जीत, ततो गूढमेवापगच्छेत्, स्वजनसंज्ञां च प्ररूपयेत्।।

एकविजय इति सूत्रम्। एकेन सैन्यसाहाय्यरहितेन विजिगीषुणा शत्रोरभिभवं इति सूत्रार्थ:।

परापहृतदुर्गस्य कर्तव्यमाह–एवमिति। अनेन प्रकारेण गृहीतदुर्गो वा, प्राश्यप्राशं प्राशनीयप्रभूताशनं, चैत्यं देवालयम्, उपस्थाप्य आत्मानं प्रापय्य, दैवतप्रतिमाच्छिद्रं प्रविश्य, आसीत। गूढाभित्तिं वा गूढ

वासयोग्यरन्ध्रवर्ती भित्तिं वा, दैवतप्रतिमायुक्तं भूमिगृहं वा, प्रविश्य आसीत। विस्मृते इत्यादि। विस्मृते शत्रुणा विस्मृते स्ववृत्तान्ते शत्रौ परभयविस्मरणविस्रब्धावस्थिते सतीत्यर्थः। यन्त्रविश्लेषणं यन्त्रं विश्लेष्यते यस्मात् तद् यन्त्रविश्लेषणाधारमित्यर्थः। विश्लेष्य यन्त्राद् वियोज्य। रसाग्नियोगेन अग्निप्रज्वालनानुकूलेन योगेन औपनिषदिकप्रलम्भनप्रकरणे वक्ष्यमाणेन। अवलिप्तम् उपदिग्धम्।

प्रमदवनविहाराणामित्यादि। विहारस्थाने क्रीडाविषये प्रसक्तमिति शेषः। प्रमत्तं क्रीडाव्यासङ्गात् कार्यान्तरानवहितम्। गूढप्रणिहिता वा रसेनेति। गूढपुरुषा वा सूदारालिकव्यञ्जना अन्नपानादौ विषभोजनेन हन्युरित्यर्थः। स्वपतो वेत्यादि। निरुद्धे निवारितजनप्रदेशे। सर्परसाग्निधूमान् सर्पविषाग्निधूमान् औपनिषदिके वक्ष्यमाणान्।

प्रत्युत्पद्यमानं निमित्तमवेक्ष्य यद् यद् वधपरिक्लेशाद्यौपयिकं, तत्तद् अन्तपुरगते शत्रौ गूढसञ्चारो भूत्वा विजिगीषुः प्रयुञ्जीत, प्रयुज्य चान्तःपुराद् गूढमेवापसरेत्, अपसृत्य च स्वजनेभ्यो गूढप्रणिहितचरेभ्य आह्वानसंकेतं दद्यादित्याह–प्रत्युत्पन्ने वेत्यादि।।

When he is surrounded in his fort, he may lie concealed in a hole bored into the body of an idol after eating sacremental food and setting up an altar; or he may lie in a secret cavity in a wall, or in a hole made in the body of an idol in an underground chamber, and when he is forgotten, he may come out of his concealment through a tunnel, and entering into the palace, kill his enemy while sleeping or unfastening a mechanical contrivance he may let it fall on his enemy; or when his enemy is lying in a chamber which is besmeared with poisonous and explosive substances or which is made of lac, he may set fire to it.

Fiery spies, hidden in an underground chamber or in a tunnel or inside a secret wall, may kill the enemy when the latter is carelessly amusing himself in a pleasure park or any other place of recreation; or spies under concealment may poison him or women may throw a snake or poison or fire or poisonous smoke over his person when he is asleep or in a confined place.

Spies having access to the harem of the enemy, may, when opportunities occur, do to the enemy whatever is found possible on the occasion, and then get out unknown, leaving signs indicative of the purpose.

द्वाःस्थान् वर्षवरांश्चान्यान् निगूढोपहितान् परे।
तूर्यसंज्ञाभिराहूय द्विषच्छेषाणि घातयेत्।।

इति कौटलीयार्थशास्त्रे आबलीयसे द्वादशाधिकरणे पञ्चमोऽध्यायः
योगातिसन्धानं दण्डातिसन्धानम् एकविजयश्च।
आदितश्चत्वारिंशच्छततमः।।

एतावता कौटलीयस्यार्थशास्त्रस्य आबलीयसे द्वादशमधिकरणं समाप्तम्।।

के ते स्वजनाः का तदाह्वानसंज्ञा किं चाहूतैः कर्त्तव्यमित्याकाङ्क्षायामाह–द्वाःस्थानिति। द्वारपालव्यञ्जनान्, वर्षवरान् षण्ढान् अन्तःपुरचरान्, अन्यांश्च सैनिकादिव्यञ्जनानितरांश्च, परे शत्रौ, निगूढोपहितान् गूढप्रणिहितान्, तूर्यसंज्ञाभिः तूर्यघोषविशेषरूपाभिः संज्ञाभिः, आहूय, द्विषच्छेषाणि द्विषतः शत्रोरात्मना सैन्यनिरपेक्षेण गूढं निहतस्य शेषाणि परिवारान्, घातयेद्, विजिगीषुः। कारयेदिति पाठे हिंस्यादित्यर्थः।।

प्रकरणत्रयमित्थमस्मिन्नध्याये संकीर्णार्थं वर्णितम्।।
व्याख्यायामर्थशास्त्रस्य श्रीमूलाख्यानभाजने।
अपूर्यताधिकरणमाबलीयससंज्ञितम्।।

इति श्रीवञ्चिमण्डलमहाराजाश्रितस्य ताम्रपर्णीतीरवर्तितरुवाग्रहारा-
भिजनस्य श्रीसीताम्बाश्रीरामसुब्रह्मण्यार्यसूनोर्महामहोपाध्याय-
गणपतिशास्त्रिणः कृतिषु कौटलीयार्थशास्त्रव्याख्यायां
श्रीमूलाख्यायाम् आवलीयसे द्वादशेऽधिकरणे
पञ्चमोऽध्यायः योगातिसन्धानं, दण्डातिसन्धानम्,
एकविजयः, आदितश्चत्वारिंशच्छततमः।।
आबलीयसे द्वादशमधिकरणं समाप्तम्।।

Having called the sentinels of the gate, eunuchs and other spies stationed by others by means of the sounding of trumpets, the enemy's remaining people may be completely destroyed.

Thus the one hundred and fortieth chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the fifth chapter of the twelfth Adhikaraṇa dealing with the sections—capture by secret means; capture by means of army and complete victory.

The twelfth Adhikaraṇa 'Concerning a powerful enemy' is concluded.'

दुर्गलम्भोपायः—त्रयोदशमधिकरणम्।

BOOK THIRTEEN : MEANS TO CAPTURE A FORTRESS

Chapter 141

171 प्रक० उपजापः।

Section 171 : Sowing the Seeds of Dissension

विजिगीषुः परग्राममवाप्तुकामः सर्वज्ञदैवतसंयोगख्यापनाभ्यां स्वपक्षमुद्धर्षयेत्; परपक्षं चोद्वेजयेत्।

सर्वज्ञख्यापनं तु—गृहगुह्यप्रवृत्तिज्ञानेन प्रत्यादेशो मुख्यानां; कण्टकोशोधनापसर्पागमेन प्रकाशनं राजद्विष्टकारिणां; विज्ञाप्योपायनख्यापनमदृष्टसंसर्गविद्यासंज्ञादिभिः विदेशप्रवृत्ति-ज्ञानं तदहरेव गृहकपोतेन मुद्रासंयुक्तेन।

दैवतसंयोगख्यापनं तु—सुरुङ्गामुखेनाग्निचैत्यदैवतप्रतिमाच्छिद्रानुप्रविष्टैरग्निचैत्य-दैवतव्यञ्जनैः सम्भाषणं पूजनं च; उदकादुत्थितैर्वा-

अथ दुर्गलम्भोपायो नाम त्रयोदशमधिकरणं प्रस्तूयते। दुर्गस्य परकीयस्य प्राप्त्युपायोऽत्रोपदिश्यते। षट् चात्र सूत्राणि। तत्र प्रथमं सूत्रम्-

उपजाप इति। उपजापो भेद उच्यते इति सूत्रार्थः।

विजिगीषुरिति। सः, परग्रामं शत्रोर्ग्रामनगरादिकं, अवाप्तुकामः, सर्वज्ञदैवतसंयोगख्यापनाभ्यां राज्ञः सर्वज्ञत्वख्यापनेन दैवतसाक्षात्कारख्यापनेन च, स्वपक्षम्, उद्धर्षयेद् उत्साहयेत्। परपक्षं च उद्वेजयेत् सन्त्रासयेत्।

सर्वज्ञत्वख्यापनप्रकारमाह—सर्वज्ञख्यापनं त्विति। सर्वज्ञत्वख्यातिनिमित्तं तु, वक्ष्यत इति शेषः। गृहगुह्यप्रवृत्तिज्ञानेनेत्यादि। तदीयगृहगतं रहस्यमसाधुवृत्तं गूढपुरुषद्वारेण विदित्वा प्रत्याख्यानमित्यर्थः। कण्टकेत्यादि। कण्टकशोधनाधिकरणपञ्चमाध्यायोक्तरीत्यापसर्पोपदेशेन राजद्विष्टाचरितॄन् गूढं विदित्वा तेषां प्रख्यापनमित्यर्थः। विज्ञाप्योपायनख्यापनमिति। राज्ञे निवेदनीयं यदुपायनं सेवार्थमन्यैरुपनीतं तस्य ख्यापनम् इदमीदृशमागमिष्यतीति प्रागेवाख्यानं, कैरुपायैः, अदृष्टसंसर्गविद्यासूचनाः तदादिभिः, आदिपदाच्चारो-पदेशादिग्रहणम्। विदेशप्रवृत्तिज्ञानमिति। दूरदेशवृत्तान्तज्ञानं, तदहरेव यस्मिन् दिने प्रवृत्तिसम्भवस्तस्मिन्नेव

दिने, गृहकपोतेन गृह्यकेण पारावतेन, मुद्रासंयुक्तेन तदहर्वृत्तान्तशंसि लेख्यं मुद्रा तत्संयुक्तेन तद्धारकेण, तदहरेव गृहकपोतोपनीतेन विदेशवृत्तान्तलेख्येनेत्यर्थः।

दैवतसंयोगमधिकृत्याह-दैवतसंयोगख्यापनं त्विति। दैवतसंयो-

A conqueror desirous of seizing an enemy's village should infuse a spirit of enthusiasm among his own men and frighten the people of his enemy by giving publicity to his omniscience and close association with gods and thereby excite his enemy's people.

Proclamation of omniscience is an follows :— rejection of chiefs by knowing the secret homely affairs; revelation of traitors of the king by gathering information on their activities through spies; foretelling the receipt of gifts proposed to be presented by visitors by indications which are subtle and information about foreign affairs by messages brought by trained pigeons in sealed covers, the same day itself.

Proclamation of his association with gods is as follows :—After gaining entrance into fire sanctuaries and temples of gods through a tunnel spies concealed in fire altars and idols of gods converse and worship as if the deities of the shrines; spies who rise up from the depth of water and pretend to be the gods of Nāga and Varuṇa converse and worship;

नागवरुणव्यञ्जनैः सम्भाषा पूजनं च; रात्रावन्तरुदके समुद्रवालुकाकोशं प्रणिधायाग्नि-मालादर्शनम्; शिलाशिक्यावगृहीते प्लवके स्थानम्; उदकवस्तिना जरायुणा वा शिरोवगूढनासः पृषतान्त्रकुलीरनक्रशिंशुमारोद्रवसाभिर्वा शतपाक्यं तैलं नस्तःप्रयोगः तेन रात्रिगणश्चरति इत्युदकचरणानि; तैर्वरुणनागकन्यावाक्यक्रिया सम्भाषणं च; कोपस्थानेषु मुखादग्निधूमोत्सर्गः।

तदस्य स्वविषये कार्तान्तिकनैमित्तिकमौहूर्तिकपौराणिकेक्षणिकगूढपुरुषाः साचिव्यकरास्तद्दर्शिनश्च प्रकाशयेयुः। परस्य विषये दैवतदर्शनं दिव्यकोशदण्डोत्पत्तिं च अस्य ब्रूयुः। दैवतप्रश्ननिमित्तवाय-

गख्यातिनिमित्तं त वक्ष्यत इति शेषः। सुरुङ्गामुखेनेत्यादि। अग्निचैत्यदैवतप्रतिमाच्छिद्रानुप्रविष्टैः अग्निचैत्यम् अग्निशरणं तस्मिन् या दैवतप्रतिमाः तच्छिद्रानुप्रविष्टैः। उदकादित्यादि। नागवरुणव्यञ्जनैः सर्पदेववेषैर्वरुणवेषैश्च। रात्रावित्यादि। अन्तरुदके तटाकादिजलमध्ये, समुद्रवालुकाकोशं समुद्रं वालुकानाम-निर्गमाय शणसूत्रसीवनादिना मुद्रितमुखं वालुकाकोशं सिकतापेशीम्। शिलाशिक्येत्यादि। शिलाशिक्यावगृहीते शिलाबन्धवता शिक्येनाधस्ताद् धारिते। प्लवके उडुपादौ। स्थानं स्रोतोवेगानाकृष्यमाणतया स्थितिः। उदकेत्यादि। उदकवस्तिना जलप्रवेशनिरोधकेन वस्त्रान्तेन, जरायुणा वा गर्भपेश्या वा, शिरोवगूढनासः शिरसा सहावच्छादिता नासा यस्य स तथाभूतः पुरुषः, पृषतान्त्रकुलीरनक्रशिंशुमारोद्रवसाभिर्वा बिन्दुमतः शम्बरमृगस्यान्त्रैः कुलीरकुम्भीरजलकपिंजलमार्जाराणां वसाभिश्च सह शतपाक्यं तैलं शतकृत्वः पचनेन संस्कृतं तैलं, नस्तःप्रयोगः नासिकायां प्रयुज्यते निषिच्यते इत्यर्थः, तेन तथाविधतैलनस्तप्रयोगेण युक्त इति

शेष:, रात्रिगणशश्चरति रात्रिगणान् जले सञ्चरति। इत्युदकचरणानि एवम्प्रकारा उदकसञ्चारा:। तै: उदकचरणै:, वरुणनागकन्यावाक्यक्रिया वरुणनागकन्यानां वाक्यक्रिया, सम्भाषणं च अन्योन्यभाषणं च। कोपस्थानेष्विति। कोपकारणेषु, मुखाद्, अग्निधूमोत्सर्ग: औषधयोगमाययाग्निधूमस्योद्वमनम्।

तदित्यादि। सर्वज्ञत्वदैवतसंयोगख्यातेर्यन्निमित्तजातमुक्तं, तत्। कार्तान्तिकेत्यादिपदे ईक्षणिको विप्रश्निक:। दैवतेत्यादि। दैवतप्रश्न: शुभाशुभकर्मप्रश्न: निमित्तं शकुनं वायस: काकवाशितम् अङ्गविद्या अङ्गस्पर्शेन शुभाशुभ-

Placing under water a mass of sea foams and weeds tangled together and mixed with burning oil and presenting it as spontaneous out-break of fire in a line; standing on a floating plank secretly fastened to a rock underneath; such magical performance in water by covering head and nose with oily clothes, sack of abdomen or womb of water animals and applying to the nose the oil prepared from the entrails of red spotted deer and the serum of the flesh of the crab, crocodile, water-cat and other; holding conversation with women of Varuṇa and Nāga (snake-god) and by ematting columes of smoke from the mouth on occasions of anger.

The power of the king (like omnicience and contact with gods) should be made known throughout the territory by astrologers, soothsayers, horologists, storey-tellers, fortune-tellers together with spies and disciples as also by so called witnesses. Likewise in foreign lands they should spread the news of gods appearing before the conqueror and of his having received from heaven weapons and treasures.

साङ्गविद्यास्वप्नमृगपक्षिव्याहारेषु चास्य विजयं ब्रूयु:, विपरीतममित्रस्य सदुन्दुभिम्। उल्कां च परस्य नक्षत्रे दर्शयेयु:।

परस्य मुख्यान् मित्रत्वेनापदिशन्तो दूतव्यञ्जना: स्वामिसत्कारं ब्रूयु:। स्वपक्षबलाधानं परपक्षप्रतिघातं च तुल्ययोगक्षेमममात्यानामायुधीयानां च कथयेयु:। तेषु व्यसनाभ्युदयावेक्षणमपत्यपूजनं च प्रयुञ्जीत।

तेन परपक्षमुत्साहयेद् यथोक्तं पुरस्तात्। भूयश्च वक्ष्याम:—साधारणगर्दभेन दक्षान्; लकुटशाखाहननाभ्यां दण्डचारिण:, कुलैलकेन चोद्विग्नान्; अशनिवर्षेण विमानितान्; विदुलेनावकेशिना

ज्ञापकविद्या स्वप्न: प्रसिद्ध: मृगपक्षिव्याहारा: मृगाणां पक्षिणां च रुतानि तेषु। अस्य विजिगीषो:। विपरीतं पराजयं भाविनम्। सदुन्दुभिम् आघोषणभेरीसहितम्। उल्काम् औपनिषदिकस्य द्वितीयाध्याये वक्ष्यमाणाम्।

परस्येत्यादि। स्वामिसत्कारं ब्रूयु: स्वामिना विजिगीषुणा कृतमात्मसत्कारं प्रपञ्चयेयु:, अर्थान्मुख्यानामपि स्वामिसत्कारलोभोत्पादनार्थम्। स्वपक्षेत्यादि। तुल्ययोगक्षेमं योग: स्वपक्षबलाधानपरपक्षप्रतिघाताभ्यां जनितो लाभ: क्षेम: स्थितपालनं तदुभयं तुल्यं राज्ञा समानं तत्सहभोग्यत्वाद् यस्य तत् तथाभूतम्। तेष्विति।

अमात्येषु आयुधीयेषु च, व्यसनाभ्युदयावेक्षणं व्यसने अभ्यवपत्त्यादिकरणम् अभ्युदये अभिनन्दनादिकरणं च, अपत्यपूजनं च मृतेष्वपि तेषु तदपत्यानां सत्करणं च, प्रयुञ्जीत।

यथोक्तेन प्रकारेण परपक्ष्यान् परस्माद् भेदयेदित्याह–तेन परपक्षमित्यादि। भूयश्च वक्ष्याम इति। भेदनप्रकारमिति शेषः। तमेवाह–साधारणेत्यादि। दक्षान् येऽनलसकर्मकरणशीलास्तान्, साधारणगर्दभेन यथा हि सामान्यगर्दभः कर्म नित्यं तत्फलस्यानभिज्ञः करोति तथा यूयं परार्थे कर्म तत्फलानभिज्ञाः कुरुथेत्येवं गर्दभनिदर्शनेनेत्यर्थः, उत्साहयेदिति वर्तते। लकुटेत्यादि। दण्डचारिणः सैनिकान्, लकुटशाखाहननाभ्याम् उत्साहयेत्, लकुटो वेत्रयष्टिः शाखाहननं कुठारादि ताभ्यामुपमानीकृताभ्यां दीपयेत्, क्षेत्रकुठारवत् यूयं स्वकर्म परस्मिंस्तत्फलमनुभवति स्वयमननुभवन्त एव कुर्वन्तोऽचेतनसधर्माण इत्युपालम्भेन भेदयेदित्यभिप्रायः। कुलेत्यादि। उद्विग्नान् परस्माद् भीतान्, कुलैलकेन स्वयूथभ्रष्टेन जीवितनिराशेन मेषेण, तदुपमानी-

Those who are conversant with horary and astrology and the science of omens should proclaim abroad that the conqueror is an expert in explaining the meaning of dreams and understanding the language of beasts and birds; and further they shall proclaim inauspiciousness to the enemy to the accompaniment of the beating of drums. They should also show to the people of enemy fire brand falling from the sky on the day of the birth-star of the enemy :—

Messengers pretending to be friendly towards the enemy should highly speak conqueror's respectful treatment of the visitors. They should also speak about the strength of his army and of the impending destruction of enemys men as also of the fact that their master both ministers and soldiers are equally safe and happy. When they are in trouble they are treated with parental care.

By these means they should win over the enemy's men as pointed out above. It may be explained further at length :—The enemy may be characterised as donkey at the hands of skilful persons; as the broken branch of the (Artocarpus Laccucha) tree may be characterised the soldiers; as a goat on the shores to anxious persons; as a down pour of lightnings to those who are treated with contempt; as a reed, a barren tree, or an iron bell or as false clouds to those who are disappointed; as an ornament of an ugly woman to the disgusted one's despite their sincerity; as a tiger's skin, or as trap of death to his favourties and as eating a piece of wood or as churning of the milk of a she-camel or a she donkey (for ghee) to those who are rendering to him valuable assistance.

वायसपिण्डेन कैतवजमेघेनेति विहताशान्; दुर्भगालङ्कारेण द्वेषिणेति पूजाफलान्; व्याघ्रचर्मणा मृत्युकूटेन चोपहितान्; पीलुविखादनेन करकयोष्ट्र्या गर्दभीक्षीराभिमन्थनेनेति ध्रुवापकारिणः इति।

प्रतिपन्नान् अर्थमानाभ्यां योजयेत्। द्रव्यभक्तच्छिद्रेषु चैनान् द्रव्यभक्तदानैरनुगृह्णीयात्। अप्रतिगृह्णतां स्त्रीकुमारालङ्कारानभिहरेयुः।

करणेनेत्यर्थः, उत्साहयेत्। अशनिवर्षेण विमानितानिति। ये परेण विमानितास्तान्, अशनिपाततुल्या विमानना युष्माभिर्बहुमानचिरार्थिभिः परस्मात् प्राप्तेति कथनेनोत्साहयेदित्यर्थः। विदुलेनेति। वञ्जुलेन, अवकेशिना अफलेन, वाशब्दः पक्षान्तरे, आयसपिण्डेन अयोमयेन भक्षणानर्हेण भक्तपिण्डेन, कैतवजमेघेन मिथ्यासृष्टेनानुदकदायिना मेघेन, इतिशब्दः प्रकारे। एवञ्जातीयेन वस्तुना परमुपमायेति शेषः, विहताशान् परभग्नमनोरथान्, उत्साहयेत्। ये कटकाङ्गुलीयकादिदानेन क्रियमाणां पूजां स्वकर्मणः फलं मन्यन्ते तान् परदत्तालङ्कारदुर्भगत्वकथनेन 'कृते कर्मणि अप्रीतः पर' इति कथनेन भेदकप्रकारान्तरकथनेन च भेदयेदित्याह–दुर्भगालङ्कारेणेत्यादि। व्याघ्रचर्मणेति। उपहितान् ये उपहिताः परप्रयुक्तयोपधया प्रतारिताः तान्, व्याघ्रचर्मणेति व्याघ्रस्येव चर्मास्य व्याघ्रचर्मा तेन,–'परो निर्दोषसदोषीकरणव्यसनितया हिंस्रत्वाद् व्याघ्रस्वभावः' इति परस्य व्याघ्रौपम्यकथनेनेत्यर्थः। व्यालचर्मणेति पाठे व्यालो हिंस्रसत्त्वः। व्याघ्रच्छद्मनेति वा पाठः कृतकव्याघ्रः पर इति कथनेनेति तदार्थः। मृत्युकूटेन च परम् उक्तादेव दोषात् कपटमृत्युरिति कथनेन चेत्यर्थः, उत्साहयेत्। पील्वित्यादि। ध्रुवापकारिणः ये परस्य नित्यापकर्तारस्तान्, पीलुविखादनेन पीलु वृक्षविशेषफलं तिक्तरसं तस्य विखादनेन भक्षणेन–यथा पीलुभक्षणं तिक्तरसत्वादुद्वेजकं तद्वत् परसेवनमिति कथनेनेत्यर्थः, करकया तिक्तरसः शाकभेदः करका तया, उष्ट्र्या तिक्तरस ओषधिभेद उष्ट्री तया ताभ्यां सह परमुद्वेजकत्वेन धर्मेणोपमायेत्यर्थः, गर्दभीक्षीराभिमन्थनेन परोपसर्पणस्य तत्समानत्वकथनेनेत्यर्थः, इतिशब्दः प्रकारान्तरार्थः, उत्साहयेत्। अनिष्पत्य परस्यापकुर्वतां तस्मान्निष्पतनार्थमयमुपदेशः। इतिशब्दः प्रकारवर्णनसमाप्तौ।

प्रतिपन्नानिति। उत्साहनाभ्युपगन्तॄन्, अर्थमानाभ्यां योजयेत्। धनान्नसंकटेषु चैषां तद्दानैरुपकुर्यादित्याह–द्रव्यभक्तेत्यादि। दीयमानं द्रव्य-

When the people of the enemy are convinced of this, they may be brought before the conqueror to be presented with wealth and honour. Those who are in need of money and food should be supplied with an abundance of those things. These who do not want these may be presented with ornaments for their wives and children.

दुर्भिक्षस्तेनाटव्युपघातेषु च पौरजानपदानुत्साहयन्तः सत्रिणो ब्रूयुः 'राजानमनुग्रहं याचामहे; निरनुग्रहाः परत्र गच्छामः' इति।

तथेति प्रतिपन्नेषु द्रव्यधान्यपरिग्रहैः।
साचिव्यं कार्यमित्येतदुपजापाद्भुतं महत्।।

।। इति कौटलीयार्थशास्त्रे दुर्गलम्भोपाये त्रयोदशे
ऽधिकरणे प्रथमोऽध्यायः उपजापः,
आदित एकचत्वारिंशच्छततमः।।

भक्तं गौरवभङ्गभयादप्रतिगृह्णतां स्त्रीधार्याणि कुमारधार्याणि च भूषणानि सत्कारपूर्वं दद्युरित्याह–अप्रतिगृह्णतामित्यादि।

दुर्भिक्षेत्यादि। उत्साहयन्तो ब्रूयुः भेदनार्थं कथयेयुः।

तथेतिप्रतिपन्नेष्विति। तथा कुर्म इति कृतयथोक्तवचनाङ्गीकारेषु अर्थात् पौरजानपदेषु स्वामिसकाशादलब्धानुग्रहेषु सत्सु, द्रव्यधान्यपरिग्रहैः धनधान्यवासस्थलानां दानैः, साचिव्यं कार्यम् अनुग्रहः कर्तव्यो विजिगीषुणा। इत्येतत् महत् प्रशस्तम्, उपजापाद्भुतम् उपजापवैचित्र्यम्।।

इति कौटलीयार्थशास्त्रव्याख्यायां दुर्गलम्भोपाये त्रयोदशेऽधिकरणे प्रथमोऽध्यायः उपजापः, आदित एकचत्वारिंशच्छततमः।।

When the subjects of the enemy are suffering from famine and the oppression of thieves and wild tribes, the spies of the conqueror should sow the seeds of dissension among given saying : "Let us seek the favour of the king and go elsewhere if not favoured."

When they agree to such proposals, they should be provided with money, grains and other items; thus one should do much by sowing the seeds of dissension.

Thus the one hundred and forty-first chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the first chapter of the thirteenth Adhikaraṇa dealing with section on 'Sowing the seeds of dissension.'

Chapter 142

172. प्रक० योगवामनम्।

Section 172 : Enticement by Secret Contrivances

मुण्डो जटिलो वा पर्वतगुहावासी चतुर्वर्षशतायुः ब्रुवाणः प्रभूतजटिलान्तेवासी नगराभ्याशे तिष्ठेत्। शिष्याश्चास्य मूलफलोपगमनैरमात्यान् राजानं च भगवद्दर्शनाय योजयेयुः। समागतश्च राज्ञा पूर्वराजदेशाभिज्ञानानि कथयेत् 'शते शते च वर्षाणां पूर्णेऽहमग्निं प्रविश्य पुनर्बालो भवामि; तदिह भवत्समीपे चतुर्थमग्निं प्रवेक्ष्यामि; अवश्यं मे भवान् मानयितव्यः; त्रीन् वरान् वृणीष्व इति। प्रतिपन्नं ब्रूयात्–सप्तरात्रमिह सपुत्रदारेण प्रेक्षाप्रहवणपूर्वं वस्तव्यम् इति। वसन्तमवस्कन्देत।

मुण्डो वा जटिलो वा स्थानिकव्यञ्जनः प्रभूतजटिलान्तेवासी वस्तशोणितदिग्धां वेणुशलाकां सुवर्णचूर्णेनावलिप्य वल्मीके निदध्याद् उपजिह्विकानुसरणार्थं, स्वर्णनालिकां वा। ततः सत्री राज्ञः कथयेत्–असौ सिद्धः पुष्पितं निधिं जानाति' इति। स राज्ञा पृष्टः 'तथा' इति ब्रूयात्। तच्चाभिज्ञानं दर्शयेत्। भूयो वा हिरण्य-

योगवामनमिति सूत्रम्। योगेन कपटोपायेन वामनं परस्य तद्दुर्गान्निष्क्रामणमुच्यत इति सूत्रार्थः।

मुण्डो जटिलोवेत्यादि। चतुर्वर्षशतायुः ब्रुवाणः चत्वारि वर्षशतान्यात्मनो वयांसि गतानीति कथयन्। प्रभूतजटिलान्तेवासी प्रचुराश्च जटाधराश्च शिष्या यस्य स तथाभूतः। शिष्याश्चेत्यादि। मूलफलोपगमनैः मूलानां फलानां चाभ्यवहारार्थमुपहृतैः। समागतश्चेत्यादि। पूर्वराजदेशाभिज्ञानानि पूर्वेषां राज्ञां देशानां च चिह्नानि। शते शते चेत्यादि। मानयितव्यः वरदानेन सम्भावयितव्यः। इति कथयेदिति सम्बन्धः। प्रतिपन्नमित्यादि। कृतयथोक्ताभ्युपगमम्। इह मदन्तिके। प्रेक्षाप्रहवणपूर्वं प्रेक्षा रूपकाभिनयादिदर्शनं प्रहवणं तुष्टिभोजनादि तत्पुरस्सरम्। अवस्कन्देत हन्यात्।

मुण्डो वेत्यादि। स्थानिकव्यञ्जनः स्थानविशेषाध्यक्षः स्थानिकः तद्व्यञ्जनः। वस्तशोणितदिग्धां छागरुधिरलिप्ताम्। उपजिह्विकानुसरणार्थम् उपजिहिका वम्री तदनुसरणार्थं तच्चाकृत्रिमत्वप्रतीत्यर्थम्। स्वर्णनालिकां सुवर्णयुक्तं वेणुभाजनं वा। ततः सत्रीत्यादि। पुष्पितं फलितावस्थापूर्वरूपभूतां पुष्पितावस्थां प्राप्तम्। तच्चाभिज्ञानं पूर्वोक्तं सुवर्णदिग्धवेणुशलाकादिरूपं चिह्नम्। भूयो वेत्यादि। भूयो बहुतरम्। अन्तः वल्मीकस्यान्तर्भागे। प्रणिपातसाध्याः

An ascetic with shaven head and braided hair living in a mountain cave claiming himself to be four hundred years old may halt at the proximity of enemy's capital with disciples with matted locks. His disciples may visit the king and his minister carrying with them roots and fruits and invite them to visit the venerable ascetic. When the king pays a visit he shall tell the history of ancient kings and their states and further inform him—"Every time when I complete the course of four hundred years I enter into the fire and come out afresh as a youth." Now that you are here, I am going to enter the fire in your presence for the fourth time. You may please remain here for the time being and please request three boons." When the king agrees to do so he may further be requested to bring his wife and children to the spot for a period of seven nights to witness the sacrificial performance. When he does so, he may be arrested.

An ascetic with shaven head or braided hair residing at a particular spot along with some disciples with shaven-heads and braided hair, pretending to know about the hidden treasure underneath the spot, may put in the interior of an ant-hill either a bamboo stick wound round with a piece of cloth drenched with the blood of goat or a hollow golden tube. Then the disciples should go to the king and report that—"This prophet can unearth blooming treasure trove". When the king makes enquiries he should say "yes". Then he may show evidence for it. Again taking out the concealed gold he may say to the king : "This treasure is being guarded by serpents and it could be obtained by performing rites. When the king is convinced he may say—"etc; as in the previous instance.

मन्तराधाय ब्रूयाच्चैनं–'नागरक्षितोऽयं निधिः प्रणिपातसाध्य इति। प्रतिपन्नं ब्रूयात्–सप्तरात्रम्' इति समानम्।

स्थानिकव्यञ्जनं वा रात्रौ तेजनाग्नियुक्तमेकान्ते तिष्ठन्तं सत्रिणः क्रमाभिनीतं राज्ञः कथयेयुः–'असौ सिद्धः सामेधिकः' इति। तं राजा यमर्थं याचेत, तमस्य करिष्यमाणः, 'सप्तरात्रम्'–इति समानम्।

सिद्धव्यञ्जनो वा राजानं जम्भकविद्याभिः प्रलोभयेत्। 'तं राजा' इति समानम्।

सिद्धव्यञ्जनो वा देशदेवतामभ्यर्हितामाश्रित्य प्रहवणैरभीक्ष्णं प्रकृतिमुख्यानभिसंवास्य क्रमेण राजानमतिसन्दध्यात्।

जटिलव्यञ्जनमन्तरुदकवासिनं वा सर्वश्वेतं तटसुरुङ्गाभूमिगृहापसरणं वरुणं नागराजं वा सत्रिणः क्रमाभिनीतं राज्ञः कथयेयुः। 'तं राजा' इति समानम्।

नागाराधनसाधनीयः। सप्तरात्रमिति समानमिति। "सप्तरात्रमिह सपुत्रदारेण प्रेक्षाप्रहवणपूर्वं वस्तव्यमिति ब्रूयाद्, वसन्तं चावस्कन्देते"ति यत् पूर्वमभिहितं तदिहापि योज्यमित्यर्थः।

स्थानिकव्यञ्जनं वेत्यादि। तेजनाग्नियुक्तम् औपनिषदिकद्वितीयाध्यायोक्तेन तेजनयोगेन स्वगात्राग्नि-प्रज्वलनाद्धुतप्रदर्शकमित्यर्थः। तेजनेत्यादिविशेषणद्वयं तापसत्वविश्वासार्थम्। सामेधिकः भाविसमृद्धीक्षणिकः।

सिद्धव्यञ्जनो वा राजानमित्यादि। जम्भकविद्याभिः मायाविद्याभिः। तं राजेति समानमिति। "तं राजा यमर्थं याचेत, तमस्य करिष्यमाणः सप्तरात्रमिह सपुत्रदारेण प्रेक्षाप्रहवणपूर्वं वस्तव्यमिति ब्रूयाद्, वसन्तं चावस्कन्देते"ति प्रागुक्तमिहापि योज्यमित्यर्थः।

सिद्धव्यञ्जनो वा देशदेवतामित्यादि। अभ्यर्हितां देवतासु मध्ये विशिष्टाम्। प्रकृतिमुख्यान् अमात्यादीन्। अभिसंवास्य संस्तवेनाभिमुखीकृत्य। क्रमेण प्रकृतिमुख्यद्वारेणेत्यर्थः। अतिसन्दध्याद् अभिसंवास्य वञ्चयेत्।

जटिलव्यञ्जनमित्यादि। अन्तरुदकवासिनम् उदकचरणविद्ययोदकान्तर्वासशीलम्। सर्वश्वेतं सर्वात्मना श्वेतं, सर्वेषां श्वेततरं वा, 'गुणात् तरेण तरलोपश्चे'ति समासः। सर्वश्वेतत्वं च देवतावर्णविश्वासार्थम्। तटसुरङ्गा।

An accomplished ascetic may deceive a king by his knowledge of the science of magic known as Jambhaka. The king may approach him etc; as in the previous instance.

An accomplished ascetic claiming himself to have secured the favour of the powerful guardian deity of the country may often beguile the king's chief ministers with his wonderful performance and gradually impose upon the king.

A person of pure white complexion, disguised as an ascetic and lving under water or in the interior of an idol entered into through a tunnel or an underground chamber may be reported to the king as Varuṇa or king of snakes and shown to him. When the king arrives etc; do is as detailed earlier in similar instances.

जनपदान्तेवासी सिद्धव्यञ्जनो वा राजानं शत्रुदर्शनाय योजयेत्। प्रतिपन्नं बिम्बं कृत्वा शत्रुमावाहयित्वा निरुद्धे देशे घातयेत्।

अश्वपण्योपयाता वैदेहकव्यञ्जनाः पण्योपायननिमित्तमाहूय राजानं पण्यपरीक्षायामासक्तमश्वव्यतिकीर्णं वा हन्युः, अश्वैश्च प्रहरेयुः।

नगराभ्याशे वा चैत्यमारुह्य रात्रौ तीक्ष्णाः कुम्भेषु नालीन् वा विदलानि धमन्तः- 'स्वामिनं मुख्यानां वा मांसानि भक्षयिष्यामः पूजा नो वर्तताम्' इत्यव्यक्तं ब्रूयुः। तदेषां नैमित्तिकमौहूर्तिकव्यञ्जनाः ख्यापयेयुः।

मङ्गल्ये वा ह्रदे तटाकमध्ये वा रात्रौ तेजनतैलाभ्यक्ता नागरूपिणः शक्तिमुसलान्ययोमयानि निष्पेषयन्तस्तथैव ब्रूयुः। ऋडक्षचर्म-

भूमिगृहापसरणं तटान्तर्विवरेण वा भूमिगृहेण वा अपसरणं निर्गमनं यस्य तं तथाभूतम्। क्रमाभिनीतं क्रमेणाभिमुख्यं नीतम्। तं राजेति समानमिति। तं राजा यमर्थं याचेत तमस्य करिष्यमाण' इत्यादिनी 'वसन्तमवस्कन्देत' इत्येतदन्तेनोक्तमिह योज्यमित्यर्थः।

जनपदेत्यादि। जनपदान्तेवासी जनपदान्तो जनपदसीमा शत्रुविजिगीषुजनपद्योः सन्धिः तत्र वास्तव्यः। योजयेद् घटनां कुर्यात्। प्रतिपन्नमिति। अङ्गीकृतशत्रुदर्शनं राजानं, बिम्बं कृत्वा पूर्वसङ्केतितमाह्वानार्थं चिह्नं ध्वनिविशेषादिरूपं कृत्वा, शत्रुम्, आवाहयित्वा आनाय्य, निरुद्धे सर्वतः प्रतिरुद्धगतौ, देशे, घातयेत्, अर्थाच्छत्रुणा।

अश्वेत्यादि। वैदेहकव्यञ्जनाः अश्वविक्रेतृवेषाः। पण्योपायननिमित्तम् अश्वरूपाणां पण्योपायनानां दर्शनार्थम्। आसक्तं तत्परम्। अश्वव्यतिकीर्णं वा अश्वसम्बाधगतं वा।

नगराभ्याशे वेत्यादि। चैत्यम् उद्देशद्रुमम्। नालीन् धान्यकाण्डान्। विदलानि पाटितदारुशकलानि। धमन्तः धूपयन्तः। अव्यक्तं मानुषीयत्वव्यक्तिर्यथा न भवेत् तथा। तदेषामित्यादि। तद् वचनम्।

मङ्गल्ये वेत्यादि। मङ्गल्ये मङ्गलनिमित्ते। ह्रदे अगाधे जलाशये। तेजनतैलाभ्यक्ताः शरतैलाभ्यक्ताः। तथैव 'स्वामिनो मुख्यानां मांसानि भक्षयिष्यामः' इत्युक्तेन प्रकारेणैव। ऋक्षेत्यादि। ऋक्षचर्मकञ्चुकिनः भल्लूकन्वङ्-

An accomplished ascetic sojourning in the vicinity of the capital city, may invite the king to witness the person of his enemy. When the king arrives to witness the invocation of his enemy's life in the image to be destroyed, he may be murdered in a secluded place.

Spies disguised as merchants of horses may invite the king to examine and purchase any of the animals; and when he attentively examines the horses he may be murdered as trampled down by the horses.

Climbing a fig-tree at night in the vicinity of the capital of the enemy and blowing through tubes or hollow reeds the fire contained in a few pots, some fiery spies may announce incoherently—"We are going to eat the flesh of the king or of his ministers; hence let the worship of gods go on." Spies under the guises of sooth-sayers and astrologers may spread this news widely.

कञ्चुकिनो वा अग्निधूमोत्सर्गयुक्ता रक्षोरूपं वहन्तस्त्रिरपसव्यं नगरं कुर्वाणाः श्वसृगालवाशितान्तरेषु तथैव ब्रूयुः। चैत्यदैवतप्रतिमां वा तेजनतैलेनाभ्रपटलच्छन्नेनाग्निना वा रात्रौ प्रज्वाल्य तथैव ब्रूयुः। तदन्ये ख्यापयेयुः।

दैवतप्रतिमानामभ्यर्हितानां वा शोणितेन प्रस्रावमतिमात्रं कुर्युः। तदन्ये दैवरुधिरसंस्रावे सङ्ग्रामे पराजयं ब्रुयुः।

सन्धिरात्रिषु श्मशानप्रमुखे वा चैत्यमूर्ध्वभक्षितैर्मनुष्यैः प्ररूपयेयुः। ततो रक्षोरूपी मनुष्यकं याचेत। यश्चात्र शूरवादिकोऽन्यतमो वा द्रष्टुमागच्छेत् तमन्ये लोहमुसलैर्हन्युः, यथा रक्षोभिर्हत इति ज्ञायेत। तदद्भुतं राज्ञः तद्दर्शिनः सत्रिणश्च कथयेयुः। ततो नैमित्तिकमौहूर्तिकव्यञ्जनाः शान्तिं प्रायश्चित्तं ब्रूयुः—'अन्यथा महदकुशलं राज्ञो देशस्य च' इति। प्रतिपन्नम् 'एतेषु सप्तरात्रमेकैकमन्त्रबलिहोमं स्वयं राज्ञा कर्तव्यम्' इति ब्रूयुः। ततः समानम्।

निर्मितकञ्चुकधारिणः। अपसव्यं कुर्वाणाः अप्रदक्षिणं परिगच्छन्तः। श्वसृगालवाशितान्तरेषु कुक्कुरजम्बुकविरावमध्येषु। शिवासृगालेत्यपपाठः। तथैव पूर्वोक्तप्रकारेणैव। चैत्यदैवतप्रतिमां वेत्यादि। अभ्रपटलच्छन्नेन अभ्रकधातुमये छदिषि अदृश्यतया स्थितेन। तथैव 'स्वामिनो मुख्यानां वेत्यादिरीत्या। तत् तथावचनम्। अन्ये सत्रिणः।

दैवतप्रतिमानामित्यादि। शोणितेन मेषादिरक्तेन। प्रस्रावं प्रस्रुतिम्। कुर्युः भावयेयुः। तदित्यादि। तदन्ये प्रस्रावोत्पादकातिरिक्ताः सत्रिणः।

सन्धीत्यादि। सन्धिरात्रिषु पर्वनिशासु। चैत्यं चिताङ्कम्। ऊर्ध्वभक्षितैः पूर्वकायभक्षितैः। मनुष्यैः उपलक्षितमिति शेषः। प्ररूपयेयुः दर्शयेयुः। तत इत्यादि। याचेत भक्षणार्थम्। 'मनुष्ययाचिनं राक्षसमहं हनिष्यामी'ति यदि यः कश्चित् शूरवादेनोपगच्छेत्, तमन्ये सत्रिणी लोहमुसलैः स्वयं हन्युः, 'रक्षोभिः स हत' इति च ज्ञापयेयुरित्याह–यश्चात्रेत्यादि। तदित्यादि। तद् अद्भुतं शूरपुरुषहननाश्चर्यम्। ततो नैमित्तिकेत्यादि। प्रतिपन्नं अभ्युपगतशान्तिप्रायश्चित्तानुष्ठानम्। एतेषु पूर्वोक्तेषु दुर्निमित्तेषु विषये। एकैकबलिमन्त्रहोमम् एकैकस्य दुर्निमित्तस्यैकैकं बलिमन्त्रहोमं, बलिरूपहारः मन्त्रो मन्त्रजपः होमोऽग्नावाहुतिः एषां समाहारो बलिमन्त्रहोमम्। ततः समानमिति। 'तत्र वसन्तमवस्कन्देते'त्ययमर्थः प्राग्वद् द्रष्टव्य इत्यर्थः।

Spies under the guise of snake-gods with their body anointed with burning oil may stand in the centre of a sacred pool of water or of a lake at night, and rubbing together their iron swords or spikes, may shout aloud as before. Spies wearing coats made of the skins of bears and sending out volumes of smoke from their mouth, may pretend to be demons and after circumambulating the city thrice from right to left may shout aloud as before at a place full of the horrid noise of dogs and jackals. Spies may set fire to the idol of a village god covered with a layer of mica besmeared with burning oil at night, and shout as before. Others may give publicity to this by spreading the news.

They may cause (by some trick) blood to flow out from the revered images of gods. Others may point out to the flow of blood and say that forebodes defeat to the enemy.

On the night of the full moon or new moon or in the vicinity of a cremation ground they may point out to a fig tree with a human corpse, the upper part of which is eaten away. One disguised as a demon may demand for the tree the offering of a human victim. If any body comes forward to witness this he may be done to death with iron rods attributing the murder to the demons. Spies and other people should convey to the king about this wonder. Then spies disguised as sooth-sayers and astrologers may prescribe auspicious rites as expiation to ward off evil consequences which would harm the king as well as the country. If convinced the king may be asked to perform in person sacrifices and

offerings with special mantras every night for seven days. Thereafter every thing is as usual (Killing of the king).

एतान् वा योगानात्मनि प्रतिकुर्वीत परेषामुपदेशार्थम्। ततः प्रयोजयेद् योगान्। योगदर्शनप्रतीकारेण वा कोशाभिसंहरणं कुर्यात्।

हस्तिकामं वा नागवनपाला हस्तिना लक्षण्येन प्रलोभयेयुः। प्रतिपन्नं गहनमेकायनं वातिनीय घातयेयुः, बद्ध्वा वापहरेयुः।

तेन मृगयाकामो व्याख्यातः।

द्रव्यस्त्रीलोलुपमाढ्यविधवाभिर्वा परमरूपयौवनाभिः स्त्रीभिर्दायादनिक्षेपार्थमुपनीताभिः सत्त्रिणः प्रलोभयेयुः। प्रतिपन्नं रात्रौ सत्त्रिच्छन्नाः समागमे शस्त्ररसाभ्यां घातयेयुः।

य एते योगा अभिहिताः तान् स्वसहायानामुपदेशार्थम् आत्मनि शुष्केष्टिन्यायेन प्रथमं दर्शयित्वा प्रतिविदध्यात्, पश्चात् तु उपदिष्टस्वीयपुरुषसहायः शत्रौ प्रयोजयेदित्याह–एतान् वा योगानित्यादि। योगदर्शनप्रतीकारेण वा कोशाभिसंहरणं कुर्यादिति। इदं वाक्यं कोशाभिसंहरणप्रकरणपठितं व्याख्यातचरम्। अस्येह पाठस्तु–योगानां प्रयोगप्रतिविधानयोः कोशाभिसंवर्धनाभ्युपायतां पूर्वोक्तां स्मारयितुम्।

हस्तिकामं वेति। गजलोलुभं शत्रुं, नागवनपालाः विजिगीषुपक्ष्याः, हस्तिना लक्षण्येन प्रशस्तलक्षणवता, प्रलोभयेयुः, तथाविधहस्तिग्रहणाभिलाषं तस्य जनयेयुरित्यर्थः। प्रतिपन्नम् अभ्युपगतप्रलोभनं तं, गहनं दुष्प्रवेशं वनम्, एकायनं वा एकमात्रगम्यतया सङ्कटं मार्गं वा, अतिनीय अतिसन्धानेन नीत्वा, घातयेयुः, बद्ध्वा वापहरेयुः अघातनपक्षे रज्जुभिर्बद्धं कृत्वा विजिगीषोरन्तिकं नयेयुः, यथा–प्रतिज्ञायौगन्धरायणे वत्सराजं सालङ्कायनादयः प्रद्योतभृत्याः स्वस्वाम्यन्तिकमिति भावः।

हस्तिकामविषयोक्तं मृगयाकामेऽतिदिशति–तेनेत्यादि।

द्रव्यस्त्रीलोलुपमिति। धनकामं स्त्रीकामुकं वा, आढ्यविधवाभिः वैधव्यं प्राप्ताभिर्धनिकाभिः, परमरूपयौवनाभिः स्त्रीभिः अविधवानाढ्याभिर्वनिताभिः, दायादनिक्षेपार्थम् उपनीताभिः दायादापहृतनिक्षेपप्रतिलम्भार्थव्यवहारवशादन्तिकं प्रापिताभिरित्यर्थः, सत्रिणः प्रलोभयेयुः। प्रतिपन्नम् अभ्युपगतप्रलोभनं, रात्रौ, सत्रिच्छन्नाः सत्रिसम्बन्धिनो गूढपुरुषः, समागमे समागमप्रसङ्गे, शस्त्ररसाभ्याम् आयुधप्रहारविषप्राशनाभ्यां, घातयेयुः।

The conqueror may himself undertake the performances before trying in the adversaries. Only then he should do it on others. He may enrich the treasury by collecting money on the pretext of doing expiatory rites.

Keepers of elephant forests may entice a king fond of elephants by showing him beautiful elephant; when he is tempted he may be led to a forest region which is lonely and be killed or carried off as a prisoner.

This explains the fate of kings fond of hunting animals.

When the enemy is fond of wealth or women he may be beguiled at the sight of rich and beautiful widows brought before him with a plaint

for the recovery of a deposit kept by them in the custody of one of their kinsmen. When he comes to meet with a woman at night as arranged, hidden spies may kill him with weapons or poison.

सिद्धप्रव्रजितचैत्यस्तूपदैवतप्रतिमानामभीक्ष्णाभिगमनेषु वा भूमिगृह-सुरुङ्गागूढभित्ति-प्रविष्टास्तीक्ष्णाः परमभिहन्युः।

येषु देशेषु याः प्रेक्षाः प्रेक्षते पार्थिवः स्वयम्।
यात्राविहारे रमते यत्र क्रीडति वाम्भसि।।
चाटूक्त्यादिषु कृत्येषु यज्ञप्रहवणेषु वा।
सूतिकाप्रेतरोगेषु प्रीतिशोकभयेषु वा।।
प्रमादं याति यस्मिन् वा विश्वासात् स्वजनोत्सवे।
यत्रास्यारक्षिसञ्चारो दुर्दिने सङ्कुलेषु वा।।
विप्रस्थाने प्रदीप्ते वा प्रविष्टे निर्जनेऽपि वा।
वस्त्राभरणमाल्यानां फेलाभिः शयनासनैः।।
मद्यभोजनफेलाभिस्तूर्यैर्वाभिहतैः सह।
प्रहरेयुररींस्तीक्ष्णाः पूर्वप्रणिहितैः सह।।

सिद्धेत्यादि। सिद्धानां साधूनां प्रव्रजितानां भिक्षूणां चैत्यस्तूपदैवतप्रतिमानां च चैत्येषु देवालयेषु स्तूपेषु तद्विमानेषु च वर्तमानानां देवताप्रतिमानां च, अभक्ष्णोभिगमनेषु पौनःपुनिकेषु सेवार्थगमनेषु वा, भूमिगृहसुरुङ्गागूढभित्तिप्रविष्टाः, तीक्ष्णाः, परं शत्रुम्, अभिहन्युः।।

विधिशेषं पञ्चभिः श्लोकैरेकान्वयेनाह–येष्वित्यादि। पार्थिवः, येषु देशेषु, याः प्रेक्षाः नृत्तानि, स्वयं प्रेक्षते, तेषु तासु चेति शेषः। यत्र यात्राविहारे, रमते व्यासज्जते तत्रेति शेषः। यत्र वा अम्भसि क्रीडति रमते, तत्रेति शेषः। चाटूक्त्यादिष्विति पाठः चाटूक्तिः स्तुतिवादस्तदादिषु, विगुक्त्यादिष्वित्यपि पाठः। कृत्येषु एतत्स्थाने सर्वेष्विति क्वचित् पाठः। यज्ञप्रहवणेषु वा यज्ञेषु तुष्टिभोजनेषु च, सूतिकाप्रेतरोगेषु प्रीतिशोकभयेषु वा प्रसवमरणरोगनिमित्तासु हर्षदुःखभीतिषु वा, यस्मिन् वा स्वजनोत्सवे, विश्वासात् प्रमादं याति, तस्मिन्निति शेषः। यत्र, अस्य राज्ञः, अरक्षिसञ्चारः रक्षिपुरुषरहितः सञ्चारो भवति, तत्रेति शेषः। दुर्दिने अतिवर्षे, संकुलेषु वा आकीर्णेषु वा, विप्रस्थाने विमार्गतः प्रस्थाने, प्रदीप्ते वा नगरादावग्निसन्दीपने वा, प्रविष्टे निर्जनेऽपि वा विजनदेशप्रवेशे वा, तीक्ष्णाः, अरीन् शत्रून् प्रहरेयुः, कथम्भूताः, वस्त्राभरणमाल्यानां फेलाभिः उपभुक्तशेषैः, शयनासनैः, मद्यभोजनफेलाभिः मद्यभोजनोच्छिष्टैश्च, प्रीता इति शेषः, पुनः कीदृशाः,

When the enemy is in the habit of paying regular visits to ascetics, shrines, sacred pillars and images of gods, spies concealed in underground chambers or in subterranean passage, or inside the walls, may annihilate him.

Wherever the king goes personally to witness performances, moves about at leisure or engages himself in swimming;—

Wherever he utters words of amusement on occasions of sacrifices,

receptions, deliveries, obituaries, diseases, happy situation, miserable occasions or in places of fear;—

Wherever he becomes careless in social gatherings of the relatives generating confidence, moves without the protection of guards, rainy days and tumultuous congregations of peoples—

Wherever he moves away from the usual route, fiery places, lonely regions, putting on dress and ornaments and garlands of flower or when he is lying in his bed or sitting on a seat;—

Whenever he is engaged in eating and drinking of liquor to the accompaniment of the sounding of drums along with others, spies in the company of pre-arranged helpers may strike him down.

यथैव प्रविशेयुश्च द्विषतः सत्रहेतुभिः।
तथैव चापगच्छेयुरित्युक्तं योगवामनम्।।

।। इति कौटलीयार्थशास्त्रे दुर्गलम्भोपाये त्रयोदशा-
धिकरणे द्वितीयोऽध्यायः योगवामनम्,
आदितो द्विचत्वारिंशच्छततमः।।

अभिहतैः तूर्यैः सह आह्वानार्थं शब्दापितैः संज्ञातूर्यैः सहिताः, पुनः कथम्भूताः, पूर्वप्रणिहितैः सह पूर्वनियुक्तैर्गूढपुरुषैः संज्ञातूर्यशब्दाहूतैर्दत्तसाहाय्या इत्यर्थः।।

यथैवेति। येनैव प्रकारेण महाप्रणिधानदानलक्षणेन, सत्रहेतुभिः छद्मनिमित्तैरुपलब्धैः, द्विषतः शत्रून्, प्रविशेयुः अर्थात् सत्रिणः, तथैव तेनैव प्रकारेण, अपगच्छेयुः द्विषद्भ्योऽपसरेयुः, अन्यथा हि द्विषद्भिर्गृहीताः स्युरिति भावः। इति योगवामनम् उक्तम् उपदिष्टम्।।

इति कौटलीयार्थशास्त्रव्याख्यायां दुर्गलम्भोपाये त्रयोदशेऽधिकरणे द्वितीयोऽध्यायः योगवामनम्,
आदितो द्विचत्वारिंशच्छततमः।।

The spies should get away as secretly as they came there on the pretense of witnessing performances; and such are the occassions for enticing the enemy with his retinue and facilitate their capture.

Thus the one hundred and forty second chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the second chapter of the thirteenth Adhikaraṇa dealing with the section on 'Enticement by secret contrivance.'

Chapter 143

173. प्रक० अपसर्पप्राणिधिः।

Section 173 : Spies at Work

श्रेणीमुख्यमाप्तं निष्पातयेत्। स परमाश्रित्य पक्षापदेशेन स्वविषयात् साचिव्यकरण-सहायोपादानं कुर्वीत। कृतापसर्पोपचयो वा परमनुमान्य स्वामिनो दूष्यग्रामं वीतहस्त्यश्वं दूष्यामात्यं दण्डमाक्रन्दं वा हत्वा परस्य प्रेषयेत्। जनपदैकदेशं श्रेणीमटवीं वा सहायोपादानार्थं संश्रयेत। विश्वासमुपगतः स्वामिनः प्रेषयेत्। ततः स्वामी हस्तिबन्धनमटवीघातं वापदिश्य गूढमेव प्रहरेत्।

एतेनामात्याटविका व्याख्याताः।

शत्रुणा मैत्रीं कृत्वा अमात्यानवक्षिपेत्। ते तच्छत्रोः प्रेषयेयुः-

अपसर्पप्रणिधिरिति सूत्रम्। अपसर्पो गूढपुरुषः तस्य प्रणिधानं परविषये निवासनमुच्यत इति सूत्रार्थः।

श्रेणीमुख्यमिति। तम्, आप्तं प्रत्ययितं, निष्पातयेद् द्वैषहेत्वपदेशेनात्मसकाशान्निष्पतितं कुर्यात्, अर्थाद् विजिगीषुः। स इति। मिथ्यानिष्पातितः श्रेणीमुख्यः, परं शत्रुम्, आश्रित्य, पक्षापदेशेन परपक्षार्थत्वापदेशेन, स्वविषयाद् विजिगीषुदेशात्, साचिव्यकरणसहायोपादानं साहाय्यकरणार्थानां सहायानां संग्रहणं, कुर्वीत। कृतापसर्पोपचयो वेति। एवं सम्पादितबह्वपसर्पसहायः, परम् अनुमान्य शत्र्वनुमतिग्रहणपूर्वं, स्वामिनो विजिगीषोः, दूष्यग्रामं दूष्यवर्गं, वीतहस्त्यश्वम् असारहस्त्यश्वं, दूष्यामात्यं दूष्यैरमात्यैर्युक्तं, दण्डं सैन्यम्, आक्रन्दं वा पृष्टमित्रं वा, हत्वा जित्वा, परस्य प्रेषयेत्। जनपदैकदेशमिति। जनपदस्यैकदेशम् अर्थात् परकीयं, श्रेणीम्, अटवीं वा आटविकान् वा, सहायोपादानार्थं स्वामिसहायत्वेन स्वीकरणार्थं, संश्रयेत गूढमनुवर्तेत। तथा सहायतयोपात्तेषु तेषु आत्मनो विश्वासे जाते तान् स्वामिनोऽन्तिके साह्यार्थं प्रेषयेदित्याह-विश्वासमुपगत इत्यादि। ईदृशसहायलाभानन्तरं स्वामी निजवनहस्तिबन्धनं वननाशनं वा निमित्तमपदिश्य परं तदविदितात्मसन्नाह एव सन् प्रहरेदित्याह-ततः स्वामीत्यादि।

अनया दिशामात्याटविकानामपि अपसर्पतया परविषये प्रणिधानमूहनीयमित्याह-एतेनेत्यादि।

अपसर्पप्रणिधानस्य प्रकारान्तरमाह-शत्रुणेति। स्वशत्रुणा सह, मैत्रीं कृत्वा मित्रभावमभिनीय, अमात्यान् स्वीयान्, अवक्षिपेत् धिक्कुर्याद्

A conqueror may dismiss a confidential chief of a corporation. The chief may go over to the side of the enemy pretending to be friend and offer to supply him with recruits and other helps procured from the territory of the conqueror. With the help of a group of spies, the chief may please the enemy by destroying a disloyal village or a regiment or an ally (of the conqueror) and may send unworthy elephants and horses and disaffected persons (of the conqueror) to the side of the enemy. He may solicit the help of persons from a portion of the country or from a corporation of people and wild tribes. After gaining their confidence they may be sent to the side of his master. Thereafter the master shall put them down on creating occasions like the hunt of elephants and destructions of wild tribes.

This explains the work of ministers and wild tribes under the mission of the conqueror.

भर्तारं नः प्रसादय' इति। स यं दूतं प्रेषयेत्, तमुपालभेत–' भर्ता ते माममात्यैर्भेदयति; न च पुनरिहागन्तव्यम्' इति। अथैकममात्यं निष्पातयेत्; स परमाश्रित्य योगापसर्पापरक्त-दूष्यानशक्तिमतः स्तेनाटविकानुभयोपघातकान् वा परस्योपहरेत्। आप्तभावोपगतः प्रवीरपुरुषोपघातमस्योपहरेत्। अन्तपालमाटविकं दण्डचारिणं वा–'दृढमसौ चासौ च ते शत्रुणा सन्धत्त' इति। अथ पश्चादभित्यक्तशासनैरेनान् घातयेत्।

दण्डबलव्यवहारेण वा शत्रुमुद्योज्य घातयेत्।

विजिगीषुः। ते इति। अमात्याः, तच्छत्रोः मित्रीकृतस्य शत्रोः, प्रेषयेयुः, अर्थाद् दूतम्। दूतनिवेदनीयं सन्देशमाह–भर्तारं न इति। अस्मासु कुपितमिति शेषः, प्रसादय इति सन्दिश्येति शेषः। स इति। अमात्यप्रार्थितः शत्रुः, यं दूतं, प्रेषयेद् विजिगीषुप्रसादनार्थं, तम्, उपालभेत निन्देत्, अर्थाद् विजिगीषुः, किमुक्त्वा, 'भर्ता ते माम् अमात्यैः भेदयति, पुनः, इह मदन्तिके, नचागन्तव्यम्, अर्थाद् भर्तृसन्देशहरेण त्वया' इति। अमात्यभेदनस्य सत्यत्वभ्रमजननानुकूलमाह–अथेति। अनन्तरम्, एकमवक्षिप्तेष्वन्यतमम्, अमात्यं, निष्पातयेत् स्वान्तिकान्निरस्तं कुर्यात्। स इति। निष्पातितः, परम् आश्रित्य, योगापसर्पापरक्तदूष्यान् स्वामिप्रणिहितान् कपटापसर्पान् स्वामिन्यपरागं प्राप्तान् स्वामिदूष्यांश्च, अशक्तिमतः, स्तेनाटविकान्, उभयोपघातकान् वा, परस्य उपहरेद् 'इमे तव सहाया मया सम्पादिता' इति वदन् उपनयेत्। आप्तभावोपगतः प्रत्ययितत्वापन्नः, अस्य शत्रोः, प्रवीरपुरुषोपघातं प्रवीरपुरुषनाशम्, उपहरेत् प्रापयेत्। कथमुपहरेदित्याह–अन्तपालमिति। तम्, आटविकम् अटवीपालं, दण्डचारिणं वा सैनिकं वा, दुष्टत्वेन सूचयेदित्यध्याहर्तव्यम्। किमुक्त्वा, दृढम् असौ च असौ च अन्तपालादिः, ते शत्रुणा, सन्धत्ते, इति उक्त्वेति शेषः। अथेति। किञ्च, पश्चाद् उत्तरकाले, अभित्यक्तशासनैः अभित्यक्तो विजिगीषुवध्यः तद्धस्तार्पितैर्विजिगीष्वन्तपालादिपरस्परमैत्री-प्रकाशकैः कूटलेख्यैः करणभूतैः, एनान् घातयेत् कूटलेख्यान्यभित्यक्तहस्तात् परेण ग्राहयित्वा अन्तपालादीन् हतान् कारयेदित्यर्थः।

दण्डबलं ते दास्यामीति प्रतिज्ञया परं तच्छत्रुणाभियोज्य पश्चात् तद्दानेन तं शत्रुबलेन घातयेदित्याह–दण्डबलव्यवहारेण वेत्यादि।

After effecting a treaty of peace with the enemy, the conqueror may dismiss the services of his own confidential ministers. They may request the enemy to "help them to reconcile with their master". Accordingly when the enemy sends a messenger to the conqueror for the purpose the latter may spurn him saying :—"your master is trying sow seeds of dissension between myself and my ministers; you should not come again for the purpose." Then one of the dismissed ministers may go over to the enemy taking with him a group of spies, disaffected people, traitors, brave thieves and wild tribes who make no destruction between friend and foe. After gaining the confidence of the enemy the minister may propose to him the destruction of the brave soldiers (of the conqueror). They may include the guards of the boundary wild chief and commander of the army by telling him—"these and other persons are in concert with your enemy." Thereafter these persons should be put to death with specific orders of the king.

After promising the help of the army, the enemy may be destroyed using the same force.

कृत्यपक्षोपग्रहेण वा परस्यामित्रं राजानमात्मन्यपकारयित्वाभियुञ्जीत। ततः परस्य प्रेषयेद्–'असौ ते वैरी ममापकरोति; तमेहि सम्भूय हनिष्यावः; भूमौ हिरण्ये वा ते परिग्रहः' इति। प्रतिपन्नमभिसत्कृत्यागतमवस्कन्देन प्रकाशयुद्धेन वा शत्रुणा घातयेत्। अभिविश्वासनार्थं भूमिदानपुत्राभिषेकरक्षापदेशेन वा ग्राहयेत्। अविषह्यमुपांशुदण्डेन वा घातयेत्। स चेद् दण्डं दद्यात् न स्वयमागच्छेत्, तमस्य वैरिणा घातयेत्। दण्डेन वा प्रयातुमिच्छेत् न विजिगीषुणा, तथाप्येनमुभयतस्संपीडनेन घातयेत्। अविश्वस्तो वा प्रत्येकशो यातुमिच्छेद्, राज्यैकदेशं वा यातव्यस्य आदातुकामः, तथाप्येनं वैरिणा सर्वसन्दोहेन वा घातयेत्। वैरिणा वा सक्तस्य दण्डोपनयेन मूलमन्यतो हारयेत्।

कृत्यपक्षोपग्रहेण वेति। कृत्यपक्षाणां क्रुद्धलुब्धभीतादीनां परकीयानां स्वानुकूलीकरणेन, परस्य, अमित्रं राजानम्, आत्मनि अपकारयित्वा अपकारं कारयित्वा, अभियुञ्जीत। ततः पश्चात्, परस्य प्रेषयेद् अर्थात् सन्देशं, कथम्भूतं सन्देशम्, 'असौ ते वैरी ममापकरोति, तमेहि सम्भूय हनिष्यावः, भूमौ हिरण्ये वा अर्थाच्छत्रुजयलभ्ये लाभे, ते परिग्रहः संविभागः' इत्येवंलक्षणम्। प्रतिपन्नम्, अभिसत्कृत्य स्वोक्तिमभिपूज्य, आगतं परम्, अवस्कन्देन सौप्तिकेन, प्रकाशयुद्धेन वा, शत्रुणा, घातयेत्। अथ शत्रुः संभूयाभियुक्तो जितः, तदा किं कर्तव्यमित्याह–अभिविश्वासनार्थमिति। विश्वासं जनयितुं, भूमिदानपुत्राभिषेकरक्षापदेशेन वा प्रतिश्रुतभूमिदानमपदिश्य स्वपुत्राभिषेकमपदिश्य स्वरक्षामपदिश्य वा, ग्राहयेद् अर्थात् परम्। अविषह्यम् अपदेशेन ग्रहीतुमशक्यम्, उपांशुदण्डेन वा रहोवधेन वा, घातयेत्। अभिसत्कृत्यागतविषया एते विधयः। परश्चेत् स्वयं नागतः दण्डमेव केवलं साहाय्यार्थं प्रेषयेत्, तदा परस्य तं दण्डं तच्छत्रुणा घातयेदित्याह–स चेद् दण्डमित्यादि। यदि सम्भूय हननार्थमाहूतः परः स्वीयेन दण्डेनैव सह प्रयातुमिच्छति नतु विजिगीषुणा सह, तदैनं पुरस्तात् पृष्ठतश्च संपीडनेन घातयेदित्याह–दण्डेन वा प्रयातुमिच्छेदित्यादि। यद्यविश्वासादसंप्रयुज्यैव विजिगीषुणा परः स्वयं पृथग् यातुमिच्छति राज्यैकदेशं च यातव्यस्य स्वयं ग्रहीतुकामः, तदा तं वैरिणा सर्वसैन्यसमुदयेन वा घातयेदित्याह–अविश्वस्तो वेत्यादि। वैरिणा वा सक्तस्येति। वैरिणमभिगम्य तेन सह

A conqueror may influence the adversary of an enemy who may be made to hurt him by some means. Thereafter the conqueror may send a message to his enemy saying :—"This enemy of yours is hurting me; let us join together and kill him; your may take possession of his territory or treasury." When the enemy agrees to the proposal he may be invited with honour and then he may be slain in a tumult or in an open battle. In order to generate confidence in him he may be invited for a pretended gift of territory or the installation of the heir-apparent or for self protection and may be captured. Whoever refuses to yield for the inducement may be slain by secret means. If the enemy proposes to come along with an army and not by himself, he may be slain through the latter's enemy. If he wishes to come with army and not along with the conqueror then he may be slain by attacking him from both sides (by the conqueror as well the enemy); If trusting to none, he wants to march alone in order to capture a portion of the territory of an unassailable enemy, then he may be slain by employing one of his enemies or any other person provided will all necessary assistance. When he goes to join an enemy, then his capital may be captured by sending an army.

शत्रुभूम्या वा मित्रं पणेत; मित्रभूम्या वा शत्रुम्। ततः शत्रुभूमिलिप्सायां मित्रेणात्मन्यपकारयित्वाभियुञ्जीत। इति समानाः पूर्वेण सर्व एव योगाः।

शत्रुं वा मित्रभूमिलिप्सायां प्रतिपन्नं दण्डेनानुगृह्णीयात्; ततो मित्रगतमतिसन्दध्यात्; कृतप्रतिविधानो वा व्यवसनमात्मनो दर्शयित्वा मित्रेणामित्रमुत्साहयित्वा आत्मानमभियोजयेत्; ततः संपीडनेन घातयेत्; जीवग्राहेण वा राज्यविनिमयं कारयेत्! मित्रेणाहूतश्चेच्छत्रुरग्राह्ये स्थातुमिच्छेत्, सामन्तादिभिर्मूलमस्य हारयेत्; दण्डेन वा त्रातुमिच्छेत्, तमस्य घातयेत्।

युद्धव्यासङ्गं कुर्वतः परस्य, मूलं स्थानीयं, दण्डोपनयेन सैन्यप्रेषणेन, अन्यतः अन्यत्र, हारयेत्।

शत्रुभूम्या वेति। मित्रं, शत्रुभूम्या स्वशत्रुभूम्या, पणेत 'तां जित्वा ते संविभजामी'ति संविदं कुर्याद् गूढम्। मित्रभूम्या वा, शत्रुं पणेत। तत इति। तत्र, शत्रुभूमिलिप्सायां, मित्रेण, आत्मनि, अपकारयित्वा अपकारं कारयित्वा, अभियुञ्जीत, अर्थात् तम्। इति समानाः पूर्वेण सर्व एव योगा इति। "ततः परस्य प्रेषयेद् 'असौ ते वैरी ममापकरोति, तमेहि संभूय हनिष्यावः भूमौ हिरण्ये वा ते परिग्रहः' इति प्रतिपन्नमभिसत्कृत्यागतमवस्कन्देन प्रकाशयुद्धेन वा शत्रुणा घातयेद्" इत्यादिना "वैरिणा वा सक्तस्य दण्डोपनयेन मूलमयतो हारयेद्" इत्यन्तेन सन्दर्भेण ये पूर्वे योगा उक्ताः ते सर्वे इहापि योज्या इत्यतिदेशार्थः।

शत्रुं वेति। तं, मित्रभूमिलिप्सायां, प्रतिपन्नं संभूयहननाभ्युपगन्तारं, दण्डेन स्वसैन्यदानेन, अनुगृह्णीयात्। ततः स्वदत्तसैन्यग्रहणानन्तरं, मित्रगतं मित्रप्राप्तं मित्रे कृताभियोगम्, अतिसन्दध्यात् मित्रेण संभूय घातयेत्। आत्मनो व्यसनस्याविद्यमानस्यैव तत्प्रतिविधानारम्भैर्विद्यमानताभिनयेन शत्रुं स्वमित्रद्वारेण प्रोत्साह्यात्मन्य-भियोजयेत्; ततः सर्वात्मना मित्रेण चेत्युभाभ्यां कृतेन पीडनेन तं घातयेद्, जीवन्तमेव वा ते गृहीत्वा राज्यपरिवर्तं कारयेद् विजिगीषुरित्याह-कृतप्रतिविधान इत्यादि। इह 'कृतप्रतिविधानो वे'त्यस्य स्थाने 'ततः

प्रतिविधानेन वा' इति क्वचित्। पाठः समानार्थः। मित्रेणेति। तेन, आहूतः आत्मसंप्रयोगायार्थितः, शत्रुः विजिगीषुव्यसनाभिनयजनितोत्साहो वैरी, अग्राह्ये स्थातुमिच्छेच्चेद् विजिगीषुमभियुञ्जानोऽपि तन्मित्रास-

The land of an enemy may be made a barter with the friend; and the land of a friend may be made a barter with an enemy. When the friend goes to seize the land of an enemy he may be made to offend the conqueror and then caught hold of. These and other contrivances lead to the same end.

When the enemy is desirous of obtaining the territory of the conqueror's friend, then the conqueror may under the pretence if compliance, supply the enemy with army; then having entered into a secret concert with the friend, the conqueror may pretend to be under troubles and permit himself to be attacked by the enemy combined with the neglected friend. Then hemmed from two sides the enemy may be killed or captured alive to distribute the territory among the conqueror and his friends. If helped by his friend, the enemy shuts himself in an impregnable fort, his base may be attacked by the help of vassals; if he tries to defend it by army, that army may be destroyed.

तौ चेन्न भिद्येयातां प्रकाशमेवान्योन्यस्य भूम्या पणेत; ततः परस्परं मित्रव्यञ्जनोभूयवेतना वा दूतान् प्रेषयेयुः—अयं ते राजा भूमिं लिप्सते शत्रुसंहितः' इति; तयोरन्यतरो जाताशङ्कारोषः पूर्ववच्चेष्टेत।

दुर्गराष्ट्रदण्डमुख्यान् वा कृत्यपक्षहेतुभिरभिविख्याप्य प्रव्राजयेत्; ते युद्धावस्कन्दावरोधव्यसनेषु शत्रुमतिसन्दध्युः; भेदं वास्य स्ववर्गेभ्यः कुर्युः; अभित्यक्तशासनैः प्रतिसमानयेयुः।

लुब्धकव्यञ्जना वा मांसविक्रयेण द्वास्स्थाः दौवारिकापाश्रयाश्चोराभ्यागमं परस्य द्विस्त्रिरिति निवेद्य लब्धप्रत्यया भर्तुरनीकं द्विधा

-म्प्रयुक्ततयैव स्थातुमिच्छेद् यदि, तर्हीति शेषः, सामन्तादिभिः, अस्य शत्रोः मूलं स्थानीयं, हारयेत्। दण्डेन वा त्रातुमिच्छेदिति। सैन्येन रक्षितुमिच्छेच्चेत्, तं दण्डम्, अस्य, घातयेत्।

मित्रशत्र्वोर्गूढभेद्यत्वेऽतिसन्धानप्रकारमभिधायभेद्यत्वे तमाह—तौ चेन्न भिद्येयातामित्यादि। प्रकाशमेव अगूढमेव सर्वजनविदितं यथा स्यात् तथा। अन्योन्यस्य भूम्या पणेत मित्रभूम्या शत्रुं शत्रुभूम्या मित्रं च पणेत। अन्योन्यभूम्येत्यपि पाठः। तत इति। प्रकाशपणनानन्तरं, परस्परं शत्रुं मित्रं चोद्दिश्येत्यर्थः, मित्रव्यञ्जनोभयवेतना वा मित्रव्यञ्जना उभयवेतना वा, व्यस्त एव तु पाठो हृद्यः। दूतान् सन्देशहरान्, प्रेषयेयुः। सन्देशप्रकारमाह—अयं ते राजेत्यादि। तयोरिति। मित्रशत्र्वोः, अन्यतरः, जाताशङ्कारोषः, पूर्ववत् चेष्टेत पूर्वोक्तदिशा स्ववैरिणमतिसन्ध्यादित्यर्थः।

योगान्तरमाह—दुर्गराष्ट्रदण्डमुख्यान् वेति। स्थानीयमुख्यान् जनपदमुख्यान् सेनामुख्यांश्च, कृत्यपक्षहेतुभिः

कृत्यसहायत्वसंभावनानिमित्तैः, अभिविख्याप्य, प्रव्राजयेद् राष्ट्राद् विवासयेत्। ते विवासिताः, शत्रुमाश्रिता इति शेषः, युद्धावस्कन्दावरोधव्यसनेषु युद्धाद्यवसरेषु, शत्रुम् अतिसन्दध्युः, भेदं वा, अस्य शत्रोः, स्ववर्गेभ्यः स्वीयेभ्योऽमात्यादिवर्गेभ्यः, कुर्युः। अभित्यक्तशासनैः अभित्यक्तहारितैः कूटलेख्यैः, प्रतिसमानयेयुः स्वोद्भावितान् मिथ्यार्थान् संवादयेयुः।

योगान्तरमाह–लुब्धकव्यञ्जना वेति। मृगयुवेषा गूढपुरुषाः, मांसविक्रयेण तद्व्यापारवशेन, द्वाःस्थाः द्वारस्थिताः, दौवारिकापाश्रयाः–

If the enemy and his ally could not be separated, then each of these may be openly asked to come to an agreement with the conqueror to seize the territory of the other and may send spies disguised as messengers who receive salary from both sides with the message :—"This king allied with my army desires to seize your territory"; then one of them may with anger and suspicion act as before (will attack).

The conqueror may dismiss the chiefs of forts, country or army by inplicating them with sufficient reasons; and they may catch hold him on occasions of war, seige or any other troubles, or may cause dissension between his own party or produce witnesses for the same.

Spies under the disguise of hunters may locate themselves near the gate of the enemy to sell flesh and make friendship with the guards and having informed the enemy of the arrival of thieves on two or three occasions, they may prove themselves to be of reliable character and cause him to split the army into two divisions and to station them in two different parts of his territory and when villages are being plundered and beseiged they may tell :—

निवेश्य ग्रामवधेऽवस्कन्दे च द्विषतो ब्रूयुः–'आसन्नश्चोरगणः, महांश्चाक्रन्दः, प्रभूतं सैन्यमागच्छतु' इति। तदर्पयित्वा ग्रामघातदण्डस्य सैन्यमितरदादाय रात्रौ दुर्गद्वारेषु ब्रूयुः–'हतश्चोरगणः; सिद्धयात्रमिदं सैन्यमागतं; द्वारमपाव्रियताम्' इति। पूर्वप्रणिहिता वा द्वाराणि दद्युः; तैः सह प्रहरेयुः।

कारुशिल्पिपाषण्डकुशीलववैदेहकव्यञ्जनानायुधीयान् वा परदुर्गे प्रणिदध्यात्। तेषां गृहपतिकव्यञ्जनाः काष्ठतृणधान्यपण्यशकटैः प्रहरणावरणान्यभिहरेयुः; देवध्वजप्रतिमाभिर्वाः ततस्तद्व्यञ्जनाः–

–द्वाराधिकृताश्रयाः, चोराभ्यागमं, परस्य, द्विस्त्रिरिति द्वित्रादिवारान्, निवेद्य, लब्धप्रत्ययाः भर्तुः प्राप्तभर्तृविश्वासः, ग्रामवधे अवस्कन्दे च विषये तदुभयप्रतिकारार्थमित्यर्थः, द्विषतः शत्रोः, अनीकं, द्विधा निवेश्य द्वैराश्येन निविष्टं कारयित्वा, ब्रूयुः। किमिति–'आसन्नः चोरगणः, महांश्च, आक्रन्दः जनाक्रोशः, प्रभूतं बहुलं, सैन्यम् आगच्छतु, चोरगणाभिघातार्थम्' इति। तदिति। आगतं सैन्यं, ग्रामघातदण्डस्य ग्रामघातप्रतिकारार्थं इत्यर्थः, अर्पयित्वा, इतरत् सैन्यम् आदाय, रात्रौ दुर्गद्वारेषु ब्रूयुः, गत्वा वदेयुः,

किमिति-'हतः चोरगणः, अत एव सिद्धयात्रं सफलयात्रम्, इदं सैन्यम् आगतम्। द्वारम् अर्थाद् दुर्गस्य, अपाव्रियतां भयहेतुव्यपगमाद् विवृतं क्रियताम्' इति। द्वारापावरणप्रार्थनं च सैन्यं परस्य स्ववशगतं हत्वा गमिष्यतां सुखनिर्गमार्थम्। पूर्वप्रणिहिता वेति। पूर्वनियुक्ता वा गूढपुरुषाः, द्वाराणि दद्युः। न केवलं द्वारदाने सहाया एते पूर्वप्रणिताः किन्तु लुब्धकव्यञ्जनैः क्रियमाणे सैन्यस्य प्रहारेऽपीत्यभिप्रायेणाह-तः सह प्रहरेयुरिति।

योगान्तरमाह-कारुशिल्पीत्यादि। आयुधीयान् आयुधजीविनः। अनायुधीयान् इत्यसमञ्जसः पाठः। प्रणिदध्यात् अपसर्पयेत्। तेषामित्यादि। तेषां कार्वादिव्यञ्जनानामायुधीयानाम्। प्रहरणावरणानि प्रहरणानि आवरणानि च युद्धोपयोगीनि। अभिहरेयुः गूढं दद्युः। देवध्वजप्रतिमाभिर्वा देवानां ध्वजभूतैः खड्गादिभिः प्रतिमाभिश्च सह वा। ततस्तद्व्यञ्जना इत्यादि। ततः कार्वादिव्यञ्जना गृहपतिकव्यञ्जनसकाशाधिगतप्रहरणावरणाः, प्रमत्तवधं प्रमादिनां हननम्, अवस्कन्दप्रतिग्रहं हठाक्रमणस्वीकारम्, अभिप्रहरणम्

"Thieves have come very near, the tumult is great, and a large army is required." When the army arrives a part is located to protect the villages and the other part is taken to the gate of the fort at night and announce loudly that. "Thieves are caught; the army has returned victorious; open the gates of the fort" Those spies who are situated there earlier will combine to open the gate, and gaining entrance the enemy may be attacked with their help.

Painters, carpenters, heretics, merchants and other disguised spies belonging to the army of the conqueror may also reside inside the fort of the enemy. Spies under the disguise of agriculturalists may supply them with weapons secretly taken in carts loaded with fire wood, grass, grains and other commodities of commerce or disguised as images and flags of gods. Then spies disguised as priests, may announce to the enemy to the accompaniment of blowing of conch shells and beating of drums that an army is approaching to beseige and destroy all. In the ensuing tumult they may surrender the fortgate and towers of the fort to the army of the conqueror or disperse the army of the enemy to bring about his fall.

प्रमत्तवधमवस्कन्दप्रतिग्रहमभिप्रहरणं पृष्ठतः शङ्खदुन्दुभिशब्देन वा प्रविष्टमित्यावेदयेयुः। प्राकारद्वाराट्टालकदानमनीकभेदं घातं वा कुर्युः।

सार्थगणवासिभिरातिवाहिकैः कन्यावाहिकैरश्वपण्यव्यवहारिभिरुपकरणहारकैर्धान्यक्रेतृभिर्वा प्रव्रजितलिङ्गिभिर्दूतैश्च दण्डातिनयनं सन्धिकर्म विश्वसनार्थम्। इति राजापसर्पाः।

एत एवाटवीनामपसर्पाः कण्टकशोधनोक्ताश्च। व्रजमटव्यासन्नमपसर्पाः सार्थं वा चोरैर्घातयेयुः। कृतसङ्केतमन्नपानं चात्र मदनरसविद्धं वा कृत्वापगच्छेयुः। गोपालकवैदेहकाश्च ततश्चोरान् गृहीत-

अभितः प्रहारदानं च, शङ्खदुन्दुभिशब्देन वा, वाशब्दात् प्रकारान्तरेण वा, पृष्ठतः प्रविष्टमिति पृष्ठत उपस्थितमिति-प्रमत्तवधोऽवस्कन्दप्रतिग्रहोऽभिप्रहरणं चेति त्रयं पृष्ठत उपस्थितमितीत्यर्थः, आवेदयेयुः,

अर्थात् परदुर्गस्थान्। आवेदनवशाच्च संकुले प्रवृत्ते प्राकारद्वाराट्टालकखण्डनं पूर्ववत् परानीकस्य द्विधा भेदनं तद्घातं च कुर्युरित्याह–प्राकारद्वारेत्यादि।

घाताय परानीकस्य भेदनवद् अतिनयनमपि अपसर्पैः कार्यमित्याह–सार्थेत्यादि। सार्थगणवासित्वादीनि षड् रूपाणि परिगृह्य स्वमार्गातिवाहनसहायापदेशेन परसैन्यस्यातिदूरनयनमपसर्पैः कर्तव्यं, सन्धिपणितं कर्म च परविश्वासनार्थं कर्तव्यमिति वाक्यार्थः। तत्र सार्थगणवासिभिः धनिकगणान्तर्भूतैः। आतिवाहिकैः अतिवाहो दुर्गममार्गलङ्घनं तत्प्रयोजनैर्मार्गरक्षार्थिभिरित्यर्थः, इदं च षण्णां विशेषकम्। कन्यावाहिकैः कन्यां वहन्ति नयन्तीति कन्यावाहिकास्तैः। प्रव्रजितलिङ्गिभिः संन्यासिव्यञ्जनैः। शेषं स्पष्टार्थम्। इति राजापसर्पा इति। अनेन प्रकारेण राज्ञामपसर्पा विज्ञेयाः।

य एते राजापसर्पाः ये च कण्टकशोधनोक्ताः, त उभये आटविकानां प्रणिधेया इत्याह–एत एवेत्यादि। आटविकेष्वपसर्पकार्यमाह–व्रजमिति। गोष्ठम्, अटव्यासन्नं वनसन्निकृष्टम्, अपसर्पाः, सार्थं वा पथिकवृन्दं वा, चोरैः अर्थादाटविकैः, आटविका हि चोरवृत्तय इति। घातयेयुः, तेषु स्वगमनुप्रविष्टा इत्यार्थम्। कृतसङ्केतमिति। अमुकदेशकाले युष्माकमाहारसंविधा भविष्यतीति कृतसमयम्, अन्नपानं च, अत्र, मदनरसविद्धं मदकरद्रव्येण विषेण च युक्तं, कृत्वा, अपगच्छेयुः। गोपालकवैदेहकाश्च,

After establishing peace and friendship with the enemy for the purpose of confidence, army and weapons may be collected inside the enemy's fort by spies under various disguises as merchants, caravans, processions leading a bride, merchants selling horses, pedlars trading in various articles, purchasers and sellers of grains and ascetics. These and others are the spies (aiming at the life) of a king.

These spies as also those mentioned in the section on "Removal of thorns" can be used in connection with the forest tribes. They together with thieves may destroy the flock of enemies cattle of merchandise in the vicinity of the wild tracts. They may mix poison with the juice of the Madana plant, the food stuffs and beverages kept, as previously arranged in a definite place grazed by the cattle of the enemy and go out unnoticed. When the cattle breeders exhibit signs of intoxication by eating such food stuffs, spies disguised as cowherds, merchant and thieves, may full upon the enemy's cowherds and carry off the cattle.

–लोप्त्रभाराः मदनरसविकारकालेऽवस्कन्दयेयुः। सङ्कर्षणदैवतीयो वा मुण्डजटिलव्यञ्जनः प्रहवणकर्मणा मदनरसयोगाभ्यामतिसन्दध्यात्। अथावस्कन्दं दद्यात्। शौण्डिकव्यञ्जनो वा दैवतप्रेतकार्योत्सवसमाजेष्वाटविकान् सुराविक्रयोपायननिमित्तं मदनरसयोगाभ्यामतिसन्दध्याद्। अथावस्कन्दं दद्यात्।

ग्रामघातप्रविष्टां वा विक्षिप्य बहुधाटवीम्।
घातयेदिति चोराणामपसर्पाः प्रकीर्तिताः।।

।। इति कौटलीयार्थशास्त्रे दुर्गलम्भोपाये त्रयोदशाधिकरणे तृतीयोऽध्यायः अपसर्पप्रणिधिः, आदितस्त्रिचत्वारिंशच्छततमः ।।

राजपुरुषभूता इति शेषः, ततः चोरान्, मदनरसविकारकाले मादकविद्धान्नपानोपयोगनिमित्तचित्तविभ्रमावसरे विषविद्धान्नपानोपयोगनिमित्तसंज्ञानाशावसरे च, गृहीतलोप्त्रभाराः चोरसकाशोपात्तमुष्टद्रव्यभाराः सन्तः, अवस्कन्दयेयुः गृह्णीयुर्घातयेयुर्वा। मदनरसयोगस्य प्रकारान्तरमाह–सङ्कर्षणदैवतीयो वेति। सङ्कर्षणो बलभद्राख्यं मद्यप्रियं दैवतं तद्भक्तो वा, मुण्डजटिलव्यञ्जनः, प्रहवणकर्मणा तुष्टिभोजनदानच्छद्मना, मदनरसयोगाभ्याम् अतिसन्दध्यात्, अर्थात् चोरान्। अथ अवस्कन्दं दद्यात् मदनरसविकारकाले। प्रकारान्तरमाह–शौण्डिकव्यञ्जनो वेत्यादि। सुराविक्रयोपायननिमित्तं सुराया विक्रयाय यदुपायनमुपहरणं तत् निमित्तं कृत्वेत्यर्थः।

प्रान्ते श्लोकमाह–ग्रामघातप्रविष्टं वेति। ग्रामघातार्थं प्रविष्टाम्, अटवीम् आटविकांश्चोरानित्यर्थः, बहुधा बहुभिर्योगप्रकारैः, विक्षिप्य विकृतचित्तान् कृत्वा, घातयेत्। इति एवं चोराणामपसर्पाः, प्रकीर्तिताः उपदिष्टाः।

इति कौटलीयार्थशास्त्रव्याख्यायां दुर्गलम्भोपाये त्रयोदशेऽधिकरणे तृतीयोऽध्यायः अपसर्पप्रणिधिः, आदितस्त्रिचत्वारिंशच्छततमः।।

Spies under the disguise of ascetics worshipping Saṅkarṣaṇa may mix their sacrificial beverages with the Madana juice and supply the same to the cowherds in a feast and carry off the cattle. A spy under the guise of a vintner may on the occasion of a procession of festival of god, sell liquor mixed with Madana juice and make the cowherds intoxicated. Then they may carry off the cattle.

Such spies who enter into the wild tracts of the enemy with the aim of plundering the villages and to destroy the enemy are termed as spies under the garb of thieves.

Thus the one hundred and forty third chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the third chapter dealing with the section of spies at work.

Chapter 144

174. 175. पर्युपासनकर्म, अवमर्दश्च।

Sections 174 : Operation of Siege
175 : Storming a Fort

कर्शनपूर्वं पर्युपासनकर्म। जनपदं यथानिविष्टमभये स्थापयेत्। उत्थितमनुग्रहपरिहाराभ्यां निवेशयेदन्यत्रापसरतः, समग्रमन्यस्यां भूमौ निवेशयेदेकस्यां वा वासयेत्। न ह्यजनो जनपदो राज्यमजनपदं वा भवतीति कौटल्यः।

विषमस्थस्य मुष्टिं सस्यं वा हन्याद् वीवधप्रसारौ च।

प्रसारवीवधच्छेदान्मुष्टिसस्यवधादपि।
वमनाद् गूढघाताच्च जायते प्रकृतिक्षयः।।

प्रभूतगुणवद्धान्यकुप्ययन्त्रशस्त्रावरणविष्टिरश्मिसमग्रं मे सैन्य-

पर्युपासनकर्मेति सूत्रम्। परदुर्गं परित उपासनकर्म सैन्यनिवासनव्यापारोऽभिधीयत इति सूत्रार्थः।

कर्शनेत्यादि। पर्युपासनकर्म, कर्शनपूर्वं कोशदण्डरेचनामात्यवधादि कर्शनं तत्पुरस्सरं, कर्तव्यमिति शेषः। कर्शने च शत्रोः क्रियमाणे जनपदो न पीडनीयः किन्तु रक्षणीय इति वक्तुमाह–जनपदमित्यादि। तं, यथानिविष्टं यथापरनिवेशितरूपम्, अभये स्थापयेत्, अभयमित्यपि पाठः। उत्थितमिति। कृष्यादिप्रयासोद्यतं जनं, अनुग्रहपरिहाराभ्यां धनदानकरमोक्षणाभ्यां, निवेशयेद् अपसरतोऽन्यत्र अपसरन्तं वर्जयित्वा, अपसरतोऽनुग्रहपरिहारौ न कार्यावित्यर्थः। समग्रमिति। अधिकम्, अन्यस्यां भिन्नभिन्नायां भूमौ, निवेशयेद्; एकस्यां वा वासयेद्, एकस्थं वेत्यपि पाठः। किमर्थं जनस्थापनादिकं तात्पर्येणोपदिश्यते, तत्राह–नह्यजनो जनपद इत्यादि। जनरहितस्य जनपदव्यपदेशाभावाद् जनपदरहितस्य राज्यव्यपदेशाभावाच्च जनस्थापनादिकमावश्यकमित्यर्थः।

कर्शनप्रकारमाह–विषमस्थस्येति। शत्रूपरोधसंकटप्राप्तस्य, मुष्टिं बीजवापं, सस्यं वा, हन्यात्। वीवधप्रसारौ च वीवधो धान्यस्नेहादिभारः प्रसारः तृणकाष्ठादिप्रवेशः तौ च, हन्यात्।

प्रकृतिक्षयहेतून् संगृह्णाति–प्रसारवीवधच्छेदादित्यादि। वमनाद् अन्यत्र नयनात्। प्रकृतिक्षयः अमात्याद्यपचयः।

कस्यामवस्थायां पर्युपासनं कर्तव्यमित्याह–प्रभूतेत्यादि। प्रचुरसारधान्यादिसप्तकसम्पन्नं, तत्र आवरणं पेटीचर्मादि निष्टि: कर्मकर: रश्मि:

Reduction of the enemy should precede a seige. But the region conquered should be kept in peace without fear. When it is in rebellion it needs to be pacified by bestowing favours and remedial measures, unless the conqueror wishes to abandon it. For Kauṭalya is of the opinion that there is no territory without people and no country without a populous territory.

When resisted the conqueror may destroy the stores, granaries and trade.

By the destruction of trade, agricultural produces and standing crops, by causing people to run away and killing them in secret the country is denuded of its people.

मृतुश्च पुरस्तात्; अपर्तु: परस्य व्याधिदुर्भिक्षनिचयरक्षाक्षय: क्रीतबलनिर्वेदो मित्रबलनिर्वेदश्च' इति पर्युपासीत्।

कृत्वा स्कन्धावारस्य रक्षां वीवधासारयो: पथश्च, परिक्षिप्य दुर्गं खातसालाभ्यां, दूषयित्वोदकमवस्त्राव्य परिखा: संपूरयित्वा वा, सुरुङ्गाबलकुटिकाभ्यां वप्रप्राकारौ हारयेत्।

दारं च गुलेन निम्नं वा पांसुमालयाच्छादयेत्। बहुलारक्षं यन्त्रैर्घातयेत्। निष्करादुप-निष्कृष्याश्वैश्च प्रहरेयु:। विक्रमान्तरेषु च नियोगविकल्पसमुच्चयैश्चोपायानां सिद्धिं लिप्सेत दुर्गवासिन:।

प्रग्रह:, शेषं प्रतीतम्। मे सैन्यम्, ऋतुश्च पुरस्तात् कालश्चानुकूल उपस्थित:, परस्य अपर्तु: प्रतिकूल: काल:, व्याधिदुर्भिक्षनिचयरक्षाक्षय: व्याधिना दुर्भिक्षेण च निचयस्य सञ्चितधनादे: रक्षाया आरक्षकाणां च क्षय:, क्रीतबलनिर्वेद: क्रयेणाधिगतस्य बलस्य कृतश्रमवैफल्यदर्शनेन भूयस्साह्यकरणाद् विरिरंसा, मित्रबलनिर्वेदश्च, अस्तीति सर्वत्र शेष:। इति अस्यामवस्थायामिति शेष:, पर्युपासीत।

पर्युपासनप्रकारमाह–कृत्वेत्यादि। स्कन्धावारस्य स्वसेनानिवेशस्य। परिक्षिप्य दुर्गं परस्य स्थानीयं परिगत्य। खातसालाभ्यां खातसालानुसारेण। अवस्राव्य निर्गतजला: कृत्वा । सुरुङ्गाबलकुटिकाभ्यां तिर्यग्भूखातै: सैन्यपल्लीभिश्च, जातौ चेहैकत्वविवक्षया द्विवचनम्। हारयेत् आक्रामेत्।

दारमित्यादि। दारं दीर्णदेशम्। गुलेन छादनसाधनपिण्डेन। बहुलेनेति पाठश्चिन्त्यार्थ:। बहुलारक्षं प्रचुररक्षाविधानं प्रदेशम्। निष्करादिति। निन्दितकरणात् कपटादित्यर्थ:, अथवा कर: शुण्डा निरायत: करो यस्य स निष्कर: प्रसारितकर: अर्थात् करिणं तथाभूतं विधायेति ल्यब्लोपे पञ्चमी, दुष्करादिति पाठेऽपि कपटादित्यर्थ:। निष्कुरादित्युकारमध्यस्तु मृग्यार्थ: पाठ:। अश्वैश्च चकाराद् गजैश्च। प्रहरेयु: अर्थादारक्षान्। विक्रमान्तरेषु चेति। विक्रमविशेषेषु च परै: प्रदर्श्यमानेष्वित्यर्थ:, उपायानां नियोगविकल्पसमुच्चयैश्च अयमेवात्रोपायोऽनुष्ठेय इति व्यवस्था नियोग: अयं वासौ वेति विकल्प: अयं चासौ चेति समुच्चय: एतैर्यथाविषयमनुष्ठित, सिद्धिं लिप्सेत, दुर्गवासिन: दुर्गगतस्य शत्रो:।

"My army has enough provision of staple corn, raw materials, machines, weapons, dress, labourers, ropes and the like; my enemy has an unfavourable season, is suffering from,disease, famine and loss of provisions and defensive force, while his hired army is in a miserable condition"—with these thought a conqueror may begin the seige.

After protecting his camp, transports and supplies and also of roads of communication; having dug up a ditch and raised a rampart round his camp, he may vitiate the water in the ditches round the enemy's fort or empty the ditches of their water or fill them with water if empty, and thus he may assail the rampart and the parapets by making use of underground tunnels and iron rods.

If the ditch is deep, he may fill it up with soil. If it is guarded by a number of men, he may destroy it using machines. Cavalry may force their passage through the gate into the fort and smite the enemy, often, in the midst of tumult, he may offer terms to the enemy by taking recourse to one, two, three or all the strategic means.

श्येनकाकनप्तृभासशुकशारिकोलूककपोतान् ग्राहयित्वा पुच्छेष्वग्नियोगयुक्तान् परदुर्गे विसृजेयुः।

अपकृष्टस्कन्धावारादुच्छ्रितध्वजधन्वारक्षा वा मानुषेणाग्निना परदुर्गमादीपयेत्।

गूढपुरुषाश्चान्तदुर्गपालका नकुलवानरविडालशुनां पुच्छेष्वग्नियोगमाधाय काण्डनिचयरक्षाविधानवेश्मसु विसृजेयुः।

शुष्कमत्स्यानामुदरेष्वग्निमाधाय वल्लूरे वा वायसोपहारेण वयोभिर्हारयेयुः।

सरलदेवदारुपूतितृणगुग्गुलुश्रीवेष्टकसर्जरसलाक्षागुलिकाः खरोष्ट्राजावीनां लण्डं चाग्निधारणम्।

श्येनकाकेत्यादि। तत्र नप्ता विष्किराख्यः पक्षी, शेषाः प्रतीताः। पुच्छेषु अग्नियोगयुक्तान् अग्निप्रज्वलनोपाययुक्तान्। विसृजेयुः विसृष्टश्येनादिपुच्छपरिपतिताग्नियोगद्वारेण परदुर्गं दीपयेयुरित्यर्थः।

अपकृष्टस्कन्धावारादिति। अधःस्थात् स्वस्कन्धावारात्, उच्छ्रितध्वजधन्वा उच्छ्रिता अग्निक्षेपार्थमुन्नमिता ध्वजाः पताका धन्वानि धनूंषि च येन स तथाभूतः, आरक्षा वा, मानुषेणाग्निना शत्रुनिहतस्य वा शूलारोपणमारितस्य वा मनुष्यस्यास्थ्नि कल्माषवेणुना मथनादुत्थितोनाग्निना, परदुर्गम् आदीपयेत्। आरक्षांशे 'आदीपयेयुरि'ति विपरिणामेन संबन्धः। 'आदीपयेयुरि'त्येव क्वचित् पाठः।

गूढपुरुषाश्चेत्यादि। अन्तदुर्गपालकाः अन्तपालकदुर्गपालकव्यञ्जना इत्यर्थः। काण्डनिचयरक्षाविधानवेश्मसु येषु बाणाः कुप्यादिवर्गा वा सञ्चित्य रक्ष्यन्ते तेषु गृहेषुः।

शुष्कमत्स्यानामित्यादि। अग्निमाधाय वक्ष्यमाणगुलिकादिकमग्निधारणं निवेश्य। वल्लूरे वा शुष्कमांसे वा। वायसोपहारेण पक्षिसबन्ध्युपहारात्मना।

सरलेत्यादि। तत्र सरलः पीतद्रुः, देवदारुः दारुहरिद्रा, पूतितृणं रोहिषतृणम्, गुग्गुलुः कालनिर्यासः, श्रीवेष्टकः सरलनिर्यासः, सर्जरसः यक्षधूपः, लाक्षा जतु।

Having captured the birds like vulture, crow; naptā (= viṣkira = a domestic fowl), bhāsa (= a bird of prey like vulture), parrot, maina and pigeon which have their nests in the fortwalls, and having tied to their tails inflammable power, he may let them fly to the forts of the enemy.

If the camp is situated at a distance from the fort and is provided with an elevated part for archers and their flags, then the enemy's fort may be set on fire.

Spies living under the guises of watchmen of the fort, may tie inflammable powder to the tails of mongooses, monkeys, cats and dogs and let them go over to the thatched roofs of the houses.

A splinter of fire kept in the body of a dried fish may be caused to be carried off by a monkey or a cow, or any other bird to such roofs.

Small balls prepared from the mixture of Sarala (Pinus Longifolia), devadāru (deodar), pūtitṛṇa (stinking grass), guggulu (Bdellium), Śrīveṣṭaka (turpentine), the juice of sarja (Vatika Robusta), and lākṣā (lac) combined with dungs of an ass, camel, sheep and goat are inflammable (such as capable of keeping fire).

प्रियालचूर्णमवल्गुजमषीमधूच्छिष्टमश्वखरोष्ट्रगोलण्डमित्येष क्षेप्योऽग्नियोगः।

सर्वलोहचूर्णमग्निवर्णं वा कुम्भीसीसत्रपुचूर्णं वा पारिभद्रकपलाशपुष्पकेशमषीतैल-मधूच्छिष्टकश्रीवेष्टकयुक्तोऽग्नियोगः विश्वासघाती वा। तेनावलिप्तः शणत्रपुसवल्कवेष्टितो बाण इत्यग्नियोगः।

नत्वेव विद्यमाने पराक्रमेऽग्निमवसृजेत्। अविश्वास्यो ह्यग्निः दैवपीडनं च, अप्रतिसंख्यात- प्राणिधान्यपशुहिरण्यकुप्यद्रव्यक्षयकरः। क्षीणनिचयं चावाप्तमपि राज्यं क्षयायैव भवति।

इति पर्युपासनकर्म।

'सर्वारम्भोपकरणविष्टिसम्पन्नोऽस्मि, व्याधितः पर उपधाविरुद्धप्रकृतिरकृतदुर्गकर्म-निचयो वा निरासारः सासारो वा पुरा मित्रैः सन्धत्ते' इत्यवमर्दकालः।

प्रियालेत्यादि। तत्र प्रियालो राजादनः, अवल्गुजः सोमराजिसंज्ञौषधिः, मषी शेफालिकाभेदः। मधूच्छिष्टं सिक्थः।

सर्वलोहचूर्णमित्यादि। तत्र कुम्भी श्रीपर्णी, सीसत्रपुणी लोहभेदौ। पारिभद्रको निम्बः, पलाशः किंशुकः, केशं हीवेरम्। विश्वासघाती विश्वासविषय एव सन् हन्तीति तथोच्यते। तेनावलिप्त इत्यादि। शणः क्षुपभेदः, त्रपुसं तन्नामप्रसिद्ध ओषधिभेदः। बाणोऽर्जुनवृक्षः।

त एतेऽग्नियोगाः पराक्रमसद्भावे न प्रयोक्तव्या इत्याह–नत्वेवेत्यादि। अविश्वास्यः अतिप्रवृद्धोऽदिधक्षितमपि निर्दहतीत्यतो विश्वसितुमनर्हः। दैवपीडनं च पीडनवर्गे प्रथमगणितं दैवपीडनं च। अप्रतिसंख्याते-त्यादिपदे अप्रतिसंख्यातेत्यस्यासंख्येत्यर्थः। क्षीणनिचयं प्राणिधान्यादिसञ्चयो निचयः स क्षीणो यस्मिंस्तत्।

इति पर्युपासनकर्मेति। व्याख्यातमिति शेषः।

अवमर्द इति सूत्रम्। अवमर्दः परदुर्गग्रहणं स कदा कथं कर्त्तव्य इत्ययमर्थोऽत्राभिधीयत इति सूत्रार्थः।

अवमर्दकालमाह–सर्वारम्भेत्यादि। सर्वविधैः सैन्यसन्नाहैः सैन्यभक्तावरणाद्युपकरणैः कर्मकरैश्चाहं सम्पन्नोऽस्मि; शत्रुस्तु व्याधिपीडितो वा, उपधाप्रत्यक्षिताशुचिभावैरमात्यैर्युक्तो वा, अकृतदुर्गसंस्कारधन धान्यादिसञ्चयो

The mixture of the powder of priyāla (Chirongia Sapida), the charcoal of avalguja (Oanyza, serratula, anthelonintica), madhūcchiṣṭa (wax) and the dung of horse, ass, camel and cow is an inflammable powder to be hurled against the enemy.

The powder of all the metals (Sarvaloha) as red as fire, or the mixture of the powder of kumbhī (gmelia arberea), Śīsa (lead), trapu (zinc) mixed with charcoal powder of the flowers of pāribhadraka (deodar), palāśa (butea frondosa), kesa (= hrībera= Andropogon) and with oil wax and turpentine is also an inflammable powder termed as Viśvāsaghātī—Killing by taking into confidence. A stick wound round with a bark made of hemp, zinc and lead is a fire arrow (against and enemy).

When a fort can be captured by bravery one should not use fire. For fire cannot be trusted as also divine visitation, since it destroys the people, grains, cattle, gold, raw materials and the like. Further the acquisition of a fort with all its property destroyed will be a source of further loss.

Such is the aspect of a seize.

When a conqueror feels that :—"I have all the necessary means and workmen whereas my enemy is diseased, with officers proven to be impure under temptations, with unfinished forts and deficient stores, allied with no friend or with friends inmical at heart" then he should consider it a fit moment to take up arms and storm the fort.

स्वयमग्नौ जाते समुत्थापिते वा प्रहवणे प्रेक्षानीकदर्शनसङ्गसौरिककलहेषु नित्ययुद्ध-श्रान्तबले बहुलयुद्धप्रतिविद्धप्रेतपुरुषे जागरणक्लान्तसुप्तजने दुर्दिने नदीवेगे वा नीहारसम्प्लवे वावमृद्नीयात्।

स्कन्धावारमुत्सृज्य वा वनगूढः शत्रुः सत्रान्निष्क्रान्तं घातयेत्।

मित्रासारमुख्यव्यञ्जनो वा संरुद्धेन मैत्रीं कृत्वा दूतमभित्यक्तं प्रेषयेत्–'इदं ते छिद्रम्; इमे दूष्याः; संरोद्धुर्वा छिद्रमयं ते कृत्यपक्षः' इति। तं प्रतिदूतमादाय निर्गच्छन्तं विजिगीषुर्गृहीत्वा

दोषमभिविख्याप्य प्रवास्यापगच्छेत् ततः। मित्रासारव्यञ्जनो वा संरुद्धं ब्रूयात्–'मां त्रातुमुपनिर्गच्छ; मया वा सह संरोद्धारं जहि' इति। प्रतिपन्नमुभयतस्संपीडनेन घातयेत्; जीवग्राहेण वा राज्यविनिमयं कारयेत्; नगरं वास्य प्रमृद्नीयात्; सारबलं वास्य वमयित्वाभिहन्यात्।

वा सुहृद्बलरहितो वा, संभावितसुहृद्बलोऽपि मित्रैः सन्धास्यते न त्वद्यापि कृतसन्धिः इति यदा विजिगीषुर्मन्यते; तदा स परमवमृद्नीयादित्यर्थः।

स्वर्यमित्यादि। प्रेक्षानीकदर्शनसङ्गसौरिककलहेषु प्रेक्षायां नृत्तादौ अनीकदर्शने सैन्यमिथ्यायुद्धप्रेक्षणे च सङ्ग आसक्तिः तस्मिन् सौरिककलहेषु शौण्डिकोत्पादितेषु कलहेषु च। नित्ययुद्धश्रान्तबल इत्यादिविशेषणत्रयस्य परस्मिन्निति विशेष्यं गम्यम्। नदीवेगे वेगवाहिनदीतरणकाले। नीहारसंप्लवे अवश्यायनिमित्तोप्लवे।

स्कन्धावारमित्यादि। सत्राद् वनात्। यदि शत्रुर्वने गूढस्थितः तर्हि तस्य वनान्निष्क्रमणं प्रतीक्ष्य तं विजिगीषुर्घातयेदित्यर्थः। 'शत्रुं निष्कान्तम्' इति पाठे तु स्फुट एवार्थः।

मित्रेत्यादि। मित्रासारमुख्यव्यञ्जनो मित्रव्यञ्जनो वा सुहृद्बलमुख्यवेषी वा। अभित्यक्तं वध्यम्। अभिव्यक्तामिति पाठे वध्यत्वेन निश्चितम्। प्रेषयेत् लेखं दत्त्वेति शेषः। इदं ते इत्यादि लेखार्थप्रदर्शनम्। दूष्याः त्वदीयाः अपकर्तारः परस्य त्वच्छिद्रप्रविवक्षोः साहाय्यदानजागरूकाः। ते कृत्यपक्षः संरोद्धुच्छिद्रप्रविवक्षोस्तव साहाय्यदानजागरूकः परकीयक्रुद्धलुब्धादिवर्गः। तमित्यादि। तम् अभित्यक्तम्। प्रतिदूतम् आदाय प्रतिलेखार्थे गृहीत्वा। दोषम् आत्मापकारम्। प्रवास्य मारयित्वा। ततः अपगच्छेत्

Whem fire breaks out accidentally or caused intentionally; when the people of the enemy are engaged in a feast; or witnessing a performance of the army or quarrelling due to drinking of liquor, or the army is tired due to loss of sleep and excessive work, or on a cloudy day, or when the region is flooded or under a thick fog an assault may be carried out.

Or after having left the camp and remaining concealed in a nearby forest the conqueror may strike the enemy who he comes out.

A king under the pretension of the chief friend of the enemy may get closer to the beseiged and inform through a messenger—"This is your weak point, these are your internal enemies, that is the weak point of the beseiger and this person coming to you is your partisan." When this partisan is returning with another messenger of the enemy, he may be caught hold of and having proclaimed the guilt of the partisan, the conqueror should banish him and retire from the seige. Then the pretending friend may tell the beseiged—"come out and help me, let us combine and strike the beseiger". Accordingly when the enemy comes out, he may be attacked from both sides and killed or captured alive and his territory may be shared by the conspirators. His capital city may be razed down and the core of his forces be forced to come out and get destroyed.

तेन दण्डोपनताटविका व्याख्याताः।

दण्डोपनताटविकयोरन्यतरो वा संरुद्धस्य प्रेषयेत्–'अयं संरोद्धा व्याधितः, पार्ष्णिग्राहेणाभियुक्तः, छिद्रमन्यदुत्थितम्, अन्यस्यां भूमावपयातुकामः' इति। प्रतिपन्ने संरोद्धा स्कन्धावारमादीप्यापयायात्, ततः पूर्ववदाचरेत्।

पण्यसम्पातं वा कृत्वा पण्येनैनं रसविद्धेनातिसन्दध्यात्।

आसारव्यञ्जनो वा संरुद्धस्य दूतं प्रेषयेत्–'मया बाह्यमभिहतमुपनिर्गच्छाभिहन्तुम्' इति। प्रतिपन्नं पूर्ववदाचरेत्।

मित्रं बन्धुं वापदिश्य योगपुरुषाः शासनमुद्राहस्ताः प्रविश्य दुर्गं ग्राहयेयुः।

आसारव्यञ्जनो वा संरुद्धस्य प्रेषयेत्–'अमुष्मिन् देशे काले च स्कन्धावारमभिहनिष्यामि; युष्माभिरपि योद्धव्यम्' इति। प्रतिपन्नं यथोक्तमभ्याघातसंकुलं दर्शयित्वा रात्रौ दुर्गान्निष्क्रान्तं घातयेत्।

संरुद्धपक्षादपसरेत्। प्रकारान्तरमाह–मित्रासारव्यञ्जनो वेत्यादि। उभयतः पुरः पश्चाच्च। वमयित्वा दुर्गान्निर्गमय्य।

उक्ताः प्रकारा दण्डोपनताटविकद्वाराप्यनुष्ठेयाः इत्याह–तेन दण्डोपनताटविका इत्यादि।

तत्र प्रकारान्तरमाह–दण्डोपनताटविकयोरित्यादि। ततः पूर्ववदाचरेदिति। पूर्ववदाचरणं च उभयतः संपीड्यघातनादिकं पूर्वोक्तम्।

पण्येत्यादि। पण्यसम्पातं पण्यविक्रेतृसङ्घागमनम्।

प्रकारान्तरमाह–आसारव्यञ्जनो वेत्यादि। सन्देशार्थमाह–मया बाह्यमित्यादि। मया प्रथममभिहन्यमानं शत्रुमनुहन्तुं दुर्गान्निष्क्रान्तो भवेत्यर्थः। प्रतिपन्नमित्यादि। पूर्ववदाचरेत् उभयतः सम्पीड्यघातनादिकं कुर्यात्।

मित्रमित्यादि। मित्रं बन्धुं वापदिश्य आत्मनो मित्रत्वं बन्धुत्वं वा निमित्तं कल्पयित्वा। शासनमुद्राहस्ताः मुद्रितकूटलेख्यहस्ताः।

आसारव्यञ्जनेन कर्तव्यमन्यमतिसन्धानप्रकारमाह–आसारव्यञ्जनो वेत्यादि। अभ्याघातसंकुलं विजिगीषुस्कन्धावाराभिहननतुमुलं, तत्प्रदर्शनं च संरुद्धविश्वासार्थम्।

This explains the treatment of a conquered enemy or wild chief.

Either a conquered enemy or a wid chief may inform the beseiged :— "This conqueror is suffering from disease, is under attack by a rear enemy, facing a rebellion and is thinking of going to another region." If the fellow believes in this, the conqueror may set fire to his camp and retire and then do as detailed above.

Or having collected merchandise contaminated with poison the conqueror may deceive the enemy by sending such materials to him.

Under the guise of an ally a messenger may be sent saying—"Come

out and attack the conqueror already thrashed by me." If he agrees he may be treated as detailed earlier.

Spies disguised as friends or relatives and holding passports may enter the fort of the enemy and help to its capture.

Pretending to be an ally of the enemy he may inform the beseiged :— "I propose to beseige the camp at such and such a time and place; then you should also fight along with me." When the enemy does so coming out to witness the tumult and uproar of the beseiging army in danger he may be slain as detailed before.

यद्वा मित्रमावाहयेद्, आटविकं वा, तमुत्साहयेत्—'विक्रम्य संरुद्धे भूमिमस्य प्रतिपद्यस्व' इति। विक्रान्तं प्रकृतिभिर्दूष्यमुख्यावग्रहेण वा घातयेत्; स्वयं वा रसेन। 'मित्रघातकोऽयम्' इत्य वाप्तार्थः।

विक्रमितुकामं वा मित्रव्यञ्जनः परस्याभिशंसेत्; आप्तभावोपगतः प्रवीरपुरुषानस्योपघातयेत्।

सन्धिं वा कृत्वा जनपदमेनं निवेशयेत्; निविष्टमन्यजनपदमविज्ञातो हन्यात्।

अपकारयित्वा दूष्याटविकेषु वा बलैकदेशमतिनीय दुर्गमवस्कन्देन हारयेत्।

दूष्यामित्राटविकद्वेष्यप्रत्यपसृताश्च कृतार्थमानसंज्ञाचिह्नाः परदुर्गमवस्कन्देयुः।

प्रकारान्तरमाह—यद्वेत्यादि। तम् उत्साहयेत् मित्राटविकान्यतरं पराभियोगायोद्योजयेत्। प्रकृतिभिः अमात्यादिभिः। दूष्यमुख्यावग्रहेण वा दूष्यमुख्यस्वविधेयीकरणेन। दूष्यमुख्योपग्रहेणेति पाठे दूष्यमुख्यानुकूलनेनेत्यर्थः। मित्रघातकोऽयमित्यवाप्तार्थ इति। परं मित्रघातक इति प्रख्याप्य स्वार्थं साधयेदित्यर्थः।

प्रकारान्तरमाह—विक्रमितुकामं वेत्यादि। विजिगीषुस्त्वयि विक्रमितुमिच्छतीत्येवं शत्रोस्तन्मित्रव्यञ्जनः कथयेत्, प्रतिपद्य चैवं तस्याप्तभावं तदीयान् प्रवीरपुरुषान् घातयेदित्यर्थः।

परेण सन्धिं कृत्वा तेनैव स्वराष्ट्रे जनपदनिवेशमन्यं कारयित्वा तं तदविज्ञातो हन्यादित्याह—सन्धिं वेत्यादि।

स्वदूष्याटविकेषु विषये परस्य बलैकदेशमपकारं कारयित्वा तेन निमित्तेन तमतिदूरे नीत्वा च बलैकदेशविरहेण सुखाक्रमणीयतामापन्नं परदुर्गं प्रसभाक्रमणेनापहरेदिति प्रकारमन्यमाह—अपकारयित्वेत्यादि।

अवस्कन्दसहायाः के इत्यत्राह—दूष्यामित्रेत्यादि। तत्र प्रत्यपसृताः परस्मादपसृत्य पुनस्तं प्रत्यागताः। शेषास्तु प्रतीताः। कृतार्थमानसंज्ञाचिह्नाः कृतार्थमाना धनाभरणादिदानसत्कृताः कृतसंज्ञाचिह्नाश्च ग्राहितावस्कन्दकालसूचकसङ्केताश्च।

Or a friend or a wild chief of the enemy may be encouraged saying— "Seize the land when he is beseiged (by the conqueror). When he is attacking, enemy's people, or chief of traitors may be employed to murder

him, or he may do it by poisoning. It should be made public that "the fellow is a killer of his friend."

A pretending friend may inform the enemy that the conqueror is likely to attack him. Thus gaining confidnece he may kill the brave persons of the enemy.

Or by effecting peace the enemy may be persuaded to put his men in some part of the country and then kill them without the knowledge of the enemy.

Causing the peaceful army to rebel and removing a portion of the same to different place, he should suddenly attack the enemy's fort and seize it.

Or traitors, enemies, wild tribes and other who have deserted the enemy may go back under the plea of reconciliation, honour and reward and allow the fort to be captured by the conqueror.

परदुर्गमवस्कन्द्य स्कन्धावारं वा पतितपराङ्मुखाभिपन्नमुक्तकेशशस्त्रभयविरूपेभ्यश्चाभयमयुध्यमानेभ्यश्च दद्युः। परदुर्गमवाप्य विशुद्धशत्रुपक्षः कृतोपांशुदण्डप्रतीकारमन्तर्बहिश्च प्रविशेत्।

एवं विजिगीषुरमित्रभूमिं लब्ध्वा मध्यमं लिप्सेत। तत्सिद्धावुदासीनम्। एष प्रथमो मार्गः पृथिवीं जेतुम्।

मध्यमोदासीनयोरभावे गुणातिशयेनारिप्रकृतीः साधयेत्। तत उत्तराः प्रकृतीः। एव द्वितीयो मार्गः।

मण्डलस्याभावे शत्रुणा मित्रं मित्रेण वा शत्रुमुभयतःसम्पीडनेन साधयेत्। एष तृतीयो मार्गः।

शक्यमेकं वा सामन्तं साधयेत्; तेन द्विगुणो द्वितीयं, त्रिगुणस्तृतीयम्। एष चतुर्थो मार्गः पृथिवीं जेतुम्।

परदुर्गस्य परस्कन्धावारस्य वावस्कन्दे सिद्धेऽनन्तरकरणीयमाह–परदुर्गमित्यादि। पतितेत्यादिपदे अभिपन्नो विपद्गतः शस्त्रभयविरूपः शस्त्रभयविकृताकारः। शेषाः प्रतीताः। परदुर्गमित्यादि। विशुद्धशत्रुपक्षः उत्सारितशत्रुपक्ष्यः। विशुद्धशत्रुपक्षमिति पाठे क्रियाविशेषणम्। अन्तर्बहिश्च दुर्गस्यान्तर्भागं बहिर्भागं च।

अनेन प्रकारेण शत्रोर्भूमिं लब्ध्वा ततो मध्यमस्य तत उदासीनस्य च लब्धुमीहेतेत्येष पृथिवीजयस्य प्रथमो मार्ग इत्याह–एवं विजिगीषुरित्यादि।

मध्यमोदासीनसत्तायामुक्तः क्रमः। तदभावे त्वाह–मध्यमोदासीनयोरभाव इत्यादि। गुणातिशयेन शत्रुगुणातिशायिना स्वगुणेन। अरिप्रकृतीः साधयेत् शत्रोरमात्यादीन् स्वानुरक्तान् कुर्यात्। उत्तराः प्रकृतीः कोशदण्डादिकाः।

तृतीयं मार्गमाह–मण्डलस्याभाव इत्यादि। मण्डलं दशराजकं तस्याभावे!

चतुर्थमाह–शक्यमेकमित्यादि। शक्यम् आत्मसुजयम्। तेन द्विगुण: साधितेनैकेन सामन्तेन सहायभूतेन द्विगुणात्मबल:।

Capturing the fort and returning to the camp the conqueror should give succour to those of the army fallen at his feet, standing defeated with face turned, with dishevelled hair and with their weapons thrown down, shivering under fear and surrendering themselves. Getting into the fort and clearing the partisans of the enemy and guarding inside and outside with own men, the victorious conqueror should enter it.

Having thus obtained the territory of the enemy close to his country the conqueror should direct his attention to that of the Madhyama kig. After accomplishing the task he should turn to the neutral. This is the first way to conquer the world.

In the absence of Madhyama and Udāsīna (neutral) he should by virtue of his noble qualities win over the chief people of the enemy. Thereafter he should obtain the other elements (like treasury and army). This is the second way.

In the absence of a circle of states he should conquer his friend by using the enemy or conquer the enemy using his friend. He should use his army to press the opposition from the one side in this. This is the third way.

First he should win over the immediate enemy. Having doubled his strength, he may go against a second enemy and having trebled his power by this victory, he may attack a third. This is the fourth way to conquer the world.

जित्वा च पृथिवीं विभक्तवर्णाश्रमां स्वधर्मेण भुञ्जीत।

उपजापोऽपसर्पो वा वामनं पर्युपासनम्।
अवमर्दश्च पञ्चैते दुर्गलम्भस्य हेतव:।।

इति कौटलीयार्थशास्त्रे दुर्गलम्भोपाये त्रयोदशाधिकरणे
चतुर्थोऽध्याय: पर्युपासनकर्म अवमर्दश्च,
आदितश्चतुश्चत्वारिंशच्छततम:।।

जित्वा चेत्यादि। स्वधर्मेण यथायथं वर्णाश्रमयो: विहितेन धर्मेण मन्वाद्युक्तेन।

उक्तान् दुर्गलम्भहेतून् श्लोकेन संगृह्णाति–उपजापोऽपसर्पो वेत्यादि। उपजापापसर्पौ चेति क्वचित् पाठ:।

इति कौटलीयार्थशास्त्रव्याख्यायां दुर्गलम्भोपाये त्रयोदशेऽधिकरणे
चतुर्थोऽध्यायः पर्युपासनकर्म अवमर्दश्च।
आदितश्चतुश्चत्वारिंशच्छततमः।।

Having conquered the world he should enjoy it by governing in accordance with the duties of the king with its people of distinct castes and divisions of religious life.

The five means to capture a fort are :—intrigue, spies, winning over the enemy's people, seige and assault.

Thus the one hundred and forty fourth chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the fourth chapter of the thirteenth Adhikaraṇa dealing with the sections of operation of seige and storming a fort.

Chapter 145

176. प्रक० लब्धप्रशमनम्।

Section 176 : Restoration of Peace in a Conquered Country

द्विविधं विजिगीषोः समुत्थानम्–अटव्यादिकमेकग्रामादिकं च।

त्रिविधश्चास्य लम्भः–नवो, भूतपूर्वः, पित्र्य इति।

नवमवाप्य लम्भं परदोषान् स्वगुणैश्छादयेत् गुणान् गुणद्वैगुण्येन। स्वधर्मकर्मानुग्रह-परिहारदानमानकर्मभिश्च प्रकृतिप्रियहितान्यनुवर्तेत। यथासम्भाषितं च कृत्यपक्षमुपग्राहयेत्। भूयश्च कृतप्रयासम्। अविश्वास्यो हि विसंवादकः स्वेषां परेषां च भवति; प्रकृतिविरुद्धा-चारश्च। तस्मात् समानशीलवेषभाषाचारतामुपगच्छेत्। देशदैवतसमाजोत्सवविहारेषु च भक्तिमनुवर्तेत।

लब्धप्रशमनमिति सूत्रम्। विजिगीषुणा लब्धस्य परदुर्गादिकस्य प्रशमनं लब्धप्रशमनम्। तच्च दुर्गादिवासिनाम् अपूर्वभूपतिविषयशङ्काद्यपोहनेन स्वात्मनि विस्रम्भजननम्। तदिहोच्यत इति सूत्रार्थः।

द्विविधमित्यादि। समुत्थानम् उद्योगः, तेन तदुपार्जितं लक्ष्यते। अटव्यादिकमित्यादिपदेन खन्यादिकम् एकग्रामादिकमित्यादिपदेन नगरादिकं च ग्राह्यम्।

त्रिविधश्चेत्यादि। लम्भो लाभः तेन लब्धोऽर्थो लक्ष्यते। नवः अस्वीय एव विजिगीषुणा शत्रुसकाशर्जितः। भूतपूर्वः स्वीय एव शत्रुवशे स्थितस्तं जित्वा प्रत्याहृतः। पित्र्यः स्वपितृसंबन्ध्येवार्थः परहस्तगतः परं जित्वा प्रत्याहृतः।

तत्र नवलम्भे विधिमाह–नवमवाप्येत्यादि। छादयेत् विस्मारयेत्। गुणान् परकीयान्। गुणद्वैगुण्येन परगुणातिशायिस्वगुणप्रदर्शनेन। स्वधर्मकर्मानुग्रहपरिहारदानमानकर्मभिरित्यादि। स्वीयैर्धर्मानुष्ठानैः कृष्यादिकर्मसु ऋणदानाद्युपकारैः करमोक्षणैः भूम्यादिदानकर्मभिः पूजनकर्मभिश्च। यथासंभाषितं पूर्वकृतसंविदनुसारेण। कृत्यपक्षं परकीयं क्रुद्धादिवर्गं कृतात्मोपकारम्। उपग्राहयेद् धनादिदानेन प्रीणयेदित्यर्थः। भूयः बहुतरम्। कृतप्रयासं कृतपरिश्रमप्रकर्षम्। प्रकृतिविरुद्धाचारः राष्ट्रजनाविरुद्धवृत्तवेषादिपरिग्रहः। देशदैवतसमाजोत्सवविहारेषु लब्धे देशे यद् दैवतं जनैराद्रियमाणं समाज उत्सवो विहारश्च, तेषु।

The expedition of a conqueror is of two kinds; one is with regard to the wild tracts and the other is in relation to single villages.

Acquisition of the territory is of three kinds—new, recovered and inherited.

Acquiring a new territory, he should obliterate the vices of his enemy with his own virtures, and the enemy's virtues by doubling his own. He should cater to the interest of his ministers and people by following their desires by the strict adherence to his duties, attending to his gifts and by bestowing honours. He should give rewards as agreed upon, to those who have deserted the enemy to join his cause. Again he should reward them as often as they render help to him. Whoever acts against the will of the people will become unreliable to one's own people as well as for the others, so also is the one who behaves against the customs. Hence he should follow the people in their faith, dress, language and customs. He should take part in national festivals relating to gods, congregations and amusements with attention.

देशग्रामजातिसङ्घमुख्येषु चाभीक्ष्णं सत्रिणः परस्यापचारं दर्शयेयुः। माहाभाग्यं भक्तिं च तेषु स्वामिनः स्वामिसत्कारं च विद्यमानम्। उचितैश्चैनान् भोगपरिहाररक्षावेक्षणैर्भुञ्जीत। सर्वदेवताश्रमपूजनं च विद्यावाक्यधर्मशूरपुरुषाणां च भूमिद्रव्यदानपरिहारान् कारयेत्। सर्वबन्धनमोक्षमनुग्रहं दीनानाथव्याधितानां च। चातुर्मास्येष्वर्धमासिकमघातं; पौर्णमासीषु च चातूरात्रिकं; राजदेशनक्षत्रेष्वेकरात्रिकम्। योनिबालवधं पुंस्त्वोपघातं च प्रतिषेधयेत्। यच्च कोशदण्डोपघातिकमधर्मिष्ठं वा चरित्रं मन्येत, तदपनीय धर्म्यव्यवहारं स्थापयेत्। चोरप्रकृतीनां म्लेच्छजातीनां च स्थानविपर्यासमनेकस्थं कारयेद् दुर्गराष्ट्रदण्डमुख्यानां च। परोपगृहीतानां च मन्त्रिपुरोहितादीनां परस्य प्रत्यन्तेष्वनेकस्थं वासं कारयेत्। अपकारसमर्थाननुक्षियतो वा भर्तृविनाशमपांशुदण्डेन प्रशमयेत्। स्वदेशीयान् वा परेण वावरुद्धानपवाहित-स्थानेषु स्थापयेत्।

देशग्रामेत्यादि। परस्य जितस्य शत्रोः। अपचारम् अहितानुष्ठानम्। माहेत्यादि। माहाभाग्यं महाभागत्वम्। तेषु स्वदेशीयेषु ग्रामजातिसङ्घमुख्येषु। भक्तिं वात्सल्यम्। उचितैरित्यादि। भोगपरिहाररक्षावेक्षणैः भोगो राजभागः परिहारः करमोक्षः रक्षावेक्षणं कण्टकशोधनम् एतैः। भुञ्जीत उपयुञ्जीत। सर्वदेवतेत्यादि। विद्यावाक्यधर्मशूरपुरुषाणां विद्याशूराः पुरुषा विपश्चितः वाक्यशूरा वाग्मिनः धर्मशूराः धार्मिकाः तेषाम्। सर्वेत्यादि। सर्वबन्धनमोक्षणं सर्वेषां काराबद्धानां बन्धनाद् मोचनम्। चातुरित्यादि। चातुर्मास्येषु चतुर्षु मासेष्वतीतेषु, अर्धमासिकमघातं पञ्चदशदिवसव्यापकं प्राणिवधप्रतिषेधं, पौर्णमासीषु च, चातूरात्रिकं रात्रिचतुष्टयव्यापकमघातं, राजदेशनक्षत्रेषु राजनक्षत्रेषु देशलम्भनक्षत्रेषु च, एकरात्रिकम् एकरात्रिव्यापकमघातं, कारयेदिति वर्तते। योनिबालवधं योनयो विजननक्षमाः कुक्कुट्यादयः बालाः भक्ष्यप्राणितर्णकाः तेषां वधं, पुंस्त्वोपघातं च षण्डीकरणं च, प्रतिषेधयेत्। यच्चेत्यादि। धर्म्यव्यवहारं धर्मानपेतचरित्रानुष्ठानम्। चोरप्रकृतीनामित्यादि। स्थानविपर्यासं स्थितिव्यत्ययम्। अनेकस्थम् असंहतम्। परोपगृहीतानां चेत्यादि।

प्रत्यन्तेषु विषयान्तेषु। अनेकस्थं भिन्नभिन्नप्रदेशगतम्। अपकारसमर्थानित्यादि। भर्तृविनाशमनु क्षियत: स्मामिविनाशं लक्षीकृत्य वसत:। उपांशुदण्डेन रहोवधेन। स्वदेशीयान् वेत्यादि। अवरुद्धान् कारायां नियन्त्रितान्। अपत्र

Spies should expose the wrong actions of the leaders of provinces, villages, castes and corporations against others. They should also expose the esteem and favour bestowed upon them by the conqueror for their devotion.

He should please them by giving suitable gifts, remitting taxes and providing for their security. He should cause his people to worship all gods, perform religious activities in addition to bestowing land, wealth and gifts of expiation to those who are learned men, orators, charitable and brave persons. He should release all the prisoners and provide help to miserable, helpless and diseased persons. He should prohibit the slaughter of animals during the period of Cāturmāsya (from July to September), for four nights during the full moon, and for a night on the day of the birth-star of the conqueror or of the national star. He should also prohibit the killing of females and young ones as well as castration. Whatever he thinks injurious to the treasury and army as also unrighteous, should be avoided and should establish righteous transactions. He should insist born thieves as well as the Mlecchas to change their habitation often and reside in many places and this is to be done in the case of chief officers of forts, country parts and army. As regards ministers and priests who are found in conspiracy with the enemy should also be required to have habitation in different parts on the borders of the enemy's country. People who are cabable of hurting and expecting the destruction of their master shall be annihilated in secret. Such renegades of his own country or captured by the enemy should be made to reside in remote places.

यश्च तत्कुलीनः प्रत्यादेयमादातुं शक्तः प्रत्यन्ताटवीस्थो वा प्रबाधितुमभिजातः, तस्मै विगुणां भूमिं प्रयच्छेत्; गुणवत्याश्चतुर्भागं वा कोशदण्डदानमवस्थाप्य, यदुपकुर्वाणः पौरजानपदान् कोपयेत्। कुपितैस्तैरेनं घातयेत्, प्रकृतिभिरुपक्रुष्टमपनयेद्, औपघातिके वा देशे निवेशयेदिति।

भूतपूर्वे येन दोषेणापवृत्तः, तं प्रकृतिदोषं छादयेत्। येन च गुणेनोपावृत्तः, तं तीव्रीकुर्यादिति।

पित्र्ये पितृदोषाञ्छादयेत् गुणांश्च प्रकाशयेदिति।।

चरित्रमकृतं धर्म्यं कृतं चान्यैः प्रवर्तयेत्।
प्रवर्तयेन्न चाधर्म्यं कृतं चान्यैर्निवर्तयेत्।।

।। इति कौटलीयार्थशास्त्रे दुर्गलम्भोपाये त्रयोदशाधिकरणे पञ्चमोऽध्यायः लब्धप्रशमनम्। आदितः पञ्चचत्वारिंशच्छततमः
एतावता कौटलीयस्यार्थशास्त्रस्य दुर्गलम्भोपाय-स्त्रयोदशमधिकरणं समाप्तम्।।

हितस्थानेषु अपवाहितानां स्वस्वाधिकारप्रच्याविताानां परपक्ष्याणामधिकारपदेषु।

यदि परस्मादपहृतां भूमिं तद्वंश्यः कश्चित् प्रत्यादातुं शक्त इति शङ्क्येत विषयान्ताटवीस्थो वा तां बाधितुं शक्त इति शङ्क्येत, तस्मै तथाविधाय गुणहीनां भूमिं दद्याद्, अथवा गुणवत्या भूमेश्चतुर्थांशं दद्यात् कोशदण्डदानमात्मार्थं तावद् बहु व्यवस्थाप्य, यावतः साधनाय पौरजानपदान् संपीडयेद्, इत्याह–यश्च तत्कुलीन इत्यादि। यत् कोशदण्डदानम्। उपकुर्वाणः साधयन् स्वस्मै ददानो वा। कोपनफलमाह–कुपितैरित्यादि। एनं कोपयितारम्। प्रकृतिभिरित्यादि। उपक्रुष्टं निन्दितम्। औपघातिके उपघातहेतुभूते। इतिशब्दो नवलम्भविधिसमाप्तौ।

भूतपूर्वलम्भविषयमाह–भूतपूर्व इत्यादि। अपवृत्तः स्वहस्तात् प्रच्युतः। छादयेत् लोपयेत्। उपावृत्तः परहस्तात् स्वहस्तं प्रत्यापन्नः। तीव्रीकुर्याद् द्रढयेत्।

पित्र्यलम्भमधिकृत्याह–पित्र्ये इत्यादि। पितृदोषान् यैर्दोषैः पितुर्हस्तादपवृत्तस्तान् दोषानित्यर्थः।।

चरित्रमित्यादि। अकृतम् अन्याप्रवर्तितम्।।

व्याख्यायामर्थशास्त्रस्य श्रीमूलाख्यानभाजने।
दुर्गलम्भोपायसंज्ञं त्रयोदशमपूर्यत।।

इति श्रीवञ्चिमण्डलमहाराजाश्रितस्य ताम्रपर्णीतीरवर्तितरुवाग्रहारा-
भिजनस्य श्रीसीताम्बाश्रीरामसुब्रह्मण्यार्यसूनोर्महामहोपाध्याय-
गणपतिशास्त्रिणः कृतिषु कौटलीयार्थशास्त्रव्याख्यायां
श्रीमूलाख्यायां दुर्गलम्भोपाये त्रयोदशऽधिकरणे
पञ्चमोऽध्यायः लब्धप्रशमनम्। आदितः पञ्चचत्वारिंशच्छततमः।।
दुर्गलम्भोपायस्त्रयोदशमधिकरणं समाप्तम्।।

That scion of the enemy's family capable of wresting the conquered territory and is taking shelter in a wild tract on the border, often harassing the conqueror, should be provided with a sterile portion of the territory or with the fourth part of a fertile tract on the condition of giving the conqueror a specified amount of money and a fixed number of troops, in raising which he may have to incur the displeasure of the people and may be destroyed by them. Whoever has caused excitement to the people or incurred their displeasure should be removed and placed in a dangerous locality.

He should hide those vices of his owing to which he lost his territory once. He should increase those virtues by which he recovered it.

With regard to the inherited territory, he should cover the vices of his father. He may also display his own virtues.

He should initiate all those customs, which though righteous and practiced by others, are not observed in his own country and give no room for the practice of whatever is unrighteous though observed by others.

Thus the one hundred and forty-fifth chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the fifth chapter of the thirteenth Adhikaraṇa dealing with the section 'Restoration of peace in a conquered country'.

The thirteenth Adhikaraṇa is concluded.

औपनिषदिकं–चतुर्दशमधिकरणम्।

BOOK FOURTEEN : SECRET MEANS

Chapter 146

177. प्रक० परघातप्रयोगः।

Section 177 : Means to Injure an Enemy

चातुर्वर्ण्यरक्षार्थमौपनिषदिकमधर्मिष्ठेषु प्रयुञ्जीत।

कालकूटादिः विषवर्गः श्रद्धेयदेशवेषशिल्पभाजनापदेशैः कुब्जवामनकिरातमूक-बधिरजडान्धच्छद्मभिः म्लेच्छजातीयैरभिप्रेतैः स्त्रीभिः पुंभिश्च परशरीरोपभोगेष्वाधातव्यः।

राजक्रीडाभाण्डनिधानद्रव्योपभोगेषु गूढाः शस्त्रनिधानं कुर्युः; सत्राजीविनश्च रात्रिचारिणोऽग्निजीविनश्चाग्निनिधानम्।

इत्थं त्रयोदशभिरधिकरणैस्तन्त्रावापौ प्रपञ्चितौ, अथ तदुभयानुकूलमौपनिषदिकं चतुर्दशमधिकरण-मारभ्यते। उपनिषन्नाम औषधमन्त्ररहस्यं, रहस्यत्वं च गुरूपदेशैकसमधिगम्यप्रयोगतया गोपनीयत्वात्; उपनिषदेव औपनिषदं, तदधिकृत्य प्रवृत्तमौपनिषदिकम्। तच्चेदं हिंसात्मकत्वादधर्मिष्ठेष्वेव प्रयोक्तव्यमित्याह–चातुर्वर्ण्येत्यादि। चातुर्वर्ण्यरक्षार्थंवर्णग्रहणं जातेरप्युपलक्षणं तेन यथावर्णजातिविभक्तधर्मकर्मकं मनुष्यसामान्यं चातुर्वर्ण्यशब्दतो गृह्यते, तस्य रक्षार्थम् अधर्मिष्ठप्रभवाभ्य आपद्भ्योऽनन्यप्रतीकार्याभ्यः परित्राणसिद्धये। तत्र

परघातप्रयोग इति सूत्रम्। शत्रुवधार्थ औषधप्रयोग उच्यत इति सूत्रार्थः।

कालेत्यादि। कालकूटादिरित्यादिपदेन वत्सनाभहलाहलादीनां ग्रहणम्। श्रद्धेयदेशवेषशिल्पभाजनापदेशैः विश्वसनीयं देशं वेषं शिल्पं भाजनं चात्मनोऽपदिशद्भिः। कुब्जेत्यादिपदे कुब्जादयश्च मूकादिच्छद्मानश्चेति समासः। कुब्जो गडुलः, वामनः खर्वः, किरातोऽल्पतनुः। अभिप्रेतैः इष्टैः। परशरीरोपभोगेषु शत्रोर्देहोपभोग्येषु वस्त्रादिषु।

राजक्रीडेत्यादि। राजक्रीडाभाण्डनिधानद्रव्योपभोगेषु क्रीडनकनिधानेषु भूषणनिधानेषु सुगन्धिद्रव्य-निधानेषु च राजोपभोग्येषु, गूढाः गूढपुरुषाः, शस्त्रनिधानं शस्त्रनिवेशनं कुयुः। यद्वा राज्ञः क्रीडाभाण्डाद्युप-

भोगावसरेषु शस्त्रप्रयोगं कुर्युरित्यर्थः। सत्राजीविनश्च सत्रिणश्च, रात्रिचारिणः, अग्निजीविनश्च अयस्कारादयश्च, अग्निनिधानम् अग्निनिवेशनं कुर्युः।

For the protection of the institution of four castes measures prescribed in secret sciences shall be used against the wicked.

Kālakuṭa and other manifold poisons should be administered in the diet and other physical enjoyments of the wicked through the instrumentality of such men or women of Mleccha class as can be put on disguises appropriate to different countries, arts, or professions, or as can be put on the appearance of a humpbacked, dwarfish or short-sized person, or of a dumb, deaf, idiot or blind person.

Spies lying in wait living as inmates (of the same household) may make use of weapons on occasions of royal sports or musical or other entertainments, while those under the disguise of rātricārī (night walkers) or of fire-keepers may set fire to the houses of the wicked.

चित्रभेककौण्डिन्यककृकणपञ्चकुष्ठशतपदीचूर्णमुच्चिदिङ्गकम्बलिशतकन्देध्मकृकलासचूर्णं गृहगौलिकान्धाहिककृकणकपूतिकीटगोमारिकाचूर्णं भल्लातकावल्गुकारसयुक्तं सद्यःप्राणहरमेतेषां वा धूमः।

कीटो वान्यतमस्तप्तः कृष्णसर्पप्रियङ्गुभिः।
शोषयेदेष संयोगः सद्यःप्राणहरो मतः।।

धामार्गवयातुधानमूलं भल्लातकपुष्पचूर्णयुक्तमार्धमासिकः।

व्याघातकमूलं भल्लातकपुष्पचूर्णयुक्तं कीटयोगो मासिकः। कलामात्रं पुरुषाणां द्विगुणं खराश्वानां चतुर्गुणं हस्त्युष्ट्राणाम्।

शतकर्दमोच्चिदिङ्गकरवीरकटुतुम्बीमत्स्यधूमो मदनकोद्रवपला-

चित्रभेकादिचूर्णम् उच्चिदिङ्गादिचूर्णं गृहगौलिकादिचूर्णं च भल्लातकादिरसयुक्तं सद्यःप्राणहरम्, एषां चूर्णानां धूमो वा सद्यःप्राणहर इत्याह–चित्रेत्यादि। तत्र चित्रभेकः चित्रवर्णो मण्डूकः, कौण्डिन्यकः शकृन्मूत्रविषः कीटभेदः, कृकणः पक्षिभेदः कीटभेदो वा, पञ्चकुष्ठं कुष्ठस्य पारिभाव्यस्य त्वक्पत्रपुष्पफल-मूलानि, शतपदी कर्णजलूका, उच्चिदिङ्गः अलविषः कीटभेदः। उच्चिटिङ्ग इति सुश्रुते। कम्बली कृमिभेदः, शतं शतमूली नामैकदेशग्रहणात्। कन्दः कण्डूरः, इध्मं पलाशसमित्, कृकलासः सरटः। गृहगौलिका पल्ली, अन्धाहिको मत्स्यभेदः, पूतिकीटः कीटभेदः, गोमारिका ओषधिभेदः। भल्लातकः अरुष्कराख्यो वृक्षभेदः, अवल्गुका अवल्गुजा सोमराजी।।

कीट इति। अन्यतमः उक्तेष्वेकतमः, कीटः, तप्तः, शोषयेद् आघ्राणादिनोपयुज्यमानः शोषणं कुर्यात्। अयं केवलस्य गुणः। मिश्रितस्य गुणमाह–कृष्णसर्पप्रियङ्गुभिः कृष्णसर्पेण कङ्गुभिश्च सह, संयोगः संप्राप्तयोगः, एषः तप्त इत्यार्थम्। सद्यःप्राणहरो मतः।

धामार्गवेत्यादि। आर्धमासिकः अर्धमासेन प्राणहरो योग इत्यर्थः। तत्र धामार्गवः कोशातको, यातुधानो राक्षसशब्दवाच्य ओषधिभेदः।

व्याघातकेत्यादि। भल्लातकपुष्पचूर्णयुक्तेन आरग्वधमूलेन सह तप्त: कीट: कश्चित् कीटयोगो भवति। स उपयुज्यमानो मासेनैकेन प्राणहरो भवतीत्यर्थ:। कीटयोगोपयोगमात्रामाह–कलामात्रामित्यादि। कला अल्पोऽश:। पुरुषाणां नराणाम्। द्विगुणं कलाद्वयमात्रम्।

शतकर्दमेत्यादि। तत्र कर्दम: यक्षकर्दम:, करवीर: हयमाराख्य

The powder prepared from (the burnt carcass) citrabheka (multicoloured frog), Kauṇḍinyaka (a kind of venomous insect), Kṛkaṇa (perdix sylvatika), pañcakuṣṭha (the five parts of kuṣṭha = the plant costus specious or arabicus, such as its bark, leaf, flower, fruit and root), and Śatapadī (centipede); or of animals such as uccidinga (crab), kambali (a particular worm) and plants Śatamūli, (Asparagus Racemosus), kanda (a kind of fragrant substance) idhma (timber of palāśa) and Kṛkalāsa (lizard); or of animals such as gṛhagaulika (a small lizard), andhālika (a blind snake or fish), kṛkaṇaka (a kind of partridge), pūtikīṭa (a strinking worm) and gomārika (a kind of medicinal plant) combined with the juice of bhallātaka (Semecarpus anarcadium) and Avalguka (the plant Vianonia Anthelminthica) causes instantaneous death as also the smoke from these combinations.

Any of the insects (mentioned above) may be heated with a black snake and priyangu (panic seed) and reduced to powder. This mixture when burnt causes instantaneous death.

Dhāmārgava (Luffa Foetida) roots and Yātudhāna (a medicinal herb) roots pounded together and mixed with the powder of Bhallātaka (Semecarpus Anarcadium) flower will cause death within hafl-a month.

The roof of vyāghātaka (= āragvadha = carthartocarpus) mixed with bhallātaka (Semecarpus Anarcadium) powder and mixed with the essence of an insect causes (when administered) the death in one month. The quantity of a kalā (one sixteenth of a tola) to men, twice as much to mules and horses and four times as much to elephants and camels (is needed).

The smoke generated by the burning of Śatakardama (ointment or perfumed paste of camphor, agallochum, musk, sandalwood and kakkola) uccidinga (crab), Karavira (nerium odorum), Kaṭutumbi (bitter gourd) and fish together with the chaff of the grains of Madana (dhattura = Datura Alba) and Kodrava (paspalum scrobiculatum) or with the chaff of the seeds of hastikarṇa (castor oil tree) and palāśa (butea frondosa) destroys animal life as far as it is carried off by the wind.

लेन हस्तिकर्णपलाशपलालेन वा प्रवातानुवाते प्रणीतो यावच्चरति तावन्मारयति।

पूतिकीटमत्स्यकटुतुम्बीशतकर्दमेध्मेन्द्रगोपचूर्णं पूतिकीटक्षुद्रारालाहेमविदारीचूर्णं वा वस्तशृङ्गखुरचूर्णयुक्तमन्धीकरो धूम:।

पूतिकरञ्जपत्रहरितालमनःशिलागुञ्जारक्तकार्पासपलालान्यास्फोटकाचगोशकृद्रसपिष्टमन्धीकरो धूमः।

सर्पनिर्मोकं गोश्वपुरीषमन्धाहिकशिरश्चान्धीकरो धूमः।

पारावतप्लवकक्रव्यादानां हस्तिनरवराहाणां च मूत्रपुरीषं कासीसहिङ्गुयवतुषकणतण्डुलाः कार्पासकुटजकोशातकीनां च बीजानि गोमूत्रिकाभाण्डीमूलं निम्बशिग्रुफणिज्जकाक्षीवपीलुकभङ्गः सर्पशफरीचर्म हस्तिनखशृङ्गचूर्णमित्येष धूमो मदनकोद्रवपलालेन हस्तिकर्णपलाशपलालेन वा प्रणीतः प्रत्येकशो यावच्चरति तावन्मारयति।

ओषधिभेदः, कटुतुम्बी इक्ष्वाकुः। मदनो धुस्तूरः, कोद्रवो धान्यभेदः, हस्तिकर्णः कुस्तुम्बुरुः पलाशः कच्चोरम्, पलालम् अफलो धान्यादिकाण्डः। प्रवातानुवाते प्रभूतमारुते अभिमारुते च।

पूतिकीटेत्यादि। तत्र इन्द्रगोपः ज्योतिर्मालो नाम कीटः। क्षुद्रा कण्टकारी, अराला यक्षधूपाख्यो निर्यासः, अत एव प्रयोगात् स्त्रियामप्ययम्। हेम धुस्तूरः, विदारी इक्षुगन्धा। अन्धीकरः अन्धङ्करणः।

पूतिकरञ्जेत्यादि। तत्र पूतिकरञ्जः पूतिकाख्यो वृक्षभेदः, हरितालं नटमण्डनं, मनश्शिला कुनटी नाम धातुभेदः, गुञ्जा कृष्णला। आस्फोटो रक्तार्कः, काचं क्षारमृज्जो लवणभेदः। पिष्टमित्येकवचनं पूतिकरञ्जादिसमुदायविवक्षया, सामान्यविवक्षया च क्लीबत्वम्।

सर्पकञ्चुको गवाश्वशकृद् अन्धाहिकाख्यमत्स्यशिर इति त्रयस्य धूपितस्य धूमोऽन्धङ्करण इत्याह–सर्पनिर्मोकमित्यादि। निर्मोकशब्दस्य नपुंसकत्वमार्षम्।

पारावतादिषट्कमूत्रपुरीषं कासीसादित्रिकं कार्पासादित्रिकबीजानि गोमूत्रिकादिद्विकमूलं निम्बादिपञ्चकभङ्गः सर्पादिद्विकचर्म हस्तिसम्बन्धि नखशृङ्गचूर्णमित्येतेष्वेकैकस्य मदनकोद्रवपलालेन वा हस्तिकर्णपलाशपलालेन वा प्रधूपितस्य धूमः स्वसञ्चारसमकालमेव प्राणिनो मारयतीत्याह–पारावते

The smoke caused by burning the powder of pūtikīṭa (a stinking insect), fish, kaṭutumbi (bitter gourd) Śatakardama (a perfumed paste), idhma (palāśa), and Indragopa (the insect cochineal) or the powder of pūtikīṭa, kṣudrā (= Kaṇṭakārī—a thorny plant) arālā (resin called yakṣadhūpa), hema (dhattūra, Datura Alba) and Vidārī (ikṣugandhā = Hedysarum Gangeticum), mixed with the powder of the hoof and horn of a goat causes blindness.

The smoke caused by burning the leaves of pūtikarañja (guilandina bonducella) haritāla (yellow orpiment), manaśśilā (red arsenic), the seeds of guñjā (arbus precatorius), the chaff and the seeds of red cotton) āsphoṭa (a plant, careya arborea), kāca (a variety of salt) and the dung and urine of a cow, causes blindness.

The smoke caused by the burning skin of a serpent, the dung of the cow and the horse and the head of a snake causes blindness.

The smoke caused by burning the powder of the mixture of the dung

and urine of pigeons, frogs, flesh eating animals, elephants, men and boars, the chaff and powder of barley mixed with kāsīsa (green sulphate of iron), rice, the seeds of cotton, kuṭaja (nerium anti-dysentericum) and kośātaki (luffa pentendra), cow's urine, the root of bhāṇḍī (hydroeotyle asiatica), the powder of nimba (nimba meria), Śigru (hyperanthera morunga), phanijjaka (a kind of tulasi plant), kṣībapīluka (ripe coreya arborea) and bhaṅga (an intoxicating drug prepared from hemp plant), the skin of a snake and fish, and the powder of the nails and tusk of an elephant, all mixed with the chaff of Madana (dhattura = Datura Alba) and Kodrava (paspalum scrobiculatum) or with the chaff of the seeds of hastikarṇa (castor oil plant) and palāśa (butea frondosa) causes instantaneous death wherever the smoke is carried off by wind.

कालीकुष्ठनडशतावरीमूलं सर्पप्रचलाककृकणपञ्चकुष्ठचूर्णं वा धूमः पूर्वकल्पेनार्द्रे शुष्कपलाले वा प्रणीतः सङ्ग्रामावतरणावस्कन्दनसंकुलेषु कृततेजनोदकाक्षिप्रतीकारैः प्रणीतः सर्वप्राणिनां नेत्रघ्नः।

शारिकाकपोतबकबलाकालेण्डमर्काक्षिपीलुकस्नुहिक्षीरपिष्टमन्धीकरणमञ्जनमुदकदूषणं च।

यवकशालिमूलमदनफलजातीपत्रनरमूत्रयोगाः प्लक्षविदारीमूलयुक्तो मूकोदुम्बरमदनकोद्रवक्वाथयुक्तो हस्तिकर्णपलाशक्वाथयुक्तो वा मदनयोगः। शृङ्गिगौतमवृक्षकण्टकारमयूरपदीयोगो गुञ्जालाङ्गलीविषमूलिकेङ्गुदीयोगः करवीराक्षिपीलुकार्कमृगमारणीयोगो मदनको-

त्यादि। तत्र पारावतः कपोतः, प्लवकः पक्षिभेदः, क्रव्यादो गृध्रः। कासीसं धातुभेदः, हिङ्गु रामठं, यवतुषकणतण्डुलं शितशूकसम्बन्धी तुषकणतण्डुलानां समाहारः। कुटजो वृक्षभेदः, कोशातकी अपामार्गः। गोमूत्रिका तृणभेदः, भाण्डी योजनवल्ली। शिग्रुः शोभाञ्जनः, फणिज्जः जम्बीरभेदः, काक्षीवशिग्रुविशेषः, पीलुको वृक्षभेदः।

नेत्रघ्नं धूमयोगमाह–कालीत्यादि। तत्र काली अम्बष्ठा नडः पोटगलः, शतावरी शतमूली। प्रचलाकः मयूरबर्हः। पूर्वकल्पेन 'मदनकोद्रवपलालेन हस्तिकर्णपलाशपलालेन वेति पूर्वम् अभिहितेन प्रकारेण। पूर्वकल्केनेति पाठे अर्थश्चिन्त्यः। आर्द्रशुष्कपलालेन वेति क्वचित् पाठः। कृततेजनोदकाक्षिप्रतीकारैः कृतं स्वचक्षुर्घातपरिहाराय सज्जितं तेजनोदकं स्वबलोपघातप्रतीकारप्रकरणे वक्ष्यमाणं वृक्षविशेषोदकम् अक्षिप्रतीकारश्च अपरश्च तज्जातीयश्चक्षुरुपघातप्रतिविधियैस्तथाभूतैः, अर्थात् प्रणेतृभिः।

शारिकेत्यादि। तत्र शारिका गोराटी, बकः कह्वः बलाका बिसकण्ठिका। अर्कः अर्कपर्णाख्यौषधिः अक्षी वृक्षभेदो विभीतकप्रकारः, स्नुहिः समन्तदुग्धा।

मदनयोगानाह–यवकेत्यादि। तत्र यवकः तोयपर्णिका, शालिः कलमादिः, जाती मालती, योगाः मिश्रणानि। प्लक्षः पिप्पलः। मूकम् आविलं जलम्, उदुम्बरो हेमदुग्धः। मदनयोगः। चित्तविभ्रमकरो योगः। शृङ्गिगौतमेत्यादि। शृङ्गिगौतमं शृङ्ग्याख्यमत्स्यविशेषस्य भेदः, वृक्षः लोध्रः, कण्टकारः शाल्मलिवृक्षः, मयूरपदी ओषधिभेदः। लाङ्गली पृथक्पर्णी,

The smoke caused by the burning of the roots of kālī (tragia involucrata) kuṣṭha (costus), naḍa (a kind of seed) and śatāvari (asperagus recemosus) or the powder of the skin of a snake, the tail of a peacock, kṛkaṇa (a kind of partridge) and pañcakuṣṭha (the five parts of kuṣṭha = the plant costus, such as its bark, leaf, flower, fruit and root) together with the chaff as previously described or with wet or dried chaff destroys the eyes of all animals, whereas the eyes of man who have kept their eyes secure with application of ointment and medicinal water burns on the occasion of the commencement of a battle and the assailing of forts.

The ointment prepared by mixing the excretion of Sārikā (maina), kapota (pigeon), baka (crane) and balākā (a kind of small crane) with the milks of arka (= arkaparṇa—calotropis Gigantea) akṣi (= vibhītaka = Terminalia Bellerica), pīluka (careya arborea) and snuhi (euphorbia) causes blindness and it could poison water.

The mixture of yavaka (a kind of barly), the root of śāli (varieties of rice), madanaphala (Datura Alba), jātipatra (leaf of nutmeg tree) and human urine together with the roots of plakṣa (fig tree) and vidāri (Hedysarum Gangeticum) as well as the essence of the decotion of mūka (contaminated water); udumbara (Ficus Glomerata), madana (Datura Alba) and Kodrava (paspalum Scrobiculatum), or with the decoction of hastikarṇa (castor oil tree) and palāśa (butea frondosa) is termed madanyoga (intoxicant). The mixture of the powders of Śṛṅgī (atis betula) (according to commentator T. Ganapati Śāstri the word is to be spelt as Śṛṅgigautama = a variety of the fish called by that name a sort of silurus or sheat fish), Kaṇṭakāra (Solanum xanthocarpum) and mayūrapadi (a species of plant, celosia cristata) is such a combination (of intoxicants); as also the combination of gunjā (Arbus precatorius) laṅgali (jusseina repens), viṣamūlikā (poisons like kālakūṭa) and ingudī (heart pea); and the combination of Karavīra (oleander), akṣipīluka (Careya arborea), arka plant (calotropis Gigantea) and mṛgamārаṇi (a medicinal plant) mixed with the decoction of madana (Datura Alba) and Kodrava (paspalum scrobiculatum) or with that of hastikarṇa (castor oil tree) and palāśa (butea frondosa)_ is an intoxicant. All of them pollute grass and water and make them poisonous.

-द्रवक्राथयुक्तो हस्तिकर्णपलाशक्राथयुक्तो वा मदनयोगः। समस्ता वा यवसेन्धनोदकदूषणाः।

कृतकण्डलकृकलासगृहगौलिकान्धाहिकधूमो नेत्रवधमुन्मादं च करोति।

कृकलासगृहगौलिकायोगः कुष्ठकरः।

स एव चित्रभेकान्त्रमधुयुक्तः प्रमेहमापादयति; मनुष्यलोहितयुक्तः शोषम्।

दूषीविषं मदनकोद्रवचूर्णमुपजिह्विकायोगः मातृवाहकाञ्जलिकारप्रचलाकभेकाक्षि-पीलुकयोगो विषूचिकाकरः।

पञ्चकुष्ठककौण्डिन्यकराजवृक्षपुष्पमधुयोगो ज्वरकरः।

भासनकुलजिह्वाग्रन्थिकायोगः खरीक्षीरपिष्टो मूकबधिरकरो मासार्धमासिकः। कलामात्रं पुरुषाणामिति समानं पूर्वेण।

विषमूलिका कालकूटादिः, इङ्गुदी कटभी। मृगमारणी औषधिभेदः। उक्ताः सर्व एवैते योगाः यवसेन्धनोदकानि दूषयन्तीत्याह–समस्ता वेत्यादि।

नेत्रघातोन्मादोभयहेतुं धूममाह–कृतकण्डलेत्यादि। कृता पक्का कण्डला रलयोरभेदात् कण्डरा स्नायुसंघातो येषां ते कृतकण्डलाः तथाभूतानां कृकलासगृहगौलिकान्धाहिकानां धूमः अर्थात् कृकलासादिस्नायुसंघाततापनोत्पन्नो धूमः, नेत्रवधम्, उन्मादं चित्तविभ्रमं च, करोति। कृतकण्डलत्यादेरपरा व्याख्या–कृतकण्डलानां मिश्रितकपिकच्छूकानां कृकलासादीनां धूमः इति।

कृकलासेत्यादि। इह योगशब्दो योगजधूमपरः। कुष्ठं कोठम्।

स इत्यादि। स एव कृकलासगृहगौलिकायोग एव। आन्त्रं परीतत्। प्रमेहम् अतिमूत्रस्रावरोगम्। शोषं क्षयम्।

दूषीत्यादि। दूषीविषम् औषधाद्युपहतवीर्यं विषं, मदनकोद्रवचूर्णम्, उपजिह्विकायोगः वम्रीमिश्रणं, मातृवाहकाञ्जलिकारप्रचलाकभेकाक्षिपीलुकयोगः मातृवाहकः पक्षिभेदः अञ्जलिकारः ओषधिभेदः प्रचलाकभेकाक्षिपीलुका व्याख्याताः एषां योगः, विषूचिकाकारः।

पञ्चकुष्ठेत्यादि। तत्र राजवृक्ष आरग्वधः, पुष्पमधुः मधूकः।

भासनकुलेत्यादि। तत्र भासः शकुन्ताख्यः पक्षिविशेषः, जिह्वा

The smoke caused by the burning of the tendon of lizard, small house lizard and blind snake makes one blind as well as mad.

The combination (of the smoke) of kṛkalāsa (lizard) and gṛhagaulikā (small house-lizard) will cause leprosy.

The smoke caused by burning the same mixture together with the entrails of citrabheka (variegated frog) and madhu (honey) causes diabetis; and combined with human blood causes tuber-culosis.

Dūṣīviṣa (poison of enhanced intensity) powders of madana (Datura Alba) and Kodrava (paspalum scrobiculatum) mixed with upajihvikā (small ants), as well as the powders made of mātṛvāhaka (a species of bird-a bat), añjalikāra (a species of medicinal plant), pracalāka (tail of a peacock), bheka (frog) and akṣi pīluka (careya arborea) causes the disease known as visūcikā (cholera).

The combination of pañcakuṣṭha (the five parts of costus), Kauṇḍinyaka (a medicinal plant) rājavṛkṣa (= āragvadha = cassia fistula) mixed with honey will cause jvara (fever).

The mixture prepared from the powder of the knot of the tongue and nakula (mungoose) reduced to a paste with the milk of a she-donkey, causes both dumbness and deafness, within a period of half a month. The dosage like one-sixteenth to men etc; are as noted earlier.

भङ्गक्वाथोपनयनमौषधानां चूर्णं प्राणभृताम्। सर्वेषां वा क्वाथोपनयनम्; एवं वीर्यवत्तरं भवति। इति योगसम्पत्।

शाल्मलीविदारीधान्यसिद्धो मूलवत्सनाभसंयुक्तश्चुचुन्दरीशोणितप्रलेपेन दिग्धो बाणो यं विध्यति, स विद्धोऽन्यान् दश पुरुषान् दशति; ते दष्टा दशान्यान् दशन्ति पुरुषान्।

भल्लातकयातुधानापामार्गबाणानां पुष्पैरेलकाक्षिगुग्गुलुहालाहलानां च कषायं वस्तनरशोणितयुक्तं दंशयोगः। ततोऽर्धधरणिको योगः सक्तुपिण्याकाभ्यामुदके प्रणीतो धनुश्शतायाममुदकाशयं दूषयति; मत्स्यपरम्परा ह्येतेन दष्टाभिमृष्टा वा विषीभवति; यश्चैतदुदकं पिबति स्पृशति वा।

मञ्जिष्ठासंज्ञं भेषजं, ग्रन्थिका पिप्पलीमूलम्, खरीक्षीरपिष्टः गर्दभीदुग्धसम्मिश्रितः, मूकबधिरकरो मासार्धमासिकः मासेनार्धमासेन वा मूकत्वबधिरत्वयोरापादकः। योगानामुपयोक्तव्यपरिमाणं तु 'कलामात्रं पुरुषाणां द्विगुणः खराश्वानां चतुर्गुणं हस्त्युष्ट्राणाम्' इति पूर्वोक्तेन परिमाणेन समानमित्याह–कलामात्रमित्यादि।

उक्तेषु योगेष्वौषधानां यथास्वं भङ्गक्वाथेन साधनं प्राणिनां चूर्णनं च कार्यमित्याह–भङ्गेत्यादि। उभयेषामपि क्वाथोपनयनपक्षमाह–सर्वेषां वेत्यादि। क्वाथसाधितस्य वीर्यातिशयमाह–एवं वीर्यवत्तरमिति। इति योगसम्पदिति। निरूपितेति शेषः।

औषधवीर्यमाह–शाल्मलीत्यादि। तत्र धान्यं कुस्तुम्बुरु। मूलं पिप्पलीमूलं, वत्सनाभो विषभेदः। चुचुन्दरी उग्रविषो मूषिकभेदः। दिग्धो लिप्तः।

अन्यं दंशयोगमाह–भल्लातकेत्यादि। तत्र बाणोऽर्जुनवृक्षः। पुष्पैः, साधितमिति शेषः। एलकः त्वग्गन्धाख्यो वृक्षः। दंशयोग इति। उक्तकषायोपयोगः पूर्ववद् बहुपुरुषदंशनोपायो भवतीत्यर्थः। तस्य वीर्यमाह–ततः इत्यादि। तत उक्तात् कषायात्। अर्धधरणिकः रूप्यमाषकाष्टकप्रमाणः। सक्तुपिण्याकाभ्यां सक्तुना धानाचूर्णेन पिण्याकेन तिलकल्केन च सह। एतेन उक्तदंशयोगदूषितेन। विषीभवति विषतां प्रतिपद्यते।

Medicinal drugs prepared in decoction and animal by the process of making powders are more effective. Or all these should be prepared in decoction to get intensive effect. These are the prescriptions for combination of drugs.

An arrow anointed with the paste of grains of Śālmali (bombax hepta phyllum), vidāri (liquorice) reduced to powder and mixed with the powder of pippali (long pepper) and vatsanābha (strong poison) with the blood

of cucundarī (musk-rat) which pierces whoever, he would bite ten other persons, who in their turn bite others.

The mixture prepared from the flowers of bhallātaka (Semecarpus anacadium), yātudhāna (a medicinal herb), dhāmārgava (Luffa Foetida) and bāṇa (sal tree) mixed with the powder of Elaka (large-cardamum) akṣi (Dalbergiea Oujeinsis), guggulu (bdellium), hālāhala (a kind of poison) together with the blood of a goat and a man causes biting madness. When half of a dharaṇa (= a measure) of this mixture together with flour and oil-cakes is thrown into water of a reservoir measuring a hundred bows in length, it vitiates the whole quantity of water; all the fish swallowing or touching this mixture become poisonous; and whoever drinks or touches this water will be poisoned.

रक्तश्वेतसर्षपैर्गोधा त्रिपक्षमुष्ट्रिकायां भूमौ निखातायां निहिता वध्येनोद्धृता यावत् पश्यति, तावन्मारयति। कृष्णः सर्पो वा।

विद्युत्प्रदग्धोऽङ्गारोऽज्वालो वा विद्युत्प्रदग्धैः काष्ठैर्गृहीतश्चानुवासितः कृत्तिकासु भरणीषु वा रौद्रेण कर्मणाभिहुतोऽग्निः प्रणीतश्च निष्प्रतीकारो दहति।

कर्मारादग्निमाहृत्य क्षौद्रेण जुहुयात् पृथक्।
सुरया शौण्डिकादग्निं भार्ग्यायोग्निं घृतेन च।।
माल्येन चैकपत्न्यग्निं पुंश्चल्यग्निं च सर्षपैः।
दध्ना च सूतिकास्वग्निमाहिताग्निं च तण्डुलैः।।

विषीभवन्तीति बहुवचनान्तपाठे कर्तृपदं बहुवचनान्तं छेत्तव्यम्। यश्चेत्यादि। यो वा एतदुदकं पिबति स च विषीभवतीत्यर्थः।

निहाका नाम जलजन्तुः श्वेतैश्च रक्तैश्च सर्षपैः सह पञ्चचत्वारिंशतं दिवसान् मृद्भाण्डविशेषे भूमौ खात्वा स्थापिता पश्चाद् वध्यपुरुषेणोद्धृता सती यावत् तामुद्धर्ता पश्यति तावत् तं मारयतीत्याह–रक्तश्वेतेत्यादि। कृष्णः सर्पो वेति। सोऽपि रक्तश्वेतसर्षपैः त्रीन् पक्षान् उष्ट्रिकायां भूखातस्थापितायां निहितो वध्येनोद्धृतो यावत् तमुद्धर्ता पश्यति तावन्मारयतीत्यर्थः।

निष्प्रतीकारमाग्नेयं योगमाह–विद्युत्प्रदग्ध इत्यादि। विद्युत्प्रदग्धेन्धनस्थो निर्ज्वालस्तद्वैद्युताग्निर्विद्युत्प्रदग्धैः काष्ठैर्गृहीत्वाभिवर्धितः कृत्तिकायुक्ते भरणीयुक्ते वा काले रुद्रदेवताकेन कर्मणा कृतहोमः परदुर्गादिषु प्रयुक्तोऽशक्यप्रतिक्रियो दाह्यं दहतीत्यर्थः। कर्मानुष्ठानक्रमस्तु सम्प्रदायादवगन्तव्यः।

योगान्तरं श्लोकचतुष्टयेनाह–कर्मारादित्यादिना। कर्माराद् वेणोर्वेण्वन्तरसंघृष्टाद्, अग्निम् आहृत्य, क्षौद्रेण माक्षिकेण, पृथग् जुहुयात्। वक्ष्यमाणाग्निभ्यः पार्थक्येनावस्थापिते तस्मिन् होमं कुर्यात्। पृथगित्युत्तरेष्वपि संबध्यते। शौण्डिकाद् अग्निम् आहृत्य, सुरया मद्येन, जुहुयात्। अयोग्निम् अयश्शब्देनायस्कारलक्षणाद् अयस्कारसकाशादाहृतमग्निमित्यर्थः, भार्ग्या ब्राह्मणयष्टिकाख्ययौषध्या, घृतेन च जुहुयात्। एकपत्न्यग्निं पतिव्रतासकाशादाहृतमग्निं, माल्येन जुहुयात्। पुंश्चल्यग्निं पुंश्चली बन्धकी तदीयमग्निं, सर्षपैः जुहुयात्। सूतिकासु, विद्यमानमाहृतमिति शेषः, अग्निं दध्ना जुहुयात्।

An allegator packed in a sack along with red and white mustard seeds and deposited under the earth dug up for the purpose for a period of forty five days, if made to pull out by a condemned person will cause his death at its sight. The same is the case with a black serpent.

After collecting the timber from a tree struck by lightning having dorment fire with a stick of the same free and lit up on the days of the stars of kṛttika and bharaṇi, with the specific incantations of cruel nature, will surely burn down the target unquenchably.

Collecting the fire from the friction of bamboos one should lit up sacrificial fire and offer an oblation of honey separately. Collecting fire from a vintner one should offer it to sacrificial fire along with liquor. Collecting fire from a blacksmith it should be offered to sacrificial fire along with ghee.

Garland may be offered to sacrificial fire by one who keeps only one wife; mustard should be offered to sacrificial fire collected from a harlot; curd should be offered to sacrificial fire collected from a lady who has just given birth to a child and rice should be offered to the fire lit up by a sacrificer.

चण्डालाग्निं च मांसेन चिताग्निं मानुषेण च।
समस्तान् बस्तवसया मानुषेण ध्रुवेण च।।
जुहुयादग्निमन्त्रेण राजवृक्षकदारुभिः।
एष निष्प्रतिकारोऽग्निर्द्विषतां नेत्रमोहनः।।

अदिते! नमस्ते; अनुमते! नमस्तेः सरस्वति! नमस्ते; देव! सवितर्नमस्ते। अग्नये स्वाहा; सोमाय स्वाहा; भूः स्वाहाः भुवः स्वाहा।

।। इति कौटलीयार्थशास्त्रे औपनिषदिकं चतुर्दशाधिकरणे
प्रथमोऽध्यायः परघातप्रयोगः, आदितः
षट्चत्वारिंशदुत्तरशततमः।।

आहिताग्निम् आहिताग्निसम्बन्धिनमग्निमित्यर्थः, तण्डुलैः, जुहुयात्। चण्डालाग्निं चण्डालादाहृतमग्निं, मांसेन जुहुयात्। चिताग्निं शवचित्याग्निं, मानुषेण जुहुयात्। समस्तान् व्यस्तान् पूर्वोक्तरीत्या पृथक् पृथगभिहुतान् नवविधान् अग्नीन् एकीकृतानित्यर्थः, बस्तबसया मेषवपया, मानुषेण, ध्रुवेण व वटेन च, राजवृक्षकदारुभिः आरग्वधकाष्ठैः, अग्निमन्त्रेण अग्निस्तावकमन्त्रेण सम्प्रदायाधिगन्तव्येन, जुहुयात्। एषोऽग्निः द्विषतां नेत्रमोहनः, एनमग्निं स्वदुर्गादिषु देदीप्यमानं शत्रवो न केवलं प्रतिकर्तुमशक्ताः, किन्तु तद्दर्शनान्मौढ्यमपि प्रतिपद्यन्त इत्यर्थः।

मन्त्रैकदेशं दर्शयति–अदिते! नमस्ते इत्यादि।।

इति कौटलीयार्थशास्त्रव्याख्यायाम् औपनिषदिके चतुर्दशे-
ऽधिकरणे प्रथमोऽध्यायः परघातप्रयोगः,
आदितः षट्चत्वारिंशच्छततमः।।

To the fire from Caṇḍāla the offering should be flesh and that collected from humans, human flesh may be offered (in cremation grounds). An oblation of the serum of the flesh of a goat and a man shall be made by means of appropriate nature to all. With the timber of rājavrkṣa (cassia fistula) one should make sacrificial offerings using the hymn of fire. This fire will unquenchably burn, deluding the eyes of the enemies.

Salutations to Aditi, salutations to Anumati, salutations to Sarasvati and salutations to the Sun, oblations to Agni, oblations to Soma, oblations to Earth and oblations to Atmosphere.

Thus the one hundred and forty sixth chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the first chapter of the fourteenth Adhikaraṇa dealing with the section 'Means to injure an enemy.

Chapter 147

178. प्रक० प्रलम्भने अद्‌भुतोत्पादनम्।

Section 178 : Delusion with Wonderous Contrivances

शिरीषोदुम्बरशमीचूर्णं सर्पिषा संहृत्यार्धमासिकक्षुद्योगः।

कशेरुकोत्पलकन्देक्षुमूलबिसदूर्वाक्षीरघृतमण्डसिद्धो मासिकः।

माषयवकुलत्थदर्भमूलचूर्णं वा क्षीरघृताभ्यां, वल्लीक्षीरघृतं वा समसिद्धं सालपृश्निपर्णीमूलकल्कं पयसा पीत्वा, पयो वा तत्सिद्धं मधुघृताभ्यामशित्वा, मासमुपवसति।

श्वेतबस्तमूत्रे सप्तरात्रोषितैः सिद्धार्थकैः सिद्धं तैलं कटुकालाबौ मासार्धमासस्थितं चतुष्पदद्विपदानां विरूपकरणम्।

तक्रयवभक्षस्य सप्तरात्रादूर्ध्वं श्वेतगर्दभस्य लण्डयवैः सिद्धं गौरसर्षपतैलं विरूपकरणम्।

प्रलम्भनमिति सूत्रम्। औषधमन्त्रप्रयोगद्वारा क्षुत्प्रतीकारविरूपकरणादिना शत्रुवञ्चनमुच्यत इति सूत्रार्थः। अद्भुतोत्पादनं भैषज्यमन्त्रप्रयोगः इति द्विधा विभज्य प्रकरणमिदमध्यायद्वयेन वितन्यते। अद्भुतं पक्षोपवासमासोपवासादिकम्।

तत्र पक्षोपवासानुकूलं योगमाह–शिरीषेत्यादि। शिरीषः कपीतनः, उदुम्बरो जन्तुफलाख्यो वृक्षः, शमी सक्तुफला। संहृत्य संयोज्य।

मासोपवासयोगमाह–कशेरुकेत्यादि। तत्र कशेरुकं वृष्यकन्दम्, उत्पलकन्दः कुवलयकन्दः, बिसं मृणालं, दूर्वा सहस्रवीर्या, मण्डः रसाग्रः।

मासोपवासयोगस्य प्रकारान्तराण्याह–माषयवेत्यादि। माषादिचतुष्टयचूर्णं क्षीरघृताभ्यां मिश्रितं पीत्वेत्येकः प्रकारः, वल्लीक्षीरघृतं समप्रमाणसिद्धं पीत्वेति द्वितीयः, सालपृश्निपर्णीमूलकल्कं पयसा मिश्रं पीत्वेति तृतीयः, पृश्निपर्णीमूलकल्कैः सह क्काथसाधितं क्षीरं मधुघृताभ्यां मिश्रितं पीत्वेति चतुर्थः। तत्र माषो मलदः, यवो दीर्घशूकः, कुलत्थो धान्यभेदः क्कचित् कुलस्थेति पाठः। दर्भः अश्वबालः। वल्ली अजमोदकः। सालः अर्जुनः, पृश्निपर्णी लाङ्गली, कल्कः द्रवाधश्चूर्णम्।

विरूपकरणयोगमाह–श्वेतबस्तमूत्र इत्यादि। सिद्धार्थकैः सर्षपैः। कटुकालाबौ कटुतुम्ब्याम्।

तस्य प्रकारान्तरमाह–तक्रेत्यादि। तक्रयवौ सप्तरात्रं भक्षयितुः पश्चाद् धवलगर्दभस्य विष्ठाभिर्यवैश्च सह पक्वं गौरसर्षपतैलमशितं वैरूप्यकारकं भवतीत्यर्थः।

A dose of the powder of Śirīṣa (mimosa sirīsa), udumbara (Ficus Glomerata) and Śamī (acacia suma) mixed with ghee, renders fasting for half a month easy.

The scum prepared from the mixture of Kaśeruka (a kind of water creeper) utpala (costus), and sugarcane mixed with bisa (water-lily), dūrva (grass), milk and ghee enables a man to fast for a month.

One could fast for a month by drinking the preparation of the powder of māṣa (phraseolus radiatus), yava (barley), kulattha (horse-gram), and darbha-mūla (the root of darbha grass) mixed with milk and ghee; or the milk of vallī (a kind of creeper and ghee mixed in equal proportions; or root of sāla (shorea robusta) and pṛśniparṇī (hedysarum lagopodioides) when drunk with milk; and or a dose of milk mixed with liquor and ghee.

The oil prepared from mustard seeds, previously kept for seven nights in the urine of a white goat, will when used externally after keeping the oil inside a large bitter gourd for a month and a half, alter the colour of both biped and qudruped animals.

The oil extracted from white mustard seeds mixed with the barley corns contained in the dung of a white donkey maintained for more than seven nights on a diet of butter, milk and barley, causes change in colour.

एतयोरन्यतरस्य मूत्रलण्डरससिद्धं सिद्धार्थकतैलमर्कतूलपतङ्गचूर्णप्रतिवापं श्वेतीकरणम्।

श्वेतकुक्कुटाजगरलण्डयोगः श्वेतीकरणम्।

श्वेतबस्तमूत्रे श्वेतसर्षपाः सप्तरात्रोषितास्तक्रमर्कक्षीरमर्कतूलकटुकमत्स्यविलङ्गाश्च। एष पक्षस्थितो योगः श्वेतीकरणम्।

समुद्रमण्डूकीशङ्खसुधाकदलीक्षारतक्रयोगः श्वेतीकरणम्।

कदल्यवल्गुजक्षाररसशुक्ताः सुरायुक्तास्तक्रार्कतूलस्नुहिलवणं धान्याम्लं च पक्षस्थितो योगः श्वेतीकरणम्।

कटुकालाबौ वल्लीगते नगरमर्धमासस्थितं गौरसर्षपपिष्टं रोम्णां श्वेतीकरणम्।

अर्कतूलोऽर्जुने कीटः श्वेता च गृहगौलिका।
एतेन पिष्टेनाभ्यक्ताः केशाः स्युः शङ्खपाण्डराः।।

श्वेतीकरणमाह–एतयोरित्यादि। एतयोः श्वेतबस्तश्वेतगर्दभयोः। अर्कतूलपतङ्गचूर्णप्रतिवापम् अर्कः

धुस्तूर: तूलं ब्रह्मकाष्ठकं पतङ्ग: शालि: एतेषां चूर्णं प्रतिवाप: प्रतिवपन्ति प्रतिसर्जयन्ति प्रतियोजयन्त्यन्येनेनमिति व्युत्पत्त्या प्रतियोजनीयमौषधं यस्य तत् तथाभूतम्।

श्वेतीकरणस्य प्रकारान्तरमाह–श्वेतकुक्कुटेत्यादि। धवलकृकवाकुशयुविष्ठायोग: श्वैत्यकारक इत्यर्थ:।

अन्यं प्रकारमाह–श्वेतबस्तमूत्र इत्यादि। श्वेतच्छागमूत्रे सप्तरात्रवासिता: श्वेतसर्षपा: उदश्विद् धुस्तूरदुग्धम्, अर्कवृक्ष–ब्रह्मकाष्ठक–पटोल–मत्स्य–कृमिघ्नाख्यौषधिभेदाश्चैतेषां योग: पञ्चदशरात्रस्थित: श्वेतीकारक इत्यर्थ:।

प्रकारान्तरमाह–समुद्रमण्डूकीत्यादि। तत्र सुधा मूर्वाख्यौषधि: क्षारो लवणभेद:।

प्रकारान्तरमाह–कदल्यवल्गुजेत्यादि। तत्र अवल्गुज: सोमराजी, क्षारो लवणभेद:, रस: पारद:, शुक्त: पूतिपरुषाम्ल:, कन्दमूलफलाद्यभिषवजद्रव्यं वा। धान्याम्लं काञ्चिकम्।

लोमश्वेतीकरणमाह–कटुकालाबौ कटुतुम्ब्याम्। वल्लीगते तल्लताया अव्यपवृक्ते। नागरं शुण्ठी नगरमिति ह्रस्वादिकमेद तु पठ्यते।

अपरं लोमश्वेतीकरणयोगं श्लोकेनाह–अर्कतूल इत्यादि। अर्जुने

The mustard oil kept in the urine and dung of any of the two when applied causes such white colour as that of the fibre of the arka plant or the dung of a white bird.

The mixture of the dung of a white cock and that of ajagara (boa constrictor) causes white colour.

The combination made from white mustard seeds kept for seven nights in the urine of a white goat mixed with butter-milk, the resin of arka plant, salt and grains are also effective. When applied for a fortnight it causes white colour.

The combination of the powders prepared from sea-frog, conch-shell, sudhā (a kind of creeper), kadalī (the plantain), kṣāra (a kind of salt and curd when applied causes white colour).

The combination of kadalī (plantain) avalguja (= somarāji = a creeper), kṣāra (salt), rasa (mercury) and śukta (oyster-shell); as well as liquor, and the fibre of Arka plant, snuhi (Euphorbia Antiquorum) and salt; as also dhānyāmla (sour-rice-gruel) kept for fifteen days causes white colour.

The paste made from mustard seeds previously kept within a large bitter gourd with ginger covered by the creeper of valli, for half a month makes the hair white.

The paste prepared from Arkatūla (the fibre of calatropis Gigantea), the two Arjuna trees (Kakubha = Terminalia Arjuna and Yavasa = a kind of weed), a particular type of insect and white house-lizard, when applied to the hair it becomes as white as conch-shell.

गोमयेन तिन्दुकारिष्टकल्केन वा मर्दिताङ्गस्य भल्लातकरसानुलिप्तस्य मासिकः कुष्ठयोगः।

कृष्णसर्पमुखे गृहगौलिकामुखे वा सप्तरात्रोषिता गुञ्जाः कुष्ठयोगः।

शुकपित्ताण्डरसाभ्यङ्गः कुष्ठयोगः।

कुष्ठस्य प्रियालकल्ककषायः प्रतीकारः।

कुक्कुटीकोशातकीशतावरीमूलयुक्तमाहारयमाणो मासेन गौरो भवति।

वटकषायस्नातः सहचरकल्कदिग्धः कृष्णो भवति।

शकुनकङ्गुतैलयुक्ता हरितालमनशिशलाः श्यामीकरणम्।

खद्योतचूर्णं सर्षपतैलयुक्तं रात्रौ ज्वलति।

ककुभवृक्षो यवसं चेत्यर्जुनद्वयम्। कीटः इह विशेषग्रहणं सम्प्रदायादवगन्तव्यम्। एतेन अर्कतूलादि-समुदायेन।

कुष्ठरोगोत्पादहेतुं योगमाह–गोमयेनेत्यादि। तत्र तिन्दुकः कालस्कन्धः, अरिष्टो निम्बः।

कुष्ठयोगस्य प्रकारान्तरमाह–कृष्णसर्पमुख इत्यादि।

प्रकारान्तरमाह–शुकेत्यादि। शुकपित्ताण्डरसाभ्यङ्गः शुकस्य मायुना अण्डरसेन चाङ्गानुलेपनम्।

कुष्ठस्य प्रतीकारमाह–कुष्ठस्येत्यादि। प्रियालकल्ककपायः प्रियालस्य राजादनाख्यस्य वृक्षस्य कल्केन कषायः।

गौरत्वापादकं योगमाह–कुक्कुटीत्यादि। तत्र कोशातकी पटोली, शतावरी शतमूली।

कृष्णयोगमाह–वटकषायस्नात इत्यादि। सहचरकल्कदिग्धः सहचरस्य अव्यथापरनाम्नः कुरवकस्य कल्केन स्नातः।

तस्य प्रकारान्तरमाह–शकुनेत्यादि। तत्र शकुनो गृध्रः, कङ्गुः प्रियङ्गुः। हरितालो नटमण्डनं, मनश्शिला कुनटी।

योगविशेषमाह–खद्योतेत्यादि। खद्योतो ज्योतिरिङ्गणः तस्य चूर्णं खद्योतचूर्णम्।

When any part of the body of a man is rubbed over with the paste prepared from tinduka (glutinoṣa) and ariṣṭa (soapberry), together with the dung of a cow, and also smeared over with the juice of bhallātaka (semecarpus anacardium), he will be afflicted with the disease of leprosy in the course of a month.

Paste of guñja (arbus precatorius) seeds kept for seven nights in the mouth of a black serpent or of a house-lizard, if applied brings on leprosy.

External application of the liquid essence of the egg of a parrot and a cuckoo brings on leprosy.

The decoction prepared from priyāla (chironjia sapida) is a remedy for leprosy.

Whoever eats the mixture of the powders of the roots of kukkuṭa (marsila dentata), Kośātakī (duffa pentandra) and śatāvari (asperagus) racemosus) for a month will become white.

He who bathes in the decoction of vaṭa (banyan tree) and rubs his body with the paste prepared from sahacara (yellow barleria) becomes black.

Salphuret of arsenic and red-arsenic mixed with the oil extracted from śakuna (a vulture like bird) and kaṅgu (Panicum Italicum) causes blackness.

The powder of khadyota (fire-fly) mixed with the oil of mustard oil emits light at night.

खद्योतगण्डूपदचूर्णं समुद्रजन्तूनां भृङ्गकपालानां खदिरकर्णिकाराणां पुष्पचूर्णं वा शकुनकङ्गुतैलयुक्तं तेजनचूर्णम् पारिभद्रकत्वङ्मषी मण्डूकवसया युक्ता गात्रप्रज्वालन-मग्निना।

पारिभद्रकत्वग्वज्रकदलीतिलकल्कप्रदिग्धं शरीरमग्निना ज्वलति।

पीलुत्वङ्मषीमयः पिण्डो हस्ते ज्वलति। मण्डूकवसादिग्धोऽग्निना ज्वलति।

तेन प्रदिग्धमङ्गं कुशाम्रफलतैलसिक्तं समुद्रमण्डूकीफेनकसर्जरसचूर्णयुक्तं वा ज्वलति।

मण्डूकवसासिद्धेन पयसा कुलीरादीनां वसया समभागं तैलं

शरीरे तदबाधेनाग्नेः प्रज्वलनानुकूलान् योगानाह–खद्योतेत्यादि। खद्योतगण्डूपदचूर्णं ज्योतिरिङ्गण-किञ्चुलुकयोश्चूर्णं, समुद्रजन्तूनाम् इह विशेषग्रहणं सम्प्रदायाद् विज्ञेयम्। भृङ्गकपालानां भृङ्गः कलिङ्गाख्यः पक्षी कपालाः शिरोस्थीनि तेषां चूर्णमित्यार्थम्। खदिरकर्णिकाराणां खदिराणां दन्तधावनाख्यानां वृक्षाणां कर्णिकाराणां वृक्षोत्पलानां च, पुष्पचूर्णं वा, शकुनकङ्गुतैलयुक्तं गृध्रप्रियङ्गुतैलयुक्तं, तेजनचूर्णं वेणुचूर्णम् अर्थात् तथाभूतं, पारिभद्रकत्वङ्मषी निम्बत्वङ्मषी, मण्डूकवसया युक्ता। एतेष्वेकैकमिति शेषः। अग्निना गात्रप्रज्वालनम् एतेष्वेकैकं गात्रेऽनुलिप्तं गात्रस्य पीडां विनैवाग्निप्रज्वलनसाधनमित्यर्थः।

पारिभद्रेत्यादि। तत्र वज्रं श्रीबेरम्।

पील्वित्यादि। पिण्डः बोलाख्यं भेषजम्। हस्ते ज्वलति विनाप्यग्नियोगमित्यर्थः प्रतीयते, उत्तरवाक्ये मण्डूकवसादिग्धस्य पिण्डस्याग्निना ज्वलनवचनात्।

तेन प्रदिग्धमित्यादि। तेन पिण्डेन। कुशाम्रफलतैलसिक्तं कुशतैलाम्रफलतैलाभ्यां सिक्तम्। समुद्रमण्डूकीफेनकसर्जरसचूर्णयुक्तं वा समुद्रमण्डूकीसमुद्रफेनकयक्षधूपचूर्णैर्युक्तं वा।

मण्डूकेत्यादि। मण्डूकवसासिद्धेन मण्डूकवसया सह पक्वेन, पयसा क्षीरेण, मिश्रमिति शेषः, कुलीरादीनां वसया, इहापि मिश्रमिति शेषः, समभागं

The powder of Khadyota (fire-fly) and gaṇḍūpada (earth-worm) or the powder of the ocean animals mixed with the powder of bhṛṅga (big black bee), kapāla (a pot-like) and khadira (mimosa catechu) and karṇikāra (pentapetes acerifolia) combined with the oil made from śakuna (vulture) and kaṅgu (priyaṅgu = Panicum Italicum) will cause effulgence, and added with the powder of the charcoal of the bark of pāribhadraka (erythrina Indica) mixed with the serum of the flesh of maṇḍūka (a frog) it can be burnt with fire when the body of a man is rubbed over with it (and without causing hurt).

The body painted with the paste prepared from the bark of pāribhadraka (erythrina Indica) vajra (= Śrībera = Andropogon Muricatus), Kadali (plantain) and tila (Sesamum) burns without being hurt.

The ball prepared from the powder of the charcoal of the bark of pīlu (Careya arborea) can be held in hand and burnt with fire. So also is the case of the body which could be burnt (without hurt) provided it is painted with the serum of the flesh of a frog.

So also is the body of a man is smeared over with the above serum as well as with the oil extracted from the fruits of Kuśa (ficus religiosa) and āmra (mango tree), and when the powder prepared from an ocean frog (samudra-maṇḍūkī), phenaka (sea-foam = bone of the cuttle-fish) and sarja rasa (the juice of vatica robusta) is sprinkled over the body, it burns (without getting hurt).

When the body of a man is smeared with sesamum oil and milk mixed with equal quantities of the serum of the flesh of a frog, crab and other animals, it burns with fire (without getting hurt). Similarly, the body which is smeared over with the sesum of the flesh of a frog burns with fire (unhurt).

सिद्धमभ्यङ्गो गात्राणामग्निप्रज्वालनम्। मण्डूकवसादिग्धोऽग्निना ज्वलति।

वेणुमूलशैवललिप्तमङ्गं मण्डूकवसादग्धमग्निना ज्वलति।

पारिभद्रकप्रतिबलावञ्जुलवज्रकदलीमूलकल्केन मण्डूकवसादिग्धेन तैलेनाभ्यक्तापादोऽङ्गारेषु गच्छति।

उपोदका प्रतिबला वञ्जुलः पारिभद्रकः।
एतेषां मूलकल्केन मण्डूकवसया सह।।
साधयेत् तैलमेतेन पादावभ्यज्य निर्मलौ।
अङ्गारराशौ विचरेद् यथा कुसुमसञ्चये।।

हंसक्रौञ्चमयूराणाम् अन्येषां वा महाशकुनीनाम् उदकप्लवानां पुच्छेषु बद्धा नलदीपिका रात्रावुल्कादर्शनम्।

वैद्युतं भस्माग्निशमनम्।

स्त्रीपुष्पपायिता माषा व्रजकुलीमूलं मण्डूकवसामिश्रं, चुल्ल्यां दीप्तायामपाचनम्। चुल्लीशोधनं प्रतीकारः।

पयोवसातुल्यप्रमाणं, तैलं, सिद्धम्, अभ्यङ्गः अभ्यज्यमानमित्यर्थः, गात्राणाम् अग्निप्रज्वालनम्। मण्डूकवसादिग्धः अर्धादुक्ततैलाभ्यक्तः, अग्निना ज्वलति।

वेणुमूलेत्यादि। तत्र शैवलं जलनीली।

पारिभद्रकेत्यादि। तत्र प्रतिबला ओषधिभेदः।

अङ्गारराशिपादचारयोगं श्लोकाभ्यामाह–उपोदकेत्यादि। उपोदका सुताह्व ओषधिभेदः। अपोदकेति मत्स्यकालीनाम्ना काचिदोषधिरपरा क्षीरस्वामिनोक्ता।

उल्काप्रदर्शनमाह–हंसेत्यादि। उदकप्लवानां जले प्लवमानानां कारण्डवादीनाम्। नलदीपिका नलस्तृणविशेषस्तत्र योजिता दीपिका। उल्कादर्शनं रक्षःपिशाचादिभावितमलातमुल्का तद्दर्शनमिव नलदीपिकाया दूराद् दर्शनं नराणां भीतिं जनयतीत्यर्थः।

वैद्युतमिति। विद्युद्दग्धकाष्ठजं, भस्म, अग्निप्रशमनम्।

स्त्रीपुष्पपायिता इति। स्त्रीरजोवासिताः, माषाः मण्डूकवसामिश्रं, व्रजकुलीमूलं गोष्ठोत्पन्नाया हिङ्गुद्याः मूलं च, चुल्ल्यां दीप्तायां प्रज्वलन्त्यामपि।

The body of a man which is rubbed over with the powder of the root of bamboo (veṇu) and saivāla (aquatic plant) and smeared over with the sesum of the flesh of a frog, burns with fire (without hurting).

Whoever has anointed his legs with the oil extracted from the paste prepared from the roots of pāribhadraka (erythrina indica), pratibalā (a medicinal plant), vañjula (a kind of ratan), vajra (Andropogon muricatum) and kadali (plantain) mixed with the sesum of the flesh of a frog, can walk over fire (without getting burnt).

Oil should be extracted from the paste prepared from the roots of Upodaka (Basella Cordifolia), Pratibala (a medicinal plant), vañjula (ratan) and pārībhadraka (erythrina indica) mixed with the sesum of the flesh of a frog, and it be anointed on the feet of a man, which will enable him to walk-over a white-hot mass of fire as though on a bed of roses.

When birds such as hamsa (swan), krauñca (heron), mayūra (peacock) and other large swimming birds are let to fly at night with a burning reed attached to their tail it gives the appearance of a fire-brand (ulka) falling from the sky.

Ashes caused by lightning could quench the fire. Māṣa (Phaseolus Radiatus) wetted with the menstrual fluid of a woman, root of vrajakulī (hiṅgudī = Solanum Melongena or Asafoetida nurtured in a cattle-shed) mixed with the serum of the flesh of a frog when placed in a fire-place, no grains can be cooked despite a blazing fire. Cleansing the fire-place is the only remedy.

पीलुमयो मणिरग्निगर्भः सुवर्चलामूलग्रन्थिः सूत्रग्रन्थिर्वा पिचुपरिवेष्टितो मुखादग्निधूमोत्सर्गः।

कुशाम्रफलतैलसिक्तोऽग्निर्वर्षप्रवातेषु ज्वलति।

समुद्रफेनकस्तैलयुक्तोऽम्भसि प्लवमानो ज्वलति।

प्लवङ्गमानामस्थिषु कल्माषवेणुना निर्मथितोऽग्निर्नोदकेन शाम्यति, उदकेन च ज्वलति।

शस्त्रहतस्य शूलप्रोतस्य वा पुरुषस्य वामपार्श्वपर्शुकास्थिषु कल्माषवेणुना निर्मथितोऽग्निः, स्त्रियाः पुरुषस्य वास्थिषु मनुष्यपर्शुकया निर्मथितोऽग्निर्यत्र त्रिरपसव्यं गच्छति, न चात्रान्योऽग्निर्ज्वलति।

चुचुन्दरी खञ्जरीटः खारकीटश्च पिष्यते।
अश्वमूत्रेण संसृष्टा निगलानां तु भञ्जनम्।।

अयस्कान्तो वा पाषाणः।

चुल्ल्याम्, अपाचनं पाचनहीनं भवति, ते च तच्च पाकं न प्राप्नुवन्तीत्यर्थः। चुल्लीशोधनमिति। चुल्ल्या अवतार्य तेषां शुचीकरणं, प्रतीकारः।

पील्वित्यादि। पीलुमयो मणिः पीलुदारुनिर्मितम् अलिञ्जरम्, अग्निगर्भः अन्तर्गताग्निः, सुवर्चलामूलग्रन्थिः क्षुमामूलग्रन्थिः, सूत्रग्रन्थिर्वा क्षुमासूत्रग्रन्थिर्वा, पिचुपरिवेष्टितः निरस्थितूलवेष्टितः, मुखाद्, अग्निधूमोत्सर्गः अग्न्युत्सर्गस्य धूमोत्सर्गस्य च साधनमित्यर्थः।

कुशाम्रेत्यादि। वर्षप्रवातेषु वृष्टिषु महावातेषु च। ज्वलति न निर्वाति।

समुद्रफेनक इत्यादि। स्पष्टार्थम्।

प्लवेत्यादि। प्लवङ्गमानां मर्कटानाम्।

शस्त्रहतस्येत्यादि। शूलप्रोतस्य शूलप्रवेशितदेहस्य। वामपार्श्वपर्शुकास्थिषु वामपार्श्वगतेषु पर्शुकाशब्दवाच्येषु अस्थिषु। यत्र प्रदेशे।

निगलभञ्जनयोगं श्लोकेनाह–चुचुन्दरीत्यादि। खञ्जरीटः खञ्जनः। खारकीटः ऊषभूमिजः कीटः। पिष्यते प्रत्येकम्। संसृष्टाः पिष्टाश्चुचुन्दर्यादय एकीकृताः। भञ्जनं भञ्जनसाधनम्।

अयस्कान्तो वा पाषाण इति। निगलानां भञ्जनमिति वर्तते।

When the oil extracted from the fruits of kuśa (ficus religiosa) and āmra (mango) is poured over the fire it blazes even in rain and storm.

Sea-foam (the bone of the cuttle-fish so light as it floats) wetted with oil and ignited keeps burning when floating on water.

The fire generated by churning the bone of a monkey by means of a speckled bamboo stick burns in water instead of being quenched.

Where the fire generated by churning by means of a speckled bamboo stick with the left side rub-bone of a man killed by weapon or by a trident, or the fire generated by churning the bone of a man or woman by means of the bone of another is circumambulated thrice from right to left, no other fire will burn.

Cucundarī (musk rat), khañjarīṭa (the small bird called wagtail) and khārakīṭa (a type of earthern-worm) are pounded together and made into a paste is capable of breaking the iron chain.

Or this could be achieved by the stone called ayaskānta (the load-stone).

कुलीराण्डदर्दुरखारकीटवसाप्रदेहेन द्विगुणो दारकगर्भः कङ्कभासपार्श्वोत्पलोदकपिष्टश्चतुष्पदद्विपदानां पादलेपः; उलूकगृध्रवसाभ्यामुष्ट्रचर्मोपानहावभ्यज्य वटपत्रैः प्रतिच्छाद्य पञ्चाशद्योजनान्यश्रान्तो गच्छति। श्येनकङ्ककाकगृध्रहंसक्रौञ्चवीचिरल्लानां मज्जानो रेतांसि वा सार्ववर्णिकानि गर्भपतनान्युष्ट्रिकायामभिषूय श्मशाने प्रेतशिशून् वा तत्समुत्थितं मेदो योजनशताय।।

अनिष्टैरद्भुतोत्पातैः परस्योद्वेगमाचरेत्।
आराज्यायेति निर्वादः समानः कोप उच्यते।।

इति कौटलीयार्थशास्त्रे औपनिषदिके चतुर्दशाधिकरणे
द्वितीयोऽध्यायः प्रलम्भने अद्भुतोत्पादनम्,
आदितः सप्तचत्वारिंशच्छततमः।।

अयोमणयो हि बहुप्रकाराः, कश्चिद्यश्चुम्बति कश्चिदयो भ्रामयति कश्चिदयो भनक्ति। तत्र भञ्जकोऽयस्कान्तविशेष इह ग्राह्यः, आयस्कान्त इति दीर्घादिः क्वचित् पठ्यते।

पञ्चाशद्योजनाश्रान्तगमनयोगमाह–कुलीराण्डेत्यादि। द्विगुणो घनतां प्रतिपन्नः। दारकगर्भः सूकरगर्भः। कङ्केत्यादिपदे उत्पलो मत्स्यभेदः। पादलेपः पादलेपनसाधनम्। उष्ट्रचर्मोपानहौ उष्ट्रचर्ममय्यौ पादरक्षिण्यौ। योजनशतगमनयोगमाह–श्येनकङ्केत्यादि। तत्र वीचिरल्लः तरङ्गाकारकम्बलरेखाङ्कः प्राणीति व्याख्येयम्। क्वचित् चिरल्लानामिति पठ्यते। तत्र रेफस्य लेखकप्रमादकृतत्वे चिल्ल आतायी नाम पक्षीति व्याख्येयम्। मज्जानो वसाः। योजनशताय योजनशतगमनाय। कल्पन्त इति शेषः। प्रकारान्तरमाह–सिंहव्याघ्रेत्यादि। सार्ववर्णिकानि ब्राह्मणादिसर्ववर्णभवानि। गर्भपतनानि पतितान् गर्भान्। उष्ट्रिकायां मृद्भाण्डविशेषे। अभिषूय अभिषवविधिना सारं गृहीत्वा। प्रेतशिशून् वा अभिषूयेति सम्बध्यते। मेदः पलतेजः।।

श्लोकेनाध्यायमुपसंहरति–अनिष्टैरिति। इति उक्तप्रकारैः, अद्भुतोत्पातैः आश्चर्यकरैरुपप्लवैः, परस्य

शत्रोः, उद्वेगं भयम्, आराज्याय तद् राजत्वाय, आचरेद् उत्पादयेत्। स चायं डिम्बप्रवर्तनलक्षणो व्यापारः कलङ्कहेतुभूतोऽपि किमर्थमुपदिश्यत इत्याह–निर्वाद इति। निर्वादः कलङ्कः लक्षणया तद्धेतुभूतो डिम्बप्रवर्तनलक्षणो व्यापारः, कोपे सति समानः विजिगीषुपरयोस्तुल्यः अन्योन्यमुद्दिश्यानुष्ठानविषयः, रागवशादेकस्य डिम्बप्रवृत्तावन्यस्यापि तत्प्रतिविधित्सोः सा भवत्येवावर्जनीयेत्यभिप्रायः। अत एव उच्यते व्युत्पाद्यते।।

इति कौटलीयार्थशास्त्रव्याख्यायाम् औपनिषदिके चतुर्दशेऽधिकरणे
द्वितीयोऽध्यायः प्रलम्भनेऽद्भुतोत्पादनम्
आदितः सप्तचत्वारिंशच्छततमः।।

Kulīrāṇḍa (egg of a crab), dardura (frog) khārakīṭa (small bird called wagtail), heavy foetus of a pig swollen with marrow, kaṅka (vulture), bhāsa (a bird) and utpala (a variety of fish)—all of which are pound to together and mixed with water to form a paste is a good pādalepa, unguent for the feet—for all quadrupeds and bipeds; while the shoes made up of the skin of a camel smeared over with the serum of the flesh of an owl and vulture and covered over with the bares of the banyan tree is a protection for the human feet to walk fifty yojanas without any fatigue. With the shoes smeared over with the pith, marrow or sperms of the birds śyena (vulture), kaṅka (a bird of the class of vulture), kāka (crow), gṛdhra (a female vulture), haṃsa (swan), krauñca (heron) and vīciralla (a bird with wave-like lines on the body), one could traverse a distance of hundred yojanas without getting fatigued. With the shoes smeared over with the marrow and sperm of simha (lion), vyāghra (tiger), dvīpi (leopard), kāka (crow) and ulūka (owl) or the foetus of all the caste (of human) a women fallen due to miscarriage collected in a mud pot from which the essence is drawn, or marrow from oil dead infants from a burial ground, may be made into a paste (for application on the feet) will enable one to traverse a hundred yojanas.

The feeling of terror should be instilled in the enemy by exhibiting such and other wonderful and delusive performances and it is necessary for the king to do so; it is common knowledge that anger is undoubtedly equal to both (the conqueror and the enemy).

Thus the one hundred and forty seventh chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the second chapter of the fourteenth Adhikaraṇa dealing with 'Delusion with wonderful contrivances'.

Chapter 148

178. प्रक० प्रलम्भने भैषज्यमन्त्रप्रयोगः

Section 178 : (Continued) Delusion with Medicines and Mantras

मार्जारोष्ट्रवृकवराहश्वाविद्वागुलीनप्तृकाकोलूकानाम् अन्येषां वा निशाचराणां सत्त्वानामेकस्य द्वयोर्बहूनां वा दक्षिणानि वामानि वाक्षीणि गृहीत्वा द्विधा चूर्णं कारयेत्। ततो दक्षिणं वामेन वामं दक्षिणेन समभ्यज्य रात्रौ तमसि च पश्यति।

एकाम्लकं वराहाक्षि खद्योतः कालशारिबा।
एतेनाभ्यक्तनयनो रात्रौ रूपाणि पश्यति।।

त्रिरात्रोपोषितः पुष्ये शस्त्रहतस्य शूलप्रोतस्य वा पुंसः शिरःकपाले मृत्तिकायां यवानावास्याविक्षीरेण सेचयेत्; ततो यवविरूढमालामाबध्य नष्टच्छायारूपश्चरति।

त्रिरात्रोपोषितः पुष्येण श्वमार्जारोलूकवागुलीनां दक्षिणानि वामानि चाक्षीणि द्विधा चूर्णं कारयेत्। ततो यथास्वमभ्यक्ताक्षो नष्टच्छायारूपश्चरति।

त्रिरात्रोपोषितः पुष्येण पुरुषघातिनः काण्डकस्य शलाकाम्

भैषज्यं तावदाह–माजरित्यादि। तत्र मार्जारः पृषदंशकः, वृकः ईहामृगः, श्वावित् शललः, वागुली पक्षिभेदः, नप्ता विष्किरः, उलूको दिवाभीतः। अन्येषां वाग्गुदादीनाम्। द्विधा पार्थक्येन। तत इत्यादि। दक्षिणम् अवामं स्वचक्षुः। वामेन मार्जारादिवामाक्षिचूर्णेन। समभ्यज्य सम्यगनुलिप्य।

तमसि रूपदर्शनयोगस्य प्रकारान्तरमाह–एकाम्लकमित्यादि। तत्र अम्लकं लकुचम्। कालशारिबा कृष्णवर्णा भद्रा नामौषधिः।।

अन्तर्धानयोगमाह–त्रिरात्रोपोषित इत्यादि। पुष्ये सिध्यनक्षत्रयुक्ते काले। आवास्य उप्त्वा। नष्टच्छायारूपः परैरदृष्टा छाया रूपं च यस्य स तथाभूतः।

तस्यान्यं प्रकारमाह–त्रिरात्रोपोषितः पुष्येण श्वमाजरित्यादि। यथास्वं यथायथं दक्षिणचूर्णेन दक्षिणस्य स्वचक्षुषोऽभ्यञ्जनं वामचूर्णेन वामस्येति क्रमेणेत्यर्थः।

तृतीयं प्रकारमाह–त्रिरात्रोपोषितः पुष्येण पुरुषघातिन इत्यादि। काण्डकस्य बाणस्य तल्लोहेनेत्यर्थः। शलाकाम् अञ्जनशलाकाम्।

Having pulled out both the right and the left eye-balls of a mārjāra (cat), uṣṭra (camel) vṛka (wolf), varāha (boar), śvāvit (=śalala=porcupine), vāgulī (a land of bird), naptā (a species of bird, a domestic fowl), Kāka (crow) and ulūka (owl) or of any one, two or three, or many such animals as roam at night's, one should reduce them to two kinds of powder (either of the left eye-ball or the right eye-ball). By anointing the right eye with the power of the left eye-ball or left eye with the right eye-ball one could see in the pitch dark at night.

On the eye anointed with the power of boar apply the paste of Amlaka (Anto carpus Lakuca) and on the eye anointed with the power of khadyota (fire fly) apply Kākaśāriba (the blade variety of Śāriba plant (Hemidesmus Indicus) reduced to a paste, then one will be able to see the things at night clearly.

Having fasted for three nights one should, on the day of the star puṣya, procure the skull of a man who has been killed by weapons or by putting on a trident to death; and having filled the skull with soil and sown with barley seeds irrigate them with the milk of goats and sheep and once the seeds are grown correct the sprouts and make a garland of the barley crop, wear it and walk about being invisible to others.

अञ्जनीं च कारयेत्; ततोऽन्यतमेनाक्षिचूर्णेनाभ्यक्ताक्षो नष्टच्छायारूपश्चरति।

त्रिरात्रोपोषितः पुष्येण कालायसीम् आञ्जनीं शलाकां च कारयेत्; ततो निशाचराणां सत्त्वानामन्यतमस्य शिरःकपालमञ्जनेन पूरयित्वा मृतायाः स्त्रिया योनौ प्रवेश्य दाहयेत्; तदञ्जनं पुष्येणोद्धृत्य तस्यामञ्जन्यां निदध्यात्। तेनाभ्यक्ताक्षो नष्टच्छायारूपश्चरति।

यत्र ब्राह्मणमाहिताग्निं दग्धं दह्यमानं वा पश्येत्, तत्र त्रिरात्रोपोषितः पुष्येण स्वयंमृतस्य वाससा प्रसेवं कृत्वा चिताभस्मना पूरयित्वा तमाबध्य नष्टच्छायारूपश्चरति।

ब्राह्मणस्य प्रेतकार्ये या गौः मार्यते, तस्या अस्थिमज्जाचूर्णपूर्णाहिभस्त्रा पशूनामन्तर्धानम्।

सर्पदष्टस्य भस्मना पूर्णा प्रचलाकभस्त्रा मृगाणामन्तर्धानम्।

उलूकवागुलीपुच्छपुरीषजान्वस्थिचूर्णपूर्णाहिभस्त्रा पक्षिणामन्तर्धानम्।

इत्यष्टावन्तर्धानयोगाः।

अञ्जनीम् अञ्जनोत्पादपात्रीम्। अन्यतमेन अक्षिचूर्णेन श्वमार्जाराद्यन्यतमचक्षुश्चूर्णेन।

चतुर्थं प्रकारमाह–त्रिरात्रोपोषित: पुष्येण कालायसीमित्यादि कालायसीं कालायसमयीम्। निशाचराणां श्वमार्जारादीनाम्। तस्यामञ्जन्यां कालायस्यां पूर्वोक्तायाम्।

पञ्चमं प्रकारमाह–यत्र ब्राह्मणमित्यादि। प्रसेवं स्यूतं वस्त्रकोशमित्यर्थ:। तम् आबध्य प्रसेवं स्वदेहसंबद्धं कृत्वा।

लोमवल्लाङ्गूलानां चतुष्पदानामन्तर्धानयोगं षष्ठमाह–ब्राह्मणस्येत्यादि। अस्थिमज्जाचूर्णपूर्णा अस्थ्नो मज्जायाश्च चूर्णेन पूर्णा। अहिभस्त्रा सर्पचर्म।

चतुष्पदसामान्यम्यान्तर्धानयोगं सप्तमं–सर्पेत्यादि।

पक्ष्यन्तर्धानयोगमष्टममाह–उलूकेत्यादि। उलूकवागुल्योर्यत् पुच्छादिचतुष्टयं तस्य चूर्णै: पूर्णा।

इत्यष्टावित्यादि।

Having fasted for three nights one should, on the day of the star of Puṣya prepare a śalākā (pencil for applying collyrium on the eye) out of the iron spike used to kill an offender, as also a bowl of collyrium to which one of the powder mentioned above may be mixed and applied to one's eye and one will be able to move invisibly.

Having fasted for three nights, one should, on the day of the star of Puṣya, make a bowl of collyrium and a needle with black iron; then having filled up with collyrium in a skull of any one of the animals roaming at night, it should be put into the womb of a dead lady, one should burn it; taking out that ointment (collyrium) one should put into the bowl. One who anoints one's eyes with it could move about invisible.

One who sees a Brahmin who has kept sacrificial fire burnt or being cremated, there on the spot, one should fast for three nights and on the day on which the star Puṣya occurs, one should make a bag out of the cloth of a man who is dead from natural causes and collect the ashes of the dead man into it and carrying it one may move about invisibly.

The slough of a snake filled with the ashes of bones and marrow of the cow killed in connection with the cremation of a Brahmin, can when put on the back of cattle render them invisible.

The slough of Pracalāka (a species of venomous reptile) filled with ashes of a man killed by snake-bite, if carried, renders beasts invisible.

A bag formed by the slough of a snake filled with the powder of the bone of the knee-joint mixed with that of the tail and excreta of an owl and vāgulī (a kind of bird) can render birds invisible (if applied on them).

These are the eight kinds of contrivances causing invisibility.

बलिं वैरोचनं वन्दे शतमायं च शम्बरम्।
भण्डीरपाकं नरकं निकुम्भं कुम्भमेव च।।

देवलं नारदं वन्दे वन्दे सावर्णिगालवम्।
एतेषामनुयोगेन कृतं ते स्वापनं महत्।।
यथा स्वपन्त्यजगराः स्वपन्त्यपि चमूखलाः।
तथा स्वपन्तु पुरुषा ये च ग्रामे कुतूहलाः।।
भण्डकानां सहस्रेण रथनेमिशतेन च।
इमं गृहं प्रवेक्ष्यामि तूष्णीमासन्तु भाण्डकाः।।
नमस्कृत्वा च मनवे बद्ध्वा शुनकफेलकाः।
ये देवा देवलोकेषु मानुषेषु च ब्राह्मणाः।।
अध्ययनपारगाः सिद्धाः ये च कैलासतापसाः।
एते च सर्वसिद्धेभ्यः कृतं ते स्वापनं महत्।।
अतिगच्छति च मय्यपगच्छन्तु संहताः।
अलिते वलिते मनवे स्वाहा।।

एतस्य प्रयोगः—त्रिरात्रोपोषितः कृष्णचतुर्दश्यां पुष्ययोगिन्यां श्वपाकीहस्ताद् बिलखावलेखनं क्रीणीयात्। तन्माषैः सह कण्डोलिकायां कृत्वा असङ्कीर्ण आदहने निखानयेत्। द्वितीयस्यां चतुर्दश्यामुद्धृत्य कुमार्या पेषयित्वा गुलिकाः कारयेत्। तत एकां गुलिकामभिमन्त्रयित्वा यत्रैतेन मन्त्रेण क्षिपति, तत् सर्वं प्रस्वापयति।

अथ चतुरः प्रस्वापनयोगान् वक्ष्यति। तत्राद्ययोर्द्वयोः साधारणं मन्त्रमाह—बलिं वैरोचनमित्यादि, 'अलिते वलिते मनवे स्वाहा' इत्येतदन्तस्य मन्त्रस्यार्थः स्पष्टप्रायः सम्प्रदायतो निर्णयः।।

अस्य मन्त्रस्य प्रयोगमाह—एतस्येत्यादिना। श्वपाकीहस्तात् चण्डालीहस्तात्। बिलखावलेखनं बिलं खनन्तीति बिलखा आखुजातीया जन्तवश्चण्डालभक्ष्यभूताः तेषामवलेखनं खण्डम्। तद् बिलखावलेखनम्। कण्डोलिकायां पिटे। असङ्कीर्णे अनाकीर्णे प्रदेशे। आदहने पितृवने। निखानयेत् खातायां भूमौ स्थापयेत्। द्वितीयस्यामित्यादि। कुमार्या कन्यकया। गुलिकाः गुटिकाः। तत् सर्वं तत्प्रदेशस्थं प्राणिजातम्।

I bow to Bali, the son of Virocana; to Śambara proficient in a hundred types of magic; to Bhaṇḍīrapāka, Naraka, Nikumbha and Kumbha.

I bow to Devala and Nārada; I bow to Sāvaraṇigālava—with the permission of these I propose to you a deep slumber.

Just as ajagaras (bow-constrictors) fall into sound sleep, may the rogues of army keeping watch over the village fall asleep.

Along with thousand dogs and hundred chariots I shall enter into this house and may the watch dogs be quiet.

Having bowed to Manu and having tethered roguish dogs and worshipped the gods in heaven and Brahmins among humans who are well-versed in teaching and performing penance in mount Kailāsa, I do

cause deep slumber to you. When I overcome the same let them go away in toto. Oblations to Aliti, Valiti and Manu.

The application of these Mantras is as follows :—Having fasted for three nights, one should, on the fourteenth day of the dark half of the month, the day having the star of Puṣya, purchase from a low-caste woman a piece of the meat of rat (which they usually dig up for food). Preserving them in a basket one should bury them apart in a lonely cremation ground that is no more in use. On the second fortnight it may be dug up by a maiden, who should ground it into a paste and prepare small pills out of the same. From that take one pill and throw it with the chanting of the above mantra to render all animal life into deep slumber.

एतेनैव कल्पेन श्वाविधः शल्यकं त्रिकालं त्रिश्वेतमसङ्कीर्णं आदहने निखानयेत्। द्वितीयस्यां चतुर्दश्याम् उद्धृत्यादहनभस्मना सह यत्रैतेन मन्त्रेण क्षिपति, तत् सर्वं प्रस्वापयति।

सुवर्णपुष्पीं ब्रह्माणीं ब्रह्माणं च कुशध्वजम्।
सर्वांश्च देवता वन्दे वन्दे सर्वांश्च तापसान्।।
वशं मे ब्राह्मणा यान्तु भूमिपालाश्च क्षत्रियाः।
वशं वैश्याश्च शूद्राश्च वशतां यान्तु मे सदा।।

स्वाहा। अमिले किमिले वसुजारे प्रयोगे फक्के वयुह्वे विहाले दन्तकटके स्वाहा।

सुखं स्वपन्तु शुनका ये च ग्रामे कुतूहलाः।
श्वाविधः शल्यकं चैतत् त्रिश्वेतं ब्रह्मनिर्मितम्।।
प्रसुप्ताः सर्वसिन्द्रा हि एतत् ते स्वापनं कृतम्।
यावद् ग्रामस्य सीमान्तः सूर्यस्योद्गमनादिति।।
स्वाहा।

एतस्य प्रयोगः—श्वाविधः शल्यकानि त्रिश्वेतानि। सप्तरात्रोपोषितः कृष्णचतुर्दश्यां खादिराभिः समिधाभिरग्निमेतेन मन्त्रेणा–

द्वितीयं प्रयोगमाह–एतेनैवेत्यादि। एतेनैव कल्पेन 'त्रिरात्रोपोषितः कृष्णचतुर्दश्यां पुष्ययोगिन्याम्' इत्यनेन विधिना। शल्यकं शलम्। त्रिकालं त्रिश्वेतं त्रिषु स्थानेषु कार्ष्ण्येन त्रिषु स्थानेषु श्वेतिम्ना च युक्तम्। क्षिपति अर्थाच्छल्यकम्।

तृतीयस्य प्रस्वापनयोगस्य मन्त्रमाह–सुवर्णपुष्पीमित्यादि। 'सूर्यस्योद्गमनादिति स्वाहा' इत्यन्तं मन्त्रस्वरूपम्। तत्र 'वसुजारे' इत्यस्य स्थाने 'वयुचारे' इति क्वचित् पठ्यते, 'वयुह्वे' इत्यस्य स्थाने 'घुट्टे' इति, 'कटके' इत्यस्य स्थाने 'कट्टके' इति च।

अस्य मन्त्रस्य प्रयोगमाह–एतस्य प्रयोगः श्वाविधः इत्यादिना। 'त्रिश्वेतानी'त्येतदुत्तरम् 'आदहने निखानयेदि'ति संबन्धनीयम्। खादिराभिः खदिरो दन्तधावनाख्यो वृक्षः तन्मयीभिः। इह अणन्तत्वेऽपि ङीबभाव आर्षः। समिधाभिः समिद्भिः, इह 'आपं चैव हलन्तानाम्' इति

According to the same procedure, one should separately bury three white and three black dart-like hairs of a porcupine. On the next fourteenth day they should be taken out and thrown together with the ashes of a burnt corpse chanting the above mantra to put the whole animal life there into deep slumber.

I bow to the goddess Suvarṇapuṣpī and to Brahmāṇī, to the god Brahmā and to Kuśadhvaja, I bow to all deities and ascetics.

May all Brahmins and Kṣatriyas come under my power; may all Vaiśyas and Śūdras be subservient to me always.

Oblation to thee O Amile, Kimile, Vasujāre, Prayoge, Phakke, Vayuhve, Vihāle, and Dantakaṭake I offer oblation to thee.

May the dogs protecting the villages vigilantly fall into happy slumber; these three white dart-like hairs of the porcupine are the creation of Brahma.

All mendicants of accomplishment have fallen into deep slumber and I do cause sleep to the whole village upto the boundary till the sun rises. Oblation to thee.

ष्टशतसंपातं कृत्वा मधुघृताभ्याम् अभिजुहुयात्। तत एकमेतेन मन्त्रेण ग्रामद्वारि गृहद्वारि वा यत्र निखन्यते, तत् सर्वं प्रस्वापयति।

बलिं वैराचनं वन्दे शतमायं च शम्बरम्।
निकुम्भं नरकं कुम्भं तन्तुकच्छं महासुरम्।।
अर्मालवं प्रमीलं च मण्डोलूकं घटोबलम्।
कृष्णकंसोपचारं च पौलोमीं च यशस्विनीम्।।
अभिमन्त्रयित्वा गृह्णामि सिद्धार्थं शवशारिकाम्।
जयतु जयति च नमः शलकभूतेभ्यः स्वाहा।
सुखं स्वपन्तु शुनका ये च ग्रामे कुतूहलाः।।
सुखं स्वपन्तु सिद्धार्थां यमर्थं मार्गयामहे।
यावदस्तमयादुदयो यावदर्थं फलं मम।।
इति स्वाहा।

एतस्य प्रयोगः—चतुर्भक्तोपवासी कृष्णचतुर्दश्यामसङ्कीर्ण आदहने बलिं कृत्वा एतेन मन्त्रेण शवशारिकां गृहीत्वा पोत्रीपोट्टलिकां बन्धीयात्। तन्मध्ये श्वाविधः शल्यकेन विद्ध्वा यत्रैतेन मन्त्रेण निखन्यते, तत् सर्वं प्रस्वापयति।

उपैमि शरणं चाग्निं दैवतानि दिशो दश।
अपयान्तु च सर्वाणि वशतां यान्तु मे सदा।।
स्वाहा।

वागुरिमतेन हलन्ताट्टाप्। अष्टशतसम्पातं कृत्वा अष्टोत्तरं शतं संपाताः होमा यस्मिंस्तं तथाभूतं कृत्वा। तत् इत्यादि। ततः आदहननिखातोद्धृतेभ्यः शल्यकेभ्यः।

चतुर्थस्य प्रस्वापनयोगस्य मन्त्रमाह-बलिं वैरोचनमित्यादिना 'फलं मम। इति स्वाहा' इत्यन्तेन।

एतस्य प्रयोमाह-एतस्येत्यादि। चतुर्भक्तोपवासी चतुर्दिवसान्नानशनव्रती। शवशारिकां शवभूतां शारिकां मुखरां नाम पक्षिभेदम्। पोत्रीपोट्टलिकां पोत्रं वस्त्रं तदल्पं पोत्री पोट्टलिका 'पोट्टलम्' इति भाषाप्रसिद्धः पदार्थः पोत्रीमयीं पोट्टलिकामित्यर्थः। तन्मध्य इत्यादि। तन्मध्ये तस्याः पोट्टलिकाया मध्ये।

अथ द्वारापावरणयोगस्य मन्त्रमाह-उपैमि शरणमित्यादि।

The application of the above matra is as follows :—Collect three white dart-iike hairs of the porcupine and having fasted for seven nights, on the fourteenth day of the dark half of the month oblations should be made into the fire with one hundred and eight pieces of the sacrificial wood of Khadira (mimosa catechu) and other timber, together with honey and ghee chanting the above mantra one shall perform the rites. Then one should bury one of the hairs at the entrance of either a village or a house within it, one causes the whole animal life therein to fall into deep slumber.

I bow to Bali, the son of Vairocana, to Śambara acquainted with a hundred kinds of magic, Nikumbha, Naraka, Kumbha, Tantukaccha, the great demon; to Armālava, Pramīla, Mandolūka, Ghaṭobala, Kṛṣṇa, Kamsa and to the famous woman Paulomī.

Chanting the above mantra I shall take up the corpse of the dead bird Śārika (parrot) to achieve my desire.

Be victorious! I bow to the ones that have been reduced to the status of darts. I offer oblations. May the vigilant dogs who keep watch over the villages fall into deep sleep. May the accomplished ascetics fall into sleep, from sun set to sunrise when I do my search for the results of my efforts. Thus I offer oblations.

The application of the above mantra is as follows :—Having fasted for four nights and having on the fourteenth day of the dark half of the month having performed an oblation in fire on the sacrificial ground one should collect the corpse of a parrot in a small bag and chant mantras. When that bag in pierced with the dart-like hair of the porcupine and is buried under ground all beings are put to sleep in the locality.

I seek refuge with the god of fire and other gods of the ten regions, may all obstacles disappear and let everything be under my control. I offer oblations.

एतस्य प्रयोगः-त्रिरात्रोपोषितः पुष्येण शर्करा एकविंशति संपातं कृत्वा मधुघृताभ्याम्

अभिजुहुयात्। ततो गन्धमाल्येन पूजयित्वा निखानयेत्। द्वितीयेन पुष्येणोद्धृत्यैकां शर्करामभिमन्त्रयित्वा कवाटमाहन्यात्। अभ्यन्तरं चतसृणां शर्कराणां द्वारमपाव्रियते।

चतुर्भक्तोपवासी कृष्णचतुर्दश्यां भग्नस्य पुरुषस्यास्थ्ना ऋषभं कारयेत्; अभिमन्त्रयेच्चैतेन, द्विगोयुक्तं गोयानमाहृतं भवति; ततः परमाकाशे विक्रामति।

सदा रविरविः सगण्डपरिघाति सर्वं भणाति। चण्डालीकुम्बीतम्बकटुकसारीघः सनारीभगोऽसि स्वाहा।

तालोद्घाटनं प्रस्वापनं च।

त्रिरात्रोपोषितः पुष्येण शस्त्रहतस्य शूलप्रोतस्य वा पुंसः शिरःकपाले मृत्तिकायां तुवरीरावास्योदकेन सेचयेत्। जातानां पुष्येणैव गृहीत्वा रज्जुकां वर्तयेत्। ततः सज्यानां धनुषां यन्त्राणां च पुरस्ताच्छेदनं ज्याच्छेदनं करोति।

तत्प्रयोगमाह–एतस्य प्रयोगः–त्रिरात्रोपोषित इत्यादि। शर्कराः शिरोस्थीनि शिलाविशेषान् वा, गृहीत्वेति शेषः। अभिजुहुयाद् अर्थादग्निम्। पूजयित्वा शर्करा एवाभ्यर्च्य। अभ्यन्तरमित्यादि। एकया शर्करया कवाटाघाते कृते शर्कराचतुष्टयान्तरालपरिमाणं विवरं कवाटे जायत इत्यर्थः।

उक्तस्यैव मन्त्रस्य प्रयोगान्तरमाह–चतुरित्यादि। एतेन 'उपैमिशरणमि'त्यादिना 'स्वाहा'न्तेन मन्त्रेण। आहृतगोयानप्रयोजनमाह–ततः परमाकाश इत्यादि।

तालोद्घाटनप्रस्वापनयोरुभयोः साधकं योगं वक्ष्यन् प्रथमं तस्य मन्त्रमाह–सदारविरविः सगण्डपरिघातीत्यादि। सगण्डस्थाने सगन्धेति, क्वचित् पाठः। तम्बस्थाने तुम्भेति, 'सारीघः सनारी' इत्यस्य स्थाने 'सारीपसारी' इति च।

तालोद्घाटनमिति। तालस्य द्वारयन्त्रस्य उद्घाटनम्।

अथ ज्याच्छेदनयोगमाह–त्रिरात्रोपोषित इत्यादि। तुवरीः आढकीः। आवास्य उप्त्वा। रज्जुकाम् अल्पां रज्जुम्। वर्तयेत् सृजेत्। अर्थात् तुवर्यङ्कुरैरेव। वर्तयतीत्यपि पाठः। तत् इत्यादि। सज्यानां –

The application of the above mantra is as follows :—Having fasted for three nights and having on the day of the star Puṣya prepared twenty one pieces of sugar candy one should offer oblation along with honey and ghee into the fire. Thereafter offering incences and garlands perform worship and bury them underground. Then on the day of the second Puṣya unearth the pieces of candy chanting the above mantra. When the door is struck with one of the sugar candy, the door is opened sufficient large to accommodate all the candys.

Having fasted for four nights and on the fourteenth day of the dark half of the month, get a figure of the bull prepared from the bone of a human being crushed in some accident and perform the worship with the above mantras and then there will appear a cart drawn by two bulls (before the worshipper) and he could mount it and drive in the sky.

Always the sun and the other planets of the sky provide path for the travel. O Candāli, Kaumbhi, Tamba, Kaṭuka and Sārīgha, you are possessed of the bhaga (vagina) of a woman and I offer oblation to thee.

Opening of the door and putting inmates into deep slumber.

Having fasted for three nights, one should on the day of the star of Puṣya, fill with soil the skull of a man, killed with weapons or put to death by impaling and plant it with the seeds of Tuvari (= āḍhaki = the pulse Cajanns Indicus Spreng) and irrigate it with water. Once it is grown pluck it along with flowers and make a rope out of it, again on the day of Puṣya (after a lapse of twenty seven days), when this rope is cut into two before a drawn bow or any other machine having strings, they will be cut into two pieces.

उदकाहिभस्त्रामुच्छ्वासमृत्तिकया स्त्रियाः पुरुषस्य वा पूरयेत्; नासिकाबन्धनं मुखग्रहश्च।

वराहवस्तिमुच्छ्वासमृत्तिकया पूरयित्वा मर्कटस्नायुनावबध्नीयाद्; आनाहकारणम्।

कृष्णचतुर्दश्यां शस्त्रहताया गोः कपिलायाः पित्तेन राजवृक्षमयीममित्रप्रतिमाम् अञ्ज्यात्; अन्धीकरणम्।

चतुर्भक्तोपवासी कृष्णचतुर्दश्यां बलिं कृत्वा शूलप्रोतस्य पुरुषस्यास्थ्ना कीलकान् कारयेत्। एतेषामेकः पुरीषे मूत्रे वा निखात आनाहं करोति; पादेऽस्यासने वा निखातः शोषेण मारयति; आपणे क्षेत्रे गृहे वा वृत्तिच्छेदं करोति।

एतेन कल्पेन विद्युद्दग्धस्य वृक्षस्य कीलका व्याख्याताः।

समारोपितमौर्वीकाणाम्। ज्याछेदनमिति। एतद् यन्त्रावयवच्छेदनस्याप्युपलक्षणम्।

नासिकाबन्धनमुखग्रहयोः साधकं योगमाह–उदकाहिमस्त्रामित्यादि। उच्छ्वासमृत्तिकया उच्छ्वाससम्बद्धया मृत्तिकया। नासिकाबन्धनं नासानिरोधः। मुखग्रहः मुखस्तम्भनम्।

आनाहयोगमाह–वराहवस्तिमित्यादि। उच्छ्वासमृत्तिकया अर्थात् स्त्रियाः पुरुषस्य वा। मर्कटस्नायुना वानरवस्नसया 'स्नाय्वना स्नसा' इति यादवः। आनाहकारणम् आनाहो मलविष्टम्भः तस्य कारणम्।

शत्र्वन्धीकरणयोगमाह–कृष्णचतुर्दश्यामित्यादि। पित्तेन पित्तधातुना। अञ्ज्यात् चक्षुषोर्लिम्पेत्। अन्धीकरणम् अर्थादमित्रस्य।

आनाहयोगान्तरं, शोषेण मारणयोगं, वृत्तिच्छेदकरणयोगं चाह चतुर्भक्तेत्यादि। बलिं कृत्वा यथाविहितं भूतोपहारं दत्त्वा। आनाहं करोतीति। यदीयं मूत्रादि तस्येत्यार्थम्। पादेऽस्येत्यादि। अस्य आसनादिस्वामिनः। वृत्तिच्छेदं जीविकाभङ्गम्।

शूलप्रोतपुरुषास्थिकीलकोक्तं विधिं विद्युद्दग्धवृक्षकीलकेष्वतिदिशति–एतेन कल्पेनेत्यादि। विद्युद्दग्धवृक्षकीलकानामप्येकः पुरीषादिनिखातस्तत्तत्कार्यं जनयतीत्यर्थः।

When the slough of a water snake is filled up with the breath-dirt of

an woman or man and shown before others it will cause blockade of the nostril as well as mouth.

When the skin of the abdomen of a boar is similarly filled up (with the breath-dirt of an woman or man) and is bound to the body of a man with the ligaments of a monkey, it causes constipation of the bowels.

When the figure of an enemy carved out of the rājavṛkṣa (cassia fistula) is besmeared with the bile of a brown coloured cow killed with a weapon on the fourteenth day of the dark half of the month, it causes blindness (to the enemy), when applied on the eye.

Having fasted for four nights and offered oblations on the fourteenth day of the dark half of the month one should make bolt-like pieces out of the bone of a man killed by impaling. When one of them is put in the faeces or urine of a person it causes obstruction for its passage and when it is put on in his feet or seat, it causes death by pulmonary consumption, or causes loss of livelihood when it is put in a shop, field or house.

This explains the usages of the splinters made of the timber burnt by lightning.

पुनर्नवमवाचीनं निम्बः काकमधुश्च यः।
कपिरोम मनुष्यास्थि बद्ध्वा मृतकवाससा।।
निखन्यते गृहे यस्य पिष्ट्वा वा यं प्रपाययेत्।
सपुत्रदारः सधनस्त्रीन् पक्षान् नातिवर्तते।।
पुनर्नवमवाचीनं निम्बः काकमधुश्च यः।
स्वयंगुप्ता मनुष्यास्थिपदे यस्य निखन्यते।।
द्वारे गृहस्य सेनाया ग्रामस्य नगरस्य वा।
सपुत्रदारः सधनस्त्रीन् पक्षान् नातिवर्तते।।
अजमर्कटरोमाणि मार्जारनकुलस्य च।
ब्राह्मणानां श्वपाकानां काकोलूकस्य चाहरेत्।।
एतेन विष्ठावक्षुण्णा सद्य उत्सादकारिका।
प्रेतनिर्मालिका किण्वं रोमाणि नकुलस्य च।।
वृश्चिकाल्यहिकृत्तिश्च पदे यस्य निखन्यते।
भवत्यपुरुषः सद्यो यावत् तन्नापनीयते।।

त्रिरात्रोपोषितः पुष्येण शस्त्रहतस्य शूलप्रोतस्य वा पुंसः शिरः कपाले मृत्तिकायां गुञ्जा आवास्योदकेन च सेचयेत्। जातानाममावास्यायां पौर्णमास्यां वा पुष्ययोगिन्यां गुञ्जावल्लीर्ग्राहयित्वा मण्डलिकानि कारयेत्। तेष्वन्नपानभाजनानि न्यस्तानि न क्षीयन्ते।

योगान्तरं श्लोकद्वयेनाह -पुनर्नवमित्यादि। अवाचीनं पुनर्नवम् अवाग्भवं शोथघ्नीसञ्ज्ञं शाकं तत्पुष्पं वा। काकमधुः काकप्रियफलो वृक्षः। काममधुरिति पाठान्तरं 'प्रपाययेद्' इत्यस्य स्थाने 'पदं नयेद्' इति क्वचित् पठ्यते।।

त्रिपक्षान्तरमाणयोगस्य प्रकारान्तरं श्लोकद्वयेनाह-पुनर्नवमित्यादि। स्वयंगुप्ता आत्मगुप्तापरपर्याया कच्छुरा नामौषधिः।।

सद्य उत्सादकारकं योगं सार्धेनाह-अजमर्कटेत्यादि। एतेन अजमर्कटादिरोमसंघातेन सह। अवक्षुण्णा चूर्णिता। सद्य उत्सादकारिका तत्क्षणोत्पत्तिहेतुः, अर्थाद् विष्ठिनः।।

अपुरुषीकरणयोगं सार्धेनाह-प्रेतेत्यादि। प्रेतनिर्मालिका शवनिर्माल्यम्। किण्वं महाबीजम्। वृश्चिकाल्याहिकृत्तिः वृश्चिकाही प्रसिद्धौ अली पुच्छकण्टकवान् वृश्चिकभेदः तेषां कृतिः चर्म।।

अन्नपानभाजनाक्षययोगमाह-त्रिरात्रोपोषित इत्यादि। गुञ्जावल्ली

Punarnava (hog-weed, Boerhavia Procumbens) growing downwards, nimba (nimba melia), Kākamadhu (the fruit of which is tasted by crows), Kapiroma (hair of a monkey) and the bone of a man—all tied up in a cloth covering the corpse and buried in the house of a man or made into a decoction and is caused to be drunk by a man, such a person with children, wife and wealth will not survive three fortnights.

Punarnava growing downwards, nimba, Kākamadhu, svayamgupta (a medicinal plant, Mucuna Pruritus Hook) and human bones are buried under the feet of or near the house of a man, or near camp, village or a city, that man with children, wife and wealth will not survive three fortnights.

When the hair of a sheep and a monkey, of cat and mongoose, of Brahmins and low-caste men and of a crow and an owl is collected and is made into a paste with faeces, its application brings on sudden death.

When the flower garland put on a dead body, the ferment derived from a burning corpse, the hair of a mongoose and the skin of a scorpion, a bee and a snake are buried under the feet of a man, that man will lose all human traits as long as they are not removed.

Having fasted for three nights and having on the day of the star of Puṣya planted Guñja (arbus precatorius) seeds in the skull filled with soil, of a man killed with weapons or impaled, one should irrigate it with water. On the new or full moon day with the star of Puṣya, one should take out the plants when grown into creepers, and prepare out of them circular pedastals. When vessels containing food and water are placed on these pedestals, they do not get damaged.

रात्रिप्रेक्षायां प्रवृत्तायां प्रदीपाग्निषु मृतधेनोः स्तनानुत्कृत्य दाहयेत्। दग्धान् वृषमूत्रेण

पेषयित्वा नवकुम्भमन्तर्लेपयेत्; तं ग्राममपसव्यं परिणीय तत्र न्यस्तं नवनीतमेषां तत् सर्वमागच्छतीति।

कृष्णचतुर्दश्यां पुष्ययोगिन्यां शुनो लग्नकस्य योनौ कालायसीं मुद्रिकां प्रेषयेत्; तां स्वयं पतितां गृह्णीयात्; तया वृक्षफलान्याकारितान्यागच्छन्ति।

मन्त्रभैषज्यसंयुक्ता योगा मायाकृताश्च ये।
उपहन्यादमित्रांस्तैः स्वजनं चाभिपालयेत्।।

।। इति कौटलीयार्थशास्त्रे औपनिषदिके चतुर्दशाधिकरणे
तृतीयोऽध्यायः प्रलम्भने भैषज्यमन्त्रप्रयोगः,
आदितोऽष्टचत्वारिंशच्छततमः ।।

पुंशिरःकपालोत्पन्ना एव कृष्णलालताः। मण्डलिकानि मण्डलाकृतीन्यधिकरणानि।

ग्रामगतसर्वनवनीतागमनयोगमाह–रात्रीत्यादि। रात्रिप्रेक्षायां रात्रिनृत्तादौ। परिणीय परिगमय्य। एषां ग्रामाणाम्।

वृक्षफलानयनयोगमाह–कृष्णेत्यादि। लग्नकस्य मत्तस्य। शुनः इह पुंस्त्वमविवक्षितं शुन्या इत्यर्थः। मुद्रिकाम् अङ्गुलीयकादिम्। तया मुद्रिकया। आकारितानि आहूतानि।।

प्रान्ते श्लोकमाह–मन्त्रेत्यादि। मन्त्रभैषज्यसंयुक्ताः प्रकृताध्यायोक्ताः ये योगाः, ये च मायाकृताः गात्रप्रज्वालनाङ्गारराशिसञ्चारादिसाधकाः योगाः, तैः, अमित्रान् अरातीन्, उपहन्यात्, स्वजनं च अभिपालयेद् अमित्रोपघातद्वारेण रक्षेद्, विजिगीषुः।

दत्ता टिप्पणिकास्माभिर्भैषज्यस्यैवमल्पशः।
क्रमस्तु सर्वस्तस्यापि मन्त्रवत् साम्प्रदायिकः।।

इति कौटलीयार्थशास्त्रव्याख्यायाम् औपनिषदिके चतुर्दशेऽधिकरणे तृतीयो-
ऽध्यायः प्रलम्भने भैषज्यमन्त्रप्रयोगः। प्रलम्भनं समाप्तम्।
आदितोऽष्यचत्वारिंशच्छततमः।।

During a midnight procession, one may cut off nipples of the udder of a dead cow and burn it in the fire of the torch. A new vessel may be plastered in the interior with the urine of a bull. When the vessel or taken around the village from right to left is placed on the ground the whole quantity of the butter produced in the area will collect itself inside the vessel.

On the fourteenth day of the dark half of the month combined with the star of Puṣya, one should thrust into the womb of a dog or heat an iron seal and when that bitch falls down along with seal, take hold of the seal by which one could get fruits from trees at one's beck and call.

By the power of the mantras, drugs and other magicial contrivances one should protect one's own people and hurt those of the enemy.

Thus the one hundred and fortyeighth chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the third chapter of the fourteenth Adhikaraṇa dealing with 'Delusion with medicines and mantras.'

Chapter 149

179. प्रक० स्वबलोपघातप्रतीकारः।

Section 179 : Remedies Against the Injuries of One's own Army

स्वपक्षे परप्रयुक्तानां दूषिविषगराणां प्रतीकारे श्लेष्मातककपित्थदन्तिदन्तशठगोजी-शिरीषपाटलीबलास्योनाकपुनर्नवाश्वेतावरणक्काथयुक्तं चन्दनसालावृकीलोहितयुक्तं तेजनोदकं राजोपभोग्यानां गुह्यप्रक्षालनं स्त्रीणां सेनायाश्च विषप्रतीकारः।

पृषतनकुलनीलकण्ठगोधापित्तयुक्तं मषीराजिचूर्ण सिन्दुवारितवरणवारुणी-तण्डुलीयकशतपर्वाग्रपिण्डीतकयोगो मदनदोषहरः।

सृगालविन्नामदनसिन्दुवारितवरणवारणवल्लीमूलकषायाणामन्यतमस्य समस्तानां वा क्षीरयुक्तं पानं मदनदोषहरम्।

स्वबलोपघातप्रतीकार इति सूत्रम्। स्वसैन्यस्य परप्रयुक्तविषाम्बुदूषणादिनिमित्तो य उपघातः तस्य प्रतीकारोऽभिधीयत इति सूत्रार्थः।

स्वपक्ष इत्यादि। प्रतीकारे आकाङ्क्ष्यमाण इति शेषः। श्लेष्मातकेत्यादि। राजभोग्यानां स्त्रीणां सेनायाश्च विषप्रयोगे परेण कृते श्लेष्मातकादि द्वादशकक्काथयुक्तेन चन्दनजम्बुकीरुधिरयुक्तेन च तेजनोदकेन तद्गुह्यावनेजनं प्रतीकार इत्यर्थः। तत्र श्लेष्मातकः शेलुर्वसन्तकुसुमाख्यः, कपित्थो दधित्थः, दन्ती उदुम्बरपर्णी, दन्तशठो जम्बीरः, गोजी गोजिह्वा। दार्विकाख्या, शिरीषः कपीतनः शुकप्रियाख्यः, पाटली गोलिहः अमोघा वा, बला वाट्यालकः, स्योनाकः शुकनासाख्यः, पुनर्नवा शोथघ्नी, श्वेता पैष्टिकी सुरा, वरणःसेतुसंज्ञो वृक्षभेदः।

मदनदोषप्रतीकारमाह–पृषतेत्यादि। पृषतादिचतुष्टयपित्तयुक्त मषीराज्योश्चूर्णं सिन्दुवारितादिषट्कयोग इति द्वयं मदकरद्रव्यदोपहरमित्यर्थः। तत्र पृषतो बिन्दुचित्रो मृगभेदः, नकुलो बभ्रुः, नीलकण्ठो मयूरः, गोधा जलजन्तुभेदः। मषी नीलशेफालिका, राजिः राजसर्षपः। सिन्दुवारितः सिन्दुवारवृक्षः, वरणः सेतुरुद्भिद्भेदः, वारुणी दूर्वा, तण्डुलीयकः जीवशाकः, शतपर्वाग्रं वंशाग्रं; पिण्डीतकः मरुवकः।

उक्तस्यैव प्रतीकारस्य प्रकारान्तरमाह–सृगालेत्यादि। सृगालविन्नादिपञ्चकमूलकषायाणां व्यस्तानां

समस्तानां वा क्षीरयुक्तं पानं मदं हरतीत्यर्थः। तत्र सृगालविन्ना ओषधिभेदः, मदनः प्रसिद्धः वारणवल्ली गजाह्वा गजपिप्पली।

For remedies against poison and poisonous compounds applied by an enemy against one's own army or people :—

Things meant for the use of king inclusive of royal women as well as things of the army are to be washed in the tepid water prepared from the decoction of Śleṣmātaka (Cordia Latifolia), Kapittha (Feronia Elephantum), dantī (Ficus Glomerata) dantaśatha (Citrus Aurantium), Gojī (Phlomis or Premna esculenta) Śirīṣa (Accacia Sirissa), Pāṭalī (Bignonia suaveolens), Balā (Lida Cordifolia), Syonāka (Bignonia Indica), Punarnavā (hog-weed), śvetā (andropogon aciculatum) and varaṇa (crataeva roxburghi), mixed with the decoction of Candana (Sandal), and the blood of Bālāvṛkī (jackal), removes the bad effects of poison.

The mixture prepared from the biles of pṛṣata (red-spotted dear), nakula (mongoose), nīlakaṇṭha (peacock) and godhā (alligator) together with the powder of maṣī (nīlaśephālika = Nyctanthes Arbor Tristis), rāji (= rājasarṣapa = black mustard, Sinapis Ramosa), sinduvārita (Vitex Negund.), Varaṇa (Crataeva Roxtburghi), Vāruṇī (Dūrva grass), taṇḍulīyaka (Amaranthus polygonoides), Śataparvāgra (shoots of bamboo) and piṇḍītaka (Vangueria spinosa) when drunk removes the effect of the mixture of madana (intoxication).

कैडर्यपूतितिलतैलमुन्मादहरं नस्तःकर्म।

प्रियङ्गुनक्तमालयोगः कुष्ठहरः।

कुष्ठलोध्रयोगः पाकशोषघ्नः।

कट्फलद्रवन्तीविलङ्गचूर्णं नस्तःकर्म शिरोरोगहरम्।

प्रियङ्गुमञ्जिष्ठातगरलाक्षारसमधुकहरिद्राक्षौद्रयोगो रज्जूदकविषप्रहारपतननिस्संज्ञानां पुनः प्रत्यानयनाय।

मनुष्याणामक्षपात्रं; गवाश्वानां द्विगुणं: चतुर्गुणं हस्त्युष्ट्राणाम्।

रुक्मगर्भश्चैषां मणिः सर्वविषहरः।

उन्मादप्रतीकारमाह–कैडर्यपूतितिलतैलमित्यादि। कैडर्यः कट्फलः, पूतिः पूतिकरजः, तिलाः प्रसिद्धाः। एततैलेन क्रियमाणं नस्तः कर्म चित्तविभ्रमहरं भवतीत्यर्थः।

कुष्ठहरं योगमाह–प्रियङ्गुनक्तमालयोग इत्यादि। तत्र प्रियङ्गुः कङ्गुः, नक्तमालश्चिरिबिल्वः।

कुष्ठलोध्रयोग इति। कोठशाबरयोगः, पाकशोषघ्नः पाकः केशशौक्ल्यं शोषः क्षयः, तावुभौ हन्ति।

शिरोरोगहरं नस्तः कर्मविशेषमाह–कट्फलेत्यादि। तत्र कट्फलः कैडर्यः, द्रवन्ती शम्बरी नामौषधिभेदः, विलङ्गः कृमिघ्नः।

नष्टसंज्ञाप्रत्यापत्तिसाधकं योगमाह–प्रियङ्ग्वित्यादि। प्रियङ्गुः कङ्गुः, मञ्जिष्ठा अञ्जनवल्लिका, तगरो नन्द्यावर्तः, लाक्षा अलक्तः, मधुको मधुष्ठीलः, हरिद्रा रात्र्याख्या, क्षौद्रं माक्षिकम् एषां योगः योगसिद्धमौषधमित्यर्थः। रज्जूदकविषप्रहारपतननिस्संज्ञानां रज्जुबन्धेन उदकमज्जनेन विषवेगेन ताडनेन उच्चदेशादधः पतनेन च नष्टसंज्ञानां प्राणिनां, पुनःप्रत्यानयनाय पुनस्संज्ञाप्रतिलम्भनाय, कल्पत इति शेषः।

उक्तानां प्रतीकारौषधानामुपयोक्तव्यां मात्रामाह–मनुष्याणामित्यादि। अक्षमात्रम् अक्षः षोडशमाषकाः तावन्मात्रमित्यर्थः।

रुक्मेत्यादि। रुक्मगर्भः अन्तर्गतस्वर्णः। एषां मणिः उक्तप्रियङ्ग्वादिनिष्पन्ना गुलिकेत्यर्थः। सर्वविषहरः धार्यमाणः सर्वविधं विषं हरति।

The decoction prepared from Sṛgālavinna (a medicinal plant, the Hemionitis Cordifolia), Madana (Phaseolus Radiatus), Sinduvārita (Vitex Negundo), varaṇa (Crataeva Roxburghi) and vāraṇavallī (= gajāhvā = Bignonia suaveolens) either from one of these or all of them together if consumed with milk avoids intoxication.

Oil extracted from kaidarya (vangueria spinosa) pūti (Basella cardifolia) and sesamum mixed together and applied through the nose removes madness.

Combination of Priyangu (panic seed) and naktamāla (galedupa arborea) removes leprosy when applied through the nose.

The mixture prepared from kuṣṭha (costus) and lodhra (symplocus) removes consumption as well as prevents loss of hair.

The mixture prepared from kaṭuphala (glelina arborea), dravanti (anthericum tuberosum) and vilaṅga (a kind of seed, when applied through the nose removes head-ache and other ailments of the head.

The application of the mixture prepared from priyangu (panic seed), mañjiṣṭhā (Rubia mañjit), tagara (tabernoemontana caronaria) lākṣārasa (the juice of lac), madhuka (Bassia Latifolia), haridrā (turmeric) and kṣaudra (honey), to person who have fallen senseless having been beaten by a rope, or with a whip, or by falling, rouses them.

The dose for the humans is an Akṣa (about the weight of sixteen māṣas), twice as much to cows and four times as much to elephants and camels.

A ball prepared from the above mixture and containing gold in its centre removes the effects of all kinds of poison.

जीवन्तीश्वेतामुष्ककपुष्पवन्दाकानामक्षीबे जातस्य अश्वत्थस्य मणिः सर्वविषहरः।

तूर्याणां तैः प्रलिप्तानां शब्दो विषविनाशनः।
लिप्तध्वजं पताकां वा दृष्ट्वा भवति निर्विषः।।

एतैः कृत्वा प्रतीकारं स्वसैन्यानामथात्मनः।
अमित्रेषु प्रयुञ्जीत विषधूमाम्बुदूषणान्।।

।। इति कौटलीयार्थशास्त्रे औपनिषदिके चतुर्दशाधिकरणे चतुर्थोऽध्यायः
स्वबलोपघातप्रतीकारः, आदित एकोनपञ्चाशच्छततमः।।
एतावता कौटलीयस्यार्थशास्त्रस्यौपनिषदिकं
चतुर्दशमधिकरणं समाप्तम्।।

जीवन्तीत्यादि। जीवन्त्यादीनां मणिः अक्षीबे जातस्याश्वत्थस्य मणिश्च सर्वविषहर इत्यर्थः। तत्र जीवन्ती गुलूची, श्वेता शङ्खिनी, मुष्ककः मोक्षकवृक्षः, पुष्पम् ओषधिभेदः, वन्दाका लताभेदः। अक्षीबः शिग्रुः महानिम्बो वा।।

अध्यायप्रान्ते श्लोकावाह–तूर्याणामित्यादि। तूर्याणां वाद्यानाम्। तैः जीवन्त्यादिसाधितैरौषधैः। ध्वजं केतुदण्डम्। पताकां दण्डोर्ध्वबद्धमंशुकम्। एतैरिति। औषधयोगैरुक्तैः, स्वसैन्यानाम् आत्मनश्च प्रतीकारं रक्षां, कृत्वा, विषधूमाम्बुदूषणान् विषधूमयोगान् उदकदूषणयोगांश्च, अमित्रेषु शत्रुषु, प्रयुञ्जीत।।

चतुर्दशाधिकरणमित्यौपनिषदाह्वयम्।
व्याख्यायामर्थशास्त्रस्य श्रीमूले समपूर्यत।।

इति श्रीवञ्चिमण्डलमहाराजाश्रितस्य ताम्रपर्णीतीरवर्तितरुवाग्रहारा-
भिजनस्य श्रीसीताम्बाश्रीरामसुब्रह्मण्यार्यसूनोर्महामहोपाध्याय-
गणपतिशास्त्रिणः कृतिषु कौटलीयार्थशास्त्रव्याख्यायां
श्रीमूलाख्यायाम् औपनिषदिके चतुर्दशेऽधिकरणे चतुर्थो-
ऽध्यायः स्वबलोपघातप्रतीकारः। आदित एकोनपञ्चाशच्छततमः।
औपनिषदिकं चतुर्दशमधिकरणं समाप्तम्।।

A round ball made of the timber of Aśvattha (the holy figtree) growing wound round with plants such as jivanti (a medicinal creeper = gulūcī), Śvetā (andropogan aciculatum), the flower of muṣkaka (a species of tree) and vandāka (epidendrum tesseloides removes the effect of all poisons.

The sound of trumpets painted with the above mixture (of medicines) destroys poison; whoever looks at a flag or banner besmeared with the above mixture will get rid of poison.

Having applied these remedies to secure the safety of himself and his army, a king should make use of poisonous smokes and other mixtures to vitiate war against his army

Thus the one hundred and forty-ninth chapter of the Arthaśāstra of Kauṭalya comes to an end. Here ends the fourth chapter of the fourteenth Adhikaraṇa dealing with the section on remedies against the injuries of one's own army.

The Fourteenth Adhikaraṇa is concluded.

पदार्थमाह–पदावधिक इत्यादि। यस्यार्थस्य पदमवधिः स पदार्थः। पदावधिकस्य शब्दभागस्य कल्प्यमानोऽर्थः पदार्थ इत्यर्थः।

हेत्वर्थाख्यां तन्त्रयुक्तिमाह–हेतुरित्यादि। 'अर्थ एव प्रधान इति कौटल्यः' इति प्रतिज्ञातस्यार्थ-प्राधान्यलक्षणस्यार्थस्य धर्मकामयोरर्थसाध्यत्वं हेतुर्भवतीति स हेत्वर्थः।

उद्देशमाह–समासेत्यादि। समासवाक्यं संक्षेपवाक्यम्। तत्त्वं च इन्द्रियशब्देन कर्णादीनां ग्रहणाद् बोद्धव्यम्।

A brief description of the matter contained in a book is the contents :—"The purport of learning; association with the aged, control of sense organs, creation of ministers and the like". (Ch. I. B.I)

Indicating similar facts by the use of such words as—"These and the like" is suggestion of similar facts; for instance—"The world, consisting of four castes and the four religious divisions, and the like" (Ch. I, B.I.).

The purport which a word has to convey is its meaning, for instance, with regard to the word "mūlahara" whoever squanders the wealth acquired for him by his father and grandfather is a mūlahara, a prodigal son.' (Ch. IX, B. II)

What is intended to prove an assertion is the purport of reason; for example—"For charity and enjoyment of life depend upon wealth." (Ch. VIII, B.I.).

Saying in one word is the mentioning of a fact is brief; for instance : "It is the control of the organs of sense on which success in learning and discipline depend." (Ch. VI, B.I.).

Explanation in detached words is the mentioning of a fact in detail :—for instance—"Absence of discrepancy in the perception of sound, touch, colour, flavour, and scent by means of the ear, the skin, the eyes, the tongue and the nose, is what is meant by restraint of the sense organs. (Ch. VI, B.I.)

एवं वर्तितव्यमित्युपदेशः–"धर्मार्थाविरोधेन कामं सेवेत न निस्सुखः स्यात्" (अधि० 1. अध्या० 7) इति।

एवमसावाहेत्यपदेशः–"मन्त्रिपरिषदं द्वादशामात्यान् कुर्वीतेति मानवाः, षोडशेति बार्हस्पत्याः; विंशतिमित्यौशनसाः, यथासामर्थ्यमिति कौटल्यः" (अधि० 1. अध्या० 15)।

उक्तेन साधनमतिदेशः–"दत्तस्याप्रदानमृणादानेन व्याख्यातम्" (अधि० 3. अध्या० 16) इति।

वक्तव्येन साधनं प्रदेशः–"सामदानभेददण्डैर्वा यथापत्सु व्याख्यास्यामः" (अधि० 7. अध्या० 14) इति।

दृष्टेनादृष्टस्य साधनमुपमानम्–"निवृत्तपरिहारान् पितेवानुगृह्णीयात्" (अधि० 2. अध्या० 1) इति।

यदनुक्तमर्थादापद्यते सार्थापत्तिः–"लोकयात्राविद् राजानमात्मद्रव्यप्रकृतिसम्पन्नं प्रियहितद्वारेणाश्रयेत" (अधि० 5. अध्या० 4) नाप्रियहितद्वारेणाश्रयेतेत्यर्थादापन्नं भवतीति।

उभयतोहेतुमानर्थः संशयः–"क्षीणलुब्धप्रकृतिमपचरितप्रकृतिं वा।" (अधि० 7. अध्या० 5) इति।

निर्देशमाह–व्यासवाक्यमित्यादि। अत्र इन्द्रियाणां कर्णत्वगादिविशेषाकारैर्ग्रहणाद् व्यासवाक्यता।

उपदेशमाह–एवं वर्तितव्यमित्यादि।

'एवमसावाहे'त्येवमन्यदीयपक्षस्य खण्डनार्थमुपन्यासः अपदेशाख्या तन्त्रयुक्तिरित्याह–एवमसावित्यादि।

अतिदेशमाह–उक्तेन साधनमित्यादि।

उपरिष्टाद् वक्ष्यमाणेनार्थेन समर्थनं प्रदेश इत्याह–वक्तव्येन साधनामित्यादि।

उपमानमाह–दृष्टेनेत्यादि। पिता हि प्रसिद्धः पुत्रेष्वु वत्सलो योग क्षेमचिन्तकश्च लोके दृष्टः; तदुपमया राज्ञः प्रजासु वात्सल्यादिकमवचनेऽपि सिद्धं भवतीति दृष्टेनादृष्टसाधनमिह द्रष्टव्यम्।

अर्थापत्तिमाह–यदभुक्तमित्यादि।

संशयमाह–उभयतोहेतुमानित्यादि 'क्षीणलुब्धे'त्यादिना।

The statement such as "Thus one should live" is guidance; for instance—"Not violating the laws of righteousness and economy, he should live. (Ch. VII, B.I.)

The statement such as "He says thus" is a quotation; for instance—"The school of Manu says that a king should make his assembly of ministers consist of twelve ministers; the school of Bṛhaspati says that it should consist of sixteen ministers; the school of Uśanas say it should contain twenty members, but Kauṭalya holds that it should contain as many ministers as the need of the kingdom requires." (Ch. XV, B.I.)

When a rule dealt with in connection with a question is said to apply to another question also, it is termed application; for example—"What is said of a debt not paid holds good with failure to make good a promised gift. (Ch. XVI, B.III.)

Establishing a fact by what is to be discussed later on is called "place of refernece", for example—"By making use of such strategic means as conciliation, bribery, dimension, and coercion, as will be explained later in connection with calamities." (Ch. XIV, B.VII)

तन्त्रयुक्तिः—पञ्चदशमधिकरणम्।

BOOK FIFTEEN : THE PLAN OF A TREATISE

Chapter 150

180. प्रक० तन्त्रयुक्तयः।

Section 180 : Division of the Treatise

मनुष्याणां वृत्तिरर्थः, मनुष्यवती भूमिरित्यर्थः; तस्याः पृथिव्या लाभपालनोपायः शास्त्रमर्थशास्त्रमिति।

तद् द्वात्रिंशद्युक्तियुक्तम्—अधिकरणं, विधानं, योगः, पदार्थः, हेत्वर्थः, उद्देशः, निर्देशः, उपदेशः, अपदेशः, अतिदेशः, प्रदेशः, उपमानं, अर्थापत्तिः, संशयः, प्रसङ्गः, विपर्ययः, वाक्यशेषः, अनुमतं, व्याख्यानं, निर्वचनं, निदर्शनं, अपवर्गः, स्वसंज्ञा, पूर्वपक्षः, उत्तरपक्षः, एकान्तः, अनागतावेक्षणम्, अतिक्रान्तावेक्षणं, नियोगः, विकल्पः, समुच्चयः, ऊह्यमिति।

यमर्थमधिकृत्योच्यते तदधिकरणम्—"पृथिव्या लाभे पालने च यावन्त्यर्थशास्त्राणि पूर्वाचार्यैः प्रस्थापितानि प्रायशस्तानि संहृत्यैकमिदमर्थशास्त्रं कृतम्" (अधि० 1. अध्या० 1) इति।

तदित्थं चतुर्दशभिरधिकरणैः पृथिवीलाभपालनानुबन्धि कृत्स्नमर्थशास्त्रीयं प्रमेयजातं सप्रपञ्चं निरूप्य प्रकृतशास्त्रेऽर्थनिर्णयोपयोगितयाश्रिताः युक्तीः सलक्षणोदाहरणं दर्शयितुं तन्त्रयुक्तिसंज्ञमन्तिमं पञ्चदशमधिकरणमिदमारभ्यते। अत्र चैकमेव सूत्रं—

तन्त्रयुक्तय इति। तन्त्रम् अर्थशास्त्रं, तदाश्रिता युक्तयोऽभिधीयन्त इति सूत्रार्थः।

तत्र प्रथममर्थशास्त्रपदार्थमाह—मनुष्याणामित्यादि। एतश्च 'पृथिव्या लाभे पालने च' इत्यादेः शास्त्रादिमवाक्यस्य व्याख्यया कृतपूर्वया व्याख्यातप्रायम्।

तदित्यादि। तद् अर्थशास्त्रम्। अधिकरणमित्यादिना तासां द्वात्रिंशतो युक्तीनां नामत उद्देशः।

अधिकरणं विवृणोति—यमित्यादि। यं प्रधानभूतमर्थमधिकृत्यार्थजातमुच्यते, तत् प्रधानार्थसंबद्धं सर्वमर्थजातम् अधिकरणमित्युच्यत इत्यर्थः। तदुदाहरति—पृथिव्या इत्यादि। पृथिवीरूपप्रधानार्थ-संबद्धनानार्थप्रतिपादकं सर्वं शास्त्रमधिकरणपदव्यपदेश्यमित्यभिप्रायः। अनेन न्यायेन विनयाधिकाराध्यक्ष-प्रचारादिष्ववान्तरार्थेषु प्रधानतया विवक्षितेषु तत्तत्संबद्धान्यर्थजातानि तत्तदधिकरणानि भवन्ति।

By Artha is meant the subsistence of mankind or the earth which contains the mankind; the science which treats of the means of acquiring and administering the earth is the Arthaśāstra, the science of polity.

It is divided into thirty two sections :—the book (adhikaraṇa), contents (vidhāna), combination of similar facts (yoga), the meaning of a word (padārtha), the purport of reason (hetvartha), mention of a fact in brief (uddeśa), mention of a fact in detail (nirdeśa), guidance (upadeśa), quotation (apadeśa), application (atideśa), the place of reference (pradeśa), simile (upamāna), implication (arthāpatti), doubt (Śaṁśaya), reference to similar procedure (prasaṅga), contrariety (viparyaya), ellipsis (vākyaśeṣa) acceptance (anumata), explanation (vyākhyāna), derivation (nirvacana), illustration (nidarśana), exception (apavarga) the author's own technical terms (svasamjña), prima facie view (pūrva pakṣa); rejoinder (uttarapakṣa), conclusion (ekānta), reference to a subsequent portion (anāgatāvekṣaṇa), reference to a previous portion (atikrāntāvekṣaṇa), command (niyoga), alternative (vikalpa), compounding together (Samuccaya) and determinable fact (Ūhya).

That section in which a subject is treated is called as book as for instance :—"This science of polity (Arthaśāstra) is a compendium of all those Arthaśāstras which provide a king guidance in acquiring and administering the earth and composed by ancient teachers." (Chapter I, Book I).

शास्त्रस्य प्रकरणानुपूर्वी विधानम्–"विद्यासमुद्देशः, वृद्धसंयोगः, इन्द्रियजयः, अमात्योत्पत्तिः" (अधि० 1. अध्या० 1) इत्येवमादिकमिति।

वाक्ययोजना योगः–"चतुर्वर्णाश्रमो लोकः" (अधि० 1. अध्या० 4) इति।

पदावधिकः पदार्थः–"मूलहरः" इति पदम्। "य पितृपैतामहमर्थमन्यायेन भक्षयति स मूलहरः" (अधि० 2. अध्या० 9) इत्यर्थः।

हेतुरर्थसाधको हेत्वर्थः–"अर्थमूलौ हि धर्मकामौ" (अधि० 1 अध्या० 7) इति।

समासवाक्यमुद्देशः–"विद्याविनयहेतुरिन्द्रियजयः" अधि० 1. अध्या० 6) इति।

व्यासवाक्यं निर्देशः–"कर्णत्वगक्षिजिह्वाघ्राणेन्द्रियाणां शब्दस्पर्शरूपरसगन्धेष्व-विप्रत्तिरिन्द्रियजयः" (अधि० 1. अध्या० 6) इति।

विधानमाह–शास्त्रस्येत्यादि। प्रकरणानुपूर्वी प्रकरणानां प्रत्यधिकरणं क्रमनिवेशनम्। एवमादिक-मित्यादिपदेन 'मन्त्रिपुरोहितोत्पत्तिरि'त्यादिकं 'तन्त्रयुक्तयः' इत्येतदन्तं प्रथमाध्यायगतं गृह्यते।

योगामाह–वाक्ययोजनेति। वाक्यस्य योजना पदानां क्रियाकारकभावेन तद्विशेषणभावेन च मिथो योजनेत्यर्थः। 'चतुर्वर्णाश्रम' इति योगस्योदाहरणम्। विनयाधिकारचतुर्थाध्यायशेषश्चायं श्लोकः।

Proving an unseen thing by what has been seen is simle, for example—"Like a father and his son, he should project those of his subjects who have passed the period of the remission of taxes." (Ch. I.. B. II)

Implication is what naturally follows from a statement of feels, though not mentioned in plain terms, for instance :—"Whoever has full experience of the affairs of this world, should, through the medium of courtiers and other friend win the favour of a king who is of good character and worthy sovereign. It follows from this that no one should seek the favour of a king through the medium of the king's enemies." (Ch. IV, B.V).

When the statement of a reason is equally applicable to two situation, it is termed doubt, for example—"Which of the two should a conqueror march against; one whose subjects are impoverished and greedy, or one whose subjects are oppressed." (Ch. V, B.VI.)

प्रकरणान्तरेण समानोऽर्थः प्रसङ्गः–"कृषिकर्मप्रदिष्टायां भूमाविति समानं पूर्वेण" (अधि० 1. अध्या० 11) इति।

प्रतिलोमेन साधनं विपर्ययः–"विपरीतमतुष्टस्य" (अधि० 1. अध्या० 16) इति।

येन वाक्यं समाप्यते, स वाक्यशेषः–"छिन्नपक्षस्येव राज्ञश्चेष्टानाशश्चेति" (अधि० 8. अध्या० 1) तत्र शकुनेरिति वाक्यशेषः।

परवाक्यमप्रतिषिद्धमनुमतम्–"पक्षावुरस्यं प्रतिग्रह इत्यौशनसो व्यूहविभागः" (अधि० 10. अध्या० 6) इति।

अतिशयवर्णना व्याख्यानम्–"विशेषतश्च सङ्घानां सङ्घवर्मिणां च राजकुलानां द्युतनिमित्तो भेदः तन्निमित्तो विनाश इत्यसत्प्रग्रहः पापिष्ठतमो व्यसनानां तन्त्रदौर्बल्यात्" (अधि० 8. अध्या० 3) इति।

गुणतः शब्दनिष्पत्तिनिर्वचनम्–"व्यस्यत्येनं श्रेयस इति व्यसनम्" (अधि० 8. अध्या० 1) इति।

निदर्शिते संशये उभयतोहेतुमत्त्वं तद्वाक्यव्याख्यायां षाड्गुण्यपञ्चमाध्याये स्पष्टम्।

प्रसङ्गमाह–प्रकरणान्तरेणेत्यादि। एकदेशातिदेशोऽयम्।

विपर्ययमाह–प्रतिलोमेनेत्यादि। प्रतिलोमेन उक्तविपरीतेन।

वाक्यशेषमाह–येनेत्यादि। वाक्यशेषः वाक्यघटकं पदम् अनुपात्तमपि सामर्थ्यतो गम्यत इत्यर्थः। इह चकारोऽप्युदाहरणे पठ्यते।

अनुमतमाह–परेत्यादि। उदाहरणस्य व्याख्यानं दशमाधिकरणषष्ठाध्याये द्रष्टव्यम्।

साधितस्यार्थस्यातिशयेन युक्त्यन्तरैः समर्थनं व्याख्यानमित्याह–अतिशयेत्यादि।

अर्थान्वयेन शब्दस्य प्रवृत्तिनिर्वचनमित्यभिप्रायेणाह–गुणत इत्यादि।

The reference to a similar procedure consists of a procedure specified in connection with a thing is specified in connection with another; for instance—"On the lands allotted to him for the purpose of carrying on agricultural operations, he should do as before." (CH. XI, B.I.)

The inference of a reverse statement from a positive statement is termed contrariety, for example—"The reverse will be the appearance of a king who is not pleased with the messenger." (Ch. XVI, B.I.)

The position of a sentence which is left out though necessary to convey the whole idea is called ellipsis, for instance :—"With his feathers plucked off, he will lose his power to move." Here the words "like a bird" are omitted. (Ch. I, B.VIII).

When the opinion of another person is stated, but not refuted, it is acceptance of that opinion; for instance—"Wings, front and reserve, is the form of an array of the army according to the school of Uśanas (Ch. VI, B.X).

Description in detail is explanation for instance :—"Especially among assemblies and confederacies of king's possessing such characteristics, quarrel is due to gambling, and destruction of persons due to quarrel. Hence among evil propensities gambling is the worst evil since it weakens the ruler." (Ch. III, B.VIII).

Expression of the derivative sense of a word is derivation : for intance, "that which throws off a king from his prosperous career is propensity." (Ch. I, B.VIII).

दृष्टान्तो दृष्टान्तयुक्तो निदर्शनम्–"विगृहीतो हि ज्यायसा हस्तिना पादयुद्धमिवाभ्युपैति" (अधि० 7. अध्या० 3)।

अभिप्लुतव्यपकर्षणमपवर्गः–"नित्यमासन्नमरिबलं वासयेदन्यत्राभ्यन्तरकोपशङ्कायाः" (अधि० 9. अध्या० 2) इति।

परैरसमितः शब्दः स्वसंज्ञा–प्रथमा प्रकृतिस्तस्य भूम्यनन्तरा द्वितीया भूम्येकान्तरा तृतीया (अधि० 6. अध्या० 2) इति।

प्रतिषेद्धव्यं वाक्यं पूर्वपक्षः–"स्वाम्यमात्यव्यसनयोरमात्यव्यसनं गरीयः" (अधि० 8. अध्या० 1) इति।

तस्य निर्णयनवाक्यमुत्तरपक्षः–"तदायत्तत्वात्; तत्कूटस्थानीयो हि स्वामी" (अधि० 8. अध्या० 1) इति।

सर्वत्रायत्तमेकान्तः–"तस्मादुत्थानमात्मनः कुर्वीत" (अधि० 1. अध्या० 19) इति।

पश्चादेवं विहितमित्यनागतावेक्षणम्–"तुलाप्रतिमानं पौतवाध्यक्षे वक्ष्यामः" (अधि० 2. अध्या० 13) इति।

उपमानमुपमानसचिवं निदर्शनमित्याह–दृष्टान्त इत्यादि। इहोदाहरणे गजरूपमुपमानं पदातिरूपोपमानसहितमुपात्तमिति बोद्धव्यम्।

कश्चिद् विधिमुत्सर्गेणाभितो व्यापकं कृत्वा व्याप्यत्वेनानिष्टाद् विषयादपोहनमपवर्ग इत्याह–अभिप्लुतेत्यादि। अभिप्लुतव्यपकर्षणम् अभिप्लुतस्य अभितः प्रसरतः व्यपकर्षणम्।

स्वसंज्ञामाह–परैरित्यादि। असमितः असङ्केतितः। इह प्रथमा प्रकृतिः द्वितीया तृतीयेति स्वपरिभाषिता संज्ञा।

पूर्वपक्षोत्तरपक्षयोर्लक्षणादिकं 'प्रतिषेद्धव्यं वाक्यम्' इत्येवमादि स्पष्टार्थम्।

एकान्तमाह–सर्वत्रेत्यादि। सर्वत्र आयत्तं देशकाले सर्वस्मिन्नप्यवर्ज्ये यत्, स एकान्तः। उदाहरणे उत्थानस्यैकान्तिकत्वं स्पष्टम्।

अनागतावेक्षणम् अतिक्रान्तावेक्षणं नियोगो विकल्पः समुच्चय इत्येतेषां विवरणवाक्यानि 'पश्चादेवम्' इत्यादीनि सुबोधानि।

The refernece to a fact to illustrate a statement is illustration, for instance—"In war with a superior, the inferior will be reduced to the same condition as that of a foot soldier fighting with an elephant." (Ch. III, B. VII).

Removal of an undesired implication from a statement is exception, for example—"A king may allow his enemy's army, to be present close to his territory, unless he suspects of the existence of any internal trouble." (Ch. II B.IX).

Words which are not used by others in the special sense in which they are used by the author are his own technical terms, as for example—"He who is close to the conqueror's territory is the first member; next to him comes the second member; and next to the second comes the third". (Ch. II, B.VI)

The citation of another's view to be refuted is prima facie view; for instance—"Of the two evils, the distress of the king and that of his minister, the latter is worse." (CH. I, B.VIII)

A settled view is rejoinder, for instance—"The distress of the king is worse, since everything depends upon him; for the king the central pivot, as it were." (Ch. I, B.VIII).

That which is universal in its application is conclusion, or an established fact; for instance—"A king should ever be ready for manly effort (Ch. XIX. B.I.)

Drawing attention to a later chapter is reference to a subsequent portion, for example—"We shall deal with balance and weights in the chapter on the superintendent of weights and measures." (CH. X, B.II).

पुरस्तादेवं विहितमित्यतिक्रान्तावेक्षणम्–"अमात्यसम्पदुक्ता पुरस्तात्" (अधि० 6. अध्या० 1) इति।

एवं नान्यथेति नियोगः–"तस्माद् धर्ममर्थं चास्योपदिशेन्नाधर्ममनर्थं च" (अधि० 1. अध्या० 17) इति।

अनेन वानेन वेति विकल्पः–"दुहितरो वा धार्मिष्ठेषु विवाहेषु जाताः" (अधि० 3. अध्या० 5) इति।

अनेन चानेन चेति समुच्चयः–"स्वसञ्जातः पितृबन्धूनां च दायादः" (अधि० 3. अध्या० 7) इति।

अनुक्तकरणमूह्यम्–"यथावद् दाता प्रतिग्रहीता च नोपहतौ स्यातां, तथानुशयं कुशलाः कल्पयेयुः" (अधि० 3. अध्या० 16) इति।।

एवं शास्त्रमिदं युक्तमेताभिस्तन्त्रयुक्तिभिः।
अवाप्तौ पालने चोक्तं लोकस्यास्य परस्य च।।
धर्ममर्थं च कामं च प्रवर्तयति पाति च।
अधर्मानर्थविद्वेषानिदं शास्त्रं निहन्ति च।।

ऊह्यमाह–अनुक्तेत्यादि। अनुक्तस्य करणम् ऊहनम्। इहोदाहरणे 'यथावत्' इति पठ्यते। तेन तृतीयाधिकरणषोडशाध्यायस्थस्य 'यथा च दाता' इत्यस्य स्थाने 'यथावद् दाता' इत्यपि पाठसत्तानुमीयते। यथावदित्यस्य च यथेत्यर्थः।।

इत्थं सपरिकरं शास्त्रार्थं परिसमाप्य तदध्ययनप्रयोजनानि श्लोकाभ्यां संगृह्णाति–एवं शास्त्रमित्यादि। अवाप्तौ योगे। पालने क्षेमे। अस्य लोकस्य ऐहलौकिकस्य पुरुषार्थस्य। परस्य पारलौकिकस्य। उभयलोकयोगक्षेमसाधकतां 'धर्ममर्थं च' इत्यादिश्लोकेन स्पष्टयति। तत्रार्थकामावैहलौकिकौ पुरुषार्थौ, धर्मः पारलौकिक इति विवेकः। ननु अस्मिन् शास्त्रे गूढपुरुषप्रणिधानादिभिरुपायैः परवञ्चनानि नानारूपाणि कर्तव्यतयोपदिश्यन्ते, उपांशुवधादीनि च परहिंसनानि; तत् कथमिदं धर्मस्य प्रवर्तकं पालकं च भवतीति चेद्, उच्यते–प्रजापरिरक्षणं हि नाम राज्ञो धर्मः। तच्च धर्मपरेण विजिगीषुणा सम्यङ् निर्वर्त्यमानं धर्मपरा अपि सामन्ताः शत्रूभूय रागवशादसहमानाश्च परभूमिकामुकाश्च विचित्रैः पापिष्ठोपायप्रयोगैर्विहन्तुं स्वभावात्

The observance that is has already bean spoken of is refernece to a previous portion; for example—"The qualifications of a minister have already been explained." (Ch. I, B. VI).

Statement like—"Thus and not otherwise" is command; for instance—"Hence he should be taught the laws of righteousness and wealth, but not unrighteousness and non-wealth" (Ch. XVIII, B.I.)

Statement like "This or that is alternative, for instance—"four daughters born of approved marriage." (Ch. IV, B.III.)

Statement like "both with this and that" is compounding together, for example—"Whoever is begotten by a man on his wife is agnatic both to the father and father's relatives". (Ch. VII, B.III).

Which requires to be determined after consideration is called determinable fact, as for instance– "Experts shall determine the validity or invalidity of gifts, so that neither the giver nor the receiver is likely to be hurt thereby." (Ch. XVI, B.III.)

Thus this science conforming to these arrangement of divisons, is composed as a guide to acquire and to secure both this and the other world.

In view of this science, one can not only set on foot righteous, economical and aesthetical acts and maintain them, but also put down unrighteous, uneconomical and displeasing acts.

येन शास्त्रं च शस्त्रं च नन्दराजगता च भूः।
अमर्षेणोद्धृतान्याशु तेन शास्त्रमिदं कृतम्।।

।। इति कौटलीयार्थशास्त्रे तन्त्रयुक्तौ पञ्चदशाधिकरणे प्रथमोऽध्यायः
तन्त्रयुक्तयः। आदितः पञ्चाशच्छततमोऽध्यायः।
एतावता कौटलीयस्यार्थशास्त्रस्य तन्त्रयुक्तिः
पञ्चदशमधिकरणं समाप्तम्।।

दृष्ट्वा विप्रतिपत्तिं बहुधा शास्त्रेषु भाष्यकाराणाम्।
स्वयमेव विष्णुगुप्तश्चकार सूत्रं च भाष्यं च।।

प्रयतन्ते। ईदृशे समुदाचारे राज्ञामौत्सर्गिके सति विद्याविनयवता आत्मसम्पद्युक्तेन केनचिदपि राज्ञा परैरबाध्यमानेन वा, परान् अबाधमानेन वा, परप्रवर्तितान् आत्मोपघातान् अप्रतिकुर्वता वा, न कदाचिदपि स्वस्थेन स्थातुं शक्यं, न चानारब्धपरोत्पादितानर्थप्रतीकारेण स्वराज्यरक्षणं सम्यङ् निर्वर्तयितुं शक्यम्। अतः स्वराज्यपरिरक्षणरूपधर्मसम्यङ्निर्वृत्तये परवञ्चनानां परहिंसनानां च विचित्राः प्रकाराः प्रतिकार्यत्वबुद्ध्या जिज्ञासिता एव राज्ञां भवन्तीति तदुपदेशपरमिदं शास्त्रम् अनर्थनिवर्तनद्वारेण यथोक्तधर्मसाधकं भवत्येवेति सुष्टूक्तं 'धर्मं प्रवर्तयति पाति च' इति।।

तदेतदतिमहच्छास्त्रं कर्तुर्नैपुण्यं किं केवलवाक्यमात्रगुम्फने विश्रान्तम्, आहोस्विच्छास्त्रार्थानुष्ठानेऽपि प्रसृप्तमिति यदि कस्यचित् सन्देहः स्यात्, तमपाकर्तुं ग्रन्थकार आत्मनः प्रकृतशास्त्रार्थानुष्ठानानुष्ठापन-प्रत्यक्षिततदीयफलतामाविष्करोति–येनेत्यादि। शास्त्रं धातुकौटलीयादिकमितरच्छास्त्रजातम्। इदं शास्त्रम् अर्थशास्त्रम्। नन्दराजभूम्युद्धरणकथा तु विष्णुवायुपुराणादेरनुसन्धेया। अत्र चाणक्यविष्णुगुप्तापरपर्यायस्य कौटल्यस्य शास्त्र-शस्त्र-नन्दराजभूम्युद्धर्तृत्वलक्षणेनासाधारणरूपेणाभिधानं पर्यायोक्तं प्रयोजयति।।

अथात्मनः सूत्रभाष्योभयकर्तृत्वोरीकरणे कारणमाह–दृष्ट्वेत्यादि।।

श्रीमूले कौटलीयार्थशास्त्रस्य विवृताविदम्।
तन्त्रयुक्त्याह्वयं पञ्चदशाधिकरणं गतम्।।

गणपतिरिति कश्चिद् ब्राह्मणस्ताम्रपर्णी-
तटजुषि तरुवैनाम्न्यग्रहारेऽभिजातः।
नरपतिनयसर्वस्वोपदेशप्रधानं
व्यवृत विपुलयत्नः कौटलीयार्थशास्त्रम्।।

।। इति श्रीवञ्चिमण्डलमहाराजाश्रितस्य ताम्रपर्णीतीरवर्त्तितरुवाग्रहारा-
भिजनस्य श्रीसीताम्बाश्रीरामसुब्रह्मण्यार्यसूनोर्महामहोपाध्याय-
गणपतिशास्त्रिणः कृतिषु कौटलीयार्थशास्त्रव्याख्यायां
श्रीमूलाख्यायां तन्त्रयुक्तौ, पञ्चदशेऽधिकरणे
प्रथमोऽध्यायः तन्त्रयुक्तयः, आदितः पञ्चाशच्छततमः।।
तन्त्रयुक्तिः पञ्चदशमधिकरणं समाप्तम्।।

This science has been made by him who from intolerance (of bad rule) quickly rescued the scriptures and the science of weapons and the earth which had passed the Nanda king.

Thus the one hundred and fiftieth chapter of the Arthaśāstra of Kauṭalya comes to an end. Her ends the first chapter of the fifteenth Adhikaraṇa dealing with the 'Division of the treatise'.

The Fifteenth Adhikaraṇa is concluded.

Having noticed the discrepancies in several ways on the part of the writers of commentaries on the Śāstras, Viṣṇugupta himself has undertaken to compose these aphorisms as well as commentaries on them.

कौटलीयार्थशास्त्रं सम्पूर्णम्।

शुभं भूयात्।।

APPENDIX

Vol. I

INTRODUCTION

(of T. Ganapati Sastri)

1. Necessity for an Improved Edition of the Arthaśāstra of Kauṭaiya

It gives me great pleasure to announce that the Trivandrum Sanskrit Series has now been enriched by the addition of the important edition of this work based on a single manuscript was first brought out in the year 1909 by Mr. Shāma Sāstrī, B.A., Ph.D., in the Mysore Government Sanskrit Series. When I read through it with an amount of concentration which the rareness and the merit of the work would demand, I found it abounded with errors, such as, the word of a previous sentence joined to a subsequent sentence and vice versa. The work has apparently a simple style and a choice vocabulary, but the nature of the subjects dealt with is such that even a talented paṇḍit cannot hope to easily understand it. What then will be the condition if it contains errors too? It then struck me that a fresh edition, bad on sufficient manuscript materials, was indispensable.

2. Acquisition of New Manuscripts

Accordingly, I made a search for new manuscripts and lighted upon two plam-leaf manuscripts of the work among a large number of other important works in the library of Svāmiyar Maṭham at Thiruppārpu near Kottayam in North Travancore. They are complete and written in Malayalam characters and almost free form errors. One of them, marked क in this edition, appears to be three or four centuries old and many of its leaves are either extremely decayed or missing. The other marked ख is a recent manuscript and is about a century old. The Madras Government Oriental Manuscripts Library also contains two manuscripts in Malayalam characters belonging to the Rājā of Edappalli in the Travancore State, while the other in Telugu character, Transcribed from an incorrect Telugu manuscript beginning from the 7th prakaraṇa in the Kaṇṭakaśodhana Adhikaraṇa. These two are marked ग and घ respectively and variants have been taken from them. A fifth manuscript copy also was found to exist in the Government Mss. Library Cochin, but this was even more worn-out than the manuscript क. It

bears striking resemblances to the latter in respect of size, characters and hand-writing. But in view of its exceedingly decayed condition, I have not made use of it.

3. Necessity for Adding a Commentary to the Text

When I set about revising the text with the help of these materials, I heard that Mr. Shāma Sāstrī had rendered his edition into English. I obtained a copy of it in order to see whether it would be of any use to my edition. But it seemed to me that many passages wer not correctly translated. For example :

मर्यादां स्थापयेदाचार्यानमात्यान् वा य एनमपायस्थानेभ्यो वारयेयुः, छायानालिकाप्रतोदेन वा रहसि प्रमाद्यन्तमभितुदेयुः ।।

(1-अधि. 7-अध्या.)

After giving general instruction in regard to some of the duties of kings, Kauṭalya mentions in the above passage a the supreme duty of making Ācāryas and ministers a barrier, as it were of the king. The meaning of the passage is, that a king should appoint, as a barriers, either Ācāryas as or Ministers who would boldly and effectively check him whenever he shows inclination to stray away from the path of righteousness. Here Kauṭalya gives expression to a noble conception of Government, the summum bonum of the subjects, namely, a King, though he has control over all his subjects, should appoint certain persons who would keep him under control. Mr. Shāma Sāstrī has taken the passage in quite a different sense. He renders it thus : "those teachers and ministers who keep him from falling a prey to dangers, and who, by striking the hours of the day as determined by measuring shadows warn him of his careless proceedings even in secret shall invariably be respected."I do not see how this meaning was made out. If the word मर्यादा is taken as meaning "respect" in Sanskrit as it does celloquially in Tamil, Telugu and Canarese, those who study the Arthaśāstra will not grasp the real meaning and perceive the noble conception of Ācārya Kauṭalya. Now, it appeared to me that the purification of the text alone will not suffice, that the meaning has also to be preserved from misinterpretations and, to attain this object, a commentary should also be added to the text.

4. Fragments of Ancient Commentaries Secured

After a persistent search, I obtained manuscripts of two commentaries from the Madras Government Oriental library. One of them was fragmentary copy of a learned Sanskrit commentary, called Paratipadapañcikā by Bhaṭṭasvāmin, containing the portion from the 8th to the last chapter of the second adhikaraṇa only. The other contained a portion of a commentary known as Nyāyacandrikā by Mādhavayajvan from the 7th Adhyāya in the

7th adhikaraṇa up to a protion of the 4th adhyāya in the 12th adhikaraṇa. Their source appears to be a plam-leaf manuscript belonging to the Kerala country. But they were so full of errors and gaps that it seemed a hopeless task to make anything out of them without the help of better manuscripts. In these circumtances and as there appeared to be no chance of discovering other manuscripts, I did not think it advisable to send the fragments to the press. But I worked at them strenuously and understood the text-portions handled therein. Besides, a plam-leaf manuscript of an ancient Malayalam version of the Arthaśāstra on the line of Bhaṭṭasvāmin's commentary was found to exist in the Palace Library. It runs up to the end of the 7th adhikaraṇa and appears to be about two or three centuries old. An exactly similar copy was also found in the Madras Government Oriental Manuscript Library and I had occasion to make use of it. But the copies of the Malayalam version were defective, containing omissions of many passages, of even five or six chapters consecutively in one place; yet they were of considerable help to me in determining the correct reading and in understanding the text. These were all the materials I had the good fortune to collect.

The work teems with several topics, which, owing to their technical character, can be grasped only with the help of traditional instruction or commentaries. In the absence of these materials, our ingnorance in regard to many topics would perpetual.

5. Preparation of a New Commentary

When the meaning of the text was somewhat grasped after spending many laborious days over the materials, the desire arose in me to place it before the public. Since no ancient commentary in its publishable shape is available, I thought of writing one of my own and wrote it on the method of the ancient commentaries. I have given my commentary the significant name of "Śrīmūlam"—literally, the source of prosperity—after the name of his Highness the Mahārāja of Travancore Śrī Mūlam Tirunāl, whose enlightened patronage has ever been the pole-star in my literary enterprises. The text along with the commentary is now being printed.

6. Distinguishing Features of the New edition

In the present edition, the text has undergone a scrutinising search in the light of the new materials and consequently, it can be said to have assumed quite a new shape. Variant reading in good numbers and of considerable importance, that are not seen in the Mysore edition, have been inserted while spurious ones are all eliminated and other errors rectified. Such of the variants that have special import to convey are dealt with in the commentary. Improvements of this nature will be obvious from a perusal of the text and the commentary.

7. The Book Divided into three Parts

The text together with the commentary has grown bulky and it is therefore proposed to issue it in three parts. The first is now issued; the second and the third will follow in due time.

There are 15 adhikaraṇas in this work and the first part contains the first two adhikaraṇas. The next six adhikaraṇas will go to form the second part and the rest the third. The first adhikaraṇa known as वैनयिकाधिकरण consists of 21 chapters and the second अध्यक्षप्रचाराधिकरण is made up of 36 chapters. The contents of these two adhikaraṇas are given in the list attached to this part.

8. Kauṭalya and his Other Names

The author of this work is the venerable ācārya, known by the three names, Kauṭalya, Chāṇakya and Viṣṇugupta. He was called Kauṭalya having been born in Kuṭala Gotra and Chāṇakya after his native land Chaṇaka. The name his father during the nāmakaraṇa ceremony. Kauṭilya (इकारमध्य) is certainly a misnomer. For, neither the term Kauṭilya nor its root Kuṭila is explained in Nighaṇṭus as Gotrarṣi and crooked. On the other hand, the word Kuṭala is mentioned by Keśavasvāmi in his Nānārthārṇa-vasaṁkṣepa as meaning both Gotrarṣi and an ornament—

अथ स्यात् कुटलो गोत्रकृत्यृषौ पुंसि नप् पुनः।
विद्यादाभरणेऽथ त्रिः कुटिलं कुञ्चिते भवेत्।
तगरे तु क्ली तगरपादिकायां स्त्रियामिति।।

From this it is clear that Kauṭalya is the correct name having for its root Kuṭala. It is further corroborated by the fact that all the manuscripts of the text and the commentaries noticed before, read throughout as Kauṭalya and not Kauṭilya. But the mistake was observed and corrected by me only after the first 40 pages were printed.

9. Date of Kauṭalya

History has it that Ācārya Kauṭalya, having been slighted by the Nandas, overthrew them and placed Chandragupta Maurya on the throne of the Magadha empire. The Archaeogical researches of India have shown that Chandra a to reigned from 321-298 B.C. and Kāmandaka and other later writers on Indian polity refer to Kauṭalya and his Arthaśāṣtra as authority for their works.

It may be said that Viśvarūpācārya alias Sureśvarācārya, a disciple of the great Śaṅkarācārya, does not mention Kauṭalya and his Arthaśāstra when dealing with topics relating to Arthaśāstra in his commentary, Bālakrīḍā, on the Yājñavalkyasmṛti (T.S.S. No. 74). But, from this, it must not be hazarded that either Kauṭalya was not earlier than Viśvarūpa or

unknown to the latter. For, though Viśvarūpa knew the Arthaśāstra of Kauṭalya, there are grounds to justify his omission to make mention of it, as will be seen from the following quotation from my introduction to the Bālakrīḍā—

"It is, however, a special feature of the Bālakrīḍā a evidencing to its high antiquity as well as its author's regard for ancient works, that among the multitude of works and authors that it cites as authority, there is none that is generally assigned to the Christian era, but all of them, being Vedic works and Smṛtis of the Vedic type and their authors, belong to the centuries that preceded Christ. Then again, when context required quotations from an authority on the Arthaśāstra, our author does not resort to Kauṭalya but to Bṛhaspati* and Viśālākṣa, the predecessors of Kauṭalya, as is seen from the following—

यदाह बृहस्पति :–स्वधर्मविदनुरक्तःशुचिरनुद्धत उद्युक्तो देशकालविधीतिनिगमेतिहासकुशलोऽव्यसनी मृदुरर्थशास्त्रकृतयोग्यो हस्त्यश्वपुरुषाचाराहोरात्रयाम निर्गमाविनिश्चितमतिश्च स्वपरबलबलाबलज्ञो बलाधिकृतः सेनापतिः स्यात्। कुलाढ्य उद्युक्तो मृदुरुदात्तः समरचित्तः शूरोऽनुरक्तोऽभेद्यः पत्तिविशेषज्ञ इङ्गिताकारकुशलः प्रतिहारः स्यात्। वनकुलकालजातिसात्म्यगुणवयः शीलायुरादानगमनकल्पनाविद् व्यपगतभयो विजयोजितमना हस्त्यध्यक्षः स्यात्। क्षेत्रजातिसात्म्यगुणलक्षणवाहनास्वज्ञोत्यर्थसमर्थः शुचिरनुद्धतोऽनुरूपोऽश्वाध्यक्षः स्यात् सन्धिभेदसन्धानस्थानज्ञोऽनुरक्तः शुचिर्दक्षः स्मृतिमान् देशकालज्ञो दर्शनीयो नीतिगतिज्ञः प्राज्ञो वाग्मी दूतः स्यात्। उभयत उत्तमवंशप्रभवः शुद्धो मनुबृहस्पत्युशनःशास्त्रविद् दण्डनीत्यादि कुशलोऽशठोऽजिह्मः सम्मानसम्मानविकृतो विगतभीः कार्याकार्यविनिश्चितमतिरहार्यः सर्वोपधाशुद्धो गूढमन्त्रो मन्त्री स्यात् अविकार्योऽविकलेन्द्रियः प्रतापवान् सुभगः सुमुखोऽकृपणोऽप्रमादी दक्षो दाक्षिण्यचारित्ररक्षणार्थ-मधिकरणसन्दिग्धविवेककृदुपरिकः स्यात्। इति।

(Yājñavalkya Adhyāya I, Śloka 307)

---

* A manuscript of the work called Bārhaspatyasūtra exists in our possession and also a manuscript the Government Oriental Mss. Library Madras; and it has recently been published in Devanāgarī characters, in Lahore. I doubt whether that work is the Arthaśāstra of Bṛhaspati quoted by Kauṭalya. For, no subject of importance pertaining to Arthaśāstra is dealt with in it; its merit as a literary composition is of a poor order and the present quotations from Bṛhaspati are not also found in it. Besides, while Kauṭalya says that, according to the school of Bṛhaspati, the Vidyās are two viz., /Vārta and Daṇḍanīti, "वार्ता दण्डनीतिश्चेति बार्हस्पत्याः" (Vainayikadhikārikā, Adhyāya 2) the statement "दण्डनीतिरेका विद्या" found in the published Bārhaspatyasūtra is a point not in favour of its authenticity. But probably it is a work of trifling interest having a few maxims gathered mainly fromt he Arthaśāstra of Bṛhaspati : just like the small work which with some moral sayings of the Arthaśāstra of Kauṭalya, goes by the name of Chāṇakyanīti or Chāṇakyasūtra and is published as a work of Chāṇakya.

तथाच बृहस्पतिः– 'ब्रह्मशङ्खस्तुतिपुण्याहशब्दैविबुध्योत्थाय सन्ध्यामुपास्य देवपितृब्राह्मणान् मनसा वा नमस्कृत्य धर्मार्थकामभयोपधाशुद्धवञ्चकगृहीतायुधायातयामविश्वासोत्पन्नासन्नपरिवृतः' इति।

(Yājñavalkya Adhyāya I, Śloka 323)

एवञ्च विशालाक्षः–
वन्यान् वनगतैर्नित्यं मण्डलस्थांस्तस्थाविधैः।
चारैरालोच्य सत्कुर्यौजिगीषुर्दूरदीर्वदृढ्।।

(Yājñavalkya Adhyāya I, Śloka 307)

This, I think, is quite as it should be. For it is the proper practice of a commentator that he should supply deficiencies in the statements of an author, advisedly left out to be learnt from other sources, by having recourse to those writers who are known either as ancient or as contemporary authority to the author himself, but not to those that are posterior to the author. Viśvarūpācārya must have taken the Arthaśāstra of Bṛhaspati and Viśālākṣa to be Ārṣa works known to Yājñavalkya's statements, but not from Kauṭalya who was posterior to Yājñavalkya. And as for the fact that Kauṭalya was later than Yājñavalkya there need be no shadow of doubt. When dealing with Pratilomajaputras i.e., sons begotten by men of lower through women of higher castes, Kauṭalya defines Sūtra as a son begotten by a Kṣatriya through a Brāhmaṇa woman and Māgadha a as a son begotten by a Vaiśya through Kṣatriya woman, and hastens to restrict the application of his definition in the case of Sūta of Purāṇic celebrity, and Māgadha the panegyrist, both sprung up from tile holy scrificial ground of the king Pṛthu, by way of saying 'पौराणिकस्त्वन्यः सूतो मागधश्च ब्रह्मक्षत्राद् विशेषः'. (Kauṭalya Adhyāya 64). This means that Sūta otherwise known as Romaharṣana who narrated the Purāṇas to Śaunaka and Māgadha who is mentioned along with Sūta in the Purāṇas, are distinct from Sūta and Māgadha born in the inverse order of castes; and that both of them excel the Brāhmaṇas and castes; and that both of them excel the Brāhmaṇas and Kṣatriyas in purity of birth. This is quite in keeping with the Purāṇas which state.

हस्ते तु दक्षिणे तस्य दृष्ट्वा चक्रं पितामहः।
विष्णोरंशं पृथुं मत्वा परितोषं परं ययौ।।
तस्यैव जातमात्रस्य यज्ञे पैतामहे शुभे।
सूतः सूत्यां समुत्पन्नः सौत्येऽहनि महामते
तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः।।

(Viṣṇu Purāṇa. Aṁśa I Chap. 13)

ब्रह्मणः पौष्करे यज्ञे सुत्याहे वितते सति।
पृषदाज्यात् समुत्पन्नः सूतः पौराणिको द्विजः।।

वक्ता वेदादिशास्त्राणां त्रिकालामलधर्मवित्।

(Agni Purāṇa Chap. 1)

त्वया सूत! महाबुद्धे! भगवान् ब्रह्मवित्तमः।
इतिहासपुराणार्थं व्यासः सम्यगुपासितः।।
त्वं हि स्वायम्भुवे यज्ञे सुत्याहे वितते सति।
सम्भूतः संहितां वक्तुं स्वांशेन पुरुषोत्तमः।।

(Kaurma Purāṇa Chap. 1)

That is Sūta of Purāṇic celebrity, the pupil of Vyāsa, not being born of the womb of a mother, was far above the Sūta of the Pratilomaja class and he was a Brāhmaṇa and an incarnation of God. Hence, it is possible to infer that Kauṭalya otherwise known as Chāṇakya knew well of Sūta, the Purāṇas as well as their wide celebrity. It is certain, therefore, that centuries must have intervened between Sūta and Kauṭalya before the latter could have believed in the works of Sūta as Purāṇas of archaic celebrity. When it is said that Sūta flourished centuries before Kauṭalya, it naturally follows that Yājñavalkya (or a pupil of his), the author of the smṛti, who studied his Yajurveda under Vaiśampāyana, a contemporary of Sūta, also lived long before Kauṭalya.

And accordingly we see that Kauṭalya reveals his high regard for and acquaintance with the Yājñavalkyasmṛti by adopting it ad verbum, ad sensum as well as explaining and supplementing it when the latter treats of Sāhasadandas in the second Adhyāya. The following are quoted here as instances. Here is a śloka from the Yājñavalkyasmṛti :

करपाददन्तभङ्गे छेदने कर्णनासयोः।
मध्यो दण्डो व्रणोद्भेदे मृतकल्पहते तथा।।

and a sentence of similar nature from Kauṭalya is this :—

मृतकल्पमशोणितं घ्नतो हस्तपादपाराञ्चिकं वा कुर्वतः पूर्वः साहसदण्डः। पाणिपाददन्त भङ्गे कर्णनासाछेदने व्रणविदारणे चान्यत्र दुष्टव्रणेभ्यः।

(Dharmasthīya Adhyāya 19)

Here are other ślokas from the Yājñavalkyasmṛti :—

स्वच्छन्दविधवागामी विक्रुष्टेऽनभिधावकः।
अकारणे च विक्रोष्टा चण्डालश्चोत्तमान् स्पृशन्।।
शूद्रप्रव्रजितानां च दैवे पित्र्ये च भोजकः।
अयुक्तं शपथं कुर्वन्नयोग्यो योग्यकर्मकृत्।।
वृषक्षुद्रपशुनां च पुंस्त्वस्य प्रतिघातकृत्।
साधारणस्यापलापी दासीगर्भविनाशकृत्।।

पितापुत्रस्वसृभ्रातृदम्पत्याचार्यशिष्यकाः।
एषामपतितान्योन्यत्यागी च शतदण्डभाक्।।

The following are the parallel sentences from Kauṭalya :—

विधवां छन्दवासिनीं प्रसह्याधिचरतः, चण्डालस्यार्यान् स्पृशतः, प्रत्यासन्नमापद्यनभिधावतो, निष्कारणमभिधावनं कुर्वतः शत्याः (दण्डाः)।

शाक्यजीवकादीन् देवपितृकार्येषु भोजयतः, शत्यो दण्डः।

शपथवाक्यानुयोगमनिसृष्टं कुर्वतो, युक्तकर्मणि चायुक्तस्य, क्षुद्रपशुवृषाणां पुंस्त्वोपघातिनो, दास्या गर्भमौषधेन पातयतश्च, पूर्वः साहसदण्डः।

पितापुत्रयोर्दम्पत्योर्भ्रातृभगिन्योर्मातुलभागिनेययोः शिष्याचार्ययोर्वा परस्परमपतितं त्यजतः स्वार्थाभिप्रयातं ग्राममध्ये वा त्यजतः पूर्व साहसदण्डः कान्तारे मध्यमः।

(Dharmasthīya Adhyāya 20)

Compare one more instance from the Smṛti :

'अबन्ध्यं यश्च बध्नाति बद्धं यश्च प्रमुञ्चति।
अप्राप्तव्यवहारं च स दाप्यो दममुत्तमम्।।

with Kauṭalya's

पुरुषमबन्धनीयं बध्नतो बन्धयतो बद्धं वा मोक्षयतो बालमप्राप्तव्यवहारं बध्नतो बन्धयतो सा सहस्रदण्डाः।

(Dharmasthīya Adhyāya 20)

It can be clearly seen from the above quotations of Kauṭalya that the words in black alone are his own and that the rest are the same as those found in the Smṛti. The word स्वच्छन्द in the line स्वच्छन्दविधवागामी is an adverb an means "of one's own accord but not with the consent of Vidhavā", while च्छन्दवासिनीम् in Kauṭalya means छन्देन वसन्तीम् that is, remaining taciturn without feeling lustful. When Kauṭalya says शपथवाक्यानुयोगमनिसृष्टं कुर्वैतः, we should not take it to the anything other than his comments on अयुक्तं शपथं कुर्वन् of the Smṛti. शपथवाक्यानुयोग means the demand of judges for statements on oath from witnesses and others. It is निसृष्ट i.e., permissible for Judges, they being authorised in it for the conduct of judicial investigations. What is निसृष्ट for one is also युक्त i.e., a right for the same, as it comes within the sphere of one's duties or as it is worthy of being done by the same. While for others it is अनिसृष्ट and अयुक्त as it does not come within the sphere of their duties or as it is not worthy of being done by them. It follows from this that the words अनिसृष्ट, अयुक्त, स्वाधिकाराविषय, and अयुक्तानार्ह are, contrarily. And in the opinion of Kauṭalya this unauthorised demand for statements on oath is what is meant by the word शपथ of the Smṛti. But the Mitākṣara gives quite a different interpretation of the passage without consulting Kauṭalya on the point.

Similarly, we should explain the sentences अयोग्यो योग्यकर्मकृत् and युक्तकर्मणि

चायुक्तस्य to be of the same meaning. योग or नियोग means a privilege and one having योग is युक्त and one deserving of योग is योग्य. Thus the difference been योग्य and युक्त is but nominal and both really mean the same thing.

Again, Yājñavalkya omits to mention the punishment for throwing filth such as urine, dung etc., upon others, but his commentator, Viśvarūpa, tells us that the word fig : निष्ठ्यूत in 'अमेध्यपार्ष्णिनिष्ठ्यूतस्पर्शने द्विगुणः स्मृतः' (याज्ञवल्क्य. अध्या. 2. श्लो० 218) is indicative of and includes also the urine, dun etc. And, what the word निष्ठ्यूत indicates, Kauṭalya expresses explicity in 'तैरेवामेध्यैः पादष्ठीविकायां च षट्पणः । छर्दिमूत्रपुरीषादिभिर्द्वादशपणः ।' Thus, it is evident that Kauṭalya was indebted to the Smṛtis and his position in respect of the Smṛtis was that of a commentator. It, therefore, follows that the contention, namely Yājñavalkya is posterior to Kauṭalya, is untenable.

10. Other works of Kauṭalya

It is clear from a perusal of the Arthaśāstra, that Kauṭalya was master in the varied fields of knowledge, and that he was the possessor of an intuitive vision. Hence, it is not improbable that he should have tried his hand on other Śāstras too. We know that the commentator, Bhattasvāmin, has referred to a work called Dhātu-Kauṭalya in the Ākarakarmāntapravartana and Varāhamihira quotes him in the Bṛhatsaṁhitā thus :

अप्यर्णवस्य पुरुषः प्रतरन् कदाचि–
दासादयेदनिलवेगवशेन पारम्।
न त्वस्य कालपुरुषाख्यमहार्णवस्य
गच्छेत् कदाचिदनृषिर्मनसापि पारम्।।

(Part I. p. 68)

Besides, the author of the commentary, Jayamaṅgala, on the Vātsyāyana Kāmasūtra, commenting on म्लेच्छितविकल्प refers to a work of Kauṭaliya—

तद् यथा कौटलीयं–

दादेःक्षान्तस्य कादेश्च स्वरयोरुभयोरपि।
बिन्दूष्मणोर्विपर्यासाद् दुर्बोधमिति संज्ञितम्।।

11. Archaic Usages

There are some archaic usages in the work such as पश्चाहः, उभयतोरात्रम् and these are reserved for consideration in the last part of the work.

Kauṭalya often refers to his predecessors in the field whose names are as follows.

12. Predecessors of Kauṭalya

(1) Mānavas (the followers of Manu).

(2) Bārhaspatyas (the followers of Bṛhaspati).

(3) Ouśanasas (the followers of Śukra).

(4) Bhāradvāja (Droṇācārya)

(5) Viśālākṣa.

(6) Parāśara (प्रसिद्ध:)

(7) Piśuna (Nārada)

(8) Kauṇapadanta (Bhīṣma)

(9) Vātavyādhi (Uddhava)

(10) Bāhudantiputra (Indra)

Among these ten founders of the school of Arthaśāstra, nothing particular is known about Viśālākṣa, but passages from his Arthaśāstra, cited by Viśvarūpa, have already been given.

13. The Arthaśāstra, a Glorious Work

The Arthaśāstra describes a method of Government by which a king should rule for the welfare of his millions of subjects, just as a learned householder, treading the path of virtue, alert in the performance of his duties, ever cautious and dexterous in preventing the treachery of his enemies, works so ably for the well-being of his own family. There is no legitimate taxation of the subjects, no fair distribution of wealth, which is not touched upon in this work. Kauṭalya advocates a system of watching the conduct of the subjects as well as of officers of grades and of meting out punishment to them when found guilty, which will tend to prevent quarrels between subjects, oppressions by officers and courtiers and seditious propaganda. The institution of espionage is mentioned as the lifeblood of Government a means to ascertain the purity or impurity in the conduct of all subjects. To be brief, protection of one's own kingdom first and when that is ensured, enterprise for the acquisition of enemy's, territories—this is the sum-total of the duties of a king and the best methods of achieving it are discussed fully in the work. In all respect the Arthaśāstra of Kauṭalya surpasses all other similar śāstraic works and we are led to infer that the Government of the ancient king in India, based on the principles of Kauṭalya, existed fo the ultimate benefit of the governed and excited universal admiration.

The publication of an adequate English rendering of the Arthaśāstra, which would be in accord with the correct interpretations proposed in the

commentary now presented to the world, and which would illustrate the text by abundance of historical notes, will prove a very real boon to the cause of the study of Indian polity. I have hopes that the task will be undertaken and accomplished in the not distant future, by a scholarly friend, who has given many years to the study of the Arthaśāstra.

Trivandrum **T. Ganapati Sastri**

4- 6- 1923

उपोद्घातः

दिष्ट्या वर्धते अनन्तशयनसंस्कृतग्रन्थावलिरियम् अर्थशास्त्रस्य कौटलीयस्य सम्यक्संशोधनादि-प्रत्यग्रसमुचितप्रतिकर्मसम्पद्योगसुखोपयोज्यतां नीतस्य चिरादात्मनि ग्रथनमासादयन्ती।

1. अर्थशास्त्रस्य संशोधनावश्यकता।

अर्थशास्त्रं नामेदं हस्तलिखितैकादर्शाश्रये श्रीमति शामशास्त्रिणि शोधके मैसूरराजकीयग्रन्थमालायां 1909 तमे क्रैस्ताब्दे प्रथमं प्रकाशितमासीत्। अपूर्वे ग्रन्थरत्नमित्यास्थोद्रेकप्रगुणितावधानचेतसा तस्मिन् मया सपदि परिशीलिते बह्व्यः पाठाशुद्धय उपलब्धः, पूर्ववाक्योज्यस्य पदस्योत्तरवाक्येन सह योजनमुत्तरवाक्ययोज्यस्य पूर्ववाक्येन सह योजनमित्येवञ्जातीयं च बहुशो दृष्टम्। ललितोचितपद-वाक्यरचनरुचिरोऽप्ययं शास्त्रग्रन्थः प्रमेयमाहात्म्यात् पण्डितेनाप्यभियोगवता दुखबोधार्थः; सोऽपि चेदशुद्धपाठः का वार्तेति चिन्तयतो मे तदैवाङ्कुरितः कश्चिदभिप्रायः—अर्थशास्त्रस्यानेकादर्शसंवादनेन मूलं सम्यक् शोधयित्वा मुद्रयेयं, कथमन्यथा ग्रन्थस्याविकृतं स्वरूपं कृतरक्षं स्यादिति।

2. नवादर्शार्जनम्।

तत आदर्शान् प्रयत्नतो विचिन्वता एतद्राज्यान्तर्गततिरुवार्पुप्रदेशवर्तिनो यतीन्द्रमठस्य ग्रन्थालयाज्ज-राजर्जरमहार्घनानाग्रन्थावतंसिताद् द्वौ अर्थशास्त्रस्य कौटलीयस्य समग्रौ तालपत्रादर्शौ केरलीयलिपी शुद्धप्रायौ मया समासादितौ। तयोरकेः जीर्णत्रुटितबहुपत्रः त्रिचतुरशतवर्षवृद्धप्रेक्षणीयः कसंज्ञः, अन्य उपशतवर्षदेशीयो दृढपत्रः श्वसंज्ञः। मद्रास्राजकीयहस्तलिपिग्रन्थसंग्रहे च द्वावादर्शौ दृष्टौ, ययोरेक एतद्राज्यान्तर्गतेटप्प-ळ्ळिराजभवनसम्बन्धिकेरलीयलिपितालपत्रग्रन्थात् प्रतिरूपितः समग्रः शुद्धप्रायः, अपर आन्ध्रलिपिग्रन्थाद-शुद्धप्रायात् कुतश्चित् प्रतिरूपित आन्ध्रलिपिः कण्टकशोधनाधिकरणीयसप्तमप्रकरणोपक्रमः। आभ्यां ग. घ. संज्ञाम्यां पाठभेदाः सर्वे पृथगुच्चित्य संगृहीताः। पञ्चमोऽपि कश्चिदादर्शः कोच्चिराजकीयग्रन्थशालायां दृष्टः। किन्तु सोऽस्मदीयस्य कसंज्ञादर्शस्य ज्येष्ठो लिप्याकृतिपरिमाणैः समान एकहस्तलिपिकरः प्रतिपत्रत्रुटितभूयिष्ठांशः स्पर्शासह उपयोगाक्षम इत्युपेक्षणीयः संवृत्तः।

3. व्याख्यानयोनावश्यकता।

इमामादर्शसम्पदमवष्टभ्यारब्धे कौटलीयस्य मया संशोधने कापि वार्ता समाकर्णिता कौटलीयस्य नाम मैसूरराजकीयग्रन्थमालायां प्रकाशितस्वरूपस्य शोधकः कमप्याङ्गलभाषानुवादमपि प्रणीय प्रकाशितवानिति। समानीतश्चासौ आङ्गलभाषानुवादः, सोऽस्मद्यत्नस्य किञ्चिदुपकरिष्यतीत्याशया। किन्तु तस्योपोद्घातेऽनुवादकेन स्वयमेवोक्तः नायं मूलस्याभिरूपोऽनुवाद इति। पुस्तके च बहवो मूलांशाः कृतसन्देहाङ्का एव दृष्टाः। अकृतसन्देहाङ्केष्वपि तेषु वहवोऽसम्यक्प्रकाशितार्था उपलब्धाः। तत्रैकमुदाहरणार्थं

दर्शयामः-अस्ति हि प्रथमाधिकरणस्य सप्तमाध्यायशेषे वाक्यं-"मर्यादां स्थापयेदाचार्यानमात्यान् वा य एनमपायस्थानेभ्यो वारयेयुः, छायावालिकाप्रतोदेन वा रहसि प्रमाद्यन्तमभितुदेयुः" इति। राजर्षिवृत्तस्य काश्चित् प्रकारान् प्रथममभिधाय सर्वोत्कृष्टः प्रकारोऽनेन वाक्येनोपदिश्यते आचार्यामात्यमर्यादीकरणं नाम! उत्पथप्रसक्तमात्मानमनिवारिताः सन्तो ये वारयेयुः, तथाविधानाचार्यानमात्यांश्चात्मनो मर्यादामिव मर्यादाम् अलङ्घनस्थानं स्थापयेत् आत्मनो नियामकान् कल्पयेदिति तदर्थः। अर्थविशेषमीदृशमुपदिशता चाचार्येण राजा सर्वनियामकं सन्तमात्मानमपि नियन्तुं काञ्चिदवश्यमधिकारयेदित्येवं रूपः सर्वजनैकान्तहितः परमोदारः स्वाभिप्राय आविष्कृतो भवति। स एष वाक्यस्यार्थ आङ्गलभाषानुवादकेन नोपात्तः किन्वन्यथैवार्थः प्रतिपन्नः। स एवं ह्याह-'आचार्यानमात्यान् वा पूजयेदि'ति। अयमर्थः केन पदेन कयावृत्या समर्पित इति न वयं विद्मः। यदि मर्यादाशब्दस्य कर्णाटद्रमिलान्ध्रादिभाषाव्यवहारगतवहुमानार्थत्वप्रसिद्धिविस्रम्भत् संस्कृतेऽपि बहुमानार्थत्वमुच्येत, हन्त तर्ह्यनुवादप्रमाणका व्युत्पित्सवः पदार्थमप्रहिताः स्युः, अभिप्रायमहिमानं च यथोक्तमाचार्यस्यनुवादभक्ता अग्राहिताः स्युः। अन्यदप्येवञ्जातीयमनुवादे बहु द्रष्टुं शक्यम्। तेनेयं मे बुद्धिरुत्पन्नाकौटलीयस्य मूलशोधनमात्रेण न किञ्चित् कृतं स्यात्, अर्थोऽपि तस्या निदर्शितगुणाङ्गलभाषानुवादादिसुलभान्योऽप्रतिपत्तिभ्यो रक्षणीय इति, अर्थात् अर्थशास्त्रं व्याख्यानोपेतं कृत्वा प्रकाशयेयमिति।

4. प्राचीनव्याख्यांशलाभः।

अथ कृते व्याख्याविचये प्रतिपदपञ्चिका नाम श्रीभट्टस्वामिप्रणीता प्रौढस्वभावा काञ्चिद् व्याख्या द्वितीयाधिकरणाष्टमाध्यायादिस्तदधिकरणसमाप्त्यन्ता मद्रास्राजकीयग्रन्थशालातो लब्धा, अन्या च श्रीमाधवयज्वप्रणीता नयचन्द्रिकाख्या सप्तमाधिकरणीयसप्तमाध्यायादिर्द्वादशाधिकरण चतुर्थाध्यायैकदेशावसाना। उभे अप्येते केरलदेशलब्धजीर्णतालपत्रमातृकातः प्रतिरूपिते। अशुद्धयश्च तयोस्तथाविधाः, यथा मातृकान्तराण्यनुपजीव्य शोधयितुं न शक्याः, बहुलाश्च ताः। ग्रन्थपङ्क्तयश्च तयोर्बहुत्र परिलुप्ताः। अस्यामवस्थायां मातृकान्तरोपलम्भे च सम्भावनापदवीदवीयसि तयोः शिरः पादहृदविकलयोर्व्याख्याखण्डयोर्मुद्रणं समीचीनं न भवेदिति नादृतम्। किन्तु मया तयोस्तीव्रमभियुञ्जानेन तत्तन्मूलार्था अवगन्तुं पारिताः। किञ्च, प्राचीनकेरलभाषात्मकः कश्चित् तालपत्रग्रन्था द्वित्रशतवर्षवृद्धः कौटल्यार्थशास्त्रार्थ प्रतिपादनपरो भट्टस्वाम्यनुयायी अत्रत्यराजकीयग्रन्थशालायां सप्तमाधिकरणावधिरुपलब्धः। यस्य सर्वात्मना सधर्मा मद्रासराजकीयग्रन्थशालायामप्यादर्शोऽस्ति। यद्यप्ययमशुद्धोऽन्तरान्तरा गलितबहुवाक्यः पञ्चषाध्यायविकलश्च, तथापि तन्मूलार्थपरिज्ञानं प्रति मूलपाठनिश्चयं प्रति च स मे महान् सहायोऽभवत्। सेयमियती प्रमेयज्ञानसामग्री भाग्यवशात् समहिता सम्पन्ना। अर्थो नाम साम्प्रदायिकोपदेशैकसमधिगम्याः शास्त्रेऽस्मिन् बहुतराः। न चेदियती यथोक्ता सामग्री लब्धाभविष्यत्, तेष्वस्माकमान्ध्यं कतिपयेषु शाश्वतिकमेवाभविष्यत्।

5. नवव्याख्यानरचना।

तदेवम् उपलब्धेषु मूलकोशेषु व्याख्यांशेषु च चिराभियोगात् कथञ्चिदवगतोऽर्थशास्त्रस्य मूलार्थः। ततस्तस्मिन् व्युत्पित्सून् प्रति प्रकाशयितव्ये तं पुरातनव्याख्यावाक्यानामलाभादात्मगुम्फितैरेवोपलब्धप्राग्व्याख्यानच्छायानुजीविभिर्वाक्यैर्यथाप्रमाणं प्रकाशयेयमित्यभिसन्धिमान् अभूवम्। व्यरचयं च महता यत्नेन यथाभिसन्धि व्याख्यानम्।

मदीयस्य व्याख्यानप्रणयनसमुद्यमस्यारम्भे सफलत्वसम्पत्तौ च मद्रक्षकस्य महामहिम्नो वञ्चिमण्डल-

किरीटपते: श्रीमूलरामवर्ममहाराजस्य कृपैवैका श्रीपद्मनाभकृपानुकारिणी कारणमभवदिति कृत्वा व्याख्यानस्यास्य तन्नामधेयसम्बन्धयुक्तं व्यपदेशं समुचितं मन्यमान: श्रीमूलमिति संज्ञां श्रिय: सम्पदो मूलं व्याख्येयग्रन्थद्वारेणेत्यनुगतार्थामकार्षम्। अस्मन्महाराजो हि मूलनक्षत्रयुक्तकालजातत्वात् श्रीमूलाख्यया लोके प्रख्यायते। तेनानेन व्याख्यानेन समुपेतं कृत्वार्थशास्त्रमिदानीं मुद्रयितुमुपक्रान्तम्।

6. नवगतविशेष:।

अस्य तु संशोधितस्य स्वरूपं संस्कारविशेषपरिग्रहात् प्रत्यग्रतामिव प्रतिपन्नम्। अत्र हि उपलब्धान् मूलादर्शान् व्याख्यांशान् भाषाटीकां चानुरुध्य पाठा: परीक्षिता:; मैसूरपुस्तकानुपलब्धा बहव: साधुपाठा: संयोजिता:, तद्दृष्ट्या अपपाठा निरस्ता:, अन्यच्च तद्दृष्टमसौष्ठवं परिहृतम्। अर्थवन्त आदर्शोपलब्धा: पाठभेदा व्याख्यायामुपादाय प्रदर्शिता:। एवञ्जातीयं सौष्ठवं मूलव्याख्ययो: परिशीलने सुबोधमिति न विविच्यते।

7. सम्पुटविभागा:।

अस्य विपुलत्वात् त्रिभि: सम्पुटै: प्रकाशनमुचितमिति प्रथमोऽयं संपुट आदौ प्रकाश्यते। द्वितीयतृतीयौ च सम्पुटौ क्रमेण प्रकाश्यमचिराद् गमिष्यत:।

पञ्चदशाधिकरण्यात्मकस्यार्थशास्त्रस्याद्यमधिकरणद्वयं प्रथमसम्पुटेऽस्मिन् निवेशितम्। तत: षडधिकरणी द्वितीयमध्यक्षप्रचाराधिकरणं षट्त्रिंशदध्यायात्मकम् । तद्गताश्च विषया: प्रमेयानुक्रमण्यां समुद्दिष्य:।

8. कौटिल्यादिसंज्ञा:।

अस्य शास्त्रस्य प्रणेता तत्रभवान् आचार्य: कौटल्यश्चाणक्यो विष्णुगुप्त इति त्रिधा संज्ञायते। कुटलो नाम गोत्र प्रवर्तकर्षि: तस्य गोत्रापत्यं कौटल्य इति संज्ञा गोत्रनिबन्धना, चणको देशविशेषस्तत्सम्बन्धाच्चाणक्य इति देशनिबन्धना, विष्णुना गुप्तो रक्षित इत्यर्थिका विष्णुभक्तेन पित्रा नामकरणसंस्कारकाले कृता विष्णुगुप्त इत्येषा सांस्कारिकी संज्ञा। अत एवाह कामन्दकीयनीतिसार-जयमङ्गला – "विष्णुगुप्तायेति सांस्कारिकी संज्ञा, चाणक्य: कौटल्य इति द्वे जन्मभूमिगोत्रनिबन्धने" इति। कौटिल्य इतीकारमध्योऽपपाठ:, तस्य वा ष्यञ्प्रकृते: कुटिलशब्दस्य वा गोत्रर्षिवक्रोभयार्थताया अभिधानग्रन्थे 'क्वचिदप्यर्शनात्। तथा च नानार्थार्णव-संक्षेपे केशवस्वाम्याह–

अथ स्यात् कुटलो गोत्रकृत्यृषौ पुंसि नप् पुन:।
विद्यादाभरणेऽथ त्रि: कुटिलं कुञ्चिते भवेत्।।
तगरे तु क्ली तगरपादिकायां स्त्रियामिति। इति

अत: कुटलशब्दप्रकृतिकयञ्प्रत्ययान्त एवायं कौटल्यशब्द इति निर्णय:। अत एव सर्वेषु मूलादर्शेषु उपलब्धव्याख्यानांशेषु भाषाटीकायां च कौटल्यइत्येव निरिकारा: पाठा ऐकरूप्येण दृश्यन्ते, न तु कौटिल्य इतीकारमध्य: पाठ: क्वचिदपि। स पुनरपपाठोऽन्धपरम्पराप्राप्तोऽस्यापि ग्रन्थसम्पुटस्य चत्वारिंशत्तमान्तेषु पत्रपृष्ठेष्वनवधानादापतित:। तत उपरिष्यत् तु साधुपाठ एवं निवेशित:।

9. कौटल्यस्य काल:।

आचार्यचाणक्यो मगधेषु कुसुमपुरे स्वपरिभवामर्षी तदीश्वरान् नन्दानुन्मूल्य तदीये सिंहासने

चन्द्रगुप्तमभिषिषेचेति हि प्रतीतमैतिह्यम् । तस्य चन्द्रगुप्तसमकालिकस्य जीवितसमयश्च कैस्तप्राचीना चतुर्थशताब्दी पुरावृत्तचिन्तकैरभ्यूहितः सुप्रसिद्धः। स्मरन्ति च ततोऽर्वाचीनाः कामन्दकादयस्तं च तदीयमर्थशास्त्रं च। किन्तु विश्वरूपाचार्यः श्रीशङ्करभगवत्पादशिष्यात् सुरेश्वराचार्यादनतिरिक्तः स्वप्रणीतायां याज्ञवल्क्यस्मृतिस्याख्यायां बालक्रीडायाम् (अनन्तशयनसंस्कृतग्रन्थावलिप्रकाशितायाम्) अर्थशास्त्रस्मरणप्रसङ्गे कौटल्यं कौटलीयं वा न स्मृतवान्। तावता कौटलीयं तत्पूर्वकालिकं न भवतीति वा तस्याविदितमिति वा न शक्यं शङ्कितुं, यस्माद् विदितस्यापि तस्यास्मरणे न्यायोऽस्माभिस्तदुपोद्घाते प्रदर्शितः। यथा–

'''अयं विशेष एको बालक्रीडायामभिलक्ष्यते तज्जरत्तमत्वप्रत्यायकः तदीयजरत्तमग्रन्थैक-भक्तत्वप्रत्यायकश्च, यत् क्रैस्तोत्तरकालभवः कश्चिद् ग्रन्थो ग्रन्थकारो वा नात्र स्मृतः, किन्तु कैस्तपूर्वकालभवा आम्नायाः स्मृतयः स्मर्तारस्तत्कल्पाश्चेत्येत एव नियमेन स्मृताः। तत्राप्यर्थशास्त्रस्मरणप्रसङ्गे कौटलीयार्थशास्त्रं नोदाहृतम् अपितु कौटल्यस्याप्युपजीव्यं बार्हस्पत्यं वैशालाक्षं चार्थशास्त्रमिहोदाहृतम्–

''यथाह बृहस्पतिः –'स्वधर्मविदनुरक्तः शृचिरनुद्धत उद्युक्तो देशकालवित्रीतिनिगमेतिहास-कुशलोऽव्यसनो मृदुरर्थशास्त्रकृतयोग्यो हस्त्यश्वपुरुषाचाराहोरात्रयामनिर्गमविनिश्चितमतिश्च स्वपरबल-बलाबलज्ञो बलाधिकृतः सेनापतिः स्यात्। कुलाढ्य उद्युक्तो मृदुरुदात्तः समरचित्तः शूरोऽनुरक्तोऽभेद्यः पत्तिविशेषज्ञ इङ्गिताकारकुशलः प्रतिहारः स्यात्। वनकुलकालजातिसात्म्यगुणवयः शीलायुरादानगमन-कल्पनावान् व्यपगतभयो विजयोर्जितमन। हस्त्यध्यक्षः स्यात् । क्षेत्रजातिसात्म्यगुणलक्षणवाहना-स्त्रज्ञोऽत्यर्थसमर्थः शुचिरनुद्धतोऽनुरूपोऽश्वाध्यक्षः स्यात्। सन्धिभेदसन्धानस्थानज्ञोऽनुरक्तः शुचिर्दक्षः स्मृतिमान् देशकालज्ञो दर्शनीयो नीतिगतिज्ञः प्राज्ञो वाग्मी दूतः स्यात्। उभयत उत्तमवंशप्रभवः शुद्धो मनुबृहस्पत्युशनः शास्त्रविद् दण्डनीत्यादिकुशलोऽशठोऽजिह्मः सम्मानासम्मानाविकृतो विगतभीः कार्याकार्यविनिश्चितमतिरहार्यः सर्वोपधाशुद्धो गूढमन्त्रो मन्त्री स्यात्। अविकार्योऽविकलेन्द्रियः प्रतापवान् सुभगः सुमुखोऽकृपणोऽप्रमादी दक्षो दाक्षिण्यचारित्ररक्षणार्थगधिकरणसन्दिग्धविवेककृदुपरिकः स्याद्' इति।''
(आचाराध्याये ३०७ तमश्लोकव्याख्यायाम्)

एवञ्च विशालाक्षः –

वन्यान् वनगतैर्नित्यं मण्डलस्थांस्तथाविधैः।
चारैरालोच्य सत्कुर्याज्जिगीषुर्दूरदीर्घदृक्।।

(आचाराध्याये ३२८ तमश्लोकव्याख्यायाम्)

इति च। युक्तं चैतत्–ग्रन्थे हि ग्रन्थान्तरसुग्रहत्वधियानुक्तमाकाङ्क्ष्यमाणमर्थं ग्रन्थकारप्रज्ञाततमाद् वयःप्रकृष्यात् समानवयसो वा ग्रन्थान्तरादुद्धृत्य व्याख्याता दर्शयितुमर्हति न तु तदर्वाचीनादिति सामुदाचारिको न्यायः। विश्वरूपाचार्यश्च बार्हस्पत्यं वैशालाक्षं चार्थशास्त्रं भगवता याज्ञवल्क्येन प्रज्ञातमार्षं ग्रन्थममन्यत; अतस्तदीयेनार्थेनार्थाकाङ्क्षां पूरितवान्। कौटलीयं तु तदर्वाक्कालभवं याज्ञवल्क्येनाप्रज्ञातमिति बुद्धया नोदाहृतवान्। न च कौटल्यस्य याज्ञवल्क्यादर्वाचीनत्वे कश्चित् सन्देहोऽस्ति। तथाहि–कौटल्यस्तावद् अर्थशास्त्रस्य चतुःषष्टितमाध्याये प्रतिलोमजपुत्रप्रस्तावे 'वैश्यात् क्षत्रियायां जातो मागधः, क्षत्रियाद् ब्राह्मण्यां जातः सूत' इत्युक्त्वा पृथुयज्ञभून्युत्पन्नस्य पौराणिकस्य सूताख्यस्य मागधाख्यस्य च पृथुस्तुतिविधायिनः प्रतिलोमजत्वशङ्काप्रार्प्ति मनसि कुर्वंस्तां परिहरति–पौराणिकस्त्वन्यः सूतो मागधश्च ब्रह्मक्षत्राद्विशेषतः' इति।

अस्यार्थः –पुराणप्रवक्ता रोमहर्षणापरनामा यः सूतः, सः अन्यः उक्तात् प्रतिलोमजसूताद् भिन्नः, यस्तत्सहपठितः पुराणेषु मागधो नाम स च प्रतिलोमजमागधाद् भिन्नः। ब्रह्मक्षत्राद् विशेषतः विशेषेण युक्तः सूतो ब्राह्मणाद् विशिष्टः मागधः क्षत्रियाद् विशिष्ट इति। तथ्यं चैतत् –यतः,

हस्ते तु दक्षिणे तस्य दृष्ट्वा चक्रं पितामहः।
विष्णोरंशं पृथुं मत्वा परितोषं परं ययौ:।।
तस्यैव जातमात्रस्य यज्ञे पैतामहे शुभे।
सूतःसूत्यां समुत्पन्नः सौत्येऽहनि महामते!
तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः।।

इति विष्णुपुराणप्रथमांशत्रयोदशाध्याये,

ब्रह्मणः पौष्करे यज्ञे सुत्याहे वितते सति।
पृषदाज्यात् समुत्पन्नः सूतः पौराणिको द्विजः।।
वक्ता वेदादिशास्त्राणां त्रिकालामलधर्मवित्।

इत्यग्निपुराणप्रथमाध्याये,

त्वया सूत! महाबुद्धे! भगवान् ब्रह्मवित्तमः।
इतिहासपुराणार्थं व्यासः सम्यगुपासितः।।
त्वं हि स्वायम्भुवे यज्ञे सुत्याहे वितते सति।
सम्भूतः संहितां वक्तुं स्वांशेन पुरुषोत्तमः।।

इति कौर्मपुराणप्रथमाध्याये च व्यासशिष्यपौराणिकसूतस्यायोनित एवोत्पत्तिः प्रतिलोमसूतविलक्षणा कथ्यते; तथा तस्य द्विजत्वं च विष्णवंशसम्भूतत्वं च वर्ण्यते। तेन कौटल्यश्चाणक्यशब्दितः पुराणानि तत्प्रवक्तृसूतोत्पत्तिकथां, पुराणतत्प्रवक्तोः प्रामाण्यप्रसिद्धिं च जानातीत्यवसातुं शक्यम्। तथाभूतश्चासौ सूतादतिदूरविप्रकृष्यर्वाक्कालजन्मैव भवितुं युक्तः, अन्यथा सूतप्रोक्तेषु ग्रन्थेषु पुरातनत्वार्षस्वनिश्चयनिबन्धनः, पुराणत्वसम्प्रत्यय एव नाभविष्यत्। एवञ्च यथा सूतश्चाणक्यादतिप्राचीनः, तथा सूतसतीर्थ्यस्वयजुर्वेदाचार्य-वैशम्पायनशिष्यतया सूतसमकालिको भवितुमर्हन् प्रकृतस्मृतिप्रवक्ता याज्ञवल्क्ययोगीश्वरो (याज्ञवल्क्य-शिष्य एव वा) चाणक्याददतिपुरातन इति किं नु वक्तव्यम्। कौटल्यः कतिपयसाहसदण्डविधानपराणां केषांश्चिद् याज्ञवल्क्यस्मृतिद्वितीयाध्यायगतानां छायामर्थतः शब्दतो व्याख्यानतोऽधिकार्थपूरणतश्च स्ववाक्यैरनुविदधान आत्मनो याज्ञवल्क्यस्मृतावस्यां भक्तिबहुमानपूतं परिचयमाविष्करोति। तेषु कानिचिदधस्तादुदाहरामः। तत्रैष एकः स्मृतिश्लोकः–

करपाददन्तभङ्गे छेदने कर्णनासयोः।
मध्यो दण्डो व्रणोद्भेदे मृतकल्पहते तथा।।

(याज्ञ० अ० २. श्लो० २२४)

इति। इदं तत्प्रतिच्छन्दप्रायं कौटिलीयवाक्यम्–

"मृतकल्पमशोणितं घ्नतो हस्तपादपाराञ्चिकं वा कुर्वतः पूर्वः साहसदण्डः। पाणिपाददन्तभङ्गे कर्णनासाच्छेदने व्रणविदारणे चान्यत्र दुष्टव्रणेभ्यः"। (कौट० धर्मस्थी० अध्या० १९) इति। एतेऽपरे स्मृतिश्लोकाः–

स्वच्छन्दविधवागामी विक्रुष्टेऽनभिधावकः।
अकारणे च विक्रोष्टा चण्डालश्चोत्तमान् स्पृशन्।। २४०।।
शूद्रप्रव्रजितानां च दैवे पित्र्ये च भोजकः।
अयुक्तं शपथं कुर्वन्नयोग्यो योग्यकर्मकृत् ।। २४१।।
वृषक्षुद्रपशूनां च पुंस्त्वस्य प्रतिघातकः।
साधारणस्यापलापी दासीगर्भविनाशकृत्।। २४२।।
पितापुत्रस्वसुभ्रातृदम्पत्या पार्थशिष्यकाः।
एषामपतितान्योन्यत्यागी च शतदण्डभाक् ।। २४३।।

(याज्ञ० अध्या० २)

इति। इमान्येतदनुविधायीनि कौटलीयवाक्यानि–

विधवां छन्दवासिनीं प्रसह्याधिचरतः, चण्डालस्यार्यान् स्पृशतः, प्रत्यासन्नमापद्यनभिधावतो, निष्कारणमभिधावनं कुर्वतः शत्याः (दण्डः)। जीवकादीन् वृषलप्रव्रजितान् देवपितृकार्येषु भोजयतः शत्यो दण्डः। शपथवाक्यानुयोगमनिसृष्टं कुर्वतो, युक्तकर्मणि चायुक्तस्य, क्षुद्रपशु-वृषाणां पुंस्त्वोपघातिनो, दास्या गर्भमौषधेन पातयतश्च पूर्वः साहसदण्डः। पितापुत्रयोर्दम्पत्योर्भ्रातृभगिन्योर्मातुभागिनेययोः शिष्याचार्ययोर्वा परस्परमपतितं त्यजतःस्वार्थाभिप्रयातं ग्राममध्ये वा त्यजतः पूर्वः साह-सदण्डः कान्तारे मध्यमः।

(कौटली० धर्मस्थी० अध्या० २०)

इति। एष स्मृतिश्लोकोऽन्यः –

अबन्ध्यं यश्च बध्नाति बद्धं यश्च प्रमुञ्चति।
अप्राप्तव्यवहारं च स दाप्यो दममुत्तमम्।।

(याज्ञ० अध्या० २. श्लो० २४९)

इति। इदं चैतदनुगामि कौटलीयवाक्यं –

"पुरुषमबन्धनीयं बध्नतो बन्ध्यतो बद्धं वा मोक्षयतो बालमप्राप्तव्यवहारं बध्नतो बन्ध्यतो वा सहस्रदण्डाः।" (कौटली० धर्मस्थी० अध्या० २०)

सर्वेष्वेषु कौटलीयवाक्येषु स्थूलाक्षरपदार्थाः परमधिकाः, अन्ये तु याज्ञवल्क्यस्मृत्युक्ता एवेति स्पष्टम्। तत्रहि 'स्वच्छन्दविधवागामी' इति स्मृतिवाक्ये स्वच्छन्दमिति क्रियाविशेषणम्। स्वेच्छया, न तु विधवेच्छयापीत्यर्थः। कौटलीये छन्दवासिनीमिति छन्देन वसन्तीं तूष्णीं स्थितामकामयमानामिति यावत्।

"अयुक्तं शपथं कुर्वन्" इत्येतदेव व्याचष्टे कौटल्यः "शपथवाक्यानुयोगमनिसृष्टं कुर्वत" इति, न पुनरन्यदेनदिति शङ्कनीयम्। तद्यथा–आधिकरणिकाः साक्ष्याद्यनुयोगं व्यवहारनिर्णयार्थं शपथवाचनपूर्व यमनुतिष्ठन्ति, सोऽयं शपथवाक्यानुयोगः। स आधिकरणिकानां निसृष्टो 'भवतस्वयमायत्त, इति व्यवहारनिर्णयस्य तेभ्यो राज्ञार्पितत्वात्। निसृष्टश्च तेषां युक्तो भवति स्वाधिकारविषय इति कृत्वा, अनुष्ठानोचित

इति कृत्वा ना । अन्येषां तु सोऽनिसृष्टेऽयुक्तः, अधिकाराविषयत्वादनुष्ठानानर्हत्वाद्वा। एवञ्च निसृष्टः, युक्तः, स्वाधिकाराविषयः, अनुष्ठानार्ह इत्येकार्थगोचरा भवन्ति। अनिसृष्टः, अयुक्तः, स्वाधिकाराविषयः, अनुष्ठानानर्ह इति च वैपरीत्येन तथा। स एषोऽयुक्तः शपथवाक्यानुयोगः स्मृतौ, शपथशब्देन विवक्षित इति कौटल्याभिप्रायः। मिताक्षरायां तु व्याख्यान्तरं सम्भवमात्रेण वर्णितं द्रष्टव्यम्।

तथा 'अयोग्यो योग्यकर्मकृत्', 'युक्तकर्मणि चायुक्तस्य' इत्यपि वाक्ये एकार्थे एव। योगो हि नियोगोऽविकारः, तद्वति युक्तशब्दो वर्तते, तदर्हे च योग्यशब्द इति युक्तयोग्यशब्दाभ्यामाश्रयत्वार्हत्व-लक्षणरूपभेदेऽपि वस्तुतो योगाश्रयस्यैव प्रतिपादनात्।" इति। किञ्च याज्ञवल्क्यस्मृतौः मूत्रपुरीषादिस्पर्शने दण्डो नोक्तः। तथापि तस्य सिद्धिरतदाधिक्यसिद्धिश्च समर्जिता–

अमेध्यपार्ष्णिनिष्ठ्यूतस्पर्शने द्विगुणः स्मृतः।

(याज्ञ० अध्या० २. श्लो० २१८)

इति निष्ठ्यूतग्रहणस्य मूत्राद्युपलक्षकत्वं वदता व्याख्यात्रा। स एव स्मृतिवचनसूचितो मूत्रपुरीषादिदण्डः कौटल्येन 'तैरेवामेध्यैः पादष्ठीविकाभ्यां च द्विगुणः छर्दिमूत्रपुरीषादिभिर्द्वादशपणः' इति स्वशब्देनोक्त इति असंशयं स्मृत्युपजीवी तद्व्याख्यातृसधर्मा कौटल्यः। एतेन याज्ञवल्क्यस्मृतेः कौटलीयोपजीवित्ववादो दूरनिरस्तो द्रष्टव्यः।

9. कौटल्यस्य कृतयः।

यथायं कौटलीयान्नानाप्रकारप्रमेयनिधानात् सर्वतन्त्रवेदी आर्षचक्षुष्मान् विज्ञायते, तथा मन्ये तन्त्रान्तरेष्वपि तस्य कृतिभिरवश्यं वर्तिव्यम्। तथाच भट्टस्वामी स्वव्याख्यायाम् अध्यक्षप्रचाराधिकरणस्य द्वादशाध्याये 'शुल्बधातुशास्त्ररसे' त्यादिपदं व्याकुर्वन् धातुकौटलीयं नाम ग्रन्थं नाम्नोपादत्ते। वराहमिहिरः 'उक्तं चाचार्यविष्णुगुप्तेनेति वदन् बृहत्संहितायां ज्योतिस्तन्त्रविषयं श्लोकमुदाहरति–

अप्यर्णवस्य पुरुषः प्रतरन् कदाचि-
दासादयेनिलवेगवशेन पारम्।
न त्वस्य कालपुरुषाख्यमहार्णवस्य
गच्छेत् कदाचिदनृषिर्मनसापि पारम्।।

(Part 1, p.68)

इति कामसूत्रजयमङ्गला च म्लेच्छितविकल्पविवरणप्रसङ्गे कौटलीयमन्यत् स्मरति–

तद् यथा कौटलीयं –

दादेः क्षान्तस्य कादेश्च स्वरयोरुभयोरपि।
बिन्दूमष्मणोर्विपर्यासाद् दुर्बोधमिति संज्ञितम्।।" इति।

पश्चाह्नः उभयतोरात्रमित्यादयः परिमिता आर्षप्रयोगाः कौटलीये वर्तन्ते।

11. आर्षप्रयोगाः। तान् पश्चिमे सम्पुटे निर्देक्ष्यामः।

12. पूर्वाचार्यस्मरणम्।

आचार्यकौटल्येन स्मृताः पूर्वाचार्यास्तावदेते –

१. मानवः= मनुशिष्याः अर्थान्मनुः।

२. बार्हस्पत्याः= बृहस्पतिशिष्याः, अर्थाद् बृहस्पतिः

३. औशनसाः= शुक्रशिष्याः, अर्थात् शुक्रः।

४. भरद्वाजः= द्रोणाचार्यः।

५. विशालाक्षः।

६. पराशरः= (प्रसिद्धः)।

७. पिशुनः= नारदः।

८. कौणपदन्तः= उद्धवः।

१०. बाहुदन्तीपुत्रः=इन्द्रः।

एतेषु दशसु अर्थशास्त्रप्रवर्तकेषु विशालाक्षः परं विशेषतो न विदितः। किन्तु तस्य वचनं विश्वरूपाचार्यप्रमाणितं पूर्वमुपदर्शितम्।

13. ग्रन्थमहिमा।

धर्मप्रधानः कर्मकुशलोऽप्रमादी परप्रयुक्तकपटप्रतिविधानक्षमः विद्वानेकः स्वकीयमेकं कुटुम्बी स्वकीयमेकं कुटुम्बमिव, योगतः क्षेमतस्तदुभयसाधनगवेषणतश्च राजा स्वराष्ट्रगतानि कुटुम्बानां लक्षाणि चिन्तयितुं यथा प्रगल्भेत, तथा शासनसरणयः सामान्यतो विशेषतश्चात्रोपदिष्टाः। प्रजाभ्यो धनसमुत्थापनस्य द्वारं नाम न तत् किञ्चितदवशिष्यते, यदत्र न प्रदर्शितम्। उत्थापितस्य धनस्य न्याय्यं विनियोगस्थान-मप्यत्रानुपदिष्टं न किञ्चिदस्ति। प्रजानां परस्परस्माद् युक्तोपयुक्ताध्यक्षामात्येभ्यः, राजवल्लभादिभ्यश्च पीडा यथा नोत्पद्येत्, यथा च ते राजकार्यहानिकरं न कदापि चेष्टेरन्, तथा तच्चरितपरीक्षणमार्गा दृष्टदोषदण्डप्रणयनरीतयश्च प्रस्थापिताः। गूढपुरूषप्रणिधानं नाम सर्वसाध्वसाधुवृत्तसाक्षात्कारसाधनं नानाप्रकारं मन्त्रवद् राज्यतन्त्रस्य जीवितस्थाने परिकल्पितम्। किं बहुना, स्वराज्यपरिरक्षणं, सिद्धे तस्मिन् परराज्यपराक्रमणमितीदं राज्ञः कार्यसर्वस्वं यथा सम्यङ् निष्पन्नं स्यात् तथा तदनुष्ठानविधयो लोकोत्तरः स्थूलमध्यसूक्ष्माः शास्त्रेऽस्मिन् न्यक्षेण प्रतिपादिताः। सर्वथा सजातीयसर्वशास्त्रग्रन्थातिशाय्यत्यद्भुतप्रस्थानमिदं कौटलीयम्। एतदनुसारिणी पूर्वेषां राज्यतन्त्रसरणिरेकान्तलोकहिता श्लाघायाः परां कोटिमधिरूढाभवदिति चास्माद् ग्रन्थाद् वयमनुमिमामहे।।

अनन्तशयनम् — त० गणपतिशास्त्री

४-६-१९२३

Vol. II

INTRODUCTION

This is the second part of the Arthaśāstra of Kauṭalya in which are included the next five Adhikaraṇas only, in order that it may be equal in size to the first.

When this volume was about to be published, a copy of Dr. Jolly's edition of the Arthaśāstra published at Lahore, came to hand, the readings of which, as well as of the Mysore edition, as compared with those of the Trivandrum edition, will be given as an appendix to the third part.

Dr. Jollys introduction deals with many questions connected with the work. We shall consider some of his arguments in support of his theories, as also of others referred to therein.

From the closing verse of the first chapter,

सुखग्रहणविज्ञेयं तत्वार्थपदनिश्चितम्।
कौटल्येन कृतं शास्त्रं विमुक्तग्रन्थविस्तरम्।।

and from the closing verse of the tenth chapter of the second Adhikaraṇa,

सर्वशास्त्राण्यनुक्रम्य प्रयोगानुपलभ्य च।
कौटल्येन नरेन्द्रार्थे शासनस्य विधिः स्मृतः।।

and from the two stanzas at the end of the work,

येन शस्त्रं च शास्त्रं च नन्दराजगता च भूः।
अमर्षेणोद्धृतान्याशु तेन शास्त्रमिदं कृतम्।।
दृष्ट्वा विप्रतिपत्तिं बहुधा शास्त्रेषु भाष्यकाराणाम्।
स्वयमेव विष्णुगुप्तश्चकार सूत्रं च भाष्य च।।

as well as from the fact that quotations cited under the name of Kauṭalya or Kauṭaliya are all found in the work, it is quite proper that it should be regarded as the production of Chāṇakya alias Viṣṇugupta, a contemporary of Chandragupta Maurya. But Drs. Winternitz, Jolly and Keith, hold that the Arthaśāstra was not the production of a person named Kauṭalya, a contemporary of Chandragupta Maurya, on the following grounds :

(i) no reference is made in the work to the great empire of Chandragupta, which is said to have been built up by Chāṇakya

(Dr. Winternitz), nor is the name Pāṭaliputra, the capital of the empire, mentioned, (Dr. Jolly);

(ii) the theories propounded refer rather to the governance of number of small independent states than of a great empire like that of Chandragupta, (Dr. Winternitz);

(iii) no great person named Kauṭalya did exist during the time of Chandragupta Maurya, as he is not mentioned by Megasthenes, (Dr. Jolly);

(iv) the person referred to frequently. as Kauṭalya, is nor the author, because, the opinion of Kauṭalya in the course of the discussion of ministerial usurpation, dealt with in the sixth chapter of the Yogavṛtta Adhikaraṇa is criticised by Bhāradvāja: and it is impossible if Kauṭalya was the author of the work, that his opinion would be criticised by a previous Ācharya, (Dr. Keith);

(v) the word Kauṭilya meaning as it does falsehood and hypocrisy could not possibly have been adopted as the name of the famous minister of Chandragupta (Drs. Keith and Winternitz).

Let us now consider these arguments.

With regard to the first, it may be said that the author could have referred to the empire of his own making either (a) in the cause of to the work, as an illustration, or (b) at the beginning or end of the work, when he makes himself known. Of these two positions, the first is not possible for in a general treatise on the science of polity, it is but proper for an author to quote as authority the government of ancient kings well known to Itihasas, instead of the one of his own making, lest he should be deemed as praising himself. As for the second, the author can be said to refer to the empire of Chandragupta, when he says at the end of the work in the śloka.

येन शस्त्रं च शास्त्रं च नन्दराजगता च भूः।
अमर्षेणोद्धृतान्याशु तेन शास्त्रमिदं कृतम्।।

That that person is the author of the work, who pulled down the empire of the Nandas. From this it may be inferred that reference is also made to the place where he lived, viz., Pāṭaliputra. It will be noted here that the author never fails to make mention of towns and cities, whenever he finds neccessity to do so, as when he speaks of Magadha, Mathura, etc., as the source of silk, cotton and other goods. If Pāṭaliputra is not mentioned in the course of the work, it is because there is no context for it.

The second argument is not conclusive. The theories of government described are as much applicable to a great empire as to small and independent states. Besides, the author dwells especially on the mutual

duties of emperor and subject kings in the fifteenth and sixteenth chapters of the seventh Adhikaraṇa.

The third argument cannot be accepted. How can the record of Magasthenes which is admittedly a mixture of real and imaginary statements, be an authority on a subject which itself is not mintioned therein? Granting that Megasthenes knew of Kauṭalya it does not necessarily follow that he should have mentioned that name in his records. It is possible that Megasthenes came to India many years after the death of Kauṭalya when Chandragupta was in full liberty and when the events connected with the name of Kauṭalya began to fade away from the memory of the subjects. Again, he might have heard of Kauṭalya from mere hearsay and because he did not know much of him he might not have cared to say anything regarding him.

Thus the probabilities being more for not mentioning the name of Kauṭalya by Megasthenes, how can it be said that the mighty Kauṭalya who is known to fame for thousands of years and whose exploits are recorded in the Viṣṇu, Vāyu and other authoritative Purāṇas did not exist during the time of Chandragupta? Dr. Jolly's argument so far as it based on the accounts of Megasthenes is tantamount to saying that, in solving problems concerning Indian antiquities, even the silence of Megasthenes is to be regarded as a piece of evidence. It further implies an utter disregard of such eminent authorities as the Viṣṇu Purāṇa, Vāyu Purāṇa, Kāmandakīya Nītisāra etc.

The fourth argument is not correct. For Kauṭalya is not criticised here by Bhāradvāja as said by Dr. Keith. It is usual for writers either to state first the views of others and the reasons therefor and then to criticise and establish their own views, or to state their own views first, and then criticise the views of others. It is the latter method that is resorted to here by the author.The purport of the passages beginning from 'एवमेकैश्वर्यममात्य: कारयेदिति कौटल्य: and ending with प्रकृतिकोपकमधर्मिष्ठमनैकान्तिकं चैतद्दिति कौटल्य:' is this : My opinion is that the minister shall make the prince assume the powers of sovereignty, while Bhāradvāja, an ancient Āchārya, thinks quite the contrary (that is the minister shall take upon himself the powers of sovereignty) which is full of evils as it excites the anger of the people and is unrighteous and uncertain of success (Vide Sanskrit introduction for fuller discussion).

The fifth argument is not convincing. The name Kauṭilya though a bad one might have been derived like the name Kautsa as stated by Prof. K.V. Rangasvami Iyengar in his additional notes on "Considerations on some aspects of Ancient Indian Polity ". In fact, the word Kauṭilya (इकारमध्य) is a mistake handed down to us by scribes and readers. All the ancient

manuscripts of the text and the commentaries of the Arthaśāstra, available here, read throughout as Kauṭalya (अकारमध्य), and not as Kauṭilya. Kuṭala is the name of a Ṛṣi who founded the Kuṭala Gotra and any descendent of that Gotra may be called Kauṭalya. This is the reason why the author of Jayamaṅgala, a commentary on the Nītisāra of Kāmandaka observe that Kauṭalya is the name given to the author of the Arthaśāstra after his Gotra, Kuṭala. A few othe details regarding the name are given in the introduction to the first volume.

Thus are refuted the contentions that at the time of Chandragupta Maurya a great man named Kauṭalya never existed and that the extant Arthaśāstra could not have been written by a contemporary of Chandragupta. We have now arrived at the conclusion that the Arthaśāstra was written by a contemporary of Chandragupta Maurya which also makes definite the date claimed for it, viz., 4th century B. C.

We shall now turn to a few minor points which in the opinion of Dr. Jolly and others are regarded as inconsistent with the early date assigned to it.

1. The number of chemical substances mentioned in the Arthaśāstra being larger than that in Suśruta and other works of the kind points to a later stage of the development of the science of chemistry at the time of Kauṭalya than at the time of Suśruta and thus testifies to the posteriarity of the Arthaśāstra (Winternitz). But this is an unwarranted inference. It is quite possible that at the time the science had attained an advanced stage, Suśruta dealt with only a small number of chemicals, because his was a purely medical work, admitting mention of such substance only as were relevant to the subject. But the Arthaśāstra is not limited in scope. It concerns itself with a variety of subjects such as the manufacture of gold and other precious metals, the preparation of poison etc., and consequently it refers to a good number of chemical substances. But in the Dhātukauṭaliya and similar other works on chemistry one might expect an exhaustive treatment of chemicals. What follows from this is the extent of the mentioning of chemical substances wherever neccessary in a work that deals primarily with other subjects cannot by itself be made the basis for fixing the age of that work.

2. The Arthaśāstra of Kauṭalya, says Dr. Jolly, has largely borrowed from the Yājñavalkyasmṛti, and as the date of the latter is later than the 3rd century A. D, the Arthaśāstra should have come after it. This is nor correct, for there is no evidence to show that the Yājñavalkyasmṛti is later than the third century A. D . On the contrary, the date of Kauṭalya having been fixed as 4th century B.C, it naturally follows that Yājñavalkya, from whom Kauṭalya has borrowed, should be anterior to the latter. What is logically

true cannot be contradicted by an apparent argument. Besides the word Yājñavalkya is mentioned in the Gargādigaṇa (गर्गादिगण) under the sūtra गर्गादिभ्यो यञ् of Pāṇini. It is clear from this that Pāṇini knew of a Yājñavalkya born of the author of the Smṛti and therefore earlier than Pāṇini.

3 Dr. Keith is of opinion that the use of correct Triṣṭup stanzas in regular metre as found in the Arthaśāstra is not in favour of its early date and that the language of the work is not sufficiently archaic. It may be asked which is unsuitable to the antiquity—the use of mere Triṣṭup stanzas or the correctness and regularity of the four lines ? Whatever it is there is no sort of restriction in the case of a non-Vedic work. Though to Dr. Keith, the language does not look archaic, to me it does look decidedly archaic , more archaic than the Mahābhāṣya of Patañjali and similar other works. The matter mau well be left to the judgment of Sahṛdayas.

4. Another scholar thinks that the Arthaśāstra covering as it does, several branches of human knowledge could not possibly be the production of a single author, but a composition by several authors. The following statement of Kāmandaka the beginning of his Nītisāra,

वंशे विशालवंशानामृषीणामिव भूयसाम्।
अप्रतिग्राहकाणां यो बभूव भुवि विश्रुतः।।
जातवेदा इवार्चिष्मान् वेदान् वेदविदां वरः।
योऽधीतवान् सुचतुरश्चतुरोऽप्यंकवेदवत्।।
यस्याभिचारवज्रेण वज्रज्वलनतेजसः।
पपातामूलतः श्रीमान् सुपर्वा नन्दपर्वतः ।।
एकाकी मन्त्रशक्त्या यः शक्त्या शक्तिधरोपमः।
आजहार नृचन्द्राय चन्द्रगुप्ताय मेदिनीम्।।
नीतिशास्त्रामृतं श्रीमानर्थशास्त्रमहोदधेः।
य उद्दध्रे नमस्तस्मै विष्णुगुप्ताय वेधसे।।

leaves no room for doubt on this matter. Here Kāmandaka ascribes the work to Vishnugupta after likening him to God Brahman in respect of his being a seer and an author of various sciences. The date of Kāmandaka is said to be the 1st century B.C. and he can certainly be credited with more accurate and reliable knowledge about Kauṭalya than we of the present day. Whatever may be the date of Kāmandaka, it is certain that he was far anterior to the poet Bhavabhūti. It is legitimate to surmise from the Mālatīmādhava that Bhavabhūti was conversant with the Nītisāra of Kāmandaka as he thought it fit to give the name Kāmandaka—the traditional sense of which is restricted to the author of Nītisāra— to a female ascetic in his Mālatīmādhava who is described as proficient in the art of diplomacy. Nor is "Kāmanda ki" an accidental and unmeaning name given

by the poet without any reference to the characteristics of the author of the Nītisāra, as Dr. Jolly thinks, for all the characters in the Mālatīmādhava are given significant and appropriate names. The names Mālatī and Mādhava which are excitants of Śṛṅgārarasa are quite suitable to the heroine and hero. Aghoraghaṇṭa and Kapālakuṇḍala stand for the terrible worshippers of Chamuṇḍi, while Buddharakṣita and Avalokita represent the disciples of the Buddhist nun. Thus when all the names of the characters are significant, it is not reasonable to regard the name Kāmandaka alone as unmeaning and accidental like Ḍittha (डित्थ). Further no one need doubt whether a mastery in one individual, because, when it is quite possible that a person gifted with an intellect of a very high order may become सर्वज्ञकल्प, it is not at all a wonder if he attains mastery over a number of subjects such as Kauṭalya is credited with.

What we have said above disproves the observation of Dr. Jolly, that the "whole work is likely to have been composed by a single person, probably a Paṇḍit belonging to a school of polity and law, who to render a dry subject interesting, introduced debates in which the Pūrvapakṣa is put in the mouth of eminent sages or of deities whose names he got from the Mahābhārata or from tradition, while the Uttarapakṣa or Siddhānta is reserved by Kāmandaka and other eminent writers in support of the ascription of the authorship of the Arthaśāstra to Kauṭalya are still extant. Dr. Jolly seems to thinks that there were really no works composed by the ancient Āchāryas Bhāradvāja, Parāśara, Viśālākṣa, Bṛhaspati, etc., which can be regarded as the sources of the several Pakṣas ascribed to them in the Arthaśāstra. But we have seen in the commentary on the Yājñavalkyasmṛti by Viśvarūpācārya, the illustrious predecessor of Vijñāneśvara long extracts from the Arthaśāstra of Bṛhaspati and Viśālākṣa (T. S. Series No. 74, pp. 184, 188 and 190), and it is clear therefore that the Arthaśāstra of Bṛhaspati and Viśālākṣa must have existed during the time of Viśvarūpācārya. In like manner, it can be inferred that the works of Bhāradvāja and other Āchāryas, who are mentioned in the Arthaśāstra along with Bṛhaspati and Viśālākṣa must have once existed but disappeared subsequently.

So far we have considered in detail the chief opinions of Dr. Jolly and others. One more statement of Dr. Jolly has to be examined. It is that for the Arthaśāstra there was a surname 'Samāna Tantra' (समानतन्त्र)which was hitherto unknown. Medhātithi in his commentary on the 191st śloka in the seventh chapter of the Manusmṛti quotes the verse 'द्वे शते धनुषाम्' which is found in the fifth chapter of the tenth Adhikaraṇa of the Arthaśāstra of Kauṭalya and introduces the quotation by saying 'समानतन्त्रेणोक्तम्'. Similarly on the 205th śloka in the same chapter, he quotes 'दैवं . . . . मानुषं कर्म लोकं

पालयति' which is an adaptation of the sentence 'दैवमानुषं हि कर्म लोकं यापयति'. bound in the second chapter of the sixth Adhikaraṇa, and introduces this quotation by saying 'समानतन्त्रेऽपि'. From this Dr. Jolly concludes that the Arthaśāstra was surnamed Samānatantra, and also says that since the phrases 'इति समानं पूर्वेण' 'इति समानम्' are found to occur in the first chapter of the fifth Adhikaraṇa and in many other places this name is quite appropriate to the work. But this is obviously wrong. Samāntantra is a Karmadharāya compound word which should be split as समानं च तत् तन्त्रं च and means another Śāstra on the same subject. What is conveyed in समानतन्त्रेणोक्तम् is that the topic under reference is also dealt with in another Śāstra on the same subject. That Śāstra is in fact the Arthaśāstra of Kauṭalya. The word समानतन्त्र is found not only in the Bhāṣya of Medhātithi, but also in the Nyāyaśāstra of Gautama 'समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः'. It is an expression commonly used as authority. On no ground can it be said that Arthaśāstra is meant by that word. It may here be noted that in the śāstraic works the transference of a statement from one place to another (अतिदेश) is indicated by various phrases such as 'समानं पूर्वेण' 'समानम्' 'पूर्ववत्' 'प्राग्वत्' एतेन व्याख्यातम्'. All these phrases are synonymous and the use of any of them is common to all works.

Trivandrum **T. Ganapati Sastri**
17th May, 1924

उपोद्घातः

अयं कौटलीयार्थशास्त्रस्य द्वितीयः सम्पुटः। अत्र धर्मस्थीयं कण्टकशोधनं योगवृत्तं मण्डलयोनिः षाड्गुण्यमिति पञ्चाधिकरणानि निवेशितानि। तद्गतानां प्रमेयानामनुक्रमणी चात्र योजितः। पूर्वस्मात् सम्पुटादेतस्य परिमाणधिकत्वं परिहर्तुमुत्तराधिकरणमिह न योजितम्। यावत् सम्पुटोऽयं प्रकाशनाय सज्जीकृतः, तावत् कौटलीयार्थशास्त्रस्यैकं नूतनं संस्करणं जर्मनिदेशीयपण्डितजालिकृतमिति पाञ्चनदाह्लवपुराद् बहिरवतीर्णं दृष्टं, यदीयान् पाठविशेषान् मैसूरपुस्तकगतैरस्मदीयपुस्तकगतैश्च पाठविशेषैः सहान्योन्यव्यतिरेकावगमार्थमस्मदीयतृतीयसम्पुटस्य परिशिष्टे प्रदर्शयिष्यामः। अस्य तु लवपुरीयस्य पुस्तकस्योद्घाते जालिना कौटलीयमर्थशास्त्रमधिकृत्य बहुप्रपञ्चितम्। तत्र दृष्ट्वान् कांश्चित् प्रमाणविकलांस्तदीयान् परकीयांश्चाभिप्रायान् इह विचारयामः।

सुखग्रहणविज्ञेयं तत्त्वार्थपदनिश्चितम्।
कौटल्येन कृतं शास्त्रं विमुक्तग्रन्थविस्तरम्।।

इति प्रथमाध्यायान्तिमश्लोकात्

सर्वशास्त्राण्यनुक्रम्य प्रयोगानुपलभ्य च।
कौटल्येन नरेन्द्रार्थे शासनस्य विधिः स्मृतः।।

इति द्वितीयाधिकरणदशमान्तिमश्लोकात्,

येन शस्त्रं च शास्त्रं च नन्दराजगता च भूः।
अमर्षेणोद्धृतान्याशु तेन शास्त्रमिदं कृतम्।।
दृष्ट्वा विप्रतिपत्तिं बहुधा शास्त्रेषु भाष्यकाराणाम्।
स्वयमेव विष्णुगुप्तश्चकार सूत्रं च भाष्यं च।।

इति ग्रन्थशेषश्लोकाभ्यां, कौटलीयनाम्ना कौटल्यनाम्ना च ग्रन्थान्तरेषु प्रमाणतयोपात्तानां वाक्यानां ग्रन्थेऽस्मिन्नुपलम्भाच्चास्य प्रणेता स एव चन्द्रगुप्तोपजीवितो विष्णुगुप्तापरनामा साक्षाच्चाणक्य इति हि न्याय्या लोकस्य प्रतीतिः।

अत्राप्याश्चर्यं द्वित्रा विप्रतिपन्ना उपलभ्यन्ते। तेष्वेक आस्त्रियादेशीयः पण्डितो विण्टरनिट्स्नामा, अन्यो जर्मनिदेशीयो जालिनामा, अपरः कीत्संज्ञ आङ्गलेयपण्डितः। ते ह्यैककण्ठ्यादूहन्ते–

१. चन्द्रगुप्तसाम्राज्यं स्वाधिष्ठितं ग्रन्थे क्वापि न सूचितं, चन्द्रगुप्तस्य स्थानीयं पाटलीपुत्रं च न स्मृतमिति,

२. क्षुद्रक्षुद्रस्वतन्त्रराज्यतन्त्रणरीतेरुपदेशेऽपि साम्राज्यतन्त्रणरीतिस्तत्र नोपदिष्टेति,

३. चन्द्रगुप्तकाले कौटल्यनामा यथाप्रतीतमाहात्म्यशाली कश्चित् पुरुषविशेष एव तावन्न स्थितः मेगास्तनीशनाम्ना यवनेन चन्द्रगुप्तसंस्तविना लिखिते चरितनिबन्धे तन्नामाग्रहणादिति,

४. कौटल्यः कौटल्य इति ग्रन्थे योऽसकृन्नाम्ना निर्दिश्यते स ग्रन्थकाराद् भिन्न एव योगवृत्तषष्ठाध्याये 'एवमेकैश्वर्यममात्यः कारयेदिति कौटल्यः' इत्युपक्षिप्तस्य कौटल्यगतस्य 'नैवमिति भारद्वाजः' इति भारद्वाजेन प्रतिक्षेपणात्, कौटल्यस्य प्रकृतार्थशास्त्रकर्तृत्वे पूर्वाचार्येण भारद्वाजेन तन्मतप्रतिक्षेपणायोगादिति,

५. कौटिल्य इति नामधेयमेव तावत् गर्हार्थत्वाद् ग्रन्थकर्ता स्वीयत्वेन नोपाददीतेति च।

त एतेऽत्यन्तनिःसारा मे प्रतिभान्ति। तथाहि –

न तावत् प्रथमो हेतुः शक्यशङ्कः, चन्द्रगुप्तसाम्राज्यं स्वाधिष्ठितं कौटल्येन किं ग्रन्थमध्येऽर्थवादप्रसङ्गात् स्मर्तव्यम् आहोस्विद् ग्रन्थस्यादावन्ते वा स्वात्मनिवेदनप्रसङ्गात् स्मर्तव्यम् ऊहको मन्यते। नाद्यः पक्षः, सर्वराजसाधारणराज्यतन्त्रोपदेशपरे शास्त्रेऽस्मिन्नितिहासप्रसिद्धान्येव राजवृत्तान्यार्थबादिकतयोदाहर्तुमुचितानि, न तु स्वाधिष्ठितस्य साम्राज्यस्य वृत्तम्। तद्धि वर्ण्यमानं प्रत्युत विकत्थनतामेव वर्णयितुः प्रत्याययेत्। द्वितीयपक्षे तु 'येनशस्त्रं च' शास्त्रं च' इति ग्रन्थान्तश्लोके नन्दराज्योन्मूलयितृत्वमात्मनो वदता ग्रन्थकृता स्वाधिष्ठितं चन्द्रगुप्तसाम्राज्यं सूचितमेव। एतेन पाटलीपुत्रास्मरणमपि समाहितं, नन्दराज्योन्मूलनकर्तृत्वकथनेन स्वाधिष्ठितदेशनगरादेरप्युक्तप्रायत्वात्। ग्रन्थमध्ये तु प्रसङ्गाभावात् पाटलीपुत्रं न स्मृतम्। मगधमथुरादिकं हि पत्रोर्णाकार्पासादिद्रव्यविशेषोत्पत्तिस्थानत्वात् कोशप्रवेश्यरत्नपरीक्षाप्रकरणादौ द्रव्यविशेषोत्पतिस्थानप्रस्तावे स्मृतम्; पाटलीपुत्रं तु तदभावात् क्व स्मर्तव्यम्।

द्वितीयो हेतुः शशशृङ्गायितः शास्त्रेऽस्मिन्नुपदिष्टास्तन्त्रणरीतयः क्षुद्रराज्यमहाराज्यसाम्राज्यानां सर्वेषां साधारणा एव। विशेषेण च षाड्गुण्याधिकरणस्य पञ्चदशषोडशाध्याययोर्दण्डोपनमितानां राज्ञामुपनमयितरि वृत्तम् उपनमयितुस्तेषु वृत्तिं च प्रपञ्चयता सम्राजां तदधश्वराणां राज्ञां च परस्परतन्त्रणमुदिष्टमेव।

न तृतीयो हेतुः साधुः। मेगास्तनीसलिखितो हि चरितनिबन्धो भूताभूतार्थसङ्कीर्णः परिलुप्तबह्वंशश्च; स कथं स्वानुक्तेऽप्यर्थे निर्णायको भवितुमर्हेत्। किञ्च जानतापि कौटल्यं मेगास्तनीसेन स्वग्रन्थे तदस्मरणं न्याय्यं संभाव्यते। मेगास्तनीसो हि कौटल्यस्वर्गप्राप्तेः परतः बहुषु वर्षेष्वतीतेषु कौटल्यपरतन्त्रत्वव्यपगम-निकामाविष्कृतनिजप्रभावपरमोर्जिते चन्द्रगुप्तस्य शासने वर्तमाने चन्द्रगुप्तगुणातिशयपरितृप्ता-भिस्तत्रेतृचाणक्यगुणेषु प्रकृतिभिरनतिस्मर्यमाणेषु पश्चादेव नूनं भारतमागतः चन्द्रगुप्तं च राजानमुपाश्रितः। तस्य चन्द्रगुप्तपरमैश्वर्यसाक्षात्कारविस्मितस्य वैदेशिकस्य पूर्ववृत्तजिज्ञासाविरहितस्य किंवदन्तीवशात् सामान्यतः श्रुतमपि कौटल्यवृत्तमनिर्ज्ञातविशेषतया न श्रद्धाया विषयो वभूव; अतस्तत् स्वनिबन्धे स नूनं न लिखेत्। अविदितमेव वा सर्वात्मना मेगास्तनीसस्य चन्द्रगुप्तसंस्तवपरायणस्य कौटल्यवृत्तं सम्भाव्यते, पौरजानपदसंस्तवाल्पत्वात्। एवञ्जातीयेषु मेगास्तनीसनिबन्धे कौटल्यनामानाख्यानस्य निमित्तेषु सम्भावयितुं शक्येषु तत् कौटल्यस्य अनेकसहस्त्रवर्षजगद्गीयमानकीर्तेः विष्णुपुराणाद्युपश्लोकितमाहात्म्यस्यासत्तां चन्द्रगुप्तकाले गमयतीति कः खलु वक्तुं व्यवस्येत्। तथा वदता नाम जालिनार्थादिदमेवोक्तं भवति – 'भरतखण्डपुरावृत्तविशेषनिर्णयविषये वस्तुतत्त्वाज्ञानावज्ञानादिनिमित्तो मेगस्तनीसस्य मूकिमापि प्रमाणं, प्रमाणमेत्र स केवलं किन्तु भारतीयैः प्रमाणतया परिगृहीतस्योपपन्नार्थप्रतिपादकस्य विष्णु वायुपुराणादिपुरातनग्रन्थजातस्य प्रामाण्यमप्युपहन्ति' इति। अत्र वयमुच्चैश्चिन्नीयामहे।

न चतुर्थो हेतुः सङ्गतः, भारद्वाजेन कौटल्यमतस्यात्राप्रतिक्षेपात्। ग्रन्थकारा नाम परमतं ससाधकं प्रथममुपन्यस्य तत्खण्डनपूर्वं स्वमतं स्थापयन्ति, स्वमतं वा प्रथमं निर्दिश्य पश्चात् तद्विरुद्धं परमतमनूद्य

दूषयन्ति। अनयोरुभयाविधयोः समुदाचारुयोर्द्वितीयः प्रकार इह ग्रन्थकारेणाश्रितः। 'एवमेकैश्वर्यममात्यः कारयेदिति कौटल्यः' इत्यादिना 'प्रकृतिकोपकमधर्मिष्ठमनैकान्तिकं चैतदिति कौटल्यः' इत्यन्तेन ग्रन्थेनैतदेव हि प्रतिपाद्यते – ''अमात्यएकैश्वर्यं कारयेदिति मम मतं, भारद्वाजस्य तु पूर्वाचार्यस्य मतं मन्मतविरुद्धमीदृग्रूपं, तच्च प्रकृतिद्वेषजनकत्वात् पापिष्ठत्वादनियतसिद्धिकत्वाच्च बहुदोषम् इति, अर्थाच्च मन्मतं प्रकृतितोषकत्वाद् धर्मिष्ठत्वाद् नियतसिद्धिकत्वाच्चादोषं बहुगुणम्'' इति च।

अत्र हीदमवधेयम् – इह खल्वनेकाचार्यनामग्राहप्रवर्तितेष्वर्थविमर्शेषु सर्वत्र अनुपपन्नाचार्यमत-खण्डनपूर्वमन्ते किमपि मतमुपपन्नं कौटल्यसम्बन्धितया नियमेन स्थाप्यते। कौटल्यश्च वस्तुतो ग्रन्थकार इति कृत्वा 'इति कौटल्यः' इत्युक्तानां सर्वासाम् 'एवमहं मन्ये' इत्येवार्थः प्रतिपत्तव्यः। 'इत्यहमि' त्यहम्पदेनात्मनि परामर्शनीये कौटल्यपदेन परामर्शः स्वाहङ्कारपरिहारार्थं आचार्यसमुदाचारसिद्धो महाभाष्यकारादीनां महाभाष्यादौ 'गोर्नदीयस्त्वाह' इति गोर्नदीयपदेन परामर्शवत्। तथा च 'प्रकृते एवमेकैश्वर्यममात्यः कारयेदिति कौटल्यः' इत्यस्यायं फलितोऽर्थः – 'राजव्यसनवशात् स्वायत्तीकर्तव्यतया प्राप्तमपि अखण्डं राज्यममात्यः स्वयमनपहरन् बालं राजकुमारमेवैकैश्वर्येण योजयेदित्यहं मन्ये' इति। 'एवममात्यः कारयेदित्यहं मन्ये' इत्युक्त्या सूचितम् 'एवममात्यो न कारयेदित्यन्यो मन्यते' इत्यमुमर्थं अन्यनामग्रहणपूर्वं स्पष्टयति– "नैवमिति भारद्वाजः" इति। केन प्रकारेण तर्ह्यमात्यः कारयेदिति भारद्वाजो मन्यत इत्याकाङ्क्षायामाह– 'प्रम्रियमाणे' इत्यादिना 'कालः' कर्म चिकीर्षतः इत्यन्तेन। एतावता भारद्वाजमतस्य स्वरूपं तत्साधकं च भारद्वाजोक्तं दर्शितं, न तु कौटल्यमतं भारद्वाजेन खण्डितं दर्शितं, सधकयुक्त्युपस्कृतस्य कौटल्यमतस्य कौटल्यप्राचीनेन भारद्वाजेनापरिज्ञाततया खण्डनायोगादिति बोद्धव्यम्। यदिदं भारद्वाजमतं ससाधकमुपदर्शितं, तद् भारद्वाजार्वाचीनः कौटल्यः खण्डयति – 'प्रकृतिकोपकमि'त्यादिना। अमात्येन क्रियमाणं स्वयं राज्यहरणं प्रकृतिद्वेषकं पापिष्ठम् अनिश्चितसिद्धिकं चेत्यतः कारणाद् भारद्वाजमतं हेयमिति कौटल्योऽभिप्रैतीत्यर्थः। एतेन कुमारराज्याभिषेचनस्य स्वाभिमतस्य प्रकृतिरञ्जकत्वधर्मिष्ठत्वैकान्तिकत्वरूपगुणयोग उपादेयत्वप्रयोजक उक्तप्रायः। एवञ्चात्र भारद्वाजस्य सम्प्रतिपन्नपूर्वाचार्यभावस्य कौटल्यमतखण्डयितृतायाः संप्रत्ययाच्च कौटल्यस्य प्रकृतग्रन्थकर्तृत्वविघटकं न किञ्चिदस्तीति स्पष्टमेव।

न पञ्चमोऽपि हेतुः समञ्जसः। यतो वक्रिमार्थतया कुत्सितापि कौटिल्यसंज्ञा कौत्सादिसंज्ञावदुपपद्यत इति प्रवक्तृरङ्गस्वाम्यार्येण समाधानमुक्तमेव। वस्तुतस्तु कौटिल्य इतीकारमध्योऽपपाठ एव पठितृलेखकप्रमादकृतः, सर्वेषु प्राचीनमूलादर्शग्रन्थेषु तद्विवरणादिषु च कौटल्य इत्यकारमध्यस्यैवैक रूप्येण पाठात्। कुटलो नाम गोत्रप्रवर्तक ऋषिविशेषः। तस्य गोत्रापत्यं कौटल्य इति। अत एव कामन्दकनीति-सारव्याख्यायां जयमङ्गलायां 'कौटल्य इति गोत्रनिबन्धना विष्णुगुप्तस्य संज्ञा' इत्युक्तम्। अधिकम् अर्थशास्त्रप्रथमसम्पुटेपोद्घाते द्रष्टव्यम्।

तदित्थं 'मौर्यचन्द्रगुप्तकाले कौटल्यनामा कश्चिद् महापुरुषो नासीदिति वादः,' चन्द्रगुप्तसहचरेण नेदमर्थशास्त्रं प्रणीतं भवितुमर्हती'ति वादश्च दूरतोः निरस्तः। चन्द्रगुप्तसहजीविप्रणीतत्वनिर्णयेन चार्थशास्त्रस्य कालोऽपि निर्धारितः क्रैस्तप्राचीनचतुर्थशताब्दीलक्षणः।

यत्तु ग्रन्थस्य तावत्प्राचीनतायां बाधकमिव किमपि किमपि जालिप्रभृतिभिरुपन्यस्तं, तदिदानीमालोचनीयम्। तत्र –

१. सुश्रुताद्यपेक्षया धातुरसवादप्रकाराणामर्थशास्त्रेऽधिकतया कथनदर्शनेनास्य धातुरसवादविद्याप्रकर्ष-

कालप्रभवत्वप्रतीत्या धातुरसवादविद्याशिशुभावावस्थाविर्भूतसुश्रुताद्युत्तरकालोत्पन्नतावगम्यत इति सुश्रुतात् क्रैस्तप्राचीन प्रथमशताब्दीभवादर्वाचीनमर्थशास्त्रमिति विण्टरनिट्स:। इदमयुक्तं कामं सुश्रुताद्यपेक्षया धातुरसवादानामधिका: प्रकारा: अर्थशास्त्रे प्रतिपाद्यन्ताम्। किन्तु तावता धातुरसवादशास्त्रस्य सुश्रुतादिकाले बालभाव: अर्थशास्त्रकाले तरुणिमेति विभागो न कल्पयितुं शक्य:। तरुणिमदशायामेव सत्यां सुश्रुतादौ धातुरसवादप्रकाराणामल्पानाम्, अर्थशास्त्रे बहूनां च कथनौचित्यसम्भवात्। सुश्रुतादितन्त्रं हि नाम चिकित्साशास्त्रम्। तत्र भेषजसाधनोपयोगितया यावद् धातुरसवादप्रमेयमपेक्षितं तावदेवाभिधानीयमित्यल्पमभिहितं स्यात्। अर्थशास्त्रे तु राज्यतन्त्रप्रधाने सुवर्णरजतादिसाधनाय शत्रुनिग्रहार्थौषधविशेषसाधनाय च यावदपेक्षितं तावदभिधानीयमिति पूर्वत: किञ्चिदधिकमभिहितं स्यात्। धातुरसवादप्रधाने तु शास्त्रे धातुकौटलीयादौ तत्सम्बद्धं प्रमेयजातं सर्वमभिधानीयमिति तत् कात्स्न्र्येनाभिहितं स्यात्। तस्माद् धातुरसवादानां प्रमेयान्तरप्रधानेषु तन्त्रेषु मनागमनाग् वा यथापेक्षमानुषङ्गिकतयाभिधानसभिधातृकालानुमागदावकिञ्चित्करम्।

२. याज्ञवल्कीयं धर्मशास्त्रमुपजीव्यतेऽर्थशास्त्रेण। तत्तु धर्मशास्त्रं क्रैस्ताब्दीयतृतीयतृशतकोत्तरकालभवमिति तदर्वाचीनतैव प्रकृतस्यार्थशास्त्रस्येति जालि:। इदं चायुक्तम्। तस्य धर्मशास्त्रस्य क्रैस्ताब्दीयतृतीयशतकोत्तरकालिकत्वे प्रमाणाभावात्। प्रत्युत कौटलीयार्थशास्त्रस्य प्रपञ्चितचरयुक्तिभि: क्रैस्तप्राचीनचतुर्थशताब्दीभवताया निर्णीततया तदुपजीव्याया: स्मृतेस्तत्पूर्वकालिकत्वस्यैव न्यायत: प्राप्तवात्, न्यायप्राप्तस्य च प्रमाणाभासैर्बाधितुमशक्यत्वात्। किञ्च 'गर्गादिभ्यो यञ्' इति सूत्रे गर्गादिगणे यज्ञवल्कशब्दस्य पाठदर्शनेन पाणिनिर्यज्ञवल्कगोत्रापत्यं याज्ञवल्क्यं विदितवानिति प्रतीत्या तद्विदितस्यैव याज्ञवल्क्यस्य धर्मशास्त्रकारताया: सम्भावितत्वेन पाणिनितोऽपि धर्मशास्त्रस्य प्राचीनत्वसम्भवाच्च।

३. यदपि तृष्टुप्छन्दसि वाक्यशैल्यां चार्थशास्त्रस्य प्राचीनत्वं न भासत इति कीत्संज्ञो महाशय आह, तदपि न साधु। किं तृष्टुप्छन्दस: परिग्रह एव प्राचीनात्वाननुगुण: आहोस्वित् तत्र पादचतुष्टयेऽपि तुल्यलक्षणयोग:। वेदादन्यत्रच्छन्दोविशेषपरिग्रहे प्राचीनार्वाचीनयो: कामचारान्नाद्य: पक्ष:। पादचतुष्टये तुल्यलक्षणयोगायोगावपि प्रयोक्तुरैच्छिकावव्यवस्थितावव्यवस्थापकौ च। वाक्यशैल्यां प्राचीनत्वं तु कीत्महाशयं प्रति न भासते, मां प्रति तु महाभाष्याद्यतिशायि प्राचीनत्वं स्फुटं भासति। तत्र निर्णय: सहृदयेष्वायत्त:। यत् पुन: प्रकृतार्थशास्त्रप्रतिपाद्यमानयावत्प्रमेयोपद्रष्टत्वमेकस्य कर्तुन सम्भवतीति मन्यमान: कश्चिदाह– इदमर्थशास्त्रं बहुभि: सम्भूय प्रकरणश: प्रणीतं पश्चादेकीकृतमिति, तदपि नोपादेयं–

वंशे विशालवंशानामृषीणामिव भूयसाम्।
अप्रतिग्राहकाणां यो बभूव भुवि विश्रुत: ।।
जातवेदा इवार्चिष्मान् वेदान् वेदविदां वर:।
योऽधीतवान् सुचतुरश्चतुरोऽप्येकवेदवत्।।
यस्याभिचारवज्रेण वज्रज्वलनतेजस:।
पपातामूलत: श्रीमान् सुपर्वा नन्दपर्वत:।।
एकाकी मन्त्रशक्त्या य: शक्त्या शक्तिधरोपम:।
आजहार नृचन्द्राय चन्द्रगुप्ताय मेदिनीम्।।
नीतिशास्त्रामृतं श्रीमानर्थशास्त्रमहोदधे:।
य उद्दध्रे नमस्तस्मै विष्णुगुप्ताय वेधसे।।

इति कामन्दकेन विष्णुगुप्तस्य बहुप्रमेयद्रष्टृतया बहुशास्त्रप्रणेतृतया च वेधस्तुल्यत्वाख्यानपूर्वं प्रकृतमहाशास्त्रकर्तृतायाः संकीर्तनात्। कामन्दको हि क्रैस्तप्राचीनप्रथमशताब्दीस्थितत्वाद् विष्णुगुप्तासन्नकालो विष्णुगुप्तचरितानां याथात्म्येऽस्मदाद्यपेक्षयाभिज्ञतमः। तस्य क्रैस्तप्राचीनप्रथमशताब्दीभवत्वविवादे वा क्रैस्ताब्दीयसप्तमशतकस्थितभवभूत्यपेक्षया प्राचीनत्वे विवादस्य नावकाशः, यतो नीतिसारकर्तरि निरूढेन कामन्दकशब्देन नीतिप्रयोगनिपुणां काञ्चित् परिव्राजिकां मालतीमाधवे व्यपदिशन् भवभूतिर्नीतिशास्त्रनिष्णा-तत्वसाम्यकृतं तस्यां तत्पदव्यपदेशौचित्यं पश्यतीति युक्तिमती कल्पना। न च तस्यां कामन्दकशब्दो निरर्थक एव यदृच्छया निवेशितः कविना न तु प्रसिद्धकामन्दकधर्मारोपेणेति जाल्युक्तं युक्तम्, मालतीमाधवे पात्रेष्वनर्थकसंज्ञानिवेशनस्यादर्शनात्। माधवपालत्यादयो हि शब्दाः शृङ्गारोद्दीपवचनाः शृङ्गारिनायकनायिका-दिष्वानुगुण्यमभिप्रमीक्ष्य संकेतिताः, अघोरघण्टकपालकुण्डलादयश्चामुण्ड्युपाराकानुगुण्यं बुद्धरक्षितादयश्च बौद्धभिक्षुकीशिष्यतानुगुण्यम्। एवं सर्वासु संज्ञासु अर्थवतीषु कामन्दकीशब्दः परं डित्थादिनामवन्निर्निमितं भिक्षुक्यां संकेतित इत्युक्तिः कथं नाम सङ्गता स्यात् इत्यादिकं विचारणीयं विद्वद्भिः। किञ्च बहुप्रमेयद्रष्ट्य कौटल्य एको दृष्ट इति नासूया कर्तव्या। नहि पुरुषविशेषे कस्मिंश्चिल्लोकोत्तरप्रज्ञादिगुणयोगिनि सर्वज्ञकल्पत्वमपि वा द्रष्टुमशक्यं, किंमुतैवञ्जातीयं बहुज्ञत्वम्। एतेन, जाली यदवोचत् – केनापि पण्डितेन महाभारतादिग्रन्थप्रसिद्धमहर्ष्यादि नागधेयैः कांश्चित् पूर्वाचार्यान् कल्पयित्वा तदीयत्वेन पूर्वपक्षाणां कौटल्य सम्बन्धित्वेन सिद्धान्तपक्षाणां च कल्पनभङ्ग्यार्थशास्त्रमिदं रचितमिति, तदपि परास्तं, कौटल्यकर्तृत्वस्थापकानां पूर्वोक्तकामन्दकादिवाक्यानां प्रमाण्यस्यानपह्नवनीयत्वात्। किञ्च, तथा वदतो जालेः कौटलीयार्थ-शास्त्रोद्भावितानां तत्तत्पक्षाणामाकरग्रन्थाः भारद्वाजादिभिः परमार्थतो न प्रणीता इति खल्वभिप्रायो गम्यते। सोऽत्यन्तायुक्तः, यतो याज्ञवल्क्यस्मृतिव्याख्यायां विज्ञानेश्वरोपजीव्यैर्विश्वरूपाचार्यैः प्रणीतायां बहूनां बृहस्पत्यर्थशास्त्रवाक्यानां विशालाक्षार्थशास्त्रग्रन्थयोर्विश्वरूपाचार्यकाले सत्तावधारणात् तुल्यन्यायेन तत्सहपठितभारद्वाजाद्याचार्यग्रन्थानामपि स्थितलुप्तत्वानुमानात्।

इत्थमुच्चावचोहैकजीवितेषु जालिमहाशयाद्यभिप्रायेषु प्रधानभूताः कौटलीयसम्बद्धा अभिप्राया विचारिताः, असम्यक्त्वं च तेषां विस्तरेण निरूपितम्। न चेदेतोऽधिकमवश्यविचारणीयं पश्यामः। अत इममेकमनन्योट्टङ्कितं जालिमहाशयस्यार्थविशेषाभ्यूहं लेशतो विचार्य प्रकृतमुपसंहरामः। स हि आह–'अस्ति समानतन्त्रमिति कौटलीयार्थशास्त्रस्य पर्यायवाचकं पदमद्ययावदविज्ञातमि'ति। स किल तं तत्पर्यायपदविशेषं मेघातिथीयाद् मनुस्मृतिभाष्यादूहितवान्। मनुस्मृतिसप्तमाध्यायगतस्य १९१ तमश्लोकस्य भाष्ये हि 'समानतन्त्रेणोक्तम्' इति प्रतिज्ञाय 'द्वे शते धनुषाम्' इति कौटलीयार्थशास्त्र (१० अधि. ५. अध्या.) श्लोकः प्रदर्शितः। २०५ तमश्लोकभाष्ये च 'समानतन्त्रेऽपि' इत्युक्त्वा 'दैवं .... मानुषं कर्म लोकं पालयति' इति वाक्यं कौटलीयार्थशास्त्रषष्ठाधिकरणद्वितीयाध्यायस्थस्य 'दैवमानुषं हि कर्म लोकं यापयति' इति वाक्यस्य कथञ्चिदर्थानुवादकमुदाहृतम्। तेन लिङ्गेन कौटलीयमर्थशास्त्रं समानतन्त्रापरपर्यायमित्यूहात इति। अपिच स आह – युक्तश्च तस्मिन् समानतन्त्रशब्दव्यपदेशः 'इति समानं पूर्वेण' 'इति समानम्' च इति च पञ्चमाधिकरणप्रथमाध्यायादिषु असकृदुक्तेस्तत्र दर्शनादिति। तदेतदखिलमत्यन्तमनुपपन्नम्। समानतन्त्रशब्दो ह्ययं यौगिकः कर्मधारयसमासनिष्पन्नः–समानं च तत् तन्त्रं चेति। समानतन्त्रं प्रमेयतस्तुल्यं शास्त्रान्तरं, 'समानतन्त्रेणोक्तम्, इत्यस्य प्रकृतं प्रमेयं तत्प्रतिपादकेन शास्त्रान्तरेण वर्णितमित्यर्थः। तच्च शास्त्रान्तरं प्रकृते कौटलीयं भवति, तदीयतयोदाहृताया वाक्यानुपूर्व्याः कौटलीये समुपलम्भात्। न चायं समानतन्त्रशब्दप्रयोगो मेधातिथिभाष्य एवापूर्वो दृष्टः, 'समानतन्त्रसिद्धः परतन्त्रासिद्ध प्रतितन्त्रसिद्धान्त' इति न्यायदर्शनसूत्रेऽपि

तद्दर्शनात्। एवं शास्त्रव्याख्यानादिग्रन्थेष्वपि शास्त्रान्तरप्रमाणीकरणावसरे समानतन्त्रशब्दप्रयोगो बहुलो दृष्टः। न हि तत्र समानतन्त्रपदं कौटलीयबोधकम्। एतेन कौटलीयस्य समानतन्त्रव्यपदेशौचित्यसमर्थनं जालिकृतं प्रत्युक्तम्। किञ्च, 'समानं पूर्वेणे'ति क्वचित् 'समानम्' इति, क्वचित् 'पूर्ववदि'ति क्वचित् 'प्राग्वदि'ति, क्वचिद् 'एतेन व्याख्यातमि'त्येवमादिभिः। सर्वे चैते प्रकाराः समानार्थाः; तत्रान्यतमस्यासकृदाश्रयणमप्यविशिष्टमेव सर्वग्रन्थेषु।।

संग्रहश्लोकाश्चात्रैते-

आदिमध्यान्तिमाध्याय श्लोकप्रामाण्ययोगतः ।
कौटल्यनाम्ना वात्स्यानां स्मृतानामाकरत्वतः।।
वाक्यशैलीसमुन्नेयपुराणत्वानुगुण्यतः ।
कामन्दकोपजीव्यत्वात्तद्गीतमहिमत्वतः ।।
यश्चन्द्रगुप्तसचिवो विष्णुवाग्व्यादिविश्रुतः।
सोऽस्य कर्तार्थशास्त्रस्य कौटल्य इति निर्णयः।।

अनन्तशयनम् त० गणपतिशास्त्री
१७-५-१९२४

Vol. III

INTRODUCTION

This is the third and the last part of the Arthaśāstra. The readings of the Punjab and Mysore editions as compared with those in this' the Trivandrum edition are given as Appendix No. I . An index of important and diffcult words occurring in the work is given as Appendix No. II and the archaic words as No. III.

There are two divisions of प्रलम्भनप्रकरण in औपनिषदिकाधिकरण, known as अद्भुतोत्पादनम् and भैषज्यमन्त्रप्रयोग. The first teaches hunger -remedying yogas which would enable one to observe monthly, pakṣa and other similar fasts. The second teaches a yoga by which one could see through darkness, five yogas by which it would be possible to walk without being visible to others as well as those by which cows, birds, etc., may be made invisible and several other wonderful yogas of similar nature. Whether these yogas will be really effective is a question to be solved by actual practice which is possible only if the proper ways of applying medicines and mantras are well understood. And a correct knowledge of these ways will have to be acquired from persons who are masters in them. Hence, those desirous of practising the yogas should have to seek the assistance of masters possessing practical experience. For our part, we can do nothing but explain the text and believe in the several statements made therein, in accordance with our estimates of the author. But we cannot be expected to show the effects of these yogas just as the commentator of the passage कारीयां वृष्टिकामो यजेत् cannot be expected to show the effects of these yogas just as the show the effects of the इष्टि. It is on this ground that we said towards the end of प्रलम्भनाध्याय-

दत्ता टिप्पणिकास्माभिर्भैषज्यस्यैवमल्पशः।
क्रमस्तु सर्वस्तस्यापि मन्त्रवत् साम्प्रदायिकः।।

In the इन्द्रियजयप्रकरण, Duryodhana is mentioned along with Rāvaṇa. The same Duryodhana is also mentioned along with Jayatsena, while dealing with gamblers. Again Nala and Dharmaputra who have sustained defeat at the hands of the gamblers are also referred to. It is clear from the above that in this prakaraṇa Kauṭalya has the Mahābhārata itself in his mind.

Though the stories in the इन्द्रियजयप्रकरण about Dambhodbhava, Haihayarjuna etc., are all traced in the Māhābharata, it has to be found out to what Itihāsa the stories of Daṇḍakya, Karala etc., belong. The same is also the case with the story of Kātyāyanas etc., indicated by अयमुच्चैः सिञ्चतीति कात्यायनः प्रवव्राजः क्रौञ्चोऽपसव्यमिति कणिङ्को भारद्वाजः etc., in the Samayachārika of the fifth Adhikaraṇa.

We have omitted owing to scribal error to mention the Ambhiyas while enumerating, in the introduction to the first volume, the names of Āchāryas referred to by Kauṭalya. We have also omitted to comment on the word, आम्भीय, Āmbhi means Bhīṣma and Āmbhiyas are Bhīṣma's followers, (Vide Sanskrit introduction for details).

That बाहुदन्तीपुत्र is इन्द्र, पिशुन is नारद and वातव्याधि is उद्धव is also explained fully in the Sanskrit introduction.

It is apparent from what Kauṭalya says that Droṇa and other Āchāryas were also authors of Arthaśāstra and that their works were known at the time of Kauṭalya. This has already been pointed out in the introduction to the second volume. Further, it is a well-known fact that Droṇa and others were well-versed in state craft. It is therefore possible that they should also have written some works which had existed at the time of Kauṭalya but which might have subsequently been lost : just as the Vyākaraṇas of Gargya and others which had existed at the time of Pāṇini were lost afterwards. It should here be remembered that we have shown in the introduction to the first volume that the works of Bṛhaspati and Viśālākṣa referred to by Kauṭalaya existed at the time of Viśvarūpāchārya, the commentator of याज्ञवल्क्यस्मृति. Since it has been proved that there were works written by Bṛhaspati and Viśālākṣa we can very well infer who are mentioned by Kauṭalya along with Bṛhaspati and Viśālākṣa.

In dealing with the arguments of Dr. Jolly in the introduction to his edition, we had also occasion to examine some views of Dr. Winterniz referred to therein. Now, we may examine Dr. Winternitz's article on "Kauṭalya Arthaśāstra" that appeared in the April issue of the "Calcutta Review" for 1924. Therein he tries to establish certain theories in respect of the Arthaśāstra. But the arguments advanced by him are too weak to support them. We shall take up three of the theories which deserve examination.

1. The author of the Arthaśāstra is not a contemporary of Chandragupta Maurya, for Megasthenes and Kauṭalya differ widely in their accounts.
2. It is impossible that one man should have been a specialist in numerous branches of knowledge.

3. The foul measures recommended in the work take away much of its merit.

We have already done with first two questions in the introduction to the second part where it has been shown that the author of the Arthaśāstra was a contemporary and minister of Chandragupta Maurya and that it is perfectly possible that a single author could be a specialist in several departments of knowledge. In fact, the very attempt to compare and contrast the accounts of Kauṭalya and Megasthenes, is unwarranted. For, one lays down rules for the conduct of government while the other gives expression to his impressions which must necessarily be swayed by feelings of likes and dislikes. It is thus clear that the two accounts may differ from each other.

As to the third question, it is true that the Arthaśāstra recommends to a king various steps of deceiving, subjugating, killing his own sons, ministers and other high state officials as well as neighbouring princes, with the help of spies. In the कोशाभिसंहरणप्रकरण of योगवृत्ताधिकरण are described various methods of playing upon the religiosity from them. In the fifth and sixth chapters of the same Adhikaraṇa we are told how a minister should subdue his king and assume all the powers. All these would no doubt discredit the work. Dr. Winternitz thinks that it is quite inconsistent in an author to profess himself to be a follower of Dharma and at the same time advocate unfair methods. But we are however of opinion that even the sage Buddha would not but have given similar advices had he written an Arthaśāstra. Suppose a good king, but weak and helpless, and in imminent danger of attack by the cruel and powerful opponent, approaches a master of the Arthaśāstra for advice as to how he should save himself and his kingdom from the enemy, then what will be his counsel? Will it be that he should surrender all his possessions to his enemy or become an anchorite or an ascetic? No. For both the advices would be highly detrimental to him and to his subjects. What he must needs instruct is that he, the king, should resort to such steps as are described above even though verging on vices, which would in the end save him from the danger. And no author of Arthaśāstra can be charged with transgressing the limits of morality if, of course, his intention be that the weak and helpless king, by acting up to his advice, should come out victorous and should later on seek to remove, by wise and virtuous rule, the sin resulting from the cruel steps adopted; just as the sinker of a well after digging washes off with the water of the well the dirt that has accumulated in his body while in the course of digging.

Besides, Kauṭalya specifically states that unrighteous measures should be resorted to only against the bad and not against the good; thus औपनिषदिकमधर्मिष्ठेषु प्रयुञ्जीत।

When momentous state matters requiring large funds have to be attended to, it is the duty of the king to collect funds from the poeple, for without them the very existence of the state will be in danger. At such times, when the king has naturally to take to unfair measures of collection putting the people to severe hardships. Kauṭalya places sufficient restraint on his by ruling out that even then only such measures should be adopted as would not wound popular feeling. Has Kauṭalya strayed away from the path of Dharma, here? When the functions of the state are duly fulfilled with the help of funds collected, the merits issuing out of them would expiate the sin of unfair collection. Moreover, politics by its very nature is mixed up with deceits : and hence it is that Kālidāsa, though he has adoptd to a very great extent the beautiful artha topics from the Arthaśāstra is his Kāvyas, observes is the words of an opponnent (विदादि) in अभिज्ञानशाकुन्तल that politics is stigmatised with deception : just as a Śrotriya Brahmin is guilty of sacrificing animals.

The statetment that the योगवृत्तधिकरण teaches ministers and courtiers how to gain and retain a king's favour and to get all power in their own hands, is quite wrong. What is taught in the fifth chapter of this adhikaraṇa is how the officers working in various departments of the state should do their work properly and how when a king gets addicted to evil habits it should be the duty of the minsters to bring him round to sober ways of living by following him as his boon companions. It the sixth chapter of the same adhikaraṇa, after criticising the opinion of Bhāradvāja, viz., when the king is dead the minister should usurp the throne, putting the heir apparent to death, Kauṭalya teaches that, ministers should, at the king's death, install the prince and work, heart and soul, for his well-being. This sense of the two chapters is clear and unmistakeable.

The charge levelled against the Arthaśāstra that it teaches unrighteous methods is thus set aside. The work, therefore, comes to be regarded as equivalent to Dharmaśāstra in as much as the methods recommended in it render it possible to run the machinery of the state in accordance with the principles of Dharma. It follows that the connection claimed by Dr. Winternitz between the Arthaśāstra and the Lokāyata has no ground to stand upon if he takes the word Lokāyata as meaning Atheism. If, however, he means by it Nyāyaśāstra which is included in the आन्वीक्षिकी, then the connection referred to above needs no special mention, as there is no śāstra which is not governed by the Nyāya system.

The answer to the similar doubts is contained in our commentary on the śloka.

धर्ममर्थं च कामं च प्रवर्तयति पाति च।

at the concluding portion of the work. It is this :—

In the Arthaśāstra are mentioned various methods of deceiving other people and of killing enemies through secret spies. If so, how can it be said that the work is in accordance with the principles of Dharma? We should here bear in mind that the first and foremost duty of a king is protection of his subject. Even when a king acts without swerving from the path of righteousness, the virtuous neighbouring princes are likely to get jealous and may begin to harbour inimical feelings and take to unfair ways of preventing him from ruling properly. That being so, it is impossible for a king to get on without being harassed by others or without himself harassing them or again without taking counter measures against oppenents. Hence it is legitimate for a king to be well acquainted with all sorts of foul practices so as to enable him to take such measure as would ward off his enemies aiming them at him. And the Arthaśāstra which recommends such practices, conduces, by acting as the means of driving out evils, to the Dharma of protecting a king's subjects.

I think it is not possible for any man even to conceive of the idea of writing a book like the Arthaśāstra if he does not possess a thorough practical knowledge of the subject pertaining to it. When such is the fact we would like to know how Dr. Winternitz has stated that the Arthaśāstra was written by a Paṇḍit who has no practical knowledge of politics. His argument, that "endless and pedantic classification and definitions" are common in the work of a Paṇḍit but not of a statesman, has no force at all. For if endles classification found in a śāstra is an indication of its author having no practical knowledge of the subjects, then the classification found in the śāstras like the Vedānta, Mīmāṁsā and Vyākaraṇa, will also have to be taken as showing that their respective authors Bādarāyaṇa, Jaimini and Pāṇini have also no practical knowledge of the sastras expounded by them. Besides, statesmanship and ability to write a grand work are not opposed to each other. They can very wel coexist in a person.

Another scholar doubts Kauṭalya's authorship of the Arthaśāstra on the ground that it mentions the names of serveral metals and town and villages and countries that were unknown during the time of Chandragupta Maurya. We ask what is the source from which he came to learn that they were unknown in India at that time? It could not be that there is ocular proof of it, which is impossible for obvious reasons. Nor could it be from the writing of anceint authors, as no work stating that they were unknown in India has so far been forthcoming. It must therefore be a mere conjecture based on imaginative reasoning. And this conjecture can be accepted only if it does not clash with a stronger counter-evidence. It is explicitly stated in the Arthaśāstra at the beginning, in the middle and at the end, that it was

written by Kauṭalya *alias* Chāṇakya or Vishnugupta, the minister of Chandragupta Maurya; and this fact is also corroborated in the Nītisāra of Kāmandaka who lived more than a thousand years ago and who can therefore be expected to know much more about the Arthaśāstra than we of the present day. When the mention of the author's name within the body of the work and the reference to it in euologistic terms in another authoriative work stand as direct evidence the contention that they could be negatived by a conjecture is, it seems to me, the same as saying that the light of the sun can be extinguished by the darkness of the night.

Trivandrum **T. Ganapati Sāstrī**

16-1-1925

उपोद्घातः।

तृतीयेनैतेन सम्पुटेन पूर्णतामर्थशास्त्रमगमत्। अर्थशास्त्रस्य मैसूरपुस्तकाल्लवपुरपुस्तकाच्च व्यावृत्तानामर्थवतामस्मत्पुस्तकस्थानां पाठविशेषाणां सूचनिका कांचिदिह प्रथमपरिशिष्यात्मना निवेशिता; अनुक्रमणी च भूयिष्ठानां पदानां विवरणविज्ञेयार्थानां द्वितीयपरिषिष्यत्मना। तृतीयमपि परिशिष्टं योजितं, यत्रार्षप्रयोगाः सङ्कलिताः; ते च गन्ये क्रैस्तप्राचीन चतुर्थशताब्द्याः समुचिताः।

औपनिषदिके प्रलम्भप्रकरणे अद्भुतोत्पादनं भैषज्यमन्त्रप्रयोगः इति चावान्तरं प्रकरणद्वयं विभक्तमस्ति। तत्राद्ये मासोपवासाद्यनुकूलाः क्षुत्प्रतीकारयोगाः, द्वितीये तमसि रूपदर्शनयोगः, नष्टच्छायारूपतया सञ्चारानुकूला पञ्च योगाः, पशूनां मृगाणां पक्षिणां चान्तर्धानयोगाः, एतदादयो बहवो विस्मयावहा योगा उपदिष्टाः। तेषां तु फलसंवादस्तदनुष्ठानेन परीक्षणीयः; अनुष्ठानं च भेषजानां मन्त्राणां च यथावत्प्रयोगपरिपाटीसम्यग्ज्ञानायत्तं; तच्च सम्यग्ज्ञानमनुष्ठानसिद्धगुरूपदेशाधीनम्। अतः फलसंवादसाक्षात्काराभिलाषिभिस्तथाविधगुरूपदेशसम्प्रदाय एव विचेतव्याः। वयं पुनर्यथाप्रमाणं मूलस्यार्थं वक्तुं प्रभवामः, योगानां फलसंवादं चोपदेष्टृप्रामाण्यादनुमिनुमः, न तु फलसंवादस्य निदर्शने प्रतिभूभवामः 'कारीयां वृष्टिकामो यजेत' इतीष्टिविधिवाक्यव्याख्यातार इव वृष्टिरूपेष्टिफलसंवादने। एतदेवाभिसन्धाय प्रलम्भनाध्यायान्तेऽवोचाम–

दत्ता टिप्पणिकास्माभिर्भैषज्यस्यैवमल्पशः।
क्रमस्तु सर्वस्तस्यापि मन्त्रवत् साम्प्रदायिकः।। इति।।

इन्द्रियजयप्रकरणे मानिनिदर्शने शवणेन सह पठितो दुर्योधनः। स पुरुष व्यसनवर्गप्रकरणे जयत्सेनेन सह कितवप्रसङ्गात् पठितः। ताभ्यां जितौ नलयुधिष्ठिरावपि स्मृतौ। तेन महाभारतमेवाचार्य कौटल्यस्तात्पर्येण स्मृतवानिति स्पष्टमेव। इन्द्रियजयप्रकरणगतानि दम्भोद्भवहैहयार्जुनवातापिवृष्णिसङ्घवृत्तान्यपि महाभारताद्याकराणि प्रतीतान्येव। किन्तु दाण्डक्यकरालादिवृत्तं कस्मिन् पुराणे वर्णितमिति विचेतव्यम्। तथा पञ्चमाधिकरणीयसमयाचारिकप्रकरणे 'अयमुच्चैः सिञ्चतीति कात्यायनः प्रवव्राज; क्रौञ्चोऽपसव्यमिति कणिङ्को भारद्वाजः इत्यादिना सूचितं यत् कात्यायनकणिङ्कादीनामितिवृत्तम् उपलब्धटीकाभागोक्तरीत्यास्मा- भिर्विवृतं, तस्याकरभूत इतिहासग्रन्थोऽपि मृग्यः।

प्रथमसम्पुटेपोद्घाते कौटल्यस्मृतायनामाचार्याणां नामनिर्देशप्रसङ्गे आम्भीयानां राजपुत्ररक्षणाध्यायस्मृतानाम् अनिर्देशो लेखकप्रमादादायातः। स मुद्राक्षरशोधनदशायामप्यनुवृत्तः। आम्भीयपदार्थोऽपि न प्रकाशितो व्याख्यायां प्रमादादेव। आम्भीया इत्यस्य ह्ययमर्थः–अम्भो जलं नदी गङ्गेति यावत् तस्यापत्यम् आम्भिर्भीष्मः कौणपदन्तशब्दाभिधेयः, अम्भः शब्दाद् 'बाह्वादिभ्यश्च, इतीञ् 'सम्भूयोम्भसोः सलोपश्च' इति बाह्वादिगणसूत्रादम्भश्शब्दसलोपश्च, आम्भेरिमे आम्भीयाः भीष्मशिष्या इत्यर्थः। इत्याम्भीया इत्यस्य स्थाने कौणपदन्त इति तु न पठितं, तच्छिष्याणामति सतां ततः किञ्चिन्मतवैलक्षण्यमस्तीति द्योतनार्थ, वैचित्र्यार्थं वा। अम्भश्शब्द एव वा मेधश्शब्दवद् ऋषिविशेषे वर्तते, तस्यापत्यमित्यादि पूर्ववत्।

बाहुदन्तीपुत्रः=इन्द्रः, पिशुनो=नारदः, वातव्याधिः=उद्धवः, इति च विवृतं यथाटीकम्।

अत्रोपपत्तिरप्यस्ति। यथा–बाहुदन्त ऐरावतः तस्येयम् इन्द्रमातृत्वेन स्वामित्वसम्बन्धवती बाहुदन्ती आदितिः तस्याः पुत्रो बाहुदन्तीपुत्रः। नारदः प्रकृत्यैव कलहप्रियत्वात् कलहोत्पादनाय पैशुन्यं करोतीति हि प्रसिद्धि। उद्धवश्च मन्ये वातनिमित्तव्याधियोगाद् वातव्याधिरुतीति हि प्रसिद्धिः। उद्धवश्च मन्ये वातिनिमित्तव्याधियोगाद् वातव्याधिरुच्यते; अत एव "प्रापयन् पवनव्याधेर्गिरमुत्तरपक्षताम्" इति शिशुपालवधद्वितीयसर्गश्लोके माघकविना वातशब्दस्थाने पवनशब्दं निवेश्य पवनव्याधिशब्देन स व्यवहृतः।

द्रोणाचार्यादीनां ग्रन्थप्रणेतृत्वं विशष्यार्थशास्त्रप्रणेतृत्वं कौटल्यकाले तत्प्रणीतार्थशास्त्रोपलब्धिश्चासीदिति कौटल्यप्रामाण्यादवसीयते। अयमर्थो द्वितीयसम्पुटेपोद्घातस्याष्टमे पृष्ठे न खलु न सूचितः। किञ्च, द्रोणादयो राज्यतन्त्रविद्यायां निष्णाताः प्रतीताः; अतो येकेचित् तद्विद्याग्रन्थास्तैः पुरा प्रणीता बभूवुरिति न खलु न सम्भाव्यते। ते तु ग्रन्थाः कौटल्यकाले स्थिता एव पश्चान्नूनं परिलुप्ताः, यथा गार्ग्यादिप्रणीतानि व्याकरणानि पाणिनिकाले स्थितान्येव पश्चात् परिलुप्तानि तद्वत्। आचार्यप्रायपाठे बृहस्पतिविशालाक्षयोः कौटल्येन स्मृतयोर्ग्रन्थौ याज्ञवल्क्यस्मृतिव्याख्यातृविश्वरूपाचार्यकालेऽप्युपलब्धाविति प्रथमसम्पुटेपोद्घाते यदुक्तं, तदपि न विस्मर्तव्यं; बृहस्पतिविशालाक्षग्रन्थसत्ताविभावनेन हि तत्सहपठितद्रोणाचार्यादिग्रन्थानामपि स्थितत्वमवश्य-मनुमेयम्।

द्वितीयसम्पुटस्योपोद्धाते लवपुरपुस्तकसंशोधकाभिप्रायविमर्शप्रसङ्गात् डाक्टर् विन्टेर्निट्सस्य मतं संशोधकप्रमाणितं किञ्चिद् विचारितमस्माभिः। तस्यैवोपन्यासः कश्चिदर्थशास्त्रविषयः कलिकातारिवियुसंज्ञ-पत्रिकाप्रकाशित इदानीं लेशतो विमृश्यते।

तस्मिन् ह्युपन्यासे विन्टेर्निट्सः प्रायः क्षोदाक्षमामिर्युक्तिभिः किमपि किमपि वस्तु साधयितुं नितान्तं परिश्रान्तः। वस्तुत्रयमेव तु तत्र प्रतिवचनयोग्यतया गणनीये मन्यामहे–यद् अर्थाशास्त्रकर्तुर्मौर्य चन्द्रगुप्तसमकालतो तत्समानकालिकमेगास्तनीशव्यतिरेकप्रदर्शनभङ्ग्या स विघटयतीत्येकम्, एकस्य सतःकर्तुर्बहुप्रमेयाभिज्ञताया असम्भवमाहेत्यन्यत्, बहून् अर्थशास्त्रे दोषान् उद्भावयतीति चापरम्। अत्राद्यं द्वितीयं च द्वितीयसम्पुटेपोद्घातेऽर्थशास्त्रस्य चन्द्रगुप्तमन्त्रिचाणक्यप्रणीतत्वस्थापनेन च प्रत्युक्तम्। तत्रापि अर्थशास्त्रकर्तृमेगास्तनीशयोरन्योन्यवैलक्षण्यसमर्थनसंरम्भ एव तावत् तस्यायुक्तः, यतः पूर्वो विधिनिषेधानुशासनमात्राय प्रवृत्तः, उत्तरम्तु वैदेशिको यात्रिकः स्वप्रत्यक्षितप्रियद्वेष्योदासीन-वस्तुस्तुतिनिन्दामौनवृत्तिरित्यनयोर्भिन्नत्वभावयोः परस्परसंवादापेक्षणमेव न समञ्जसम्।

तृतीयं तु चिन्त्यते शास्त्रे खल्वस्मिन् गुढपुरुषप्रणिधानादिरूपैः कपटोपायैः विरोधिनां सामन्तानां स्वामात्यादीनां स्वराष्ट्रमुख्यानां स्वपुत्रादीनामपि वञ्चनं दमनं हननं च राज्ञा कर्तव्यमुपदिश्यते, जनेभ्यस्तदीयधर्मश्रद्धोपजीवनेन धनापहरणस्योपायाः कोशभिसंहरणे प्रदर्श्यन्ते। योगवृत्ताधिकरणत्य पञ्चमषष्ठाध्याययोर्मन्त्रिणां राजवशीकरणोपायो राजशक्तिस्वायत्तीकरणोपायश्चोपदिश्येते। त एते पापिष्ठमार्गा इत्यर्थशास्त्रस्य दोषाः परिस्फुट्या इति विन्टेर्निट्सस्याशयः; ईदृशोपदेशदायित्वं चार्थशास्त्रप्रणेतुर्बहुत्र प्रकाशितनिजधार्मिकभावस्यासङ्गतमिति च।

वयं पुनर्मन्यामहे–बुद्धमुनिरपि राज्यतन्त्रशास्त्रं प्रणेतुं प्रवृत्त एवञ्जातीयान् शत्रुनिग्रहोपायोपदेशान् अवर्जनीयत्वाद् दातुमर्हतीति। यदि हि कश्चिद् गुणी दुर्बलो राजा निस्सहायः प्रबलेन रिपुणासमुच्छेतुकामेन बाध्यमानः स्वराज्यरक्षणोपायमधिजिगांसेत, तदा तं प्रति देशिकः किं प्रतिपद्यतां किं तावत् 'सर्वस्वं रिपवे समर्पये' ति स तमनुशास्तु, आहोस्वित् 'तृतीयमाश्रमं चतुर्थं वाश्रयस्वे 'ति। उभयमप्यर्थहानिकरमर्थशास्त्रकारेण नोपदेष्टुं युज्यते। किन्तु 'येनकेनचित् पूर्वोक्तजातीयेनाधर्म्येणाप्युपायेनात्मप्रतिष्ठामन्विच्छे' त्येवोपदेष्टव्यम्। एवं हि लब्धोपदेशो दुर्बलः प्रयत्नेन जयं प्रतिपद्य सम्यग्राज्यपरिपालनजन्यैः पुण्यैर्दुरुपायप्रयोगजनितं पाप्मानं

कूपखानक इव तत्खननान्तरपरिनिष्पन्नैस्तोयैः खननकालजनितं पङ्कलेपमपनोत्स्यतीत्याशयवतः उपदेष्टुः क्व धार्मिकत्वप्रच्युतिप्रसङ्गः। किञ्चायं शास्त्रकारो दुरुपायान् अधार्मिकेष्वेव प्रयोक्तव्यान् मन्यते न धार्मिकेषु, यदाह- 'औपनिषदिकमधर्मिष्ठेषु प्रयुञ्जीते'ति।

प्रचुरधनसाध्ये राज्यकर्मण्युपस्थिते कोशसम्पद्विहीने राज्ञा कोशाभिसंहरणमवश्यं कर्तव्यम्, अन्यथा राज्यं परित्यक्तव्यं स्यात्। विधविपत्निवारणाय कोशमभिसंहर्तुं प्रकृतिभ्यो यया कयापि तन्मनोव्यथाजनिकया विधया हठाद् धनं ग्रहीतुं प्रवृत्तो नियम्यते शास्त्रकारेण-गत्यन्तराभावे प्रकृतिप्रकाशत् किञ्चिद् वञ्चनमिश्रितैरपि तच्चित्तानुपपीडिभिः कोशाभिसंहरणोक्तैरुपायैर्धनं सञ्चिन्वीत, न तु जातु तच्चित्तोपपीडिभिरिति। तत्र का नाम धर्मच्युतिः कौटल्यमुनेः। तथोपचितया हि कोशसम्पदा राज्यकर्मणि सम्यङ्निर्वृत्तेऽतिमहत् पुण्यं सिद्धं भविष्यति; तेन च वञ्चनजं पापं निर्धानिष्यते।

किञ्च, राज्यतन्त्रणप्रक्रियैव तावदीदृशी स्वभावाद्, यद् अवर्जनीयैर्वञ्चनैः प्रायः सा संसृज्यते। अत एव राज्यतन्त्रविद्यामिमां स्वकाव्येषु श्लाघनीयतदर्थानुवादेन बहुलमुपजीवन्नपि तत्रभवान् कालिदासः कतिपयावर्जनीयवञ्चनोपदेशदायित्वं निमित्तं कृत्वा अभिज्ञानशाकुन्तले विवाद्युक्तौ श्रोत्रियस्येव पशुमारणकर्मदारुणत्वम् अस्याः परातिसन्धानविद्यात्वमुपन्यस्तवान् 'परातिसन्धानमधीयते यैर्विद्येति ते सन्तु किलाप्तवाच' इति।

यत्तु योगवृत्ताधिकरणे मन्त्रिणां राजवशीकरणोपायो राजशक्तिस्वायत्तीकरणोपायश्चोपदिश्यत इति, तदत्यन्तासंगतम्। तस्य हि पञ्चमाध्याये कर्मनियुक्तानां स्वकर्मसम्यगनुष्ठानं, कथञ्चिद् व्यातेनिराजानुवर्तनेन तद्व्यसनोपघाते प्रयतनं चोपदिश्यते। षष्ठाध्याये तु 'अमात्यः कुमारमुपरतपितृकं हत्वा स्वयं राज्यं हरेद्' इत्येवंरूपं भारद्वाजीयं मतं युक्तिभिः खण्डयित्वा अमात्यस्य कुमाराभिषेचनपूर्वं सर्वात्मना तद्धितानुचिन्तनमेव करणीयतया प्रपञ्चितम्। ईदृशेऽध्यायद्वयस्यार्थे विस्पष्टे सति डाक्टर विन्टेर्निट्सस्तद्विपरीतं कथमवोचदिति न विद्मः।

तदेवम् अधर्मोपदेशत्वेऽर्थशास्त्रस्य निरस्ते सम्यग्राज्यतन्त्रण रूपधर्मानुष्ठानाभ्युपायोपदेशकताया अबाधितत्वाद् धर्मशास्त्रसोदर्यत्वं सिद्धं द्रष्टव्यम्। एतेन, 'लोकायतस्यार्थशास्त्रस्य चान्योन्यसख्यमस्ती'ति विन्टेर्निट्सोक्तिः प्रत्युक्ता, लोकायतशब्देन नास्तिकतन्त्रस्य तेन विवक्षणाद् अर्थशास्त्रस्य चास्तिकतन्त्रत्वात्। यद्यान्वीक्षिक्यन्तर्गतं न्यायशास्त्रं लोकायतपदेन तस्य विवक्षितं, तर्हि सर्वेषां शास्त्राणामविशिष्टमिति किं विशिष्यार्थशास्त्रस्य तत्कथनेनेति न किञ्चिदेतत्।

यथोक्तजातीया अन्यथाशङ्का समाधातुं शास्त्रोपान्त्यश्लोकस्य ''धर्ममर्थं च कामं च प्रवर्तयति पाति च।" इत्येतस्य व्याख्यायां यदस्माभिरुपपादितं, तदप्यत्र स्मर्तुमुचितम्। तत्र ह्युक्तं-"नन्वस्मिन् शास्त्रे गूढपुरुषप्रणिधानादिभिरुपायैः परवञ्चनानि नानारूपाणि कर्तव्यतयोपदिश्यन्ते, उपांशुवधादीनि च परहिंसनानि; तत् कथमिदं धर्मस्य प्रवर्तकं पालकं च भवतीति चेत्। उच्यते-प्रजापरिरक्षणं हि नाम राज्ञो धर्मः। तच्च धर्मपरेण विजिगीषुणा सम्यङ्निर्वर्त्यमानं धर्मपरा अपि सामन्ताः शत्रूभूय रागवशादसहमानाश्च परभूमिकामुकाश्च विचित्रैः पापिष्ठोपायप्रयोगैर्विहन्तुं प्रायः स्वभावात् प्रयतन्ते। ईदृशे समुदाचारे राज्ञामौत्सर्गिके सति विद्याविनयवता आत्मसम्पद्युक्तेन केनचिदपि राज्ञा परैरबाध्यमानेन वा, परान् अबाधमानेन वा, परप्रवर्तितान् आत्मोपघातान् अप्रतिकुर्वता वा, न कदाचिदपि स्वस्थेन स्थातुं शक्यं, न चानारब्धपरोत्पादितानर्थप्रतीकारेण स्वराज्यरक्षणं सम्यङ्निर्वर्तयितुं शक्यम्। अतः स्वराज्यपरिरक्षणरूपधर्मसम्यङ्निर्वृत्तये परवञ्चनानां परहिंसनानां च विचित्राः प्रकाराः प्रतिकार्यत्वबुद्ध्या जिज्ञासिता एव राज्ञां भवन्तीति तदुपदेशपरमिदं शास्त्रम् अनर्थनिवर्तनद्वारेण यथोक्तधर्मसाधकं भवत्येवेतिसुष्ठूक्तं "धर्मं प्रवर्तयति पाति च" इति।

न खलु कश्चित् प्रेक्षापूर्वकारी सर्वाकारमहनीयार्थानुष्ठानोपदेशप्रधानमिदं शास्त्रम् आत्मनस्तदर्थानुष्ठानपरिचयविकलतायां सत्यां 'प्रणयेयम्' इति मनसापि संकल्पयितुं व्यवस्येत्, किमुत प्रणेतुम्। इत्थं वस्तुस्थितौ शास्त्रमपरिचिततदर्थानुष्ठानेन पण्डितेन प्रणीतमिति विन्टेर्निटत्समहोदयः कथं वक्तुं व्यवसित इति न विद्मः। यदपि स तत्र युक्तिं दर्शयितुमिव प्रवृत्ते वक्ति–बहुपक्षोपन्यासः शास्त्रे परिदृश्यमानः पण्डितसाधारणो, न तु राज्यधुरन्धरसाधारण इति, तदप्यसङ्गतम्। यदि हि शास्त्रे बहुपक्षोपन्यासस्तदर्थमनुष्ठानरहितत्वे लिङ्गं, तर्हि ब्रह्मधर्ममीमांसाव्याकरणशास्त्रेषु बहुपक्षोपन्यासदर्शनात् तत्प्रणेतॄणां व्यास–जैमिनिपाणिनीनामपि तदर्थानुष्ठानपरिचयविहीनत्वं कल्पनीयं प्रसज्येत्। किञ्च, राज्यतन्त्रधुरन्धरत्वं चतुरवाक्यगुम्फनलक्षणं पाण्डित्यमिति नैतौ परस्परविरुद्धौ धर्मौ; अत एनयोरेकस्मिन् धर्मिणि सहावस्थान मपि नासम्भवीति न चिन्तितं तेन विदुषा।

अत्रान्तरे केनापि विपश्चिता अर्थशास्त्रस्य चाणक्यकृतत्वे संशयबीजमित्थं मे लेखमुखेन निवेदितम्–'अथशास्त्रग्रन्थे हि बहुलानि द्रव्याणि बहुलानि नामानि च देशजनपदादीनां पठ्यन्ते, यानि तदा मौर्यचन्द्रगुप्तकाले भारतवर्षे न ज्ञायन्ते स्म' इति।

तत्रेदं प्रष्टव्यमस्ति–तेषां द्रव्याणां देशादिनाम्नां च मौर्यचन्द्रगुप्तकालेषु भारतीयाविज्ञात्वं केन प्रमाणेनावगतमिति। न तावत् प्रत्यक्षेण प्रत्यक्षकल्पेनाप्तवाक्येन वा पूर्वाचार्योक्तिलक्षणेन प्रमाणेन, तयोरुभयोरभावात्। किन्तु उत्प्रेक्षकबुद्धिवैचित्र्यजन्मना केवलेन ऊहेन। ऊहश्च प्रबलप्रमाणविरोध्येवोपादेयो भवति, न तु तद्विरोधी। उपादेयता च सा नैकान्तिकी तदुपमर्दकोहान्तरोपनिपातावधिजीवितत्वत् तस्य। प्रकृतस्य चार्थशास्त्रस्य चन्द्रगुप्तराज्यप्रतिष्ठापकविष्णुगुप्तचाणक्यापरनामधेयकौटल्यप्रणीतत्वं ग्रन्थादिमध्यान्तेषु स्पष्टमभिहितम्। कामन्दकेन च परस्सहस्रवर्षप्राचीनतयास्मदाद्यपेक्षयार्थशास्त्रकालप्रत्यासन्नतरेणार्थशास्त्र–विषयकयावद्विशेषज्ञानयोगिना तद् वितत्योपश्लोकितं नीतिसारे। इत्थं च ग्रन्थशरीरे कर्तृनामधेयोपनिबन्ध इति, तस्यैव नामधेयस्य ग्रन्थान्तरेषूपश्लोकनमिति च प्रमाणद्वयमबाधितं प्रत्यक्षमुपलब्ध्ं जागर्ति। तदेतन्नित्यशङ्क्यमानबाधेनास्मदाद्यूहेन यथोक्तेन बाध्यतामिति वादः अप्रतिहतप्रकाशप्रसरं सौर्यं तेजस्तिमिरेण बाध्यतामिति वादस्य समान इति मे मतिः; उपदर्शितप्रमाणद्वयमहिम्ना यथोपन्यस्त ऊहः प्रत्याख्येय इति। च। तस्माद्,

यन्मौर्यमन्त्रिशास्त्रेऽस्मिन् द्रव्यं देशादिनाम वा।
तज्ज्ञातं मौर्यकालेऽपि भारतीयैरिति स्थितिः।।

किञ्च,

अर्थः प्रामाणिकाचार्यग्रन्थेषु स्पष्टमीरितः।
मेगास्तनीशमौनेन बाध्यतामिति वादवत्।।
ऊहेन बाध्यतां सोऽर्थ इति वादेऽप्यसुन्दरे।
अबाधितास्य शास्त्रस्य मौर्यमन्त्रिप्रणीतता।।

अनन्तशयनम् त० गणपतिशास्त्री

१६–२–१९२५